वैष्णवकुलचूड़ामणि-प्रभुपाद-श्रीमत्कृष्णदास-कविराज-गोस्वामि-
प्रणीत-वङ्गवाङ्मय-पद्यात्मक-

श्रीचैतन्यचरितामृतग्रन्थस्य संस्कृतपद्यानुवादः

(*मध्यलीला*)

भारतवर्षीय-पश्चिमवङ्गप्रदेशस्थ-
वर्द्धमानमण्डलान्तर्गत-कालनानगरावस्थितानन्दाश्रमाश्रित-
श्रीमत्स्वामि-भास्करानन्द-सरस्वती-विरचितः

१८८२ शकाब्दीय-
श्रीश्रीरासपूर्णिमायाम्
प्रकाशितः ।

(प्रथमसंस्करणम्)

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

प्रकाशकः—श्रीक्षेत्रनाथडाङ्गाली-घोषः
७वि गोराचाँद वसु रोड्
कलिकाता-६

सर्व्वं स्वत्वं प्रकाशकेन संरक्षितम्।

मूल्यं रूप्यकदशकमात्रम्।

मुद्राकरः—श्रीरामगोपालवन्द्योपाध्या
सार्भिस् प्रिण्टार्स्
४१, वृन्दावनवसाक ष्ट्रीट
कलिकाता-५

श्रीश्रीगुरुदेवो जयतितराम्

निवेदनम्

वैष्णवाचार्य्य-श्रील-कृष्णदासकविराजगोस्वामि-विरचित-प्रख्यात-श्रीचैतन्य-चरितामृत-ग्रन्थराजस्य मदीयपरमाराध्यगुरुदेव-श्रीमत्स्वामिभास्करानन्द-सरस्वतीपादेन संस्कृतपद्यैरनूदितं मध्यलीलाखण्डं श्रीमन्महाप्रभुकृपया मुद्रितं प्रकाश्यते।

श्रीचैतन्यविचित्रलीलापुष्ट–गौड़ीयवैष्णवदर्शनस्य प्रामाणिकग्रन्थेऽस्मिन्ना बाल्याज्जातानुरागेण प्रौढ़े वयसि प्रव्रज्यां चरता स्वामिपादेन—"आत्मीयैस्तन्माधुर्य्यं लम्भयितुं" तस्य देवभाषया कृतानुवादस्य व्यतीतानि बहूनि वर्षाणि। तस्यादिलीलाखण्डं संस्कृतसाहित्यपरिषत्–पत्रिकायां धारावाहिकं मुद्रितम्। तस्मात् पुनर्मुद्रितं पुस्तकाकारेण प्रकाशितञ्च वर्षचतुष्टयात् प्राक्। प्रकाशितखण्डस्य साहित्यसम्पदाकृष्टदृष्टिसूरीणां विमर्शचोदिताः स्वामिपादस्य कतिपयभक्तशिष्या ग्रन्थेनानेनावङ्गीयानां श्रीचैतन्यचरितामृतरसास्वादने तथा विपश्चिताञ्च गौड़ीयवैष्णवदर्शनानुशीलने प्रभूतानुकूल्यं भवेत्, संस्कृतभारती च समृद्धा स्यादिति संचिन्त्य स्वामिपादमनुमान्य समग्रग्रन्थस्य प्रकाशने मतिं वदधुः। अग्रतः संस्कृतभाषाप्रचारविषये दर्शितोत्साहस्य राष्ट्रस्य साहाय्य-लिप्सया तत्र एकाधिकवारंकृतावेदनस्य वर्षद्वयोर्द्ध्वं गतं परन्तु राष्ट्रिय-यन्त्रस्य दीर्घसूत्रतातिमिरावरणं भित्त्वानुकूलादेशरश्मिनिर्गमणकालोऽद्याप्यज्ञेयः। अन्यतो भग्नस्वास्थ्यस्य स्वामिपादस्य जीवितकाल एवास्य महाग्रन्थस्य मुद्रणं सुकरं भवेद् वाञ्छनीयञ्चेत्यवधार्य्यार्थसंग्रहणेन प्रथममप्रकाशितपूर्व्वयोर्मध्यान्त्यलीला-खण्डयोः स्वल्पसंख्यकानुलिपिमुद्रणेनास्यामूल्यरत्नस्य संरक्षणमेव संकल्पितं गतवर्षस्य मार्गशीर्षे मासि। अचिरेण मुद्रणकार्य्यमारब्धम्। किन्तु हा दैवम्! यदाशङ्कितं तदापतितम्। कतिपयपत्राणां मुद्रणानन्तरमेकदा वह्नौ मध्यलीलायास्तृतीयपरिच्छेदस्य मुद्रणसंशोधनरतः स्वामिपादोऽस्माद्धृद्रोगेण पुनराक्रान्तो दण्डद्वयेनैव नश्वरदेहपिञ्जरं परित्यज्य सर्व्वाञ्छोकार्णवे निमज्जयन् ब्रह्मनिर्व्वाणं लेभे। (१८८१ शकाब्दे माघीय-कृष्ण-

सप्तम्याम् १-१० मि होरायाम्)। अशनिपातेनेवासह्यशोकावेगेन सर्व्वे नैराश्य-मुग्धा बभूवुः। आरब्धकर्म्मणस्तु समाधानविषये न कस्यापि किमपि द्वैध-मासीत्। अर्थसाहाय्यञ्च यथाशक्ति सर्व्वैः प्रतिश्रुतम्। मुद्रणव्यापारादिसाधन-कर्म्मास्याधमस्योपरि न्यस्तम्। किन्तु तत्र नासीत् कोऽप्यधिकारोऽज्ञान-तिमिरान्धस्य मे, न केवलं देवभाषायामज्ञतया परन्तु प्राकृत-तिमिररोगेणा-प्यन्धकल्पस्य। तथापि श्रीगुरुचरणमनुस्मृत्य तत्करुणाशंसिना मया एतद् गुरुकर्म्म शिरसि गृहीतम्। यथासामर्थ्यं यत्ने कृतेऽपि व्युत्पत्त्यभावाद-कुशलिन स्तथा श्रीगुरुदेवोपदेशेन तत्कृपया च कृतास्त्रोपचारलब्धक्षीणदृष्टे र्मम मुद्रणसंशोधनेऽवश्यम्भाविनो बहुला भ्रमप्रमादाः सुधीभिः क्षन्तव्याः। शुद्धिपत्रमेकञ्च सन्निविष्टं तदपि नूनमसम्पूर्णम्। ग्रन्थ उद्धृतीनामाकराश्च परीक्षितुं न शक्ताः। तद्दोषोऽपि मार्ज्जनीयः।

अन्त्यलीलाखण्डमुद्रणञ्चाग्रे सुष्ठु सरति। त्रिचतुरैर्मासैस्तदपि समाप्ति-मेष्यतीत्याशास्यते। ततो यथेप्सितं गुरुदेवेन तथा समग्रो ग्रन्थः शाश्वतं विश्वज्ञानभाण्डागारं प्रापयिष्यते, पृथिव्यां विभिन्नदेशस्थेषु प्रसिद्धग्रन्थागारेषु विश्वविद्यालयेषु देवभाषानुशीलनकेन्द्रेषु च संस्थापनेन।

कर्म्मणोऽस्य प्रधानप्रयोजकाः श्रीगुरुदेवस्यानुरागिणो बान्धवाः—श्रीकाली किङ्करसेनगुप्त-श्रीशैलविहारिलालसिंह—श्रीविमानविहारिलालसिंह—श्रीरतनमणि चट्टोपाध्याय-श्रीसुरेन्द्रनाथमल्लिक-महोदयाः सूत्रधारा एव मुख्यपुरोधसश्च यज्ञ यजमाना श्रीस्वामिपादस्यासंख्य-भक्तशिष्या येषां सार्थकगुरुपूजनस्य फलम् स्वप्रकाशं न तद्वाच्यम्। सर्व्वोपर्य्यस्माकमुपदेष्टानुमन्ता च श्रीगुरुदेवस्याभिन्न हृदय-सतीर्थ-सुहृत् पूज्यपादो महामहोपाध्यायः श्रीयुक्तकालीपदतर्काचार्य्य महोदयो यस्यानृण्यं न कदापि गच्छेम। सार्भिस् प्रिण्टास् मुद्रायन्त्राध्यक्ष श्रीकृष्णगोपालवन्द्योपाध्यायस्य सर्व्वविधा सहयोगिता सविशेषमुल्लेखनीया अलमतिपल्लवितेन।

श्रीश्रीरासपूर्णिमा
१८८२ शकाब्दाः

श्रीगुरुदेवचरणैकशरणसेवकाधमस्य
दीनप्रकाशकस्य।

भास्करप्रकाशः

श्रीकृष्णदासकविराज-यशःपताका
चैतन्यदेवचरितामृतकाव्यरत्नम् ।
एकत्र यत्र खलु दर्शन-धर्म्मशास्त्र-
साहित्यतत्त्वनिवहाः सममुल्लसन्ति ॥१

नो वङ्गवाङ्मयनिबद्धतया तदर्थाः
सर्व्वप्रदेशजनगोचरतां श्रयन्ते ।
तस्मात्तदाश्रितहितादपरे प्रदेशा
हा विच्युता इति सतां चिरमास्त दुःखम् ॥२

तस्यापनोदनकृते मम मित्रराजः
श्रीभास्करो विबुधवाङ्मयपूर्णमूर्त्तिः ।
चैतन्यदेवचरितामृतमार्य्यवाचा
रूपान्तरं सुगमया गमयाञ्चकार ॥३

प्रान्तप्रभेदेन विभिन्नरूपा
विभाति भाषा किल भारतेऽपि ।
सर्व्वत्र देशे सदृशप्रचारा
गीर्वाणवाणीति परो बिशेषः ॥४

वहिस्तथा भारतवर्षतोऽपि
गीर्वाणवाणीं वहवो विदन्ति ।
तैर्द्वारभूतैः किल तत्र तत्र
भवेत् प्रचारोऽस्य हितोचितस्य ॥५

करानुषङ्गादिह भास्करस्य
तमोविनाशादखिलं चकाशे ।
रूपं यथार्थं विशदावभासं
सर्व्वत्र गीर्वाणगिरः प्रकर्षात् ॥६

ये स्वल्पमात्रं विदुरार्य्यभाषां
तेषां प्रतीतेरपि गोचरः स्यात् ।
यथानुवादश्चरितामृतस्य
तथास्य यत्नः सफलश्च सम्यक् ॥७

आदौ प्रकाशं गमितादिलीला
यथाक्रमं संस्कृतपत्रिकायाम् ।
ततः पृथक्त्वेन च मुद्रितैषा
श्रीभास्करे जीवति सप्रचारा ॥८

अंशेन केनचन यावदगात् प्रकाशं
श्रीभास्करस्य चरितामृतमध्यलीला ।
तावद् विरूपमनसा सहसा विधात्रा
नीतः स हन्त परलोकभुवं ह्यकाले ॥९

व्याधूय बन्धुजनताप्रणयं गभीरं
हित्वा दृढ़ामपि चिरन्तनशिष्यभक्तिम् ।
वागदेवतां शुचि निमज्ज्य तथैव साधून्
अन्त्यं हि निश्वसितमेष जहौ महात्मा ॥१०

चैतन्यदेवचरितस्य च सोऽनुवादो
निष्ठां न यावदगमद् बुधभास्करस्य ।
नैवोदकर्षि स दिवं प्रति यद्धि धात्रा
तत्रास्य भूतलहिताय कृपैव हेतुः ॥११

भूतेषु भास्करवपुः किल भौतिकत्वा-
दभ्याजगाम बिलयं यदपि प्रकृत्या ।
नात्मा तथापि निरुपाधिरभूत्तदीयः
कीर्त्तिप्रतानवपुषेति पुनस्तदाशा ॥१२

चैतन्यदेवचरितामृतकानुवादः
श्रीभास्करेण विहितस्त्रिदिवेशवाचा ।
आचन्द्रभास्करनभःस्थितिकालमेव
सन्धारयिष्यति यशो भुवने तदीयम् ॥१३

जयति विबुधवाणीशिक्षणं भास्करस्य
जयति विरलरूपा काव्यशक्तिस्तदीया ।
जयति गुरुविधानापेक्षितं तस्य धैर्य्यम्
जयति सुकृतिभोग्यं तत्फलं ग्रन्थराजः ॥१४

एकस्तीर्थं विधत्ते हितमथ दधते प्राणिसङ्घा ह्यनेके
तज्जातः पुण्यराशिर्विशति हितकृते तस्य कर्त्तारमेव ।
एष ग्रन्थो विशालः सपदि विरचितो भास्करेणैककेन
क्षेमं सर्व्वस्य कर्त्ता सुकृतमपि भवेत्तद्भवं तस्य भूत्यै ॥१५

यत्र यत्र सुरवाङ्मयचर्चा
तत्र तत्र विहरन्ननुवादः ।
भास्करेण विहितोऽमरवाचा
शान्तिमस्य तनुतां परलोके ॥१६

तदीयमित्रम्मन्य-
श्रीकालीपदतर्काचार्य्यस्य ।

सूचीपत्रम्

परिच्छेदः	विषयः	पत्रपृष्ठसंख्या
प्रथमः	मध्यलीलासूत्रवर्णनम्	१-२४
द्वितीयः	अन्त्यलीलासूत्रकथने प्रेमोन्मादप्रलापः	२४-३७
तृतीयः	सन्न्यासकरणाद्वैतगृहविलासः	३७-५४
चतुर्थः	श्रीमाधवेन्द्रपुरीचरितामृतास्वादनम्	५५-७१
पञ्चमः	साक्षिगोपालचरितवर्णनम्	७१-८४
षष्ठः	श्रीसार्व्वभौमोद्धारः	८४-१०८
सप्तमः	श्रीवासुदेवोद्धारः	१०८-१२०
अष्टमः	श्रीरामानन्दरायसङ्गोत्सवः	१२१-१५०
नवमः	दक्षिणदेशतीर्थभ्रमणम्	१५१-१८१
दशमः	वैष्णवमिलनम्	१८१-१९६
एकादशः	वेष्टनकीर्त्तनविलासवर्णनम्	१९७-२१६
द्वादशः	गुण्डिचागृहमार्ज्जनम्	२१७-२३३
त्रयोदशः	रथाग्रे नर्त्तनम्	२३४-२५२
चतुर्द्दशः	होरापञ्चमीयात्रादर्शनम्	२५२-२७३
पञ्चदशः	सार्व्वभौमगृहे भोजनविलासः	२७४-२९८
षोड़शः	पुनर्गौड़गमनविलासः	२९८-३२०
सप्तदशः	बृन्दावनदर्शनम्	३२१-३४०
अष्टादशः	बृन्दावनदर्शनविलासः	३४०-३५९
ऊनविंशः	श्रीरूपानुग्रहः	३५९-३८१
विंशः	श्रीभगवत्स्वरूपभेदविचारः	३८२-४१७
एकविंशः	श्रीकृष्णैश्वर्य्यमाधुर्य्यवर्णनम्	४१८-४३३
द्वाविंशः	अभिधेयभक्तितत्त्वविचारः	४३४-४५१
त्रयोविंशः	प्रेमप्रयोजनविचारः	४५१-४६३
चतुर्विंशः	श्लोकव्याख्यायां सनातनानुग्रहः	४६३-४९८
पञ्चविंशः	काशीवासिवैष्णवीकरणपुनर्नीलाचलगमनम्	४९८-५२४

—o—

श्रीलकृष्णदासकविराजगोस्वामिप्रणीत-

श्रीचैतन्यचरितामृतस्य संस्कृतपद्यानुवादः

श्रीचैतन्यचरितामृते मध्यलीलायां

प्रथमः परिच्छेदः

"यस्य प्रसादादज्ञोऽपि सद्यः सर्वज्ञतां व्रजेत् ।
स श्रीचैतन्यदेवो मे भगवान् सम्प्रसीदतु ॥१॥

वन्दे श्रीकृष्णचैतन्य-नित्यानन्दौ सहोदितौ ।
गौड़ोदये पुष्पवन्तौ चित्रौ शन्दौ तमोनुदौ ॥२॥

जयतां सुरतौ पङ्गोर्मम मन्दमतेर्गती ।
मत्सर्वस्व-पदाम्भोजौ राधा-मदनमोहनौ ॥३॥

दीव्यद्वृन्दारण्य-कल्पद्रुमाधः
श्रीमद्रत्नागार-सिंहासनस्थौ ।
श्रीमद्राधा-श्रीलगोविन्ददेवौ
प्रेष्ठालीभिः सेव्यमानौ स्मरामि ॥४॥

श्रीमान्रासरसारम्भी वंशीवटतटस्थितः ।
कर्षन् वेणुस्वनैर्गोपीर्गोपीनाथः श्रियेऽस्तु नः ॥५॥

जयताज्जयताद् गौरचन्द्रः कारुण्यसागरः ।
जेजीयतां शचीसूनुर्जयताद्दीनवत्सलः ॥१॥

नित्यानन्दः प्रभुर्जीयाज्जीयादद्वैतचन्द्रमाः ।
श्रीवासाद्याश्च सर्वे श्रीगौरभक्ता जयन्त्विह ॥२॥

सूत्रमेवादिलीलायास्तस्याः प्रोक्तं मया पुरः ।
श्रीवृन्दावनदासेन कथिता या सविस्तरम् ॥३॥

अतएव मयासूत्रमात्रमुल्लिखितं पुनः ।
यः कश्चन विशेषोऽत्र कथितः सूत्र एव सः ॥४॥

वक्ष्यन्ते शेषलीलाया मुख्यसूत्राणि साम्प्रतम् ।
प्रभोरशेषलीलानां सम्यग्व्याख्या न सम्भवेत् ॥५॥
तासु लीलासु येऽप्यंशा ग्रन्थे चैतन्यमङ्गले ।
श्रीवृन्दावनदासेन वर्णिताः सन्ति विस्तृतम् ॥६॥
संक्षिप्तान्येव सूत्राणि तेषामत्र लिखाम्यहम् ।
तत्र यो यो विशेषोऽस्ति मया सोऽत्र वितन्यते ॥७॥
व्यासश्चैतन्यलीलायां दासो वृन्दावनः खलु ।
तस्याज्ञया तदुच्छिष्टमिदानीं चर्व्यते मया ॥८॥
भक्त्या तच्चरणाम्भोजं शिरसा धारयन्नहम् ।
सूत्राणि शेषलीलाया वर्णयिष्यामि कानिचित् ॥९॥
चतुर्विंशतिमब्दान् यां लीलां गेहमधिष्ठितः ।
प्रभुर्विहितवान्नाम्ना सादिलीलेति कथ्यते ॥१०॥
तच्चतुर्विंशवर्षान्ते माघमासे समागते ।
शुक्लपक्षे च सन्न्यासं कृतवान् श्रीमहाप्रभुः ॥११॥
एवं गृहीतसन्न्यासश्चतुर्विंशतिमब्दकान् ।
प्रभुश्चकार यां लीलां शेषलीलेति नाम सा ॥१२॥
द्वे नाम्नी शेषलीलाया मध्या चान्त्या च भेदतः ।
नामभेदं ब्रुवन्त्येवं लीलाभेदेन वैष्णवाः ॥१३॥
गौड़े नीलाचले सेतुबन्धे वृन्दाबने तथा ।
तेषु षड् वत्सरानास्तां गमनागमने प्रभोः ॥१४॥
तत्र तत्र च या लीला मध्यलीलेति सोच्यते ।
या लीला च ततः पश्चात् सान्त्यलीलाभिधीयते ॥१५॥
आदिर्मध्या तथा चान्त्या तिस्रो लीला महाप्रभोः ।
इदानीं मध्यलीलाया विस्तृतिः क्रियते मया ॥१६॥
शिष्टानष्टादशाब्दांश्च तिष्ठन्नीलाचले प्रभुः ।
स्वभक्तिं स्वयमाचर्य्य सर्वान् जीवानशिक्षयत् ॥१७॥

तेषु षड्वत्सरान् भक्तैर्नृत्यगीतादिलीलया ।
नित्यं प्रवर्त्तयामास प्रेमभक्तिं महाप्रभुः ॥१८॥
नित्यानन्दप्रभुस्तेन गौड़देशे प्रचोदितः ।
गौड़ानाप्लावयामास स प्रेमरसवन्यया ॥१६॥
कृष्णप्रेममदोन्मत्तो नित्यानन्दः स्वभावतः ।
प्रेमाणं यत्र तत्रासौ प्रददावाज्ञया प्रभोः ॥२०॥
तस्य श्रीचरणाम्भोजे कोटिः प्रणतयो मम ।
यश्चैतन्यपदे भक्तिं विश्वैरग्राहयज्जनैः ॥२१॥
यं श्रीचैतन्यगोस्वामी प्रोचे ज्येष्ठसहोदरम् ।
प्रभुर्मे कृष्णचैतन्य इति सोऽपि सदावदत् ॥२२॥
यद्यप्येषोऽभवच्छ्रीमान् बलरामः प्रभुः स्वयम् ।
चैतन्यदासमात्मानमभिमेने तथाप्यसौ ॥२३॥
सदा सेवस्व चैतन्यं तन्नाम ब्रूहि गाय च ।
भजते यो हि चैतन्यं स एव मम जीवनम् ॥२४॥
इत्थं चैतन्यभक्तिं स ग्राहयामास मानवैः ।
सर्वांश्चोद्धारयामास दीनान् हीनांश्च निन्दकान् ॥२५॥
सनातनश्च रूपश्च प्रभुणा प्रहितौ व्रजम् ।
तौ वृन्दावनमायातौ भ्रातरौ द्वौ तदाज्ञया ॥२६॥
प्रकाशितानि तीर्थानि भक्तिस्ताभ्यां प्रचारिता ।
सेव्यौ मदनगोपालगोविन्दौ च प्रतिष्ठितौ ॥२७॥
नानाशास्त्राणि संगृह्य भक्तिग्रन्थनिधिः कृतः ।
मूढ़पामरलोकानां निस्तारो विहितस्ततः ॥२८॥
विचारः सर्वशास्त्राणां कृतस्ताभ्यां तदाज्ञया ।
गूढ़ो रसो व्रजस्यैवं समन्ताच्च प्रचारितः ॥२६॥
हरिभक्तिविलासश्च वृहद्भागवतामृतम् ।
चरितं दशमस्थञ्च दशमस्कन्धटिप्पनीम् ॥३०॥

श्रीसनातनगोस्वामी ग्रन्थानेतान् विनिर्ममे ।
चक्रे यान् रूपगोस्वामी कस्तान् गणयितुं क्षमः ॥३१॥
प्राधान्येन तु केषाञ्चिन्नाम निर्दिश्यते मया ।
तेन व्रजविलासर्द्धिः श्लोकलक्षेण वर्णिता ॥३२॥
स रसामृतसिन्धुञ्च चक्रे विदग्धमाधवम् ।
तथोज्ज्वलनीलमणिं श्रीमल्ललितमाधवम् ॥३३॥
स्तवस्तवकराजिञ्च श्रीदानकेलिकौमुदीम् ।
लीलाच्छन्दांसि तान्यष्टादश नाना पदावलीम् ॥३४॥
तत्तल्लक्षणयुक्ताञ्च गोविन्द-विरुदावलीम् ।
श्रीमन्माथुरमाहात्म्यं लघुभागवतामृतम् ॥३५॥
नाटकलक्षणादीनि कः संख्यातुमिहार्हति ।
व्रजलीलाविलासानामस्ति सर्वत्र वर्णना ॥३६॥
श्रीजीवो नाम गोस्वामी तस्य भ्रातृसुतोऽभवत् ।
अनन्ता रचिता भक्तिग्रन्थास्तेन महात्मना ॥३७॥
श्रीभागवतसन्दर्भो नाम ग्रन्थोऽतिविस्तृतः ।
भक्तिसिद्धान्तसारो हि तत्र तेन प्रदर्शितः ॥३८॥
नाम्ना गोपालचम्पूश्च कृतो ग्रन्थो महाबलः ।
यत्र व्रजरसैः पूर्णा नित्यलीला प्रकाशिता ॥३९॥
एवं बहुविधान् भक्तिग्रन्थान् सम्यक् प्रकाशयन् ।
अध्यवात्सीत् सगोष्ठीकः श्रीवृन्दावनधाम सः ॥४०॥
अथाद्वैतादयो भक्ताः प्रथमे वत्सरे प्रभुम् ।
साक्षान्निरीक्षितुं नीलाचलं सर्वे प्रतस्थिरे ॥४१
रथयात्रां समालोक्य तत्र ते प्रभुणा समम् ।
अतिष्ठंश्चतुरो मासान्नन्दन्तो नृत्यगीतिभिः ॥४२॥
प्रतिप्रस्थानकाले तान् प्रभुः सर्वानुपादिशत् ।
भवन्तो द्रष्टुमायान्तु प्रत्यब्दं गुण्डिचामिति ॥४३॥

भक्तास्ते प्रभुणादिष्टा आगत्य प्रतिवत्सरम् ।
प्रययुर्गुण्डिचां दृष्ट्वा तत्सङ्गसुखनन्दिताः ॥४४॥
एवं द्वादशवर्षाणि चक्रुः सर्वे गतागतम् ।
द्वयेषां प्रभुभक्तानां नान्योन्येन विना स्थितिः ॥४५॥
अवशिष्टानि वर्षाणि द्वादश श्रीमहाप्रभोः ।
अन्तरे कृष्णविच्छेदलीलास्फूर्त्तिर्महत्यभूत् ॥४६॥
विषण्णो विरहोन्मादवशाद्रात्रिन्दिवं प्रभुः ।
जगौ ननर्त्त चक्रन्द जहास च निरन्तरम् ॥४७॥
यस्मिन् काले जगन्नाथं पश्यन्नासीत् प्रभुस्तदा ।
मिलितोऽस्मि कुरुक्षेत्रे कृष्णेनेति व्यचिन्तयत् ॥४८॥
पुरतो रथयात्राया नृत्यं कुर्वन् महाप्रभुः ।
तत्र गीतपदं त्वेतद् गीतवान् केवलं मुहुः ॥४९॥

"तथाहि पदम्"

तं पुनराप्तवती हृदयेशम् ।
यस्य कृतेऽस्मि गता मदनानलदाहमशेषम् ॥५०॥
इति ध्रुवपदं गायन्ननर्त्त प्रहरद्वयम् ।
व्रजं नेष्याम्यहं कृष्णमित्यन्तर्भावमाविशन् ॥५१॥
इत्थं भावसमाविष्टो नृत्यन् श्लोकं पपाठ सः ।
तस्य श्लोकस्य कोऽप्यर्थं बोद्धुं नैवाशकत् पुनः ॥५२॥

"तथाहि काव्यप्रकाशे १।४ साहित्यदर्पणे१।१०,पद्यावल्याम्३८६

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥६॥"

एकेनैव स्वरूपेण श्लोकार्थो विदितः खलु ।
श्रीरूपो दैवयोगेन तस्मिन् वर्षे समागतः ॥५३॥
तदा श्रीरूपगोस्वामी श्लोकं श्रुत्वा प्रभोर्मुखात् ।
तस्य श्लोकस्य भावार्थश्लोकं तत्रैव निर्ममे ॥५४॥
श्लोकं विरचयन्नेकं तालीपत्रे विलिख्य सः ।
निवेश्य निदधे तच्च स्वगेहपटलान्तरे ॥५५॥
श्रीरूपे श्लोकमाधाय स्नातुं याते च सागरम् ।
प्रभुस्तन्मिलनाकाङ्क्षी तन्निवास उपस्थितः ॥५६॥
सनातनश्च रूपश्च हरिदासश्च ठक्कुरः ।
त्रय एते न यान्ति स्म श्रीजगन्नाथमन्दिरम् ॥५७॥
विलोक्योपान्नभोगं श्रीजगन्नाथस्य स प्रभुः ।
त्रिभिरेतैश्च सङ्गत्य निजवासं गतोऽभवत् ॥५८॥
त्रिष्वेतेषु यदा तत्र यतमोऽभूदुपस्थितः ।
सङ्गतोऽभूत् प्रभुस्तेन सहेति नियमः प्रभोः ॥५९॥
प्रभुर्दैवात्तदा गच्छन्नूर्द्ध्वं यावन्निरैक्षत ।
छदिरारोपिते तालीपत्रे श्लोकं तमाप्तवान् ॥६०॥
पठित्वा श्लोकमासीनं भावाविष्टं महाप्रभुम् ।
सम्प्राप्तो रूपगोस्वामी दण्डवन्न्यपतद् भुवि ॥६१॥
उत्थायैव चपेटेन तमाहत्य महाप्रभुः ।
किञ्चिद्वदितुमारेभे क्रोड़े कृत्वा च तं पुनः ॥६२॥
श्लोकेऽस्मिन्मदभिप्रायं नैव जानाति कश्चन ।
मम मानसिकीं वाणीं कथं त्वमवगच्छसि ॥६३॥
इत्येवं कथयंस्तस्मिन् कृत्वा बहुमनुग्रहम् ।
प्रभुः श्लोकं तमानीय श्रीस्वरूपमदर्शयत् ॥६४॥
अथ विस्मयमाविष्टः स्वरूपं पृष्टवान् प्रभुः ।
रूपः कथं विजानाति मानसीं मे कथामिति ॥६५॥

स्वरूपः प्रत्युवाचाथ यथासौ वेत्ति ते मनः ।
मन्ये तथा भवेत् सोऽयं तव कारुण्यभाजनम् ॥६६॥
प्रभुरूचेऽथ सन्तुष्टहृदयः सन्नहं पुनः ।
सञ्चार्य निखिलाः शक्तीः समालिङ्गितवानमुम् ॥६७॥
निगूढ़रसतात्पर्यबोधेऽसावाधिकारिकः ।
अतो गूढ़रसव्याख्यां त्वममुष्मै वदिष्यसि ॥६८॥
इत्यादिकानि वृत्तानि पुरा विव्रियते मया ।
किञ्चिदुक्तं समासेन प्रसङ्गं प्राप्य साम्प्रतम् ॥६९॥

"तथाहि पद्यावल्यां श्रीरूपगोस्वामिचरणरचितः
श्लोकः (३८७)

प्रियः सोऽयं कृष्णः सहचरि कुरुक्षेत्रमिलित-
स्तथाहं सा राधा तदिदमुभयोः सङ्गमसुखम् ।
तथाप्यन्तः-खेलन्मधुरमुरलीपञ्चमजुषे
मनो मे कालिन्दीपुलिनविपिनाय स्पृहयति ॥७॥"
अस्य श्लोकस्य संक्षिप्तमर्थं शृण्वन्तु वैष्णवाः ।
अवलोक्य जगन्नाथं यथाभावोऽभवत् प्रभोः ॥७०॥
यद्यपि श्रीमती राधा लेभे कृष्णस्य दर्शनम् ।
कुरुक्षेत्रे तथाप्यस्या इत्थम्भावोऽभवद्धृदि ॥७१॥
राजवेशोऽयमेतच्च हस्त्यश्वनरसङ्कटम् ।
क्वासौ स गोपवेशोऽस्य क्व तद्वृन्दावनं रहः ॥७२॥
भावं तमेव तं कृष्णं तच्च वृन्दावनं पुनः ।
यदि प्राप्नोमि वाञ्छा मे तदा गच्छति पूर्णताम् ॥७३॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्याये
पञ्चत्रिंशश्लोकः—

आहुश्च ते नलिननाभ पदारविन्दं
योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं
गेहं जुषामपि मनस्युदियात् सदा नः ॥८॥"

तवेदं चरणाम्भोजं मम व्रजपुरालये ।
उदितं यदि पश्यामि पूर्णकामा भवाम्यहम् ॥७४॥
गूढ़ं भागवतश्लोकभावार्थं स्फुटयन्निमम् ।
श्लोकं श्रीरूपगोस्वामी लोकबोधाय निर्ममे ॥७५॥

तथाहि ललितमाधवे दशमाङ्के षट्त्रिंशश्लोकः—

या ते लीलापदपरिमलोद्गारिवन्या-परीता
धन्या क्षौणी विलसति वृता माधुरी माधुरीभिः ।
तत्रास्माभिश्चटुलपशुपीभावमुग्धान्तराभिः
संवीतस्त्वं कलय वदनोल्लासि-वेणुर्विहारम् ॥६॥"

एवं यदा जगन्नाथमीक्षाञ्चक्रे महाप्रभुः ।
सुभद्रासहितं वंशीपरिहीणकराम्बुजम् ॥७६॥
व्रजेन्द्रनन्दनं श्यामं व्रजे त्रिभङ्गसुन्दरम् ।
क्व प्राप्स्यामीति वाञ्छास्य ववृधेऽनुक्षणं तदा ॥७७॥
श्रीराधाया यथोन्माद आसीदुद्धवदर्शनात् ।
तथोद्घूर्णा प्रलापाश्चाभवन् रात्रिन्दिवं प्रभोः ॥७८॥
अवशिष्टानि वर्षाणि द्वादशैवं निनाय सः ।
इत्थं त्रिधा विभक्ताञ्च शेषलीलां समाचरत् ॥७९॥
चतुर्विंशतिमब्दान् स प्रव्रजन् यान्यथाचरत् ।
अनन्तं कर्मणां तेषां मर्म को वेत्तुमर्हति ॥८०॥
तेषां कर्त्तुं समुद्देशं दिङ्मात्रं परिदर्शयन् ।
लीलानां मुख्यमुख्यानां सूत्राणि विदधाम्यहम् ॥८१॥

सूत्रं हि प्रथमं तावत् सन्न्यासग्रहणं प्रभोः ।
प्रेमावेशेन तस्याथ वृन्दावनगमोद्यमः ॥८२॥
परितो भ्रमणं तस्य राढ़देशे दिनत्रयम् ।
प्रेमावेशेन वैक्लव्यं वाह्यविस्मरणं ततः ॥८३॥
यमुनेति ब्रुवन् गङ्गां भ्रान्तिमुत्पादयन् प्रभोः ।
नित्यानन्दप्रभुर्गङ्गातीरमेवानयच्च तम् ॥८४॥
आचार्यस्य गृहे शान्तिपुरेऽथागमनं प्रभोः ।
तत्र च प्रथमा भिक्षा रात्रौ सङ्कीर्त्तनं ततः ॥८५॥
जनन्या निजभक्तैश्च तत्र सम्मेलनं तदा
समाप्य निखिलं कर्म नीलाद्रिगमनं ततः ८६॥
पथि नानाविधा लीला देवसन्दर्शनं तथा ।
माधवेन्द्रस्य गोपालस्थापनक्षीरचौर्य्ययोः ॥८७॥
वृत्तान्तश्रवणं साक्षिगोपालस्य तथाद्भुतम् ।
नित्यानन्देन दण्डस्य भञ्जनञ्च महाप्रभोः ॥८८॥
स ययौ क्रुद्ध एकाकी श्रीजगन्नाथमीक्षितुम् ।
पश्यन्नेव जगन्नाथं मूर्च्छितो न्यपतद्भुवि ॥८९॥
सार्वभौमस्तथा दृष्ट्वा स्वगेहमनयत् प्रभुम् ।
तृतीये प्रहरे तत्र लब्धसंज्ञोऽभवच्च सः ॥९०॥
मुकुन्दो जगदानन्दो नित्यानन्दश्च तत्परम् ।
दामोदरश्च तत्रेत्य मिलितास्तेन नन्दिताः ॥९१॥
सार्वभौमे प्रसादं स कृतवांश्च ततः प्रभुः ।
तस्मै सन्दर्शयामास निजमैश्वरविग्रहम् ॥९२॥
दाक्षिणात्यप्रदेशाय ततः प्रस्थितवान् प्रभुः ।
कूर्मक्षेत्रे चकारासौ वासुदेवविमोचनम् ॥९३॥
प्रभुर्नृसिंहमस्तौषीन्नृसिंह-जियड़े पुरे ।
प्रतिमार्गं प्रतिग्रामं चक्रे नामप्रवर्त्तनम् ॥९४॥

गोदावरीतटारण्ये तस्य वृन्दावनभ्रमः ।
श्रीरामानन्दरायेण तत्रैवाभूच्च मेलनम् ॥९५॥
त्रिमल्ल-त्रिपदीस्थानं प्रभुणा समदृश्यत ।
समन्ताद्विहितं तेन कृष्णनामप्रचारणम् ॥९६॥
कृत्वा पाषण्डिनां व्यूहदलनञ्च ततः प्रभुः ।
अहोवलनृसिंहादि-दर्शनं कृतवान् पथि ॥९७॥
श्रीरङ्गक्षेत्रमागत्य कावेरीतटसंस्थितम् ।
श्रीरङ्गदेवमालोक्य प्रेम्णासौ विह्वलोऽभवत् ॥९८॥
ततस्त्रिमल्लभट्टस्य समागत्य निकेतनम् ।
वर्षासु चतुरो मासांस्तत्रैव न्यवसत् प्रभुः ॥९९॥
त्रिमल्लभट्ट आसीच्च वैष्णवः पण्डिताग्रणीः ।
पाण्डित्येन तथा प्रेम्णा प्रभोः सोऽभूत् सुविस्मितः ॥१००॥
चातुर्मास्यं प्रभुस्तत्र श्रीवैष्णवजनैः सह ।
अनयन्नृत्यगीतेन कृष्णसंकीर्त्तनेन च ॥१०१॥
दाक्षिणात्ये पुनर्यात्रा चातुर्मास्यान्तरे प्रभोः ।
श्रीपुरीपरमानन्दस्तेन तत्रैव सङ्गतः ॥१०२॥
भट्टमारीपुरात् कृष्णदासश्च प्रभुणोद्धृतः ।
रामजापि-द्विजास्येन कृष्णनाम प्रचारितम् ॥१०३॥
स श्रीरङ्गपुरीसङ्गं तत्रैव कृतवान् प्रभुः ।
रामदासाख्यविप्रस्य चक्रे दुःखविमोचनम् ॥१०४॥
कृतस्तत्त्वविचारश्च प्रभुणा तत्त्ववादिभिः
बुद्धिहीनममन्यन्त स्वात्मानं सर्व एव ते ॥१०५॥
अनन्तं वासुदेवञ्च पद्मनाभं जनार्दनम् ।
पुरुषोत्तमदेवञ्च दृष्टवान् श्रीमहाप्रभुः ॥१०६॥
प्रभुर्विहितवांस्तत्र सप्ततालविमोचनम् ।
सेतुबन्धेऽथ सस्नौ च श्रीरामेश्वरमैक्षत ॥१०७॥

तत्रैव श्रुतवान् कूर्मपुराणं स महाप्रभुः ।
रावणेन हृता माया-सीतेति तत्र वर्णितम् ॥१०८॥
तदाकर्ण्य प्रभोश्चित्तमासीदानन्दविह्वलम् ।
श्रीरामदासविप्रोऽसौ तस्य स्मृतिपथं गतः ॥१०९॥
तत्पुरातनपत्रञ्च तदानीमाग्रहेण सः ।
दर्शयन् रामदासस्य मनोदुःखमखण्डयत् ॥११०॥
कर्णामृतं तथा ब्रह्मसंहितां नाम पुस्तके ।
द्वे प्राप्य चोत्तमे ज्ञात्वा गृहीत्वा चानिनाय ते ॥१११॥
पुनर्नीलाचलं गत्वा निजभक्तजनैः सह ।
मिलित्वा च जगन्नाथस्नानयात्रां ददर्श सः ॥११२॥
अलब्ध्वाऽनर्हकालेऽसौ जगन्नाथस्य दर्शनम् ।
आलालनाथमागच्छत्तद्वियोगेन दुःखितः ॥११३॥
दिवसान् कतिचित्तत्र तस्थौ भक्तजनैः समम् ।
गौड़भक्ताः समायाता इति वार्त्ताञ्च सोऽशृणोत् ॥११४॥
नित्यानन्दप्रभुस्तत्र गत्वा साग्रहमानसः ।
महाप्रभुं समादाय नीलाचलमथागमत् ॥११५॥
नक्तन्दिवं निनायासौ विरहार्त्तो यदा प्रभुः ।
तदा भक्तजनाः सर्वे गौड़ेभ्यस्तमुपाययुः ॥११६॥
मन्त्रयित्वा समं सर्वैः समारब्धे च कीर्त्तने ।
सङ्कीर्तनसमाविष्टः स्वस्थचित्तोऽभवत् प्रभुः ॥११७॥
रामानन्दं यदा पूर्वमुपतस्थे महाप्रभुः ।
तदा नीलाचले तस्यागमनाय तमादिशत् ॥११८॥
कालेन कियता राज्ञो लब्ध्वाज्ञां स उपागतः ।
कृष्णालापमहोरात्रं तेनैव कृतवान् प्रभुः ॥११९॥
अथ प्रद्युम्नमिश्राद्यैर्मिलनञ्च प्रभोः कृपा ।
काशीमिश्रे, पुरीस्वामिपरमानन्दसङ्गमः ॥१२०॥

गोविन्देन तथा काशीश्वरेण मेलनं प्रभोः।
दामोदरस्वरूपेण शिखिमाहितिना तथा ॥१२१॥
श्रीभवानन्दसंज्ञश्च गौड़ेभ्यो वैष्णवागमः।
प्रथमं मेलनं तावत् कुलीनग्रामवासिभिः ॥१२२॥
श्रीनरहरिदासाद्या यावन्तः खण्डवासिनः।
ते सर्वे प्रभुमागच्छन् शिवानन्देन सङ्गताः ॥१२३॥
स्नानयात्रां निरैक्षन्त भक्तास्ते प्रभुणा सह।
सर्वानादाय तांश्चक्रे गुण्डिचामार्जनं प्रभुः ॥१२४॥
रथयात्रां ददर्शाथ सर्वैर्भक्तजनैः समम्।
नृत्यं कृत्वा रथस्याग्रे तैरुद्यानं जगाम च ॥१२५॥
कृपां प्रतापरुद्रे च तत्रैव कृतवान् प्रभुः।
प्रतियानदिने भक्तान् गौडीयानादिदेश च ॥१२६॥
'रथयात्रावलोकार्थमायात प्रतिवत्सरम्'।
इत्युक्त्वासौ छलेनैव भक्तसङ्गमयाचत ॥१२७॥
सार्वभौमगृहे भिक्षा परिपाटीयुता प्रभोः।
षाठ्या माताब्रवीद् यत्र षाठी मे विधवास्त्विति ॥१२८॥
वर्षान्तेऽद्वैतमुख्यानां भक्तानामागमः पुनः।
चक्रे यत्र शिवानन्दः सर्वेषां पर्यवेक्षणम् ॥१२९॥
भाग्यवान् कुक्कुरः कोऽपि शिवानन्देन चागतः।
प्रभोश्चरणमालोक्य सपद्यन्तर्दधौ हि सः ॥१३०॥
मार्गे बभूव सर्वेषां सार्वभौमेण मेलनम्।
सार्वभौमभट्टाचार्यः काशीक्षेत्रं जगाम च ॥१३१॥
वैष्णवाः सर्व आगत्य प्रभुणा सद सङ्गताः।
प्रभुः सर्वान् समादाय जलकेलिं चकार च ॥१३२॥
कृतवान् सह तैः सर्वैर्गुण्डिचागृहमार्जनम्।
रथयात्रामसौ पश्यन्ननर्त्त श्रीमहाप्रभुः ॥१३३॥

उद्याने कृतवांस्तत्र विलासान् विविधानथ।
कृष्णदासाह्वविप्रेण कृतं तस्याभिषेचनम ॥१३४॥
नृत्यान्ते गुण्डिचागेहे जलकेलिं चकार सः।
लक्ष्म्याः केलिमसौ होरापञ्चम्यां सन्ददर्श च ॥१३५॥
जग्राह गोपवेशञ्च कृष्णजन्मोत्सवे प्रभुः।
लगुड़ं घूर्णयामास दधिभारमुवाह च ॥१३६॥
गौड़ीयानां स भक्तानां यात्रानुज्ञां ददौ ततः।
चक्रे सहचरैर्भक्तैः सदा सङ्कीर्त्तनं प्रभुः ॥१३७॥
ततो वृन्दावनं गन्तुं गौड़यात्रां चकार सः।
पथि प्रतापरुद्रोऽसौ सिषेवे बहुधा प्रभुम् ॥१३८॥
वस्त्रदानप्रसङ्गश्च पुरीगोस्वामिना सह।
श्रीरामानन्दरायस्यानुयानं भद्रकावधि ॥१३९॥
विद्यावाचस्पतेर्गेहे तस्थावागत्य च प्रभुः।
तं द्रष्टुं जनसंघट्टो महांस्तत्र बभूव च ॥१४०॥
अविश्रान्ता जनाः पञ्च दिवसान् ददृशुः प्रभुम्।
आगच्छत् कुलियाग्रामं रात्रौ स लोकशङ्कया ॥१४१॥
आकर्ण्य कुलियाग्रामे प्रभोरागमनं जनाः।
कोटिशस्ते समाजग्मुर्वीक्षितुं श्रीमहाप्रभुम् ॥१४२॥
कृतवान् कुलियाग्रामे देवानन्दे कृपामसौ।
श्रीवासेन च गोपालं विप्रं दोषममार्जयत् ॥१४३॥
पाषण्डा निन्दकाश्चेत्य पतिताः पादयोः प्रभोः।
कृष्णप्रेम ददौ तेभ्योऽपराधं मार्जयन् प्रभुः ॥१४४॥
नृसिंहानन्द आकर्ण्य यान्तं वृन्दावनं प्रभुम्।
तत्पथं सज्जयामास मनसा हृष्टमानसः ॥१४५॥
रत्नैर्बबन्ध पन्थानं कुलियानगरात्ततः।
तस्मिंश्चास्तृतवान् शय्यां निर्वृन्तैः कुसुमैः कृताम् ॥१४६॥

सपुष्पकेसरश्रेणिं पन्थानमभितो न्यधात् ।
चक्रे पुष्करिणीर्दिव्याः पार्श्वयोश्चान्तरान्तरा ॥१४७॥
तेन रत्नमयं तीर्थं फुल्लाब्जान्यत्र चक्रिरे ।
सुधास्वादं जलं नानाखगाश्च कलकूजनाः ॥१४८॥
कल्पितः शीतलो वायुर्नानासौरभमावहन् ।
कानाएर्नाटशालान्तं कृतञ्च पथिबन्धनम् ॥१४६॥
तन्मनो नाग्रतोऽगच्छन्मार्गं बन्धुं न चाशकत् ।
मार्गं बन्धुमशक्तोऽसौ नृसिंहो विस्मितोऽभवत् ॥१५०॥
यूयं शृणुत हे भक्ता इत्यूचे कृतनिश्चयः ।
प्रभुर्वृन्दावनं नूनमिदानीं नैव यास्यति ॥१५१॥
कानाएर्नाटशालातो ध्रुवं प्रत्यागमिष्यति ।
ज्ञास्यथातः परं यूयमिति वच्मि सुनिश्चितम् ॥१५२॥
कुलियातः प्रतस्थेऽतः प्रभुर्वृन्दावनं प्रति ।
सर्वे भक्ताः समं तेन सहस्रञ्च जना ययुः ॥१५३॥
यत्रागच्छत् प्रभुस्तत्र मनुजाः कोटिसंख्यकाः ।
द्रष्टुमागत्य दृष्ट्वा च दुःखशोकान् जहुः किल ॥१५४॥
यत्र यत्र प्रभोः पादौ गच्छतः पतितौ भुवि ।
तन्मृदं जगृहुर्लोकाः पथि गर्त्तास्ततोऽभवन् ॥१५५॥
एवं गच्छन् प्रभूरामकेलिग्राममथागमत् ।
गौड़पुर्य्याः समीपेऽसौ ग्रामो निरुपमः क्षितौ ॥१५६॥
तत्र नृत्यं चकारासौ प्रभुः प्रेम्णा विचेतनः ।
आजग्मुः कोटिशो लोका द्रष्टुकामाः प्रभोः पदम् ॥१५७॥
गौड़ेशो यवनो राजा प्रभावमशृणोत् प्रभोः ।
ततो गदितुमारेभे किञ्चिदेवं सुविस्मितः ॥१५८॥
इयन्तोऽनुगता लोकाः किमप्यददतञ्च यम् ।
स एव खलु गोस्वामी मन्यतामिति निश्चितम् ॥१५६॥

न कश्चिद् यवनः काजी कुर्य्यादस्य विहिंसनम् ।
यत्रैवास्य मनो याति तत्रायं विचरत्विति ॥१६०॥
राज्ञाथ केशवछत्रः पृष्टो वार्त्तां महाप्रभोः ।
सोऽपाजानीत माहात्म्यं प्रभोर्गौड़पतेः पुरः ॥१६१॥
"अयं भिक्षुकसन्नयासी तीर्थपर्य्यटने रतः ।
जनास्त्रिचतुरा एव तमत्रायान्ति वीक्षितुम् ॥१६२॥
यवना भवतः कर्णे जपन्ति तद्विरुद्धताम् ।
न लाभस्तस्य हिंसायां भवति प्रत्युत क्षतिः ॥१६३॥"
इति प्रबोध्य राजानं केशवेन प्रभोः पुरः ।
प्रेरितो ब्राह्मणः कोऽपि तं प्रस्थापयितुं ततः ॥१६४॥
राज्ञा स्वमन्त्रणामात्यो विजने पृष्ट एकदा ।
व्याख्यातुं स समारेभे महिमानं महाप्रभोः ॥१६५॥
"यो राज्यं दत्तवांस्तुभ्यं यो वा भवति ते प्रभुः ।
जातोऽसौ तव भाग्येन तव देशं समागतः ॥१६६॥
तव वाञ्छति कल्याणं सिद्धवागेव पूरुषः ।
अस्याशीर्वचनेनैव सर्वतो विजयस्तव ॥१६७॥
कथं पृच्छसि मामेवं पृच्छ त्वं निजमानसम् ।
विष्णोरंशसमानोऽसि नराणामधिपोऽसि यत् ॥१६८॥
मन्यसे कृष्णचैतन्यं कीदृशं निजचेतसा ।
यथा गृह्णाति ते चेतः प्रमाणं तावदेव तत् ॥१६९॥
इत्याकर्ण्यावदद्राजा श्रूयतां मे मनोमतम् ।
अयमेवेश्वरः साक्षान्नास्ति कोऽप्यत्र संशयः ॥१७०॥
इत्युक्त्वान्तःपुरं राजा प्रविवेश निजं यदा ।
तदासौ मन्त्रणामात्यो निजालयमुपागतः ॥१७१॥
ततः स्वगृहमागत्य भ्रातरौ द्वौ विचिन्त्य तौ ।
सङ्गोप्य च निजं वेशं प्रभुं द्रष्टुमगच्छताम् ॥१७२॥

सोदरौ द्वौ निशीथे तौ प्रभोः स्थानमुपस्थितौ ।
प्राङ् नित्यानन्दमाश्रित्य हरिदासेन सङ्गतौ ॥१७३॥
तयोरागमनं ताभ्यां प्रभवेऽथ निवेदितम् ।
त्वां द्रष्टुमागतौ रूपसचिवप्रवराविति ॥१७४॥
तृणगुच्छद्वयं दन्तैर्गृह्णन्तौ भ्रातरावुभौ ।
संवेष्ट्य वाससा कण्ठं दण्डवत् पतितौ भुवि ॥१७५॥
दैन्येनारुदितामुच्चैस्तावानन्देन विह्वलौ ।
"युवामुत्तिष्ठतं स्वस्ति भूयादित्यवदत् प्रभुः ॥१७६॥
तृणानि दशनैर्धृत्वा तावुत्थाय च सोदरौ ।
प्रभुं तुष्टुवतुर्दैन्याक्रान्तचित्तौ कृताञ्जली ॥१७७॥
जय श्रीकृष्णचैतन्य जय कारुण्यसागर ।
जयोदारमहासत्त्व पतिताधमपावन ॥१७८॥
नीचजाती समं नीचैर्नीचकर्माणि कुर्वहे ।
आवां लज्जावहे वक्तुं भवतः पुरतः प्रभो ॥१७९॥

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे
साधनभक्तिलहर्य्याम्—(२।६५)

मत्तुल्यो नास्ति पापात्मा नापराधी च कश्चन ।
परिहारेऽपि लज्जा मे किं ब्रुवे पुरुषोत्तम ॥१०"॥
पतितोद्धारणाय त्वमवतीर्णोऽसि हे प्रभो ।
नान्यः कश्चिद्विनावाभ्यां पतितो वर्त्तते भुवि ॥१८०॥
समुद्धृतौ जगाइश्च माधाइश्च त्वया प्रभो ।
तयोरुद्धारणार्थं ते श्रमलेशोऽपि नाभवत् ॥१८१॥
तावास्तां ब्राह्मणौ जात्या नवद्वीपकृतालयौ ।
तौ न नीचानसेवेतां नापि नीचसमाश्रितौ ॥१८२॥

एक एव तयोर्दोषः पापकर्मानुशीलनम्
नामाभासेन ते नूनं दह्यन्ते पापराशयः ॥१८३॥
तव नाम गृहीत्वा तौ निन्दनं तव चक्रतुः ।
तदेव भवतो नाम विमुक्तेः कारणं तयोः ॥१८४॥
आवां जगाइ-माधाइ-युगलादपि निश्चितम् ।
कोटिकोटिगुणैः पापैः पङ्किलौ पतिताधमौ ॥१८५॥
आवान्तु म्लेच्छजातीयौ सततं म्लेच्छसङ्गिनौ ।
म्लेच्छादेशकरौ नित्यं गोविप्रद्रोहिसङ्गतौ ॥१८६॥
आवां हस्तगले बद्धौ स्वकृतेन कुकर्मणा ।
घृण्ये विषयविड्गर्त्ते सुचिराय निपातितौ ॥१८७॥
अस्मदुद्धारणे शक्तो न कोऽप्यस्ति जगत्त्रये ।
त्वामेवैकं विना कश्चिन्नान्यः पतितपावनः ॥१८८॥
आवां तारयितुं शक्तिं निजां चेद्दर्शयिष्यसि ।
पतितपावनाख्या ते तदा साफल्यमेष्यति ॥१८९॥
ब्रवीम्येकं वचः सत्यं शृणु त्वं करुणामय ।
आवां विना कृपापात्रं नैवास्ति भुवने तव ॥१९०॥
आवयोः करुणां कृत्वा स्वकृपां सफलां कुरु ।
ब्रह्माण्डमखिलं तावत् कृपाशक्तिं तवेक्षताम् ॥१९१॥

"तथाहि—यामुनमुनिविरचिते स्तोत्ररत्ने (५०)

न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः ।
यदि मे न दयिष्यसे तदा दयनीयस्तव नाथ दुर्लभः ॥११॥"

विवेच्यायोग्यमात्मानं क्षुब्धं भवति नौ मनः ।
महांस्तु जायते लोभस्तथापि भवतो गुणैः ॥१९२॥
वामनोऽपि स्वहस्तेन यथा चन्द्रं जिघृक्षति ।
आवयोरियमाकाङ्क्षा तथा मनसि जायते ॥१९३॥

"तथाहि यामुनमुनि-विरचिते स्तोत्ररत्ने—(४६)

भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिःशेषमनोरथान्तरः ।
कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि स नाथ जीवितम् ॥१२॥"

श्रुत्वोक्तं प्रभुणा 'रूप मन्त्रणामात्य कर्णय ।
युवां द्वौ भ्रातरौ नूनं मम प्राक्तनकिङ्करौ ॥१६४॥
अद्य प्रभृत्युभौ नाम्ना युवां रूप-सनातनौ ।
दैन्यं मुञ्चतमन्तर्मे युष्मद्दैन्येन भिद्यते ॥१६५॥
लिखित्वा दैन्यपत्रं मे युवाभ्यां प्रेरितं मुहुः ।
तेन तेन च पत्रेण ज्ञातवानस्मि वां मनः ॥१६६॥
युवयोर्हृदयाकाङ्क्षां पत्रद्वारा विजानता ।
युवां शिक्षयितुं श्लोको लिखित्वा प्रेरितो मया ॥१६७॥

"तथाहि वाशिष्ठरामायणे—

पर-व्यसनिनी नारी व्यग्रापि गृहकर्मसु ।
तदेवास्वादयत्यन्तर्नवसङ्गरसायनम् ॥१३॥"

नासीत् प्रयोजनं किञ्चिद् गौडदेशागमेन मे ।
युवयोर्दर्शनायैव मयेहागमनं कृतम् ॥१६८॥
एषा मे मानसी वाणी न केनाप्यवगम्यते ।
आहुः सर्वे कथं प्राप्तो रामकेलिमसाविति ॥१६९॥
साधु वृत्तं, समायातौ भ्रातरौ द्वौ ममान्तिकम् ।
गृहं यातं भयं किञ्चित् कुरुतं मा मनस्यपि ॥२००॥
प्रतिजन्म युवां द्वौ हि भ्रातरौ मम किङ्करौ ।
अचिरेण युवां कृष्णो नूनं निस्तारयिष्यति ॥२०१॥
इत्युक्त्वा तेन हस्ताभ्यां गृहीते शिरसी तयोः ।
भ्रातरौ च प्रभोः पादौ न्यधत्तां स्वस्वमूर्द्धनि ॥२०२॥
प्रभुणा द्वौ समालिङ्ग्य प्रोक्तं भक्तगणं प्रति ।
सर्वे भवन्त एतौ द्वौ कृपयैवोद्धरन्त्विति ॥२०३॥

Braja Nitai Gaura Radhe Syam Japa Hare Krishna Hare Ram.

ततो भक्ताश्च जानन्तस्तौ द्वौ प्रति कृपां प्रभोः ।
सानन्दमानसाः सर्वेऽकुर्वन् हरिहरिध्वनिम् ॥२०४॥
नित्यानन्दो मुकुन्दश्च हरिदासो गदाधरः ।
श्रीवास जगदानन्द वक्रेश्वर मुरारयः ॥२०५॥
इत्येषां चरणान् धृत्वा पतितौ द्वौ सहोदरौ ।
सर्वेऽब्रुवन् प्रभुं प्राप्तौ दिष्ट्या धन्यौ युवामिति ॥२०६॥
प्रतियानावकाशे तौ सर्वान् सम्प्रार्थ्य सम्मतिम् ।
ऊचतुः प्रभुपादेभ्यः किञ्चित् सप्रश्रयं पुनः ॥२०७॥
इतः स्थानात् प्रतिष्ठस्व प्रभो नात्र प्रयोजनम् ।
अपि चेद् गौडभूपालस्त्वयि भक्तिं करोत्यसौ ॥२०८॥
तथापि यवनो जात्या नात्र विश्वसिमो वयम् ।
एतावांस्तीर्थयात्रायां संघट्टो नोत्तमा प्रथा ॥२०९॥
येन सार्द्धं प्रयान्त्येता जनानां लक्षकोटयः ।
तस्य वृन्दावनं यातो नेदृशो भवति क्रमः ॥२१०॥
प्रभोर्यद्यपि भूतार्थं भयं किञ्चिन्न विद्यते ।
तथापि लौकिकी लीला लोकवच्चेष्टितञ्च ते ॥२११॥
इत्युक्त्वा तौ प्रभोः पादौ वन्दमानौ गृहं गतौ ।
ततः प्रस्थातुकामोऽभूत्तस्माद् ग्रामान्महाप्रभुः ॥२१२॥
प्रातरुत्थाय कानाएर्नाटशालां जगाम सः ।
ददृशुः कृष्णचारित्रलीलां सर्वे सहागताः ॥२१३॥
तत्र तस्यां विभावर्यां मनसाचिन्तयत् प्रभुः ।
न सुष्ठुर्जनसंघट्ट इत्यवादीत् सनातनः ॥२१४॥
एतावद्भिर्जनैः सार्द्धं यास्यामि मथुरां यदि ।
न प्राप्स्यामि सुखं किञ्चिद्रसभङ्गो भविष्यति ॥२१५॥
गमिष्याम्यहमेकाकी सार्द्धमेकजनेन वा ।
श्रीवृन्दावनयात्रा मे तदा शोभिष्यते खलु ॥२१६॥

इत्यसौ चिन्तयन् प्रातर्गङ्गायां स्नानमाचरत् ।
नीलाचलं गमिष्यामीत्युक्त्वा प्रातिष्ठत प्रभुः ॥२१७॥
स शान्तिपुरमायातः क्रमेणैवं व्रजन् पथा ।
अहानि पञ्चसप्तानि तस्थावाचार्यमन्दिरे ॥२१८॥
आनाय्य श्रीशचीदेवीं भक्त्या च प्राणमत् प्रभुः ।
तस्या हस्ताच्च भिक्षान्नं सप्ताहानि गृहीतवान् ॥२१९॥
आज्ञां तस्या गृहीत्वासौ पुनः प्रस्थातुमुद्यतः ।
विनयेन निजान् भक्तान् सर्वानापृच्छत प्रभुः ॥२२०॥
जनद्वयान्वितो नीलाचलं यास्यामि निश्चितम् ।
आगत्य रथयात्रायां यूयं प्राप्नुत मामिति ॥२२१॥
आचार्यो बलभद्रश्च श्रीदामोदरपण्डितः ।
द्वाविमौ प्रभुणा सार्द्धं नीलाचलमुपागतौ ॥२२२॥
कियतो दिवसांस्तत्र स्थित्वा वृन्दावनं प्रति ।
रात्रौ चलितुमारेभे प्रभुर्लोकैरलक्षितः ॥२२३॥
तेन केवलमाचार्यो बलभद्रः सह स्थितः ।
नानामार्गैर्गतः काशीं काड़िखण्डपथेन सः ॥२२४॥
काश्यां दिनानि चत्वारि स्थित्वा वृन्दावनं गतः ।
वनानि द्वादशापश्यत् प्राग् दृष्ट्वा मथुरां प्रभुः ॥२२५॥
लीलास्थलं विलोक्यामुं प्रेम्णा विह्वलतां गतम् ।
मथुराया बहिष्कृत्य बलभद्रो महाप्रभुम् ॥२२६॥
गङ्गातीरपथेनैव प्रयागञ्चोपनीतवान् ।
श्रीरूपः प्रभुमागत्य तत्रैव समगच्छत ॥२२७॥
प्रणत्य दण्डवद्भूमौ पतितस्तस्य पादयोः ।
तं रूपं परमानन्दः समालिङ्गन्महाप्रभुः ॥२२८॥
ततस्तं शिक्षयन् वृन्दावनं प्रेषितवान् प्रति ।
आजगाम स्वयं वाराणसीधाम महाप्रभुः २२९॥

इत्यसौ चिन्तयन् प्रातर्गङ्गायां स्नानमाचरत् ।
नीलाचलं गमिष्यामीत्युक्त्वा प्रातिष्ठत प्रभुः ॥२१७॥
स शान्तिपुरमायातः क्रमेणैवं व्रजन् पथा ।
अहानि पञ्चसप्तानि तस्थावाचार्यमन्दिरे ॥२१८॥
आनाय्य श्रीशचीदेवीं भक्त्या च प्राणमत् प्रभुः ।
तस्या हस्ताच्च भिक्षान्नं सप्ताहानि गृहीतवान् ॥२१९॥
आज्ञां तस्या गृहीत्वासौ पुनः प्रस्थातुमुद्यतः ।
विनयेन निजान् भक्तान् सर्वानापृच्छत प्रभुः ॥२२०॥
जनद्वयान्वितो नीलाचलं यास्यामि निश्चितम् ।
आगत्य रथयात्रायां यूयं प्राप्नुत मामिति ॥२२१॥
आचार्यो बलभद्रश्च श्रीदामोदरपण्डितः ।
द्वाविमौ प्रभुणा सार्द्धं नीलाचलमुपागतौ ॥२२२॥
कियतो दिवसांस्तत्र स्थित्वा वृन्दावनं प्रति ।
रात्रौ चलितुमारेभे प्रभुर्लोकैरलक्षितः ॥२२३॥
तेन केवलमाचार्यो बलभद्रः सह स्थितः ।
नानाभावैर्गतः काशीं झाड़िखण्डपथेन सः ॥२२४॥
काश्यां दिनानि चत्वारि स्थित्वा वृन्दावनं गतः ।
वनानि द्वादशापश्यत् प्राग् दृष्ट्वा मथुरां प्रभुः ॥२२५॥
लीलास्थलं विलोक्यामुं प्रेम्णा विह्वलतां गतम् ।
मथुराया वहिष्कृत्य बलभद्रो महाप्रभुम् ॥२२६॥
गङ्गातीरपथेनैव प्रयागञ्चोपनीतवान् ।
श्रीरूपः प्रभुमागत्य तत्रैव समगच्छत ॥२२७॥
प्रणत्य दण्डवद्भूमौ पतितस्तस्य पादयोः ।
तं रूपं परमानन्दः समालिङ्गन्महाप्रभुः ॥२२८॥
ततस्तं शिक्षयन् वृन्दावनं प्रेषितवान् प्रति ।
आजगाम स्वयं वाराणसीधाम महाप्रभुः २२९॥

मिलितः प्रभुणा सार्द्धं काशीमेत्य सनातनः ।
तत्रावस्थाय मासौ द्वौ प्रभुस्तञ्चाप्यशिक्षयत् ॥२३०॥
मथुरां गमयामास तं भक्तिबलवर्द्धितम् ।
सन्न्यासिनोऽनुगृह्यासौ गतो नीलाचलं ततः ॥२३१॥
षड्वर्षाण्येवमेवासौ विलासं कृतवान् प्रभुः ।
जगामेतस्ततो जातु क्षेत्रे वा जातु सोऽवसत् ॥२३२॥
सङ्कीर्त्तनविलासं स चक्रे भक्तैः सदा मुदा ।
विलासं कृतवान् प्रेम्णा श्रीजगन्नाथदर्शने ॥२३३॥
सूत्राणि मध्यलीलाया इमानि कृतवानहम् ।
श्रूयन्तामन्त्यलीलाया भक्तैः सूत्राणि साम्प्रतम् ॥२३४॥
यदा वृन्दावनान्नीलाचलं प्राप्तो महाप्रभुः ।
तत्रैवाष्टादशाब्दान् सोऽवात्सीन्नैव ययौ क्वचित् ॥२३५॥
तत्र गौड़ीयभक्तास्ते प्रतिवर्षं समागताः ।
प्रभुणा चतुरो मासान् मिलिता अवतस्थिरे ॥२३६॥
नृत्यकीर्त्तनसङ्गीतैर्विललास स सन्ततम् ।
आचण्डालञ्च सर्वेभ्यः प्रेमभक्तिं ददौ प्रभुः ॥२३७॥
गोस्वामी पण्डितो वक्रेश्वरदामोदरौ तथा ।
हरिदास-भवानन्द-जगदानन्द-शङ्कराः ॥२३८॥
काशीश्वरश्च गोविन्दः परमानन्दकः पुरी ।
दामोदरस्वरूपश्च ते नीलाचलमावसन् ॥२३९॥
श्रीरामानन्दरायाद्या भक्ता ये क्षेत्रवासिनः ।
अतिष्ठन् प्रभुणा सार्द्धं ते सर्वेऽपि निरन्तरम् ॥२४०॥
नित्यानन्दस्तथाद्वैत-वासुदेव-मुरारयः ।
विद्यानिधिर्मुकुन्दश्रीवासौ दासाश्च ये पुनः ॥२४१॥
प्रत्यब्दं चतुरो मासांस्तस्थुरभ्येत्य ते प्रभुम् ।
तैः सर्वैरभवंस्तस्य विलासा विविधाः प्रभोः ॥२४२॥

अथ श्रीहरिदासस्य सिद्धिप्राप्तिर्महाद्भुता ।
स्वयं महाप्रभुर्यस्य कृतवांश्च महोत्सवम् ॥२४३॥
रूपगोस्वामिनस्तावत् पुनरागमनं ततः ।
शक्तिः सञ्चारिता तस्य हृदये प्रभुणा स्वयम् ॥२४४॥
अथ दण्डितवान् खुञ्जहरिदासं महाप्रभुः ।
प्रभुं दण्डितवान् वाचा श्रीदामोदरपण्डितः ॥२४५॥
श्रीसनातनगोस्वामी पुनः प्रत्याजगाम च ।
ज्यैष्ठे मासि चकारासौ प्रभुस्तस्य परीक्षणम् ॥२४६॥
तुष्टेन प्रभुणा वृन्दावनं स प्रेरितस्ततः ।
अथाद्वैतस्य हस्तेन भुक्तवानद्भुतं प्रभुः ॥२४७॥
विधाय विजने देशे नित्यानन्देन मन्त्रणाम् ।
ततः प्रेमप्रचाराय प्रभुः प्रेरितवानमुम् ॥२४८॥
ततो वल्लभभट्टोऽसौ प्रभुण मिलितोऽभवत् ।
अमुष्मै कृष्णनाम्नोऽर्थो विवृतः प्रभुणा ततः ॥२४९॥
रामानन्दात् प्रभुः कृष्णकथामश्रावयत्ततः ।
प्रद्युम्नमिश्रमाज्ञाप्य तद्‌गुणान् कथयन् स्वयम् ॥२५०॥
रामानन्दानुजं गोपीनाथाख्यं पट्टनायकम् ।
राज्ञा घानिष्यमाणं तं ररक्ष श्रीमहाप्रभुः ॥२५१॥
रामचन्द्रपुरी-भीत्या भिक्षान्नं समकोचयत् ।
वैष्णवानां ततो दुःखं दृष्ट्वार्द्धं कृतवान् प्रभुः ॥२५२॥
ब्रह्माण्डस्यान्तरे सन्ति भुवनानि चतुर्दश ।
जीवा वसन्ति यावन्तो भुवनेषु च तेष्वपि ॥२५३॥
यात्रिकव्यपदेशेन ते गृह्णन्तो नराकृतिम् ।
निरीक्षाञ्चक्रिरे नीलाचलमागत्य च प्रभुम् ॥२५४॥
सर्व एव प्रभोर्भक्ताः श्रीवासादय एकदा ।
चक्रुः सङ्कीर्तनं तत्र प्रगायन्तः प्रभोर्गुणान् ॥२५५॥

तदाकर्ण्य प्रभुः क्रुद्धोऽवदद् भक्तगणं प्रति ।
क्रियते कीर्तनं कस्य कृष्णनामगुणान् विना ॥२५६॥
कर्तुमुद्धतमाचारं युष्माभिः काङ्क्षितं यतः ।
ततः स्वातन्त्र्यमाश्रित्य विश्वध्वंसः कृतोऽधुना ॥२५७॥
अत्रैवावसरे लोकैः समन्तात् कोटिकोटिशः ।
जय श्रीकृष्ण चैतन्येत्युक्त्वा कोलाहलः कृतः ॥२५८॥
जय महाप्रभो गौर श्रीव्रजेश्वरनन्दन ।
जगतां तारणाय त्वमवतीर्णोऽसि हे प्रभो ॥२५९॥
महतीमार्तिमासाद्य सुदूराद् वयमागताः ।
प्रभो दर्शनदानेन कुरु नश्चरितार्थताम् ॥२६०॥
इति तद्दैन्यमाकर्ण्य द्रुतचित्तोऽभवत् प्रभुः ।
कृपालुर्वहिरागत्य तांश्चात्मानमदर्शयत् ॥२६१॥
ब्रूत हरिहरीत्यूचे वाहू उत्तोलयन् प्रभुः ।
दिशश्चतस्र आपूर्य श्रीहरिध्वनिरुत्थितः ॥२६२॥
प्रभुं दृष्ट्वा जनाः प्रेम्णा जाताः संहृष्टमानसाः ।
ईश्वरोऽयमिति ज्ञात्वा ते महाप्रभुमस्तुवन् ॥२६३॥
तेषां तं स्तवमाकर्ण्य श्रीनिवासोऽवदत् प्रभुम् ।
आत्मानं गोपयन् गेहे प्रकाशयसि किं वहिः ॥२६४॥
कोऽशिक्षयदिमाँल्लोकान् ब्रुवन्तीमे च किं वचः ।
इदानीमात्मपाणिभ्यां मुखान्येषां त्वमावृणु ॥२६५॥
यथा समुदितः सूर्यः स्वं गोपयितुमिच्छति ।
तथैवेदं चरित्रं ते न बोद्धुं शक्नुमो वयम् ॥२६६॥
प्रभुः प्रत्यवदन्मुञ्च श्रीनिवास विडम्बनाम् ।
यूयं सर्वे मिलित्वा मां निगृह्णीथ कियत् पुनः ॥२६७॥
इति प्रोच्य स लोकेभ्यः शुभदृष्टिं समर्पयन् ।
गृहान्तरं प्रविष्टोऽभूत् पूर्णकामाश्च तेऽभवन् ॥२६८॥

श्रीरघुनाथदासोऽथ नित्यानन्दमुपागतः ।
दधिचिपिटकैस्तत्र महोत्सवमकारयत् ॥२६९॥
आज्ञां तस्य गृहीत्वासौ प्रभोश्चरणमाश्रयत् ।
दामोदरस्वरूपाय प्रभुस्तञ्च समार्पयत् ॥२७०॥
स ब्रह्मानन्दभारत्या चर्माम्बरममोचयत् ।
इत्येवं बहुधा लीलां षड्वर्षाणि चकार सः ॥२७१॥
आदिद्वादशवर्षीणा कथिता सूत्रसन्ततिः ।
शेषद्वादशवार्षिक्याः श्रूयतां स्पष्टवर्णनम् ॥२७२॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रुते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२७३॥

इति श्रीचैतन्यचरितामृते मध्यखण्डे मध्यलीला-
सूत्रं नाम प्रथमः परिच्छेदः ।

मध्यलीलायां द्वितीयः परिच्छेदः

"विच्छेदेऽस्मिन् प्रभोरन्त्यलीलासूत्रानुवर्णने ।
गौरस्य कृष्ण-विच्छेदप्रलापाद्यनुवर्ण्यते ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्युत ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ॥१॥
अथ यान्यवशिष्टानि वर्षाणि द्वादश प्रभोः ।
तानि श्रीकृष्ण-विच्छेद-स्फूर्तिरासीन्निरन्तरम् ॥२॥
राधिकाया यथा चेष्टा बभूवोद्धव-दर्शनात् ।
रात्रिन्दिवं तथावस्था बभूव श्रीमहाप्रभोः ॥३॥

विरहोन्माद एवासीत् प्रभोस्तत्र निरन्तरम् ।
सदा भ्रान्तिमयी चेष्टा सप्रलापञ्च भाषितम् ॥४॥
रोमकूपादसृक्स्रावो दशनानाञ्च लोलता ।
क्षणेनोपचयोऽङ्गानां क्षणेनापचयः पुनः ॥५॥
गम्भीराभ्यन्तरे रात्रौ निद्रालेशोऽपि नाभवत् ।
भित्तौ घृष्टं शिरोवक्त्रं बभूव क्षतविक्षतम् ॥६॥
प्रभुः कपाटरुद्धेऽपि द्वारत्रये वहिरागमत् ।
सिंहद्वारेऽपतज्जातु सिन्धुवारिणि जातु च ॥७॥
चटकं पर्वतं पश्यन् गोवर्द्धन-गिरिभ्रमात् ।
रुदन्नार्तस्वरेणोच्चैरभ्यधावन्महाप्रभुः ॥८॥
पश्यन्नुपवनोद्यानं मेने वृन्दावनञ्च तत् ।
तत्र गत्वा जगौ नृत्यन् क्षणान्मूर्च्छामगात् प्रभुः ॥९॥
विकारा ये च भावानां श्रूयन्ते न कुतश्चन ।
त एव पर्यलक्ष्यन्त स्फुटं श्रीविग्रहे प्रभोः ॥१०॥
पाणिपादे पृथग्भूता अन्योन्यं सर्वसन्धयः ।
वितस्तिव्यवधानेन यथास्थानं त्वचः स्थिताः ॥११॥
यदा तस्य शिरोहस्तपदं देहान्तराविशत् ।
तदा स प्रतिभाति स्म कूर्माकारो महाप्रभुः ॥१२॥
इत्थं महाद्भुता भावा देहे तस्य प्रकाशिताः ।
शून्यता मनसि व्याप्ता हाहाहेति-ध्वनिर्मुखे ॥१३॥
किं करोमि क्व लप्स्येऽहं श्रीव्रजेश्वरनन्दनम् ।
मुरलीवदनः प्राणनाथो मे कुत्र वर्त्तते ॥१४॥
कस्मै वा कथयिष्यामि दुःखं मे कोऽवगच्छतु ।
व्रजराजकुमारेण विना वक्षो विदीर्यते ॥१५॥
इत्येवं विललापासौ प्रभुर्विह्वलमानसः ।
रायस्य नाटकश्लोकानपठच्च निरन्तरम् ॥१६॥

"तथाहि जगन्नाथवल्लभनाटके तृतीयाङ्के नवमश्लोके मदनिकां प्रति श्रीराधिकाया वाक्यम्—

प्रेमच्छेदरुजोऽवगच्छति हरिर्नायं न च प्रेम वा
स्थानास्थानमवैति नापि मदनो जानाति नो दुर्वलाः ।
अन्यो वेद न चान्यदुःखमखिलं नो जीवनं वाश्रवं
द्वित्राण्येव दिनानि यौवनमिदं हाहा विधेः का गतिः ॥२॥

अस्यार्थः,—यथारागः ।"

कृष्णो नागरशेखरः सखि शठो नारीवधैकव्रतो
भग्नान्मे प्रणयाङ्कुराद्विगलितं दुःखासवं नापिवत् ।
अज्ञात्वा नियमं विधेः सुखकृते प्रेमा मयाराधितो
दुःखं तद्विपरीतमाप्तमधुना प्राणाः प्रयान्त्येव मे ॥१७॥
मूढोऽयं प्रणयः स्वभाव-कुटिलो नो वेत्ति योग्यास्पदं
नास्त्येवास्य विवेचने सदसतोः स्वल्पापि शक्तिः पुनः ।
हन्त क्रूरशठप्रियेण सुदृढं कण्ठे च बाहुद्वये
बद्धाहं गुणशृङ्खलैर्नहि ततः शक्नोमि मोक्तुं निजम् ॥१८॥
हिंस्रः पञ्चशरान् स्मरोऽतनुरपि प्रास्यन्नजस्रं मुहु-
र्विद्धाङ्गेष्वबलास्तपन् जरयति प्राणांस्तु गृह्णाति नो ।
आधिं वेत्त्यपरस्य नान्य इति यत् सत्यं परा का पुन-
र्नापि प्राणसखी च वेद दिशती मां धैर्यमालम्बितुम् ॥१९॥
कृष्णस्त्वामुररीकरिष्यति कृपाम्भोधिः स्वयं जात्विति
व्यर्थं ते सखि भाषितं ननु यतो जीवस्य यज्जीवनम् ।
लोलं पद्मदलाम्बुवत् क उत वा वर्त्तेत तावच्चिर-
मायुर्वर्षशतान्तमित्यपि वचः सम्यग् विचार्य्यं त्वया ॥२०॥
नारीणां खलु यौवनं धनमिदं कृष्णस्य यत् काङ्क्षितं
द्वित्राण्येव दिनानि तद्विलसति ध्वंसं ततो गच्छति ।

कृष्ट्वाग्निः शलभीर्यथा विदहति स्वां दीप्तिमादर्शयन्
कृष्णो मज्जयते तथाधिजलधौ चित्तं हरन् स्वैर्गुणैः ॥२१॥
इत्थं विषण्णो विलपन् महाप्रभुर्दुःखालयद्वारमपावृणोद् बहिः ।
भावोर्मिवैचित्र्यचलन्मनोरथः श्लोकं पुनश्चैकमिमं पपाठ सः ॥२२॥
"तथाहि गोस्वामिपादोक्तः श्लोकः—
श्रीकृष्णरूपादि-निषेवणं विना व्यर्थानि मेऽहान्यखिलेन्द्रियाणाम् ।
पाषाण-शुष्केन्धन भारकाण्यहो बिभर्मि वा तानि कथं हतत्रपः ॥३॥

यथारागः ।"

लावण्यामृत-वेणुगीत-सुधयोरेकायनं तस्य तं
श्रीमद्वक्त्रसुधाकरं न खलु या दृष्ट्या स्वया प्रेक्षते ।
तस्याः किञ्च तया प्रयोजनमहो कस्माच्च सा तिष्ठति
वज्रः सम्पतितोऽस्तु मूर्द्धनि वरं तस्या वृथा जीवनम् ॥२३॥
सख्याकर्णय मे निदारुणविधेर्दग्धस्य तं विक्रमं
चित्त-प्राण-कलेवरेन्द्रियगणः कृष्णं विना मेवृथा ।
तद्वाणी मधुरा सुधासुरधुनी नो गाहते यां श्रुतिं
सेयं विद्धवराटकस्य विलवत्तज्जन्म निर्हेतुकम् ॥२४॥
या नास्वादयति क्वचिज्जितसुधं कृष्णस्य दन्तच्छदं
चारित्रञ्च गुणांश्च, भेकरसना जाता न सा किं मृता ? ।
कस्तूरी-शितिपद्म-दम्भदमिना कृष्णाङ्गगन्धेन या
संसर्गस्य सुखं न चोपलभते भस्त्रेव तन्नासिका ॥२५॥
या कृष्णस्य न चन्द्रकोटिशिशिरं श्रीपादपाणिद्वयी-
स्पर्शं स्पर्शमणेरिवास्य लभते सा लौहदेहा ध्रुवम् ।
इत्येवं विलपन् प्रभुर्हृदयतः शोकं समुद्घाटय-
न्निर्विण्णो गुरुदैन्यपीडितमना: श्लोकं पुनर्गीतवान् ॥२६॥

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

"तथाहि श्रीजगन्नाथवल्लभनाटके तृतीयाङ्क एकादशश्लोके श्रीराधिका-वाक्यम्—

यदा यातो दैवान्मधुरिपुरसौ लोचनपथं
तदास्माकं चेतो मदनहतकेनाहृतमभूत् ।
पुनर्यस्मिन्नेष क्षणमपि दृशोरेति पदवीं
विधास्यामस्तस्मिन्नखिलघटिका रत्नखचिताः ॥४॥

अस्यार्थः—यथारागः । "

दृष्टोऽसौ मुरलीधरः सखि यदा स्वप्नेऽन्यदा वा मया
द्वावानन्दमनोभुवौ च युगपत् प्राप्तौ तदा वैरिणौ ।
ताभ्यां चोरितमानसा प्रियमहं द्रष्टुं न कामं क्षमा
तृष्णार्त्ता नयनद्वयी मम चिरात् प्राप्नोति तृप्तिं न वा ॥२७॥
कृष्णं चेत् क्षण एव कश्चन पुनर्मां दर्शयिष्यत्यहो
तत्तं दण्डपलक्षणादि-समयं माल्येन गन्धेन च ।
नानारत्नविभूषणैश्च सुतरां विभ्राजयिष्याम्यह-
मित्यन्तर्विलपन् ददर्श च वहिष्प्रज्ञः प्रबुद्धौ जनौ ॥२८॥
"चैतन्योऽस्मि किं" मित्यपृच्छदथ तौ, दृष्टं मया किं पुनः
स्वप्नाभं तदिदं, किमु प्रलपितं, किं स्विद् युवाभ्यां श्रुतम् ।
हे मत्प्राणसखौ दरिद्रहृदयं कीदृङ् ममाकर्ण्यतां
कृष्णप्रेमधनं विना मम वृथा देहेन्द्रियाणां गणः ॥२९॥
पुनः स, हाहा शृणुतं स्वरूप, हे रामरायैष तु निश्चयो मे ।
विचार्य्य सारं वदतं यथार्थमिति ब्रुवन् श्लोकमुदाजहार ॥३०॥

"तथाहि श्रीमद्भागवते दशमस्कन्धीयैकत्रिंशाध्यायस्य जयति तेऽधिक-मित्यस्य तोषणीकृतव्याख्यायां धृतो न्यायः—

कइअवरहिअं पेम्मं णहि होइ माणुसे लोए ।
जइ होइ कस्स विरहो विरहे होन्तम्मि को जीअइ ॥५॥

अस्यार्थः यथारागः ।"

कृष्णप्रेमा कपटरहितः शुद्धजाम्बुनदाभः
प्रायेणायं न भवति नृणां लोकमध्ये कदाचित् ।
संयोगोऽस्य क्वचिदपि यदि स्यात्तदा नो वियोगो
दुर्दैवाच्चेद् भवति विरहो जीवितुं कः समर्थः ॥३१॥
इत्युक्त्वासौ शचीपुत्रः पपाठ श्लोकमद्भुतम् ।
तत्र शुश्रुवतुस्तं तावेकाग्रमनसावुभौ ॥३२॥
आत्मनो हृदयावस्थां लज्जमानोऽपि भाषितुम् ।
लज्जावीजमपि प्राश्य वच्मीत्याह पुनः प्रभुः ॥३३॥

"तथाहि श्रीमहाप्रभुपादोक्तः श्लोकः—

न प्रेमगन्धोऽस्ति दरापि मे हरौ
क्रन्दामि सौभाग्यभरं प्रकाशितुम् ।
वंशीविलास्याननलोकनं विना
बिभर्मि यत् प्राणपतङ्गकान् वृथा ॥६॥

अस्यार्थः यथारागः ।"

प्रेम्णः शुद्धस्य गन्धः किमुत सकपटप्रेमबन्धोऽल्पकोऽपि
चित्ते नास्त्येव मेऽसौ पदकमलयुगे येन बध्नामि कृष्णम् ।
क्रन्दाम्येवं तथापि प्रतिपलमिति यन्नैव तत् प्रेमहेतोः
सौभाग्यं स्वीयमेव प्रथयितुमभितो निश्चितं चेष्टितोऽस्मि ॥३४॥
यत्-संसर्गेण वंशी मदयति हृदयं सोऽपि कृष्णाननेन्दु-
र्न स्यादालम्बनं मे सकृदपि च यतो नैव पश्याम्यहं तम् ।
प्रीतिं देहेन्द्रियादौ सततमनुचरन् स्वोपभोगार्थमेव
कामस्यैव प्रसादं हृदि बहु गणयन् प्राणकीटान् बिभर्मि ॥३५॥
भागीरथ्या विशुद्धं जलमिव विमलः कृष्णरागोऽमृताब्धि-
रन्यो यातीह रागो न खलु विलयनं शुभ्रवस्त्रे मसीवत् ।

शुद्धप्रेम्णः सुखाब्धेरणुरपि जगतां मज्जनं कर्त्तुमीष्टे
वक्तुं योग्यं नचैतत्तदपि वदति यद्वातुलः, कः प्रतीयात् ॥३६॥
इत्येवमात्मनो भावान् विचित्रान् श्रीमहाप्रभुः ।
रामानन्दस्वरूपाभ्यां प्रत्यहं समवेदयत् ॥३७॥
वहिरेव विषज्वालां सोऽन्तश्चानन्दमन्वभूत् ।
अद्भुतं चरितं कृष्णप्रेम्णस्तेन प्रकाशितम् ॥३८॥
मुखदाहेऽपि न त्याज्यं तप्तेक्षोश्चर्वणं यथा ।
अस्य प्रेम्णस्तथास्वादः प्रदहन्नपि दुस्त्यजः ॥३६॥
प्रेमायं युगपद् योगो गरलामृतयोरिव ।
हृदि यस्यास्ति तेनैव ज्ञायते तस्य विक्रमः ॥४०॥

"तथाहि विदग्धमाधवे द्वितीयाङ्केऽष्टादशश्लोके नान्दीमुखीं प्रति पौर्णमासी-वाक्यम्—

पीडाभिर्नवकालकूटकटुता-गर्वस्य निर्वासनो
निःस्यन्देन मुदां सुधामधुरिमाहङ्कारसङ्कोचनः ।
प्रेमा सुन्दरि, नन्दनन्दनपरो जागर्त्ति यस्यान्तरे
ज्ञायन्ते स्फुटमस्य बक्रमधुरास्तेनैव विक्रान्तयः॥७॥
यदा सुभद्रा-बलरामयुक्तं श्रीमज्जगन्नाथमहं निरीक्षे ।
तदा कुरुक्षेत्रमुपागतं स्वं सङ्कल्पितात्मा किल भावयामि ॥४१॥
जानामि दृष्टः खलु पद्मलोचनः साफल्यमाप्तं मम सर्वजीवनम् ।
कलेवरं नेत्रयुगं मनश्च मेऽलभन्त तृप्तिं निखिलोत्तमां क्षणात् ॥४२॥
निकषा गरुडस्तम्भं स्थित्वा पश्यन् महाप्रभुः ।
यमानन्दं तदा लेभे न निर्वाच्यं हि तद्बलम् ॥४३॥
गरुड़स्तम्भमूलस्थो निम्नगर्त्तोऽश्रुभिर्भृतः ।
गृहागतेन तेनाथ लिखिता च नखेन भूः ॥४४॥
हा हा वृन्दावनं कुत्र क्व वा गोपालनन्दनः ।
स वंशीवदनः क्वास्ते क्वासौ त्रिभङ्गविग्रहः ॥४५॥

कुत्र तन्मुरलीगानं क्व चासौ यमुनातटः ।
क्वास्ते रासविलासोऽसौ हासो गीतञ्च नर्तनम् ॥४६॥
ममासौ वर्त्तते कुत्र प्रभुर्मदनमोहनः
इत्येवं विविधैर्भावावेगैर्द्रुतसमुत्थितैः ॥४७॥
समुद्विग्नमना जातस्तदानीं स महाप्रभुः ।
कालं मुहूर्तमात्रञ्च नासीद् यापयितुं क्षमः ॥४८॥
धैर्यं तरलतामाप्तं महाविच्छेदवह्निना ।
ततो नानाविधान् श्लोकान् पठितुं स प्रचक्रमे ॥४९॥

"तथाहि श्रीकृष्णकर्णामृत एकचत्वारिंशश्लोके विल्वमङ्गलवाक्यम् ;—
अमून्यधन्यानि दिनान्तराणि हरे त्वदालोकनमन्तरेण ।
अनाथवन्धो करुणैकसिन्धो हा हन्त हा हन्त कथं नयामि ॥८॥"
रात्रिन्दिवं सर्वमधन्यमेव मे कालो न नेयस्तव दर्शनं विना ।
दया-महाब्धिस्त्वमनाथबान्धवः प्रदेहि मह्यं तव दर्शनं प्रभो ॥५०॥
इतीत्थं भावचापल्याच्चलचित्तोऽभवत् प्रभुः ।
कोऽपि बोद्धुं न शक्तोऽभूद् भावानां तादृशीं गतिम् ॥५१॥
अदर्शनेन दग्धात्मा दर्शनं ते कथं लभे ।
इत्युपायमपृच्छत् स कृष्णमेव महाप्रभुः ॥५२॥

"तथाहि तत्रैव द्वात्रिंशश्लोकः ;—
त्वच्छैशवं त्रिभुवनाद्भुतमित्यवेहि
मच्चापलञ्च तव वा मम वाधिगम्यम् ।
तत् किं करोमि विरलं मुरलीविलासिन्
मुग्धं मुखाम्बुजमुदीक्षितुमीक्षणाभ्याम् ॥६॥
यथा रागः ।"

माधुर्यस्य बलं हि यत्तव ममाप्यत्रैव यच्चापलं
त्वञ्चाहञ्च परस्परं तदुभयं जानीवहे निश्चितम् ।

किं किं वा विदधे क्व यामि शरणं गत्वा क्व वा त्वां लभे
तत् सर्वं कृपया स्वयं निदिश मां नान्योऽस्ति मे त्वादृशः ॥६३॥
इत्येवं बहुभावानां प्राबल्यमभवत् प्रभोः ।
अभूतां सन्धिशावल्ये भावानामभवद्रणः ॥५४॥
औत्सुक्यं चापलं दैन्यं रोषामर्षादयोऽभवन् ।
संग्रामे सैनिकास्ते ते प्रेमोन्मादस्य हेतवः ॥५५॥
भावा मत्तगजास्तत्र देहश्चेक्षुवणं प्रभोः ।
युद्धे मत्तगजैरेवं तद्वनं दलितं तदा ॥५६॥
दिव्योन्मादः प्रभोर्जातोऽवसन्ने तनु-मानसे ।
भावावेशेन तेनैवं कृतं सम्बोधनं किल ॥५७॥

"तथाहि तत्रैव चत्वारिंशः श्लोकः —

हे देव हे दयित हे भुवनैकबन्धो हे कृष्ण हे चपल हे करुणैकसिन्धो ।
हे नाथ हे रमण हे नरनाभिराम हा हा कदा नु भवितासि पदं दृशोर्मे ॥१०॥

यथा रागः ।"

उन्मादलक्षणेनैवं कृष्णस्फूर्त्तिरभूत् प्रभोः ।
भावावेशेन तत्रास्य मानोऽभूत् प्रणयोद्भवः ॥५८॥
सोल्लुन्ठवचनं मानं गर्वं व्याजस्तुतिं प्रभुः ।
कदाचिदकरोन्निन्दां सम्मानं जातु चाकरोत् ॥५९॥
देव क्रीड़ारतस्त्वं विहरसि जगतः स्त्री-समूहे यथेच्छं
सोभाग्येनैव मे त्वं स्वयमिह दयित प्रीतिमानागतोऽसि ।
नारीः कर्षन् समस्ता भुवनपरिगतास्तोषयस्येव तास्ताः
कासौ मूढ़ा भवन्तं भुवि बहु मनुते कृष्ण चित्तापहारिन् ॥६०॥
दोषस्ते नास्ति कश्चिच्चपलमतिरसि स्थातुमेकत्र नालं
कारुण्याम्भोनिधिस्त्वं मम हृदयसुहृन्नेक्षसे मेऽपराधम् ।

प्राणोऽसि त्वं व्रजस्य व्रजपुरमवतो नावकाशस्तवास्ति
लीलावैदग्ध्यमेतत्तव मम रमणो मत्सुखायागतो यत् ॥६१॥
निन्दां मत्वा वचो मे किमु हरिरगमद् दूरतो मां विहाय
हे कृष्ण त्वां स्तवीमि स्तुतिवचनमिदं कथ्यमानं शृणु त्वम् ।
त्वं मे नेत्राभिरामस्त्वमसि मम धनं जीवनं त्वं शरीरे
हा हा नाथ प्रिय त्वं वितर पुनरपि प्रेक्षणं वारमेकम् ॥६२॥
स्तम्भः कम्पोऽश्रु वैवर्ण्यं प्रस्वेदः स्वरभेदनम् ।
रोमाञ्चाश्च प्रभोर्देहं परितो व्याप्नुवंस्तदा ॥६३॥
नृत्यन् गायन् हसन् क्रन्दन्नुत्तिष्ठन्नभितो द्रवन् ।
निपतंश्च क्षणेनैव मूर्च्छितोऽभून्महाप्रभुः ॥६४॥
साक्षात्कारञ्च मूर्च्छायां लब्ध्वोत्थाय च तत्क्षणात् ।
सहुङ्कारमुवाचासौ भद्र स्वागतमस्त्विति ॥६५
कृष्णमाधुर्यसम्पद्भिर्नानाभ्रान्तिचलन्मनाः ।
श्लोकमेवं पठित्वासौ निश्चिकाय महाप्रभुः ॥६६

"तथाहि श्रीकृष्णकर्णामृतेऽष्टषष्टितमः श्लोकः—

मारः स्वयं नु मधुरद्युति-मण्डलं नु
माधुर्यमेव नु मनोनयनामृतं नु ।
वेणीमृजो नु मम जीवितवल्लभो नु
कृष्णोऽयमभ्युदयते मम लोचनाय ॥११

यथा रागः ।"

कामः साक्षात् किमयमथवा मूर्तिमान् कान्तिबिम्बः
साक्षान्मूर्तः किमु मधुरिमा चित्तनेत्रोत्सवो मे ।
प्राणारामो हृदयरमणः किं मम प्राणकान्तो
नेत्रानन्दं मम वितरितुं सत्यकृष्णः समेतः ॥६७

एवं भावगणो नाट्यगुरुर्विविधरीतिभिः ।
अनर्तयत् सदा शिष्यौ मनःकायौ महाप्रभोः ॥६८

निर्वेदेन विषादेन दैन्येन चापलेन च ।
मन्युप्रहर्षधैर्यैश्च नृत्यैः कालोऽगमत् प्रभोः ॥६९

स गीतिं चण्डिदासस्य कवेर्विद्यापतेस्तथा ।
कर्णामृतं तथा गीतगोविन्दं रायनाटकम् ॥७०

रामानन्दस्वरूपाभ्यां सह रात्रिन्दिवं प्रभुः ।
अगायत् परमानन्दनिर्वृतः श्रुतवान् पुनः ॥७१

रामानन्दस्य सख्यञ्च पुर्यां वत्सलता यथा ।
गोविन्दप्रमुखाणाञ्च शुद्धदास्यरसः पुनः ॥७२

माधुर्यञ्च स्वरूपस्य जगदानन्दकस्य च ।
गदाधरस्य चेत्येवं चतुर्धा वशगः प्रभुः ॥७३

लीलाशुकस्य मर्त्त्यस्य यदि भावोद्‌गमोऽभवत् ।
ईश्वरस्य तदा भावोद्‌गमे क इव विस्मयः ॥७४

विषयोऽपि स्वयं मुख्यरसस्यासीत् स आश्रयः ।
तेनैवं सर्वभावानां स्फुरणं तत्र सङ्गतम् ॥७५

पुरा श्रीव्रजलीलायां न पूर्णं वाञ्छितत्रयम् ।
महतापि प्रयत्नेन न तेनास्वादितं तदा ॥७६

भावसारं हि राधाया अङ्गीकुर्वन् स्वयं प्रभुः ।
तदेवास्वादयामास पूर्वोक्तं वाञ्छितत्रयम् ॥७७

स्वयमास्वाद्य तद्भक्तान् शिक्षयामास सर्वथा ।
प्रेमचिन्तामणिस्वामी दानवीरो महाप्रभुः ॥७८

पात्रापात्रविचारेण विनैव यत्र तत्र सः ।
दत्तवान् प्रेमसम्पत्तिं प्रभुर्दातृशिरोमणिः ॥७९

अयं गुप्तोऽपि भावाब्धिर्वितीर्णस्तेन भूतले ।
यस्यैकविन्दुमात्रोऽपि नैव लब्धो विरिञ्चिना ॥८०

दयालुरवतारो वा दाता वा नास्ति तादृशः ।
अनन्तांस्तद्-गुणान् कोऽपि नैव वर्णयितुं क्षमः ॥८१
एवं विचित्रा लीलास्य चैतन्यस्य महाप्रभोः ।
भाषया नैव निर्वाच्या नाप्यनुक्ता तु बुध्यते ॥८२
चैतन्यस्य कृपा यत्र स एव ज्ञातुमर्हति ।
तस्य दासानुदासस्य सङ्गस्तेनैव लभ्यते ॥८३
तल्लीला रत्नसारो हि स्वरूपस्तस्य पेटकः ।
स एव रघुनाथस्य कण्ठे स्थापितवानिमम् ॥८४
यत् किञ्चित्तत आकर्ण्य तथैवेदं सविस्तरम् ।
विरचय्य च भक्तेभ्य उपहारं ददाम्यहम् ॥८५
यदि कश्चिद् वदत्येवं ग्रन्थः श्लोकमयः कृतः ।
प्राकृतानां जनानान्तु बोध्यो नायं भवेदिति ॥८६
प्रभोर्यथाभूदाचारस्तथैव वर्ण्यते मया ।
सर्वेषामपि चित्तानि नैवाराधयितुं क्षमे ॥८७
न केनापि विरोधो मे नानुरोधोऽस्ति कस्यचित् ।
यद्धि स्वाभाविकं वस्तु तदेवात्र विविच्यते ॥८८
रागद्वेषौ यदि स्यातां तत्राविष्टं भवेन्मनः ।
तथात्वे च यथाभूतं लेखितुं नैव शक्यते ॥८९
चैतन्यचरितं ह्येतदीदृशं परमाद्भुतम् ।
नापि चेद् बुध्यते कश्चिच्छ्रूयमाणं स बुध्यते ॥९०
प्रीतिः सञ्जायते कृष्णे रसरीतिज्ञता तथा ।
आकर्णयत एवेदं जनस्य स्यान्महाहितम् ॥९१
श्रीमद्भागवतं श्लोकमयं संस्कृतभाषया ।
रचितापि च तट्टीका कथं लोकेषु बुध्यते ॥९२
अत्र द्विचतुराः श्लोका व्याख्याता वङ्गभाषया ।
तथाप्येतान् जनाः सर्वे बोद्धुं नालं कथं पुनः ॥९३

सूत्राण्यन्तिमलीलाया वर्ण्यन्तेऽत्र मया मनाक् ।
वाञ्छा चेतसि जागर्ति विवरीतुं सविस्तरम् ॥९४
अस्ति चेदायुषः शेषः कृपा चेन्मयि च प्रभोः ।
लीलाशेषं प्रभोस्तर्हि वर्णयिष्ये सविस्तरम् ॥९५
लिखतः कम्पते पाणिर्जरसा विकलस्य मे ।
स्मर्तुं पूर्वश्रुतं वस्तु मनसो नास्ति मे बलम् ॥९६
नयनाभ्यां न पश्येयं कर्णाभ्यां शृणुयां न च ।
तथाप्येतल्लिखामीति नूनं परमविस्मयः ॥९७
सारोऽयमन्त्यलीलाया रचितोऽत्र सविस्तरम् ।
सूत्रमध्ये मयेदानीं कथञ्चिद् वर्णना कृता ॥९८
अधुना चेन्मरिष्यामि पुनर्वर्णयितुं तदा ।
नैव शक्ष्यामि, लीलेयं भक्तानां धनमस्त्विति ॥९९
संक्षिप्तेऽत्र कृते सूत्रे न यद् यल्लिखितं मया ।
तत्तल्लेखिष्यते सर्वं विस्तरेणाग्रतः पुनः ॥१००
तावच्चेज्जीवनं लप्स्ये कृपया श्रीमहाप्रभोः ।
लेखिष्यामि यथाकामं सविचारमहं तदा ॥१०१
कनिष्ठज्येष्ठभक्तानां वन्देऽहं चरणाम्बुजम् ।
कृपां कुर्वन्तु ते सर्वे मयि सन्तुष्टचेतसः ॥१०२
सम्मतं यत् स्वरूपस्य श्रीरूपरघुनाथयोः ।
ज्ञातं यावच्च तत् सर्वं लिखामि, दूषणं न मे ॥१०३
श्रीचैतन्यपदाम्भोजं नित्यानन्दपदाम्बुजम् ।
अद्वैतस्य पदं भक्तपदञ्च मूर्ध्नि धारयन् ॥१०४
सनातनस्य रूपस्य स्वरूपरघुनाथयोः ।
श्रीपदाब्जपरागेण स्वशिरो भूषयाम्यहम् ॥१०५
हरिदासप्रमुखांस्तान् वैष्णवान् व्रजवासिनः ।
वन्दे भक्त्या यतस्तेभ्यो लब्धमाज्ञाधनं मया ॥१०६

श्रीचैतन्यविलासाब्धेर्ये कल्लोलय विन्दवः ।
तेषामेकः कणः कृष्णदासेनेहाभिधीयते ॥१०७

इति श्रीचैतन्यचरितामृते मध्यखण्डेऽन्त्यलीलासूत्रकथने
प्रेमोन्मादप्रलापवर्णनं नाम द्वितीयः परिच्छेदः ।

मध्यलीलायां तृतीयः परिच्छेदः

"न्यासं विधायोत्प्रणयोऽथ गौरो
वृन्दावनं गन्तुमना भ्रमात्मा ।
राढे भ्रमञ्छान्तिपुरीमयित्वा
ललास भक्तैरिह तं नमामि ॥१॥"

जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यथ ।
जयोऽस्त्वद्वैतचन्द्रस्य गौरभक्ता जयन्ति च ॥१
चतुर्विंशवयोऽब्दान्ते माघे मासि समागते ।
शुक्लपक्षे हि सन्न्यासं कृतवाञ्छ् श्रीमहाप्रभुः ॥२
प्रेमावेशेन सन्न्यस्य गच्छन् वृन्दावनं प्रति ।
भ्रमणं राढदेशेऽसौ कृतवान् दिवसत्रयम् ॥३
श्लोकमेवं पठित्वा च भावाविष्टो महाप्रभुः ।
राढदेशं पुनाति स्म तत्र तत्र परिभ्रमन् ॥४

"तथाहि श्रीमद्भागवत एकादशस्कन्धे त्रयोविंशाध्याये त्रिपञ्चाशश्लोके उद्धवं प्रति भिक्षुवाक्येन श्रीकृष्णवचनम् ।

एतां स आस्थाय परात्मनिष्ठा-
मध्यासितां पूर्वतमैर्महर्षिभिः ।
अहन्तरिष्यामि दुरन्तपारं
तमो मुकुन्दाङ्घ्रिनिषेवयैव ॥२॥"

प्रभुणोक्तमिदं भिक्षोर्वचनं साधु सङ्गतम् ।
सेवाव्रतं मुकुन्दस्य भिक्षुणा यद्धि निश्चितम् ॥५
केवलं ब्रह्मनिष्ठाया वेशमात्रं विधारयेत् ।
संसारात्तारयेत् किन्तु मुकुन्दस्यैव सेवनम् ॥६
वेशं तमेव संगृह्याधुना वृन्दावनं गतः ।
तत्र निर्जनमासीनः करिष्ये कृष्णसेवनम् ॥७
इत्युक्त्वा गन्तुमारेभे स प्रेमोन्मादलाञ्छितः ।
विहाय दिग्विदिग्-ज्ञानं प्रभू रात्रिन्दिवं ययौ ॥८
नित्यानन्दो मुकुन्दश्चाचार्यरत्नश्च ते त्रयः ।
पश्चादलक्षितास्तावत् प्रभुमेवानुवव्रजुः ॥९
ये येऽपश्यन् प्रभुं लोकास्ते सर्वे प्रेमनिर्भराः ।
उच्चैर्हरिध्वनिं कृत्वा दुःखशोकाननाशयन् ॥१०
गोपालबालकाः सर्वे विलोक्य श्रीमहाप्रभुम् ।
हरिर्हरिरिति प्रोच्चैः समकालमुदैरयन् ॥११
तदाकर्ण्यैव तान् सर्वान्निकषा गतवान् प्रभुः ।
ब्रूहि ब्रूहीत्युवाचैषां शीर्षेषु करमाधत् ॥१२
प्रशशंस च तान् सर्वान् यूयं सौभाग्यसंयुताः ।
श्रावयन्तो हरेर्नाम कृतकृत्यं व्यधत्त माम् ॥१३
रहस्याहूय तान् सर्वान्नित्यानन्दप्रभुस्तदा ।
निजाभिप्रायसिद्ध्यर्थमेवमेवमशिक्षयत् ॥१४
प्रभुः पृच्छति चेद् युष्मान् वृन्दावनपथं तदा ।
गङ्गातीरपथं यूयं तस्मै सन्दर्शयिष्यथ ॥१५
ततः प्रभुरपृच्छत्तानाकर्णयत बालकाः ।
ब्रुत मां केन मार्गेण यामि वृन्दावनं सुखम् ॥१६
सर्वे ते शिशवो गङ्गातीरमार्गमदर्शयन् ।
ययौ तेनैव मार्गेण प्रेमाविष्टो महाप्रभुः ॥१७

उवाचाचार्यरत्नं श्रीनित्यानन्दप्रभुस्तदा ।
निकषाद्वैतमाचार्यं सत्वरं गम्यतां त्वया ॥१८
चैतन्यप्रभुमादाय गमिष्यामि तदालयम् ।
तीरे तरणिमादाय सोऽवधानेन तिष्ठतु ॥१६
तथा कृत्वा नवद्वीपं गच्छ त्वमतिसत्वरम् ।
शच्या सार्द्धं प्रभोर्भक्तान् सर्वांस्तत्र समानय ॥२०
इत्युक्त्वा तञ्च सम्प्रेष्य नित्यानन्दप्रभुः पुनः ।
उपस्थितोऽभवत् साक्षात् समक्षं श्रीमहाप्रभोः ॥२१
तं दृष्ट्वा प्रभुणाप्युक्तं श्रीपाद त्वं क्व गच्छसि ।
श्रीपादः प्रत्युवाचामुं यामि वृन्दावनं त्वया ॥२२
वृन्दावनं कियद्दूरमित्यपृच्छत् प्रभुस्तदा ।
तेन प्रत्युक्तमेषैव यमुना दृश्यतां त्वया ॥२३
इत्युक्त्वासौ प्रभुं गङ्गासन्निधानं समानयत् ।
आवेशेन प्रभुर्गङ्गां यमुनेति व्यबुध्यत ॥२४
यमुनादर्शनं लब्धं मया भाग्यमहो मम ।
इत्युक्त्वा यमुनां तत्र समस्तौषीन्महाप्रभुः ॥२५

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके पञ्चमाङ्के त्रयोदशश्लोके
महाप्रभुकृतस्तुतिः—

चिदानन्दभानोः सदा नन्दसूनोः
परप्रेमदात्री द्रवब्रह्मगात्री ।
अघानां लवित्री जगत्क्षेमधात्री
पवित्रीक्रियान्नो वपुर्मित्रपुत्री ॥३"

इति स्तुत्वा च नत्वा च गङ्गायां स्नातवान् प्रभुः ।
एकन्त्वेवास्य कौपीनं नासीद्वस्त्रं द्वितीयकम् ॥२६

अस्मिन्नवसरे नावमारुह्याद्वैत आगतः ।
वहिर्वासंश्च कौपीनं गृहीत्वाभिनवं पुनः ॥२७
प्रभोरग्रे समागत्याचार्यस्तं प्राणमत् स्थितः ।
विलोक्य प्रभुराचार्यमपृच्छत् संशयान्वितः ॥२८
अहो आचार्य गोस्वामिन् कथमत्रागतोऽसि भोः ।
वृन्दावनं व्रजामीति त्वया वा ज्ञायते कथम् ॥२९
आचार्यः प्राह यत्र त्वं तद्वृन्दावनमेव हि ।
ममैव खलु भाग्येन गङ्गातीरे तवागमः ॥३०
प्रभुणा कथितं नित्यानन्देनाहं प्रतारितः ।
मां गङ्गातीरमानीय प्रोक्तवान् यमुनेति सः ॥३१
आचार्यः प्रोक्तवान् मिथ्या नेदं श्रीपादभाषितम् ।
यमुनामवगाह्यैव कृतं स्नानं त्वयाधुना ॥३२
यमुनैव हि गङ्गायां प्रवहत्येकधारया ।
यमुना पश्चिमे भागे गङ्गा वहति पूर्वतः ॥३३
यमुनायां त्वमत्रैव पश्चिमे स्नानमाचरः ।
आर्द्रं सन्त्यज्य कौपीनमिदं शुष्कं पिनह्यताम ॥३४
प्रेमावेशेन किञ्चिन्न त्वया भुक्तं दिनत्रयम् ।
अद्यैव मे गृहे भिक्षां गृहाण गच्छ मद्गृहम् ॥३५
एकमुष्टिप्रमाणं हि पक्कवानहमोदनम् ।
तेमनं शुष्करुक्षञ्च सूपशाकौ च तादृशौ ॥३६
इत्युक्त्वा नावमारोप्य तं निनाय निजालयम् ।
पादौ च क्षालयामास तस्यासौ हृष्टमानसः ॥३७
आचार्यगृहिणी पूर्वमेव सर्वं पपाच सा ।
आचार्येण स्वयं तत्तदर्पितं विष्णवे तदा ॥३८
पात्रत्रये समीकृत्य भोज्यं स पर्यवेषयत् ।
स्थापयामास कृष्णार्थं भोज्यं धातवभाजने ॥३९

द्वौ द्वात्रिंशत्-फल-श्रेणि-वीजि-रम्भा-नवच्छदौ ।
अधिष्ठापितवान् भोज्यभागौ स साधुसज्जितौ ॥४०
मध्ये पीतहविः-सिक्तशाल्यन्नस्तूपयुग्मकम् ।
तेमनं मौद्‌गसूपञ्च विष्वक् पत्रपुटेष्वधात् ॥४१
वास्तुकस्य च शाकस्य पाकान् बहुविधानथ ।
पटोलं मानमूलञ्च कौष्माण्डकवटीस्तथा ॥४२
पक्वं चव्यमरीचैश्च सर्वशः फलमूलकैः ।
सुतिक्तं तत् सुधानिन्दि पञ्चधा कटुतिक्तकैः ॥४३
तथा सुभृष्टवार्ताकीर्मृदुभिर्निम्बपत्रकैः ।
कोमला वटिका भृष्टा मानकुष्माण्डचक्रिकाः ॥४४
शस्यानि नारिकेलस्यामिक्षा मधुरशर्कराः ।
मोचाघण्टञ्च कुष्माण्डं दुग्धपक्वञ्च भूरिशः ॥४५
मधुराम्लञ्च वव्यम्लमम्लानि पञ्चषाणि च ।
लोकख्यातानि पक्वानि निष्ठानान्यखिलान्यपि ॥४६
वटिका मुद्‌गमाषाणां मधुराः कदलीवटीः ।
क्षीरपूरांस्तथा नारिकेलपूरांश्च पिष्टकान् ॥४७
कदलीवल्कपात्राणि गभीराणि महान्ति च ।
स्थितिशीलान्यकम्प्यानि द्रढिष्ठान्यटलानि च ॥४८
पञ्चाशच्छस्तथा पात्राण्यापूर्य तेमनैश्च तैः ।
त्रयाणां भोज्यपात्राणां स्थापितानि समन्ततः ॥४९
सघृतं परमान्नञ्च मृत्तिकाकुण्डिकाभृतम् ।
घनावर्तितदुग्धञ्च निहितं भाजनत्रये ॥५०
सदुग्धकदलीशस्यं पृथुकं दुग्धपिष्टकाः ।
इत्येवं संगृहीतानि शक्यन्ते नैव भाषितुम् ॥५१
सर्वं मृत्कुण्डिकापूर्णं निहितं पार्श्वयोर्द्वयोः ।
दुग्धामिक्षिकचाम्पेयरम्भाशस्यान्यशेषतः ॥५२

अधि तेमनमन्नञ्च तुलसीमञ्जरी स्थिता ।
त्रिषु पानीयपात्रेषु सम्भृतं वासितं जलम् ॥५३
शुभ्रपीठान्यशोभन्त त्रीणि वस्त्रावृतानि च ।
भोज्यमानीय कृष्णस्य पुरतस्तन्निवेदितम् ॥५४
हूतौ नीराजनारम्भेऽद्वैताचार्येण तौ प्रभू ।
दृष्टं नीराजनं सर्वैः प्रभुभ्यां साकमागतैः ॥५५
तत आरात्रिकं कृत्वाचार्यः कृष्णमशाययत् ।
चैतन्यं प्रभुमभ्येत्य विनयेन न्यवेदयत् ॥५६
भवद्भ्यां कृपया गेहाभ्यन्तरं गम्यतामिति ।
तत आगच्छतां भोक्तुं भ्रातरौ द्वौ गृहान्तरम् ॥५७
हरिदासो मुकुन्दश्च द्वौ हूतौ प्रभुणा यदा ।
तदा तौ वक्तुमारब्धौ युक्तपाणी यथाक्रमम् ॥५८
मुकुन्देनोक्तमद्यापि नैव कृत्यं कृतं मया ।
पश्चाल्लप्स्ये प्रसादं ते गृहान्तर्विंश्यतामिति ॥५९
हरिदासोऽप्युवाचाहं पापिष्ठेष्वधमः प्रभो ।
पश्चाद् भोक्ष्ये प्रसादं ते मुष्टिमात्रं वहिःस्थितः ॥६०
नीतवांस्तत आचार्यस्तौ प्रभू गृहमन्तरा ।
प्रसादं प्रभुरालोक्य सानन्दहृदयोऽब्रवीत् ॥६१
यः कृष्णं भोजयत्यन्नं नित्यमेतादृशं जनः ।
गृह्णामि शिरसा तस्य पादौ जन्मनि जन्मनि ॥६२
प्रभुणावगतं भोज्यत्रयं कृष्णनिवेदितम् ।
आचार्यस्य मनोभावः प्रभुणा विदितो नहि ॥६३
प्रभुणोक्तं निषीद त्वं भक्षयामस्त्रयः समम् ।
तच्छ्रुत्वावददाचार्यः करिष्ये परिवेषणम् ॥६४
कुत्राहमुपवेक्ष्यामि द्वे पात्रे पुनरानय ।
तत्राल्पशोऽन्ननिष्ठाने देहीत्यकथयत् प्रभुः ॥६५

आचार्येणोक्तमासाथामनयोः पीठयोर्युवाम् ।
इत्युक्त्वा तौ करे धृत्वा तेनोभावुपवेशितौ ॥६६
नोपकरणसम्भारा भक्ष्याः सन्न्यासिना क्वचित् ।
इन्द्रियोपरमः कस्मात् स्यात्तदेत्यवदत् प्रभुः ॥६७
अहं जानामि सन्न्यासाडम्बरं तव सर्वथा ।
परिमुञ्चात्मचौर्यं तत् त्यक्त्वा वचनचातुरीम् ॥६८
भुङ्क्ष्व भोज्यानि सर्वाणीत्याचार्यः प्रत्यभाषत ।
प्रभुणोक्तं मयैतावदन्नं भोक्तुं न शक्यते ॥६९
आचार्योऽकथयत्तावद् भक्षय त्वमकैतवम् ।
शक्यते नैव यद् भोक्तुं पात्रे तदवशिष्यते ॥७०
उवाच प्रभुरेतावन्नान्नं शक्ष्यामि खादितुम् ।
उच्छिष्टस्थापनं नापि धर्मः सन्न्यासिनामिति ॥७१
ऊचेऽद्वैतः सकृद्भोज्यान्यन्नभारशतानि ते ।
नीलाद्रौ त्वं चतुष्पञ्चाशत् कृत्वोऽत्सि तथान्वहम् ॥७२
जनत्रयस्य भक्ष्यो यः पिण्डो ग्रासमितः स ते ।
नेदं तत्तुलयान्नं ते पञ्चग्रासमितं भवेत् ॥७३
मद्भाग्योपचयात्तेऽद्य मद्गेहे शुभ आगमः ।
चातुरीं तत् परित्यज्य प्रभो त्वं कुरु भोजनम् ॥७४
इत्युक्त्वासौ ददौ वारि द्वयोर्गोस्वामिनोः करे ।
भोजनं कर्त्तुमारब्धौ हसन्तौ तौ प्रभू ततः ॥७५
नित्यानन्द उवाचाहमुपोष्य दिवसत्रयम् ।
करिष्ये पारणामद्येत्याशा मे महती स्थिता ॥७६
किन्त्वद्याप्युपवासोऽभूदाचार्यामन्त्रितस्य मे ।
नानेनार्द्धोदरं ग्रासमात्रेण मम पूर्यते ॥७७
आचार्यः प्रत्युवाच त्वं सन्न्यासी तैर्थिकोऽसि भोः ।
फलमूलाशनो जातु तिष्ठस्यनशनोऽथवा ॥७८

अन्नं मुष्टिमितं प्राप्तं दरिद्रब्राह्मणालये ।
भव तेनैव तुष्टोऽद्य मुञ्च लोलुपतामिति ॥७६
नित्यानन्दोऽब्रवीदस्मि यत आमन्त्रितस्त्वया ।
यावत्ततोऽर्थये भोक्तुं तावद्दातव्यमेव ते ॥८०
इत्यद्वैतो वचो नित्यानन्दस्याकर्णयन् पुनः ।
सम्प्राप्तः परमां प्रीतिं किञ्चित्तं प्रत्यभाषत ॥८१
अहो भ्रष्टावधूतस्त्वमाद्य नः स्वोदरम्भरिः ।
मन्ये दण्डयितुं विप्रान् सन्नयासं त्वं गृहीतवान् ॥८२
दशानां वाथ विंशत्या भक्ष्यं भोक्तुमलं भवान् ।
तावदन्नं क्व लप्स्येऽहं दरिद्रब्राह्मणो भवन् ॥८३
यत् प्राप्तं मुष्टिमेयान्नं तद्भुक्त्वोत्तिष्ठ साम्प्रतम् ।
परिमुञ्चोन्मदिष्णुत्वमुच्छिष्टं न च निक्षिप ॥८४
इति हासरसेनासौ भोजनं विदधत् पुनः ।
तेमनान्यर्द्धशो भुक्त्वा विरराम महाप्रभुः ॥८५
तैस्तैश्च तेमनैः पात्रेष्वाचार्योऽर्द्धमपूरयत् ।
पुनः पुनश्चकारासावेवं तत्परिवेषणम् ॥८६
प्रभुं निर्बन्धयामास पात्राण्यापूर्य तेमनैः ।
अशिष्यामि कियद् भूय इत्युवाच महाप्रभुः ॥८७
आचार्यः कथयामास यद्दत्तं न जहीहि तत् ।
अधुना दीयते यत्तु तस्यार्द्धं भक्षय प्रभो ॥८८
इत्युक्त्वा बहुधा यत्नैर्दैन्येनाभोजयत् प्रभुम् ।
आचार्यस्य मनोवाञ्छां प्रभुरेवमपूरयत् ॥८९
नित्यानन्दोऽब्रवीत् पूर्णं नाभवत्तु ममोदरम् ।
गच्छादाय त्वदीयान्नं मया भुक्तं न किञ्चन ॥९०
इत्युक्त्वा ग्रासमात्राणि गृहीत्वान्नानि पाणिना ।
असौ रोषवशेनेव समुत्क्षिप्य विकीर्णवान् ॥९१

द्वित्राण्येवापतन् भक्तान्याचार्यस्य कलेवरे ।
तद्भक्तस्पृष्टदेहोऽसावनृत्यद्बहुलीलया ॥६२
उच्छिष्ठमवधूतस्य पतितं मे कलेवरे ।
छद्मनानेन मामेषोऽवधूतः पूतवान् परम् ॥६३
त्वां निमन्त्र्य मया लब्धं फलं तस्यानुरूपकम् ।
कुलजातिविहीनोऽसि सोन्मादश्च स्वभावतः ॥६४
त्वयोच्छिष्ठं मयि क्षिप्तं कर्तुं मामात्मनः समम् ।
विप्रोऽयमिति ते भीतिर्नाभूदित्यवदच्च सः ॥६५
नित्यानन्दोऽब्रवीत् कृष्णप्रसादोऽयमिति ध्रुवम् ।
तच्चापि ब्रुवतोच्छिष्टमपराधः कृतस्त्वया ॥६६
भोजयिष्यसि रुच्यानि शतं सन्न्यासिनो यदि ।
अपराधस्तदैवायं खण्डितस्ते भविष्यति ॥६७
आचार्यः प्राह सन्न्यासी नैवामन्त्र्यो मया पुनः ।
निखिलः स्मार्तधर्मो मे यतः सन्न्यासिना हतः ॥६८
इत्युक्त्वाचमनं तेन कारितश्चोभयोस्तयोः ।
ततोऽनुत्तमशय्यायां शायितौ तौ च यत्नतः ॥६९
एलावीजं लवङ्गञ्च ताभ्यां सुरसवासिते ।
तुलसीमञ्जरीयुक्ते मुखशुद्ध्यर्थमर्पिते ॥१००
तयोः श्रीविग्रहौ कृत्वा गन्धचन्दनचर्चितौ ।
सुगन्धि स्रजमानीय स न्यधाद्धृदयोपरि ॥१०१
पादसंवाहनं कर्तुमाचार्योऽभ्यलषत् पुनः ।
हृदि सङ्कोचमापन्नोऽब्रवीदेवं महाप्रभुः ॥१०२
अलं मां नर्तयित्वाद्य त्वं मां नर्तितवान् बहु ।
मुकुन्दं हरिदासञ्च गृहमानीय भोजय ॥१०३
तदानीं तावदाचार्यः सममानीय तावुभौ ।
मनसाकाङ्क्षितं यत्तद् भोजयन् बुभुजे स्वयम् ॥१०४

प्रभोरागमनं श्रुत्वा जनाः शान्तिपुरस्थिताः ।
तस्य श्रीचरणाम्भोजं द्रष्टुं तत्र समागताः ॥१०५
परमानन्दिता लोकाश्चक्रुः सर्वे हरिध्वनिम् ।
प्रभोः सौन्दर्यमालोक्य बभूवुस्ते चमत्कृताः ॥१०६
गौरकान्तिः शरीरस्य सूर्यादप्युज्ज्वलत्तरा ।
तत्र जाज्वल्यमानश्रीररुणा वसनच्छविः ॥१०७
आगमान्निर्गमाच्चैवं विरेमुर्न जनास्तदा ।
संघट्टेन च लोकानां दिवसो विरराम सः ॥१०८
सङ्कीर्त्तनं समारब्ध आचार्यः सायमागते ।
ततो नृत्यन्तमाचार्यं सन्ददर्श महाप्रभुः ॥१०९
धृत्वाचार्यकरं नित्यानन्दश्च परितोऽभ्रमत् ।
हरिदासोऽप्यनृत्यच्च तत्पश्चाद्धृष्टमानसः ॥११०

"तथाहि पदम् । धान-श्री-रागः"

किमिव कथयामि सखि मम मुदितपारम् ।
शश्वदधिवसति मम हरिरिदमगारम् ॥१११
इदं गीतपदं गायन्नाचार्यो ह्लादितान्तरः ।
स्वेदकम्पाश्रुरोमाञ्चैर्नृत्यन् गर्ज्जंश्च हुङ्कृतैः ॥११२
मुहुरावर्तमानश्चाग्रह्णाज्जातु प्रभोः पदम् ।
कदाचिच्च समाश्लिष्य प्रभुमेवं वचोऽब्रवीत् ॥११३
मां प्रतार्य बहूनि त्वं दिनानि भ्रान्तवानसि ।
बध्नंस्त्वां वासयिष्यामि प्राप्तोऽसि स्वगृहेऽधुना ॥११४
इत्याचार्यो वदन् वाक्यं ननर्त प्रीतमानसः ।
रजन्याः प्रथमं यामं व्याप्य सङ्कीर्तनं जगौ ॥११५
श्रीकृष्णसङ्गमाभावात् प्रेमोत्कण्ठा प्रभोरभूत् ।
ववृधे प्रेमविच्छेद-ज्वालाकल्लोलसङ्कटम् ॥११६

पपात धरणीपृष्ठे प्रभुर्व्याकुलमानसः ।
आचार्यो व्यरमन्नृत्यात्तथा दृष्ट्वा महाप्रभुम् ॥११७
मुकुन्दो ज्ञातवान् साधु प्रभोस्तं भावमान्तरम् ।
तस्य भावानुरूपं स जगौ गीतपदं ततः ॥११८
उदस्थापयदाचार्यस्तदा नर्तयितुं प्रभुम् ।
तद्गीतं शृण्वतस्तस्य धार्यं नासीत् कलेवरम् ॥११९
कम्पाश्रुपुलकस्वेदाप्लुतो गद्गदवाक् प्रभुः ।
क्षणात् पपात चोत्तस्थौ क्षणादेव रुरोद च ॥१२०

"तथाहि गीतपदम्"

हा हा जीवनदयिते सखि मम लोकय किमिव न जातम् ।
ज्वरयति मम तनुमनसी कृष्ण-प्रेमगरलमतिशातम् ॥१२१
रात्रिन्दिवमपि दह्यत इव मन उपशाम्यति न सतृष्णम् ।
तत्र चलाम्यहमुड्डयमाना यत्र लभे मम कृष्णम् ॥१२२

इति गीतमगायत् स मुकुन्दो मधुरस्वरम् ।
तदाकर्णयतश्चित्तं प्रभोरन्तर्व्यदीर्यत ॥१२३
विषादामर्षनिर्वेदचापल्यगर्वदीनताः ।
भावसैन्या अयुध्यन्त सततं प्रभुणा सह ॥१२४
प्रहारेण च भावानां जर्जरोऽभून्महाप्रभुः ।
अपतन्मेदिनीपृष्ठे श्वासहीनकलेवरः ॥१२५
तथालोक्यैव सर्वेषु भक्तेषु चिन्तयत्सु च ।
अकस्माद् गर्जनं कुर्वन्नुदतिष्ठन्महाप्रभुः ॥१२६
ब्रूहि ब्रूहीत्युदीर्यासौ ननर्तानन्दविह्वलः ।
प्रबला भावकल्लोला अबोध्या अभवंस्तदा ॥१२७
नित्यानन्दः प्रभुं गृह्णंस्तेनैव सार्द्धमभ्रमत् ।
आचार्यो हरिदासश्च नृत्यन्तावनुचेरतुः ॥१२८

स इत्थं लीलयानृत्यद् याममात्रं महाप्रभुः ।
जातु हृष्टो विषण्णश्च निजभावतरङ्गितः ॥१२६
दिनानि त्रीण्युपोष्यैव तदानीं कृतभोजनः ।
इत्थमुत्प्लवनृत्येन प्रभुः श्रान्तोऽभवन्महत् ॥१३०
तथापि नैव मेनेऽसौ प्रेमावेशवशाच्छ्रमम् ।
नित्यानन्देन धृत्वा च रुद्धा चास्थाप्यत प्रभुः ॥१३१
अद्वैताचार्यगोस्वामी कीर्तनाद्विरतस्ततः ।
कृत्वा वहुविधां सेवां महाप्रभुमशाययत् ॥१३२
इत्थं दश दिनान्येव तथाभोजनकीर्तनैः ।
समरूपैः स आचार्यश्चकार प्रभुसेवनन् ॥१३३
प्रातराचार्यरत्नोऽसौ सर्वैर्भक्तजनैः समम् ।
दोलाधिरोपितां तत्र शचीमातरमानयत् ॥१३४
नार्यो बालाश्च वृद्धाश्च नवद्वीपनिवासिनः ।
तत्र सर्वे समायाताः संघट्टश्च महानभूत् ॥१३५
नामसङ्कीर्तनं कुर्वन्नासीन्नृत्यन् यदा प्रभुः ।
समानीता शचीमाता तदैवाद्वैतमन्दिरम् ॥१३६
अपतत् पुरतः शच्या दण्डवत् स महाप्रभुः ।
शची क्रन्दितुमारेभे क्रोडमारोप्य नन्दनम् ॥१३७
उभयोर्दर्शनेनैव संवृत्तौ विह्वलावुभौ ।
शची केशानपश्यन्ती पुत्रस्य विकलाभवत् ॥१३८
पुत्रस्याङ्गानि पस्पर्श चुम्बित्वैक्षत चाननम् ।
अश्रुपूर्णाकुलाक्षी तु न शशाक निरीक्षितुम् ॥१३९
रुदत्यूचे शचीमाता निमाए मम वत्स रे ।
न समं विश्वरूपेण नैष्ठुर्यं कुरु मां प्रति ॥१४०
स तु सन्न्यासमालम्ब्य दर्शनं नैव मे ददौ ।
त्वय्यप्येवं कृताचारे मरणं मे भविष्यति ॥१४१

प्रत्युवाच प्रभुः क्रन्दन्नार्ये मद्वचनं शृणु ।
भवत्या एव देहोऽयं मम नैवास्ति किञ्चन ॥१४२
भवत्या पालितो देहो भवत्या जात एव च ।
ऋणं ते जन्मकोट्यापि नाहं शोधयितुं क्षमः ॥१४३
जानन्नथाप्यजानन् वा सन्न्यासं कृतवानपि ।
औदासीन्यं करिष्यामि न कदाचिदपि त्वयि ॥१४४
तत्रैवाहं निवत्स्यामि त्वमादेक्ष्यसि यत्र माम् ।
तदेवाहं करिष्यामि त्वं यथाज्ञापयिष्यसि ॥१४५
इति तां प्रभुराभाष्य प्रणनाम पुनः पुनः ।
माता पुनः पुनः क्रोडेऽगृह्णात्तं तुष्टचेतसा ॥१४६
अथाचार्यो निनायैतामार्यामन्तःपुरं ततः ।
प्रभुर्भक्तजनैः सार्द्धं सङ्गाय त्वरितोऽभवत् ॥१४७
एकैकशः प्रभुः सर्वैस्तैर्भक्तैः समगच्छत ।
समाश्लिष्य च सर्वांस्तान् मुखदर्शं महाप्रभुः ॥१४८
अपि चेत् केशहीनं तं दृष्ट्वा भक्ताः सुदुःखिताः ।
तथाप्यपूर्वसौन्दर्यं दृष्ट्वा प्रापुर्महत् सुखम् ॥१४९
विद्यानिधिश्च रामाइः श्रीवासश्च गदाधरः ।
गङ्गादासो मुरारिश्च श्रीवक्रेश्वरनन्दनौ ॥१५०
शुक्लाम्बरो मुकुन्दश्च विजयो बुद्धिमन्तखान् ।
श्रीधरो वासुदेवश्च श्रीदामोदरसञ्ज्ञयौ ॥१५१
ब्रुवे कियन्ति नामानि तान्नवद्वीपवासिनः ।
सर्वान् सकृपया दृष्ट्योपातिष्ठत हसन् प्रभुः ॥१५२
सर्वे हरि हरीत्युक्त्वा सानन्दं ननृतुः समम् ।
आचार्यमन्दिरञ्चाभूच्छ्रीवैकुण्ठपुरी तदा ॥१५३
यावन्तो मानवास्तत्र द्रष्टुकामा महाप्रभुम् ।
नवद्वीपात्तथा नानाग्रामेभ्यश्च समाययुः ॥१५४

अद्वैताचार्यगोस्वामी तावद्भ्यः सुचिरं तदा ।
सर्वेभ्यः प्रददावन्नं भक्ष्यं पेयञ्च सद्म च ॥१५५
आचार्यस्य गृहे द्रव्याण्यक्षयाण्यव्ययानि च ।
व्ययितानि च यावन्ति तावन्त्येवोपजज्ञिरे ॥१५६
शची तदा प्रभृत्येव पपाच प्रतिवासरम् ।
प्रभुर्भक्तजनैः सार्द्धं बुभुजे च मुदान्वितः ॥१५७
आचार्यस्य प्रभुप्रीतिं प्रभुञ्च दिवसे जनाः ।
रात्रौ च ददृशुः सर्वे प्रभोर्नर्तनकीर्तने ॥१५८
सर्वे भावाः समुद्भूताः कीर्त्तनं कुर्वतः प्रभोः ।
स्तम्भकम्पाश्रुरोमाञ्चाः प्रलयो गद्गदस्वराः ॥१५६
प्रस्खलच्चरणो भूमौ पपातासौ प्रतिक्षणम् ।
तदालोक्य शचीमाता रुदत्येवमभाषत ॥१६०
मन्येऽहं चूर्णतां यातं निमाएस्तु कलेवरम् ।
हा हेति ब्रुवती विष्णुं वरमेवमयाचत ॥१६१
बाल्यात् प्रभृति या सेवा प्रभो तव कृता मया ।
तस्या एतत् फलं मह्यं हे नारायण दीयताम् ॥१६२
यदैव हि निमाइर्मे वसुधायां पतिष्यति ।
लभतां न तदा तस्य शरीरं यातनामिति ॥१६३
बभूवैवं शचीदेवी वात्सल्येनातिविह्वला ।
भीति-प्रहर्ष-दैन्यैश्च युगपद्विकलाभवत् ॥१६४
श्रीनिवासादयो भक्ता यावन्तो द्विजसत्तमाः ।
तावतां प्रभवे भिक्षां दातुं तत्र मनोऽभवत् ॥१६५
तदाकर्ण्य शचीमाता विनयेनावदच्च तान् ।
अहं कुत्र पुनर्लप्स्ये निमाएर्मम दर्शनम् ॥१६६
मिलनं सह युष्माभिरन्यत्रापि भविष्यति ।
किन्तु मे भाग्यहीनाया इदमेव हि दर्शनम् ॥१६७

आचार्य्यस्य गृहे यावन्निमाइरवतिष्ठते ।
तावद्ददाम्यहं भिक्षां तत्सर्वैरनुमन्यताम् ॥१६८
इति भक्ता स्तदाकर्ण्य सनमस्कारमब्रुवन् ।
जनन्या योऽभिलाषोऽसौ सर्वेषामपि सम्मतः ॥१६९
मातुर्वैयग्र्यमालोक्य प्रभुर्व्यग्रमना अभूत् ।
भक्तान् सर्वान् स एकत्र स्थापयन्निदमब्रवीत् ॥१७०
आज्ञां विनापि युष्माकमहं बृन्दावनं प्रति ।
प्रस्थितोऽपि न शक्तोऽस्मि यातुं विघ्ननिवर्त्तितः ॥१७१
अपि चेदस्मि सन्न्यासं सहसैव गृहीतवान् ।
औदासीन्यं करिष्यामि न युष्मासु तथाप्यहम् ॥१७२
यावज्जीवाम्यहं युष्मां स्तावत्त्यक्ष्यामि नैवतु ।
जननीमपितावच्च नैव त्यक्तुमहं क्षमः ॥१७३
नायं सन्न्यासिनो धर्मो यत् सन्न्मासं चरन्पुनः ।
आत्मनो जन्मभूमौ स वसेत् सह कुटुम्बकैः ॥१७४
इत्येवमाक्षिपन् कोऽपि यथा निन्दां करोति न ।
यूयं कुरुत तां युक्तिं तिष्ठेद्धर्मद्वयं यथा ॥१७५
इतीदं मधुरं वाक्यं समाकर्ण्य महाप्रभोः ।
आचार्यप्रमुखाः सर्वे शचीदेवीमुपागताः ॥१७६
प्रभोर्विज्ञापनं यत्तत्तस्यै सर्वं न्यवेदयन् ।
जगन्माता शचीदेवी श्रुत्वा तच्चैवमब्रवीत् ॥१७७
सोऽवतिष्ठेत यद्यत्र तदा मे परमं सुखम् ।
यदि तस्य भवेन्निन्दा दुःखं मे परमं तदा ॥१७८
तेन मे प्रतिभात्येषा युक्तिः साध्वी मनोमता ।
कार्य्यद्वयं सुसिद्धं स्याद्वसेन्नीलाचले स चेत् ॥१७९
नीलाचले नवद्वीपे मन्ये तस्य गृहद्वयम् ।
तद्वार्त्ता सर्वदा लप्स्ये यातायातजनाननात् ॥१८०

गमनागमने कर्त्तुं यूयं रुवेंऽपि शक्नुथ ।
जातु स्नानाय गङ्गायां तस्याप्यागमनं भवेत् ॥१८१
आत्मनो मे सुखं दुःखं न किञ्चिद् गणयाम्यहम् ।
तदेवात्मसुखं मन्ये यत्तस्यैव सुखं भवेत् ॥१८२
इति श्रुत्वैव ते भक्तास्तुष्टुवुस्तां मुदान्विताः ।
आज्ञा यथैव वेदानां मातर्वाणी तथैव ते ॥१८३
एवं स्तोतुं समारब्धा भक्ताः सर्वे प्रभोः पुरः ।
शृण्वतस्तत् प्रभोश्चित्तं सानन्दमभवत्तदा ॥१८४
नवद्वीपादिवास्तव्यान् भक्तां स्तान्निखिलानपि ।
बहु सम्मानयन्नेवमवोचत महाप्रभुः ॥१८५
यूयमेव हि लोके मे सर्वे परम-बान्धवाः ।
प्रार्थयेऽहमिमां भिक्षां यूयं सर्वे प्रदत्त मे ॥१८६
विधत्त स्वगृहं गत्वा कृष्णसङ्कीर्त्तनं सदा ।
श्रीकृष्णस्य कथां नामाराधनञ्चानुतिष्ठत ॥१८७
यामि नीलाचलं यूयमनुजानीत मां ततः ।
दर्शनं वः प्रदास्यामि समागत्यान्तरान्तरा ॥१८८
इत्येतावन्ति वाक्यानि कथयित्वा स्मिताननः ।
सर्वान् सम्मानयन् साधु विससर्ज महाप्रभुः ॥१८९
स तानापृच्छमानस्तु यदा प्रस्थातु मुद्यतः ।
हरिदासस्तदाक्रदंन्नब्रवीत् करुणं वचः ॥१९०
भवान्नीलाचलं याति साम्प्रतं का गतिर्मम ।
न मे नीलाचलं गंतुं शक्तिः स्वल्पापि विद्यते ॥१९१
अहं पापाधमो नीचो न लब्ध्वा तव दर्शनम् ।
पापिष्ठं जीवनं ह्येतद्धरिष्यामि कथं प्रभो ॥१९२
महाप्रभुरुवाचेमं दीनतामुपसंहर ।
एतेन तव दैन्येन मनो मे चपलायते ॥१९३

त्वत्कृते श्रीजगन्नाथं प्रार्थयिष्ये निरन्तरम् ।
त्वामादाय गमिष्यामि यथा श्रीपुरुषोत्तमम् ॥१९४
ततः सप्रश्रयं तावदाचार्यस्तं न्यवेदयत् ।
कृपयात्रावतिष्ठस्व त्वं द्वित्रान्दिवसानिति ॥१९५
आचार्य्यस्य वचो जातु प्रभुणा नैव लङ्घितम् ।
अतोऽद्वैतगृहे तस्थौ यात्रां विरमयन्नसौ ॥१९६
तेनाचार्य्यशचीभक्ताः सर्वे हर्षं प्रपेदिरे ।
महामहोत्सवं चक्रेऽद्वैतस्तु प्रतिवासरम् ॥१९७
दिवा भक्तजनैः कृष्णकथारसनिषेवणात् ।
नक्तञ्च कीर्त्तनानन्दाज्जातो महामहोत्सवः ॥१९८
रन्धनं श्रीशचीमाता चकारानन्दितान्तरा ।
सर्वैर्भक्तजनैः साकं सुखेन बुभुजे प्रभुः ॥१९९
श्रद्धा भक्तिर्गृहं सम्पदाचार्य्यस्य धनानि च ।
प्रापुः सर्वाणि साफल्यमेवमाराधनात् प्रभोः ॥२००
आनन्दो ववृधे शच्याः पश्यन्त्यास्तनयाननम् ।
भोजयन्ती सुतं माता स्वसुखं पर्य्यपूरयत् ॥२०१
एवं भक्तजनैः सार्द्धं मिलित्वाद्वैतमन्दिरे ।
महाकौतूहलेनासौ निनायाहानि कानिचित् ॥२०२
अपरेद्युः प्रभुः प्रोचे सर्वान् भक्तजनांस्ततः ।
स्वं स्वं निकेतनं सर्वे यूयं गच्छत साम्प्रतम् ॥२०३
कृष्णसङ्कीर्त्तनं सर्वे गृहं गत्वा विधत्त च ।
युष्माभिः सह भूयोऽपि मिलनं मे भविष्यति ॥२०४
भवन्तोवा गमिष्यन्ति कदाचिन्नीलपर्वतम् ।
उताहो आगमिष्यामि गङ्गास्नानाय जात्विति ॥२०५
श्रीनित्यानन्दगोस्वामी जगदानन्दपण्डितः ।
दामोदरपण्डितश्च मुकुन्दोदत्त इत्यमी ॥२०६

चत्वारः प्रभुणा जग्मुराचार्य्येण प्रयोजिताः ।
जननीं सान्त्वयंस्तस्या ववन्दे चरणौ प्रभुः ॥२०७

ताश्च प्रदक्षिणीकृत्य तस्मिन् यात्रार्थं मुद्यते ।
क्रन्दनध्वनिरुत्तस्थौ तत्राचार्यनिकेतने ॥२०८

निर्व्यपेक्षस्ततः शीघ्रमारेभे चलितुं प्रभुः ।
रोरुद्यमान आचार्यस्तस्य पश्चाच्चचाल च ॥२०९

ततो गत्वा कियद्दूरं युक्ताञ्जलिपुटः प्रभुः ।
आचार्य्यं सान्त्वयन् किञ्चिद्वचो मधुरमब्रवीत् ॥२१०

मातरं सान्त्वय त्वं मे भक्तांश्च शमयाचिरम् ।
त्वयि व्यग्रे न कस्यापि प्राणाः स्थास्यन्ति निश्चितम् ॥२११

इत्येवं प्रभुराचार्य्यं कथयित्वालिलिङ्ग तम् ।
तं परावर्त्तयन्नेव सच्छन्दं प्रययौ द्रुतम् ॥२१२

तैश्चतुर्भिः समं गङ्गातीरं प्रभुरुपागमत् ।
छत्रभोगपथेनाभि-नीलाद्रि प्रस्थितः प्रभुः ॥२१३

चैतन्यमङ्गलग्रन्थे नीलाद्रिगमनं प्रभोः ।
श्रीवृन्दावनदासेन वर्णितन्तु सविस्तरम् ॥२१४

विलासं शृणुयाद्यस्तु प्रभोरद्वैतवेश्मनि ।
प्राप्नुयात् सोऽचिरादेव कृष्णप्रेममहाधनम् ॥२१५

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२१६

इति श्रीचैतन्यचरितामृते मध्यखण्डे सन्न्यासकरणाद्वैतगृहविलासो नाम तृतीयः परिच्छेदः

मध्यलीलायां चतुर्थः परिच्छेदः

"यस्मै दातुं चोरयन् क्षीरभाण्डं
गोपीनाथः क्षीरचोराभिधोऽभूत् ।
श्रीगोपालः प्रादुरासीद्वशः सन्
यत् प्रेम्ना तं माधवेन्द्रं नतोऽस्मि ॥१"

जयोऽस्ताद् गौरचन्द्रस्य नित्यानन्दोजयत्यथ ।
जयोऽस्त्वद्वैतचन्द्रस्य गौरभक्ता जयन्ति च ॥१
नीलाद्रिगमनं श्रीमज्जगन्नाथस्य दर्शनम् ।
मिलनं सार्वभौमेण भट्टाचार्येण च प्रभोः ॥२
श्रीवृन्दावनदासेन सर्वालीलाः प्रभोरिमाः ।
सुप्रकाशमवर्ण्यन्त सुषमञ्च सविस्तरम् ॥३
श्रीचैतन्यविहारोऽसौ प्रकृत्या मधुराद्भुतः ।
निःसृतो नु सुधाधारो दासबृन्दावनाननात् ॥४
मयातो वर्ण्यमानेऽस्मिन् पुनरुक्तिर्भविष्यति ।
वर्णये यदि दम्भेन तथाशक्तिर्नमे तदा ॥५
चैतन्यमङ्गलग्रन्थे या लीलास्तेन वर्णिताः ।
सूत्ररूपेण ताः सर्वाः सूच्यन्तेऽत्र मयाधुना ॥६
सन्ति तत्कृतसूत्राणि वर्ण्यन्ते तानि नो मया ।
विधिना येन केनापि सा लीलैवात्र वर्ण्यते ॥७
अतएव नमस्यामि तस्य श्रीचरणाम्वुजे ।
प्रार्थये तस्यपादाब्जे नापराधोममास्त्विति ॥८
इत्थं भक्तैश्चतुर्भिस्तै र्ययौ नीलाचलं प्रति ।
कृष्णसङ्कीर्त्तनास्वादकौतुकेन महाप्रभुः ॥६
प्रविवेश च भिक्षार्थं कञ्चन ग्राममेकदा ।
याचमानः स्वयं तस्मात् प्रभूतान्नमुपानयत् ॥१०

महान्तो मार्गशुल्कादाः पथि विघ्नं न चाचरन् ।
दयमानः स तान् सर्व्वान् रेमुणामागतः प्रभुः ॥११

तस्यां विराजते गोपीनाथः परममोहनः ।
भक्त्या सन्दर्शनं तस्य कृतवान् श्रीमहाप्रभुः ॥१२

तस्य श्रीचरणाम्भोजं निकषा नमतः प्रभोः ।
शिरसि न्यपतत् पुष्पचूड़ा देवस्य मस्तकात् ॥१३

तां प्राप्यैवातिसन्तुष्ट-मानसोऽभून्महाप्रभुः ।
बहुशो नृत्यगीतानि चक्रे भक्तजनैः समम् ॥१४

प्रेम-रूप-गुणान्दृष्ट्वा प्रभावञ्च प्रभोस्तदा ।
विस्मयं परमं जग्मु र्गोपीनाथस्य सेवकाः ॥१५

सेव्यमानः प्रभुस्तैश्च बहुधा प्रेमपूर्वकम् ।
यापयामास सानन्दं तत्रासौ तां विभावरीम् ॥१६

पुरेश्वरपुरीस्वामी यस्य बृत्तान्तमब्रवीत् ।
महाप्रसादक्षीरं तल्लिप्सुस्तत्रस्थितः प्रभुः ॥१७

क्षीरचोरगोपीनाथ इत्याख्या विश्रुता यतः ।
तदाख्यानमुवाचासौ तत्र भक्तजनानथ ॥१८

पुरा माधवपुर्य्यर्थं देवः क्षीर मचोरयत् ॥
क्षीरचोर इतिख्यातो गोपीनाथोऽभवत्ततः ॥१९

माधवेन्द्र पुरीस्वामी पुरा वृन्दावनं गतः ।
परितोभ्रमता तेन प्राप्तो गोवर्धनो गिरिः ॥२०

रात्रिर्वाहरितिज्ञान-हीनः प्रेमोन्मदः स हि ।
क्षणादुत्थाय चापसत् स्थानास्थाने विवेद न ॥२१

गोविन्दकुण्डमायातः कृत्वा शैलपरिक्रमम् ।
स्नात्वा चोपाविशत् सायं वृक्षमूलसमाश्रितः ॥२२

गोपालबालकः कश्चिदादाय दुग्धभाजनम् ॥
तमुपेत्य पुरोधृत्वा हसन् किञ्चिदभाषत ॥२३

पुरीस्वामिन्निदं दुग्धं गृहीत्वा त्वं पिवाधुना ।
याचित्वा न कथं भुङ्क्षे किंवा ध्यायसि सर्वदा ॥२४
बालस्यालोक्य सौन्दर्य्यं पुरीस्वामी तुतोष च ।
सान्त्वेन वचसा तस्य विसस्मार च तृट्क्षुधौ ॥२५
अपृच्छत् सोऽथ कस्त्वं भो निवासः कुत्र वा तव ।
उपवासं करोमीति कथं त्वमवगच्छसि ॥२६
बालः प्रोवाच गोपोऽस्मि ग्रामेऽस्मिन्निवसामि च ।
मम ग्रामे जनः कश्चिदुपवासी न तिष्ठति ॥२७
कोऽप्यन्नं याचितं भुङ्क्ते दुग्धं पिवति कोऽपि वा ।
जनायायाचकायैव भोज्यं तावद्ददाम्यहम् ॥२८
जलायागत्य नार्य्यस्तु त्वां विलोक्य गृहं गताः ।
ताः प्रैरयंश्च मामत्र दुग्धं दत्त्वा तवान्तिकम् ॥२९
गोदोहनं करिष्यामि ततः शीघ्रं व्रजाम्यहम् ।
भाण्डमेतद् ग्रहीष्यामि पुनरेत्य तवान्तिकात् ॥३०
इत्युक्त्वा गतवान् बालः पुनर्नैवावलोकितः ।
तन्माधवपुरीस्वामी नितरां विस्मितोऽभवत् ॥३१
दुग्धं निपीय तद्भाण्डं प्रक्षाल्यास्थापयच्च सः ।
पश्यन्नासीच्च तन्मार्गं पुनर्बालस्तु नाययौ ॥३२
पुरीस्वामी जपन्नाम तत्रासीनो विनिद्रकः ।
अन्त्यरात्रेऽगमत्तन्द्रां वाह्यवृत्तिनिरोधिनीम् ॥३३
ततः स्वप्नं ददर्शासौ पुर एत्य स बालकः ।
कुञ्जमेकं निनायामुं धृत्वा पाणिं स्वपाणिना ॥३४
कुञ्जं प्रदर्शयन् प्रोचे कुञ्जेऽस्मिन्निवसाम्यहम् ।
प्राप्नोम्यत्र महादुःखं शीतवृष्टिदवाग्निभिः ॥३५
आनीय ग्रामतो लोकान्मां निष्काशय कुञ्जतः ।
पर्वतोपरि मां नीत्वा साधु संस्थापय द्रुतम् ॥३६

निर्मायैकं मठं तत्र मां निवासय सम्प्रति ।
प्रचुरैर्वारिभिः शीतैः स्नापय श्रीलविग्रहम् ॥३७
चिरादुदीक्षमाणोऽस्मि तवागमपथं प्रति ।
कदा माधव आगत्य मम सेवां करिष्यति ॥३८
तव प्रेमवशादेव सेवामङ्गीकरोम्यहम् ।
सर्वेभ्यो दर्शनं दत्त्वा तारयिष्यामि संसृतेः ॥३९
श्रीगोवर्द्धनधारी श्रीगोपाल इति नाम मे ।
वज्रेन स्थापितश्चास्मि योऽत्रासीदाधिकारिकः ॥४०
स शैलशृङ्गादानीय कुञ्जेऽस्मिन्मां निगूहयन् ।
मदीयः सेवकः पश्चान्म्लेच्छभीत्या पलायत ॥४१
तदाप्रभृति तिष्ठामि सुचिरं कुञ्जमध्यगः ।
दिष्ट्यासि त्वं समायातोऽवहितो मां वहिर्नय ॥४२
इत्येवं कथयित्वैव तस्मिन् वाले तिरोहिते ।
माधवेन्द्र पुरीस्वामी जाग्रदेवं व्यतर्कयत् ॥४३
श्रीकृष्णोऽसौ मयादृष्टो नाभिज्ञातुं त्वशक्यत ।
इत्युक्त्वा न्यपतद्भुमौ प्रेमावेशवशेन सः ॥४४
कियच्चिरं रुदित्वैवं बभूव स्थिरमानसः ।
तदादेश मनुष्ठातु मालम्बे च धीरताम् ॥४५
प्रातः स्नातः पुरीस्वामी जगाम ग्राममन्तरा ।
तत्रैकत्र समाहूय जनान् वक्तुं प्रचक्रमे ॥४६
श्रीगोवर्द्धनधारीति युष्माकं ग्रामदेवता ।
कुञ्जे वर्त्तत आयातानेष्यामस्तं वहिस्ततः ॥४७
कुञ्जस्त्वतीव सान्द्रोऽयं प्रवेष्टुं नैव शक्यते ।
गृह्यन्तामवकाशाय कुद्दालाश्च कुठारकाः ॥४८
इत्याकर्ण्य जनाहृष्टास्तेन सार्द्धं प्रतस्थिरे ।
भित्त्वा कुञ्जं कृतद्वारं प्रविष्टास्ते यथासुखम् ॥४९

मृत्तृणाच्छादितं देवविग्रहं तं विलोक्य ते ।
आनन्देनाभवन् सर्वे विमूढ़ा विस्मयेन च ॥५०
तत आवरणं दूरीकृत्य देवः प्रकाशितः ।
नासीच्चालयितुं शक्यो गुरुभारोऽति विग्रहः ॥५१
महामहाबलिष्ठास्ते समवेता जनास्तदा ।
उद्गृह्यारोपयामासुस्तं देवं पर्वतोपरि ॥५२
ततः शिलामये सिंहासनेऽसावुपवेशितः ।
पृष्ठावलम्बनं दत्तं तस्यैकेन महाश्मना ॥५३
ब्राह्मणा ग्रामवास्तव्या उदूढैर्नूतनैर्घटैः ।
उत्पूतं वारि गोविन्दकुण्डादानिन्यूरेकदा ॥५४
नव्यं घटशतं वारिपूर्णं तत्र समाहृतम् ।
भेर्य्यादीनि च वाद्यानि वादितानि स्त्रियोजगुः ॥५५
जगु र्वा ननृतुः केचिदेवमासीन्महोत्सवः ।
ग्रामोत्पन्नानि यावन्ति दधिदुग्धघृतानि च ॥५६
आमिक्षिकादिभोज्यानि सम्भृतानि ततस्ततः ।
वस्तून्यनेकसंख्यानि यत्नेनैवाहृतानि च ॥५७
आनीतानि तुलस्यादिपुष्पाणि वसनानि च ।
माधवेन्द्र पुरीस्वामी स्वयं तमभिषिक्तवान् ॥५८
दूरीकृत्याङ्गमालिन्यं स्नापयामास तञ्च सः ।
चिक्कणीकृतवानङ्गं बहुतैलैश्च मर्दयन् ॥५९
स्नपयन् पञ्चगव्यैस्तमादौ पञ्चामृतैस्ततः ।
अकारयन्महास्नानं घटानां शतकेन च ॥६०
पुनश्चकार तैलेन चिक्कणं श्रीकलेवरम् ।
शङ्ख-गन्धोदकाभ्यां स ततः स्नानं समापयत् ॥६१
मार्जयन् श्रीमदङ्गं स वसनं पर्य्यधापयत् ।
चन्दनं तुलसीं पुष्पमाल्यञ्चाङ्गे ददौ ततः ॥६२

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

धूपदीपादिभि र्नानाभोगैः स तमयोजयत् ।
यथाप्राप्तेन दध्ना च दुग्धेनामिक्षिकेण च ॥६३
स्वच्छं सुवासितं वारि निहितं नवभाजने ।
समर्प्याचमनं तस्मै ताम्बुलञ्च न्यवेदयत् ॥६४
ततो नीराजनं कृत्वा चकार बहुधा स्तवम् ।
प्रणम्य दण्डवद्भूमौ चकारात्मसमर्पणम् ॥६५
दाली-तण्डुल-गोधूमचूर्णै र्ग्रामात् समाहृतैः ।
निवेदितैश्च तैःसर्वै पूर्णोऽभूत् स च पर्वतः ॥६६
मृद्भाजनानि यान्यासन् कुम्भकारस्य वेश्मनि ।
तैः सर्वैराहृतैः प्रातरारब्धं रन्धनं ततः ॥६७
अन्नं राशीकृतं तत्र पचद्भिर्दशभिर्द्विजैः ।
चतुष्पञ्चैर्जनैः सूप-व्यञ्जनादि च रन्धितम् ॥६८
वन्यैः शाकैः फलैर्मूलै र्व्यञ्जनं बहुधा कृतम् ।
केचन ब्राह्मणाश्चक्रुर्वटिकावटकान् बहून् ॥६९
पञ्चसप्ता जनाः पौलीन् कृतवन्तश्च राशिशः ।
सर्पिराप्लुत मेवासीदोदन-व्यञ्जनादिकम् ॥७०
पातिते नूतने वस्त्रे पलाशच्छद-संबृते ।
पाचंपाचञ्च भक्तानि तत्र स्तूपीकृतानि च ॥७१
क्षुद्रोऽद्रिरिव तत्पार्श्वे पौलिराशिरशोभत ।
सूप-व्यञ्जनपात्राणि स्थापितानि समन्ततः ॥७२
पार्श्वे शिखरिणी दुग्धं मथितं दधि चाहितम् ।
पायसं नवनीतञ्च सरश्चासं स्तदन्तिके ॥७३
इत्थं सुसज्जितं कुर्वन्नन्नकूटं मनोरमम् ।
श्रीमाधवपुरीस्वामी गोपालाय न्यवेदयत् ॥७४
घटैर्बहुभिरापूर्य्य ददौ वारि सुवासितम् ।
क्षुधया चिरवर्त्तिन्या गोपालो बुभुजेऽखिलम् ॥७५

व्यञ्जनान्नानि निःशेषं गोपालेनाशितान्यपि ।
बभूवुस्तत्करस्पर्शात्तथा पूर्णानि पूर्ववत् ॥७६
इति माधव गोस्वामी साक्षादेवानुभूतवान् ।
श्रीगोपालेन गोसव्यं तस्मात् किञ्चन नाभवत् ॥७७
ऐकाहिकेन यत्ने न कृतस्तादृङ् महोत्सवः ।
गोपालस्य महिम्नैवेत्यपरे नाविदन् जनाः ॥७८
अथ स्वामी तमाचाम्य ददौ ताम्बूलवीटिकाम् ।
कुर्वत्यारात्रिकं तस्मिँल्लोकाश्चक्रुर्जयध्वनिम् ॥७९
नवं पर्य्यङ्कमानीय शय्यां सोऽस्मिन्नकल्पयत् ।
पुरीस्वामी नवं वासस्तत्रैवास्तृतवान् पुनः ॥८०
तृणपर्णैर्वृतिं बद्ध्वा दिशः सर्वाः समावृणोत् ।
ऊर्द्ध्वमप्येकया वृत्या स आच्छादितवांस्ततः ॥८१
आज्ञापयत् पुरीस्वामी सकलान् ब्राह्मणानथ ।
सर्वान् भोजयतावालवृद्धं ग्रामजनानिति ॥८२
तत्रागत्यो पविष्टास्ते भुक्तवन्तो यथाक्रमम् ।
भोजिता ब्राह्मणा आदौ ब्राह्मण्यस्तदनन्तरम् ॥८३
यावन्तो द्रष्टुमायाता अन्ये ग्रामनिवासिनः ।
तेऽपि गोपालमालोक्य प्रसादं प्रापुरन्ततः ॥८४
स्वामिनस्तं प्रभावं तैर्दृष्ट्वा लोकैः सुविस्मितैः ।
द्वापरस्यान्नकूटोऽसावत्र दृष्ट इवाधुना ॥८५
सर्वान् विप्रान् पुरीस्वामी कृत्वा दीक्षितवैष्णवान् ।
तत्र तत्र च सेवासु न्ययोजयत तानपि ॥८६
पुनस्तद्दिवसान्ते स समुत्थापितवान् प्रभुम् ।
किञ्चिन्निवेद्य नैवेद्यं जलञ्चापाययत् पुनः ॥८७
गोपालः प्रकटोऽत्रेति प्रवादाद्देशमन्तरा ।
लोका द्रष्टुं तमाजग्मुर्ग्रामेभ्यश्च समन्ततः ॥८८

याचित्वैकैकशो ग्रामान् दिनेष्वेकैकशो जनाः ।
अन्नकूटं ततश्चक्रुर्याचितै हृष्टमानसाः ॥८६
विभावर्य्यां पुरीस्वामी गोपालं शाययन्नथ ।
दुग्धजातं यथाप्राप्तं भुक्तवान् किञ्चन स्वयम् ॥६०
स प्रातः पुनरुत्थाय देवसेवां तथाकरोत् ।
एकस्माद् ग्रामतो लोका भोज्यद्रव्यं तदानयन् ॥६१
ग्रामाद् यावन्ति भोज्यानि दधिदुग्धघृतानि च ।
आनीय न्यदधुस्तत्र गोपालस्य पुरो जनाः ॥६२
पूर्वेद्यु रिव ते विप्राः कृतवन्तश्च रन्धनम् ।
अन्नकूटं तथैवाभूद् गोपालोबुभुजे तथा ॥६३
श्रीकृष्णे सहजा प्रीतिर्जनानां व्रजवासिनाम् ।
गोपालस्यापि तेष्वेव प्रीतिः स्वाभाविकी तथा ॥६४
सर्वे महाप्रसादं ते समायाता अभुञ्जत ।
ततो गोपालमालोक्य दुःखशोकौ जहुर्जनाः ॥६५
ग्रामा यावन्त आसंश्च व्रजभूमेः समन्ततः ।
तत्रत्या दिन मेकैकं जनाश्चक्रुर्महोत्सवम् ॥६६
गोपालं प्रकटं श्रुत्वा नाना देशविदेशतः ।
विविधद्रव्यसम्भारै र्जनास्तत्र समाययुः ॥६७
मथुरापुरवास्तव्या महाद्रविणशालिनः ।
नाना वस्तूनि ते भक्त्योपायनानि ददुर्जनाः ॥६८
स्वर्णै रोप्यैश्च वासोभिर्गन्धैर्भोज्यैरुपाहृतैः ।
असंख्यैरागतै र्नित्यं भाण्डागारो व्यवर्द्धत ॥६६
महर्द्धिः क्षत्रियः कश्चित् प्रासादं निरमापयत् ।
पाकशालां तथा कोऽपि प्राचीरञ्च तथापरः ॥१००
प्रत्येकं व्रजवास्तव्या धेनूरेकैकशो ददुः ।
गोपालस्याभवं स्तेन धेनवोऽपि सहस्रशः ॥१०१

द्वौ विप्रावथ वैराग्यवन्तौ गौड़ेभ्य आगतौ ।
श्रीमाधपुरीस्वामी सयत्नं तौ न्यवासयत् ॥१०२
कृत्वा शिष्यावुभौ सेवाभारं ताभ्यां समर्पयन् ।
दृष्ट्वा तां राजवत् सेवां स्वामी हर्षावधिंगतः ॥१०३
इत्थं वर्षद्वयं स्वामी श्रीगोपालमसेवत ।
अथैकदा तु यामिन्यां स्वप्नमेवं ददर्श सः ॥१०४
गोपालः प्राह तापोमे पुरीस्वामिन्न शाम्यति ।
मालयं चन्दनं लिम्प ततस्तापो विलुम्पति ॥१०५
अतो नीलाचलादेवानय मालय-चन्दनम् ।
न तु देशान्तराज्जातु गच्छ त्वं त्वरितं ततः ॥१०६
स्वप्नं दृष्ट्वा पुरीस्वामी प्रेमावेशवशोऽभवत् ।
प्रभोराज्ञामनुष्ठातुं प्राग्देशं गन्तुमुद्यतः ॥१०७
ततो देवस्य सेवार्थं सेवकान् स नियोजयन् ।
याचित्वा प्रभुमादेशं गौड़देशं जगाम च ॥१०८
स शान्तिपुरमायातोऽद्वैताचार्य्यस्य मन्दिरम् ।
आचार्यः स्वामिनः प्रेम दृष्ट्वा हृष्टान्तरोऽभवत् ॥१०९
स सयत्नादरेणातः स्वामिनो मन्त्रमग्रहीत् ।
दीक्षयंस्तं पुरीस्वामी प्रययौ दक्षिणां दिशम् ॥११०
गोपीनाथं ददर्शाथ रेमुणापत्तनं गतः ।
दृष्ट्वा तद्रूपसौन्दर्य्यं सोऽभूद्विह्वलमानसः ॥१११
मन्दिरालिन्दमध्यास्त नृत्यगीते समापयन् ।
किं किं नैवेद्यमत्रेति सोऽपृच्छद् ब्राह्मणं प्रति ॥११२
सेवा-सौष्ठवमालोक्य तेनानन्दितचेतसा ।
युज्यतेऽत्रोत्तमो भोग इत्येवानुमितं ततः ॥११३
अत्र देवस्य यद् यावत् भोज्यं श्रोष्याम्यशेषतः ।
श्रीगोपालाय तत्तावद् योजयिष्यामि सर्वथा ॥११४

इत्यतः परिपप्रच्छ स्वामी तं सेवक-द्विजम् ।
नैवेद्यविवृतिं सोऽपि तं प्रत्यूचे यथायथम् ॥११५

पूर्णं द्वादशभिः पात्रैमृन्मयैरमृतोपमम् ।
क्षीरं सायन्तनो भोगोऽमृतकेलिर्निवेद्यते ॥११६

गोपीनाथस्य विख्यातं क्षीरमित्येव कथ्यते ।
पृथिव्यां तादृशं भोज्यं क्वाप्यन्यत्र न विद्यते ॥११७

अस्मिन्नवसरे भोगो देवतायै निवेदितः ।
तदाकर्ण्य पुरीस्वामी हृदा किञ्चिदचिन्तयत् ॥११८

क्षीरप्रसादमाप्स्यामि यद्यल्पमप्ययाचितम् ।
ज्ञात्वास्वादं तथा क्षीरं गोपालाय प्रदास्यते ॥११९

एवमिच्छोदयाल्लज्जां प्राप्तोऽसौ विष्णुमस्मरत् ।
भोगावसान उत्तस्थौ तदा नीराजनध्वनिः ॥१२०

तत आरात्रिकं दृष्ट्वा पुरीस्वामी प्रणम्य च ।
वहिरागतवान् भूयोनैव किञ्चिदभाषत ॥१२१

उदासीनोविरक्तः सोऽभूदयाचकवृत्तिकः ।
बुभुजेऽयाचित-प्राप्तमन्यथा स उपावसत् ॥१२२

प्रेमामृतेन तृप्तोऽसौ क्षुत्तृड्भ्यां न च पीड़ितः ।
अपराधिन मात्मानं मेने तत्क्षीरलिप्सया ॥१२३

शून्यहट्टे यदासीनः स ग्रामे कीर्त्तनं जगौ ।
तदा पूजकविप्रोऽसौ गोपीनाथमशाययत् ॥१२४

निजकृत्यं समाप्यैव मधिशिश्येऽथ पूजकः ।
स्वप्ने देवः समागत्य वाक्यमेव मुवाच तम् ॥१२५

उत्तिष्ठ पूजक द्वारमत्रोद्घाटय सत्वरम् ।
क्षीरपात्रं मया न्यस्तमेकं सन्न्यासिनः कृते ॥१२६

क्षीरभाजनमस्त्येकं मम वस्त्राञ्चलावृतम् ।
पुष्माभिर्नैव विज्ञातं मम मायाप्रभावतः ॥१२७

श्रीमाधवपुरीस्वामी हट्टमध्यास्य वर्त्तते ।
सत्वरं तत्र गत्वा त्वं तस्मै क्षीरं समर्पय ॥१२८
पूजकः स्वप्नमालोक्य मनसा निरधारयत् ।
स्नात्वा कवाटमुन्मोच्य गृहद्वारमपावृणोत् ॥१२९
तच्च वस्त्राञ्चलाधस्तात् स प्राप्नोत् क्षीरभाजनन् ।
स्थानं विशोध्य तत्-क्षीरपात्रपाणिर्वहिर्गतः ॥१३०
द्वारं रुद्ध्वा तदादाय ग्राममध्यं विवेश सः ।
पुरीस्वामिन मन्वैष्यत् प्रतिहट्टं परिभ्रमन् ॥१३१
भो भोः क्षीरं गृहाणेदं यो नाम्ना माधवःपुरी ।
भवदर्थमिदं गोपीनाथः क्षीरमचोरयत् ॥१३२
क्षीरमेतत् समादाय भवता भुज्यतां सुखम् ।
कोऽपि लोकत्रये नास्ति भाग्यवान् भवता समः ॥१३३
इत्याकर्ण्य पुरीस्वामी तमात्मान मजिज्ञपत् ।
क्षीरं समर्प्य विप्रोऽसौ दण्डवत् प्रणनाम तम् ॥१३४
सर्वं क्षीरस्य बृत्तान्तं जगाद च सविस्तरम् ।
आकर्ण्यैवं पुरीस्वामी प्रेमाविष्टोऽभवत्तदा ॥१३५
प्रेमलक्षण मालक्ष्य विस्मितः पूजकोऽब्रवीत् ।
कृष्णोऽस्य वशमायात इति यत्तद् यथोचितम् ॥१३६
इत्युक्त्वा तं नमस्कृत्य ब्राह्मणे निलयं गते ।
प्रेमाविष्टः पुरीस्वामी तच्च क्षीरमभक्षयत् ॥१३७
ततः प्रक्षाल्य तत्पात्रं खण्डशः कृतवान् पुनः ।
वाह्येन वाससा तानि खण्डान्यपि बबन्ध सः ॥१३८
अथ प्रत्यह मेकैकं खण्डं भक्षितवानसौ ।
प्रेमाविष्टोऽभवद्भुक्त्वा तत्खण्डमिति चाद्भुतम् ॥१३९
देवता मेऽददात् क्षीरमित्याकर्णयतां नृणाम् ।
जानताञ्च प्रतिष्ठां मे सङ्कटोभविता दिने ॥१४०

इत्याशङ्क्य पुरीस्वामी निशान्ते प्रस्थितस्ततः ।
गोपीनाथश्च तत्रैव प्राणमद्दण्डवद्भुवि ॥१४१
पथा गच्छन् क्रमेणासौ प्राप्तो नीलाचलं ततः ।
तत्र दृष्ट्वा जगन्नाथं वभूव प्रेमविह्वलः ॥१४२
प्रेम्णोत्तिष्ठन्नपतच्च हसन्नृत्यन् जगौ च सः ।
जगन्नाथं समालोक्य लेभे सातिशयं सुखम् ॥१४३
श्रीमाधवपुरीस्वामी प्राप्तोऽत्रेति जनश्रुतिम् ।
प्राप्य लोकाः समागत्य तस्मै भक्तिमदर्शयन् ॥१४४
प्रतिष्ठायाः स्वभावोऽयं विदितो जगतीतले ।
यस्तां नेच्छति तस्यैव सा विधात्रा विधीयते ॥१४५
प्रतिष्ठाशङ्कया स्वामी स पलायितु मुद्यतः ।
प्रतिष्ठानुलगन्ती तु कृष्णभक्तं तमन्वगात् ॥१४६
यद्यप्युद्विग्नचित्तोऽसौ तत ऐच्छत् पलायितुम् ।
किन्तु तत्रान्तरायोऽभूत् प्रभोश्चन्दनसंग्रहः ॥१४७
तत्रत्या ये महान्तो ये जगन्नाथस्य सेवकाः ।
सर्वं गोपालवृत्तान्तं स्वामी तानवदत्तदा ॥१४८
गोपालश्चन्दनार्थीति श्रृण्वती भक्तसंहतिः ।
चन्दनस्य कृते यत्नं सानन्दमकरोत्तदा ॥१४९
ये राजपुरुषैः सार्द्धं संस्तुता अभवन् जनाः ।
ते तान् सम्प्रार्थ्य कर्पूरचन्दने जगृहुस्ततः ॥१५०
तैरेको ब्राह्मणश्चैको भृत्यश्चन्दनवाहकः ।
पुरीगोस्वामिना सार्द्धं सपाथेयं नियोजितौ ॥१५१
पथि शुल्काच्च तान् मोक्तुं लेखितां राजपूरुषैः ।
पुरीगोस्वामिनो हस्ते ददुस्ते राजपत्रिकाम् ॥१५२
ततश्चन्दनमादाय प्रतस्थे स्वामिमाधवः ।
दिनैः कतिपयैरेव रेमुणां पुनरागतः ॥१५३

प्राणमत् बहुशो गोपीनाथस्य चरणाम्बुजम् ।
भूयिस्ठं कृतवान्नृत्यगीतानि प्रेमविह्वलः ॥१५४
पुरीस्वामिनमालोक्य बहुमन्यन्त सेवकाः ।
दत्त्वा क्षीरप्रसादं ते तेन भिक्षामकारयन् ॥१५५
तस्यां रात्रौ पुरीस्षामी शयानोदेवमन्दिरे ।
निशाया अन्तिमे भागे स्वप्नमेकं ददर्श च ॥२५६
स्वप्ने गोपाल आगत्य प्रोक्तवान् शृणु माधव ।
कर्पूरं चन्दनं सर्वमधुना प्राप्तवानहम् ॥१५७
घर्षन् कर्पूरसंयुक्तमेतं चन्दनसञ्चयम् ।
तेनैव प्रत्यहं लिम्प गोपीनाथस्य विग्रहम् ॥१५८
एकमेव वपुर्गोपीनाथस्य मम च ध्रुवम् ।
तस्मि श्चन्दन संलिप्ते मम तापक्षयो भवेत् ॥१५९
अतो मा कुरु सन्देहं न किञ्चिच्चिन्तयान्यथा ।
श्रद्धया चन्दनं देहि मम वाक्यानुसारतः ॥१६०
इत्युक्त्वा याति गोपाले गोस्वामी जाग्रदुत्थितः ।
आहूयाकथयत् सर्वान् गोपीनाथस्य सेवकान् ॥१६१
प्रभुणा कृत आदेश एतत् कर्पूरचन्दनम् ।
प्रत्यहं विग्रहे गोपीनाथस्य लिप्यतामिति ॥१६२
तदस्मै चन्दने दत्ते गोपालः शीतलो भवेत् ।
ईश्वरस्तु स्वतन्त्रोहि तदाज्ञा स्याद्बलीयसी ॥१६३
गोपीनाथो निदाघेऽस्मिंश्चन्दनेन विलिप्यते ।
इत्याकर्ण्य बभूवु स्ते सेवका हृष्टचेतसः ॥१६४
स्वामिनोक्त मिमौ मे द्वौ चन्दनं घर्षयिष्यतः ।
आनय द्वौ जनावन्यौ ताभ्यां दास्यामि वेतनम् ॥१६५
अथ प्रत्यहमेवैते चन्दनं तदघर्षयन् ।
सानन्दं सेवकास्तेन लिलिपुर्देवविग्रहम् ॥१६६

प्रत्यहं चन्दनं लिप्तं निःशेषमभवद् यदा।
तदावधि पुरीस्वामी तत्रैवासीदवस्थितः ॥१६७
निदाघस्यावसानेऽसौ पुनर्नीलाचलं गतः।
चातुर्मास्यविधिं तत्र सानन्द मचरत्तदा ॥१६८
इति श्रीमाधवस्वामि-चरितामृत मद्भुतम्।
मुखेन श्रावयन् भक्तानिद मास्वादयत् प्रभुः ॥१६९
कथितं प्रभुणा नित्यानन्देदानीं विचारय।
पुरीस्वामिसमः कोऽपि नास्ति सौभाग्यवान् भुवि ॥१७०
दुग्धदानच्छलात् कृष्णो यमात्मानमदर्शयत्।
यस्मै चाज्ञां ददौ वारत्रयं स्वप्ने समागतः ॥१७१
आविर्भूय स्वयं कृष्णो यस्य प्रेमवशंगतः।
जगदुद्धारयामास स्वीकुर्वन् यस्य सेवनम् ॥१७२
चीरं तच्चोरयामास. गोपीनाथोऽपि तत्कृते।
यस्य चन्दनकर्पूरैः श्रीमदङ्गं लिलेप च ॥१७३
कर्पूरं चन्दनञ्चास्य वहतो म्लेच्छ-मार्गतः।
भविष्यति महत्कष्टमिति जानन् कृपामयः ॥१७४
स्वयमेव हि गोपालदेवोऽसौ भक्तवत्सलः।
सफलं कृतवान् भक्तश्रमं चन्दनचर्च्चितः ॥१७५
परां काष्ठां गतं पुर्य्यां प्रेमाणं तु विचारय।
अलौकिकेन तत्-प्रेम्ना जायते विस्मयो महान् ॥१७६
सर्वत्रासीदुदासीनो मौनी वैराग्यवान् परम्।
ग्राम्यवार्त्ताभिया त्यक्त-द्वितीय-जनसङ्गमः ॥१७७
इत्थम्भूतः स गोपालात् प्राप्यादेशामृतं तदा।
व्यचरच्चन्दणं याचन् क्रोशसाहस्रमागतः ॥१७८
स क्षुधा पीड्यमानोऽपि भोक्तुं नान्नमयाचत।
भारं चन्दनकाष्ठानां वहन्नेव ययावसौ ॥१७९

विंशतितोल-कर्पूरै र्मणमेयैश्च चन्दनैः ।
चर्चयिष्यामि गोपालमित्यानन्दं परं गतः ॥१८०
चन्दनं वीक्ष्य रुन्धन्तं घट्टाध्यक्षं स उत्कले ॥
राजपत्रं प्रदर्श्यैव मुक्तिं लेभे करं विना ॥१८१
म्लेच्छदेशः सुदूराध्वा घट्टाश्चासंख्यकाः पुनः ।
तत् कथं चन्दनं नेयमिति नासौ व्यचिन्तयत् ॥१८२
घट्टीयकरदानाय नैकोऽप्यासीत् कपर्दकः ।
तथाप्युत्सहमानोऽभूत् स गन्तुं चन्दनं वहन् ॥१८३
गाढ़प्रेम्नः स्वभावोऽयं तथाचरणमीदृशम् ।
यत्र स्वदुःखविघ्नादिविचारोऽपि न जायते ॥१८४
लोके दर्शयितुं तस्य गाढ़ं प्रेमाणमीदृशम् ।
चन्दनानयनायैवं गोपालस्तं समादिशत् ॥१८५
चन्दनं नयतस्तस्य रेमुणां सुबहुश्रमम् ।
कष्टञ्चामन्यमानस्य हर्षोऽवर्द्धत चेतसि ॥१८६
आज्ञापयाञ्चकारैवं गोपालस्तं परीक्षितुम् ।
अवसाने परीक्षायास्तस्मिन् कारुणिकोऽभवत् ॥१८७
इत्थं भक्तिश्च भक्तेष्टकृष्णस्याचरणञ्च तत् ।
नैव विज्ञातुमस्माकमधिकारोऽपि वर्त्तते ॥१८८
इत्युक्त्वा तत्-कृतं श्लोकं पपाठैकं महाप्रभुः ।
येनैव श्लोकचन्द्रेण दीपितं भुवनत्रयम् ॥१८९
चन्दनं घृष्यमाणं हि यथा सौरभमश्नुते ।
श्लोको विचार्य्यमाणोऽयं माधुर्य्यं तनुते तथा ॥१९०
यथा विविधरत्नेषु शस्यते कौस्तुभोमणिः ।
तथा सरसकाव्येषु श्लोकोऽयं बहुमन्यते ॥१९१
श्रीमत्याराधिकादेव्या श्लोकोऽयं गदितोऽभवत् ।
अस्फुरन्माधवेन्द्रस्य वाणी तत्-कृपया पुनः ॥१९२

किमिवास्वादयामास श्लोकेऽस्मिन् गौरचन्द्रमाः ।
नास्यास्वादनशक्तोऽन्यश्चतुर्थः कोऽपि विद्यते ॥१९३

जीवनस्यान्तिमे काले पुरीस्वामी पठन्निमम् ।
श्लोकेनैनेन साकं स परां सिद्धिमविन्दत ॥१९४

"तथाहि पद्यावल्यां चतुस्त्रिंशदधिकत्रिशततमः श्लोकः—

अयिदीनदयार्द्रनाथ हे मथुरानाथ कदावलोक्यसे ।
हृदयं त्वदलोककातरं दयित भ्राम्यति किं करोम्यहम् ॥२"

पाठं पाठमिमं श्लोकमभवन्मूर्च्छितः प्रभुः ।
प्रेम्णा वैवश्यमापन्नः पतितश्च धरातले ॥१९५

नित्यानन्दस्तमुत्सङ्गे कृतवांश्च ससम्भ्रमम् ।
गौरचन्द्रस्तदोत्तस्थौ रोदनव्याकुलः परम् ॥१९६

प्रेमोन्मादात् समुत्थाय प्राधावत् स इतस्ततः ।
क्रोशंश्चकार हुङ्कारं जगौ नृत्यन् जहास च ॥१९७

अयिदीनायि दीनेति व्याजहार पुनः पुनः ।
कण्ठोऽभूत् स्तब्धवाक् तस्य साश्रुधारे च लोचने ॥१९८

कम्प-प्रस्वेद-रोमाञ्च-स्तम्भ-वैवर्ण्य-दीनताः ।
विषादजाड्य-निर्वेद-गर्वहर्षास्तमाश्रिताः ॥१९९

एष श्लोकः प्रभोः प्रेम्नः कपाटमुदघाटयत् ।
प्रेमनाट्यं प्रभोर्दृष्टं गोपीनाथस्य सेवकैः ॥२००

लोकसङ्घट्टमालोक्य वहिष्प्रज्ञोऽभवत् प्रभुः ।
भोगेऽर्पितेऽथ देवायोत्थितो नीराजनध्वनिः ॥२०१

शाययन् पूजको देवं वहिरेत्य प्रभोः पुरः ।
प्रसाद-क्षीर-पात्राणि द्वादशानीय चादधे ॥२०२

आनन्दो ववृधे क्षीरं पश्यतस्तन्महाप्रभोः ।
भक्तान् भोजयितुं पञ्चपात्राण्येव स आददे ॥२०३

तेन प्रत्यर्पितं पात्रसप्तकं पूजकाय तत् ।
विभक्तानि च भुक्तानि पञ्चक्षीराणि पञ्चभिः ॥२०४
स गोपीनाथरूपेण प्राक् तत् भुङ्क्ते स्म यद्यपि ।
पुनर्दर्शयितुं भक्तिं प्रसादमपि भुक्तवान् ॥२०५
तां रात्रिं यापयामास नामसङ्कीर्त्तनेन सः ।
मङ्गलारात्रिकं दृष्ट्वा प्रभाते प्रस्थितस्ततः ॥२०६
श्रीगोपीनाथ-गोपाल-पुरीगोस्वामिनां गुणान् ।
भक्तैरास्वादयामास श्रीमुखेन महाप्रभुः ॥ २०७
एतस्मिं स्तावदाख्याने कथितो महिमा द्वयोः ।
प्रभोश्च भक्तवात्सल्यं भक्तस्य प्रणयावधिः ॥२०८
य इदं शृणुयाच्छ्रद्धासमायुक्तेन चेतसा ।
स श्रीकृष्णपदाम्भोजे प्रेमसम्पद माप्नुयात् ॥२०९
य आशास्ते पदाम्भोजे श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२१०

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीमाधवेन्द्रपुरीचरितामृतास्वादनं नाम चतुर्थः परिच्छेदः ।

—०—

मध्यलीलायां पञ्चमः परिच्छेदः

"पद्भ्यां चलन् यः प्रतिमास्वरुपो
ब्रह्मण्यदेवो हि शताहगम्यम् ।
देशं ययौ विप्रकृतेऽद्भुतेहं
तं साक्षिगोपालमहं नतोऽस्मि ॥१"

जयतात् कृष्णचैतन्यो नित्यानन्दोजयत्वथ ।
जयोऽस्त्वद्वैतचन्द्रस्य गौरभक्ता जयन्तु च ॥१
व्रजन् पादसरोजाभ्यां ययौ याजपुरं प्रभुः ।
वराहं देवमालोक्य भक्त्यासौ प्रणनाम च ॥२

कृतवान्नृत्यगीतानि प्रेम्णा च स्तुतवान् बहु ।
नयत् याजपुरे रात्रिं तामथ प्रस्थितः प्रगे ॥३
द्रष्टुं श्रीसाक्षिगोपालं कटकं प्रभुरागतः ।
दृष्ट्वा गोपालसौन्दर्यं बभूवानन्दितान्तरः ॥४
प्रेमाविष्टो ननर्तासौ जगौ च सुचिरं प्रभुः ।
तत्र प्रेमसमाविष्टो गोपालं पुनरस्तवीत् ॥५
तत्र भक्तजनैः सार्द्धं यापयंस्तां विभावरीम् ।
श्रीगोपालस्य बृत्तान्तमश्रृणोत् सकुतुहलम् ॥६
पुरा पुण्यानि तीर्थानि नित्यानन्दः प्रभुर्भ्रमन् ।
कटकञ्च यदायातः साक्षिगोपालमीक्षितुम् ॥७
तदा शुश्राव यां वार्तां गोपालस्य जनाननात् ।
तामसौ कथयामास सुखेन पुरतः प्रभोः ॥८
विद्यानगरवास्तव्यौ ब्राह्मणौ द्वौ पुरा किल ।
सन्दर्शनाय तीर्थानामुभौ गेहाद्बहिर्गतौ ॥९
गयाकाश्यादितीर्थानि प्रयागञ्च गतौ ततः ।
सानन्दमानसौ प्राप्तौ मथुराधाम तावुभौ ॥१०
वनानि वनयात्रायां दृष्ट्वा गोवर्धनञ्च तौ ।
वनानि द्वादशालोक्य श्रीवृन्दावन मागतौ ॥११
प्रासादोऽतिमहांस्तत्राभितो गोविन्दमन्दिरम् ।
तत्र गोपालदेवस्य प्रवृत्तं सेवनं महत् ॥१२
वगाह्य केशितीर्थञ्च तौ कालियह्रदादिकम् ।
उभौ गोपालमालोक्य लेभाते तत्र विश्रमम् ॥१६
श्रीमद्गोपालसौन्दर्यहृतचित्तौ च तावुभौ ।
तत्र त्रिचतुराण्येवाहानि लब्धसुखौ स्थितौ ॥२४
द्वयोरेकतरोजीर्णप्रायस्तदितरो युवा ।
स एव तस्य बृद्धस्य साहाय्यमकरोत् पुनः ॥२५

युवा विप्रस्तु तं वृद्धविप्रं सेवितवान् सदा ।
तयैव सेवया वृद्ध स्तस्मिंस्तुष्टमना अभूत् ॥१६
उक्तं वृद्धेन विप्रेण त्वयाहं बहु सेवितः ।
त्वयैवाहं सहायेन पुण्यतीर्थानि दर्शितः ॥१७
पितरं जातु पुत्रोऽपि नैवं सेवितु मर्हति ।
तव शुश्रूषया नैव प्राप्तोऽस्म्यल्पमपि श्रमम् ॥१८
अकृत्वा तव सम्मानं कृतघ्नः स्यामहं खलु ।
अतएव प्रदास्येऽहं तुभ्यं मत्तनयामिति ॥१९
प्रत्युक्तो विप्रयूनासौ शृणु विप्र महाशय ।
असम्भाव्यं कथं ब्रूषे न यद्भवितु मर्हति ॥२०
महाकौलीन्यसम्पन्न स्त्वं विद्याधनवानपि ।
आभिजात्येन हीनोऽहं विद्यया द्रविणेन च ॥२१
नैवाहं तव कन्याया योग्यं पात्रं कथञ्चन ।
कृष्णप्रीत्यर्थ मेवाहं परिचर्यां करोमि ते ॥२२
कृष्णस्य महती प्रीतिर्भवेद् ब्राह्मणसेवया ।
सन्तोषात्तस्य वर्द्धेत भक्तिसम्पन्नृणामिति ॥२३
वृद्धो विप्रोऽवदत्तञ्च नात्र त्वं कुरु संशयम् ।
तुभ्यं दास्यामि मत्कन्यामिति निश्चितवानहम् ॥२४
युवा विप्रोऽवदत् सर्वे तव भार्यासुतादयः ।
ज्ञातयश्च तथा सन्ति वहवस्तव वान्धवाः ॥२५
तेषां विनैव सम्मत्या कन्यादानं न युज्यते ।
रुक्मिण्या जनकस्तत्र प्रमाणञ्चास्ति भीष्मकः ॥२६
कृष्णायार्पयितुं कन्यां स्वृहयामास भीष्मकः ।
पुत्रस्य तु विरोधेन कन्यां दातुं न सोऽशकत् ॥२७
वृद्धविप्रस्ततः प्रोचे दुहिता मे निजं धनम् ।
मां निवारयितुं को वा शक्तो निजधनार्पणात् ॥२८

तान् सर्वानवमन्यापि तुभ्यं दास्यामि कन्यकाम् ।
अत्र मा कुरु सन्देहं त्व मङ्गीकुरु केवलम् ॥२६
युवा प्रोवाच कन्यां ते मह्यं दातुं मनो यदि ।
गोपालस्याग्रतो ब्रूहि सत्यङ्कार मिदं वचः ॥३०
गोपालस्याग्रतो गत्वा बृद्ध एवं वचोऽब्रवीत् ।
कन्या मस्मै ददामीति विजानातु भवानिति ॥३१
युवा विप्रस्ततः प्रोचे साक्षी त्व मसि मे प्रभो ।
तदा त्वामाह्वयिष्यामि यदि द्रक्ष्यामि वान्यथा ॥३२
एतावत् कथयित्वा तौ खदेशं प्रतिजग्मतुः ।
युवासेवत तं बृद्धं गुरुबोधेन भूरिशः ॥३३
देश मागत्य तौ विप्रौ गृहं यातौ निजं निजम् ।
बृद्धो दिनेषु गच्छत् सु चिन्तयामास चेतसा ॥३४
तीर्थे विप्राय वाग्दत्ता मया सत्या भवेत् कथम् ।
ज्ञापयामि स्त्रियं पुत्रान् ज्ञातीश्च बान्धवानिति ॥३५
एकदा वृद्ध आत्मीयान् समवेतान् समाह्वयत् ।
सर्वेषां पुरतस्तेषां सर्वं बृत्तान्त मुक्तवान् ॥३६
आकर्ण्य स्वजनास्तस्य सर्वे हाहे ति चुक्रुशुः ।
मैवं वाक्यं मुखेन त्वं पुनर्जातु प्रकाशय ॥३७
कन्यादाने तु नीचाय कुलं सर्वं विनश्यति ।
उपहासं करिष्यन्ति श्रुत्वा सर्वे जना इति ॥३८
विप्रः प्रोवाच तीर्थोक्त मन्यथा क्रियते कथम् ।
कन्यादानं करिष्यामि तद् यथास्तु तथास्त्विति ॥३९
अथ ज्ञातिजनाः प्रोचु स्त्यक्ष्यामस्त्वां वयन्त्विति ।
विषं भुक्त्वा मरिष्याम इत्यूचु र्दारसूनवः ॥४०
विप्रेणोक्तं स आकार्य सक्षिणं तत् प्रमास्यति ।
धर्मोमे व्यर्थतां याति जित्वा कन्यां ग्रहीष्यति ॥४१

पुत्रेणोक्तं प्रतिच्छाया साक्षिणो सापि दूरतः।
कः प्रदास्यति साक्ष्यं ते कथं चिन्तां करोषि भोः ॥४२

नोक्तं मयेति मिथ्योक्ति नैंव वाच्या त्वया पुनः।
नैव किञ्चित् स्मरामीति सर्वां स्त्वं कथयिष्यसि ॥४३

नाहं किञ्चन वेद्मीति यदि त्वं निगदिष्यसि।
तदैवाहं यथान्यायं विप्रं जेष्मामि निश्चितम् ॥४४

इति स द्विज आकर्ण्य चिन्ताक्रान्तमना अभूत्।
एकान्तं चिन्तयामास गोपालस्य पदाम्बुजम् ॥४५

रक्षां प्राप्नोति मे धर्मः स्वजनो म्रियते नच।
उभयं रक्ष गोपाल शरणं त्वां व्रजाम्यहम् ॥४६

स एवं चिन्तयामास चेतसा सततं द्विजः।
अन्येद्युः स युवा विप्र आजगाम तदालयम् ॥४७

आगत्य परया भक्त्या तं वृद्धं प्रणमन्द्विजम्।
बद्धाञ्जलिपुटो वक्तु मारेभेऽनुनयेन सः ॥४८

त्वं मह्यं तनयां दातुं प्रतिज्ञां कृतवानसि।
किञ्चिद्ब्रवीषि नेदानीं केयं तव विचारणा ॥४९

इतिं श्रुत्वा त्वसौ विप्रो वृद्ध स्तूष्णी मवर्तत।
यष्टिपाणि स्तमाहन्तुं वृद्धस्य तनयोऽभ्यगात् ॥५०

अरे नीच स्वसारं मे परिणेतुं त्वमिच्छसि।
भूत्वापि वामनश्चन्द्रं ग्रहीतु मिव वाञ्छसि ॥५१

यष्टि मालोक्य विप्रेण यूना तेन पलायितम्।
समवेताः कृता ग्रामजनास्तेन परेद्यवि ॥५२

सर्वे तं वृद्ध माहूय यदा तत्र समानयन्।
एवं गदितु मारेभे तदासौ ब्राह्मणो युवा ॥५३

कन्यामर्पयितुं मह्यमयं स्वीकृतवानपि।
न दित्सत्यधुना कस्माद् भवद्भिः पृच्छ्यतामिति ॥५४

पर्यपृच्छन्निदं सर्वे जना वृद्धद्विजं तदा ।
न कथं दीयते कन्या दत्ता वाग् भवता यदि ॥५५
वृद्धः प्रत्यवदत् विप्राः श्रूयतां मे निवेदनम् ।
नाहं स्मर्तुमलं किञ्चित् कदा किं प्रोक्तवानिति ॥५६
पुत्रो बृद्धस्य तच्छ्रुत्वा तदा वाक्छलमाश्रयत् ।
प्रागल्भ्येन समभ्येत्य पुर एवं वचोऽब्रवीत् ॥५७
सुबहूनि धनान्यासं स्तीर्थं यातस्य मे पितुः ।
विलोक्य तानि दुष्टोऽयं ग्रहीतुं लोलुपोऽभवत् ॥५८
अयं केवल मेकाकी सममासीन्न चापरः ।
उन्मत्तं कृतवांस्तातं धुस्तूरं भक्षयन्नयम् ॥५६
चौरेण हृत मित्युक्त्वं तेनादाय स्वयं धनम् ।
कन्यां सोऽदित्सदित्येव मधुनोत्थापितं वचः ॥६०
भवन्तः सर्व एवात्र प्रकुर्वन्तु विचारणाम् ।
अप्यस्मै मत्पिता कन्यां सम्प्रदातुं किमर्हति ॥६१
एव माकर्ण्य सन्दिग्धचित्ताः सर्वेऽभवन् जनाः ।
धनलुब्धो भयं धर्मात्त्यजतीत्यपि सम्भवेत् ॥६२
ततः प्रोचे युवा विप्रः श्रूयतां भो महाजनाः ।
विचारेण जयं लब्धु मयं मिथ्या प्रभाषते ॥६६
यदाऽ तुष्यदयं बृद्धब्राह्मणो मम सेवया ।
तुभ्यं दास्याम्यहं कन्यामित्यवोचत् स्वयं तदा ॥६४
निषिद्धवांस्तदैवाहं शृणु ब्राह्मण सत्तम ।
कदाचित्तव कन्याया नाहं योग्यतमोवरः ॥६५
क्व त्वं श्रेष्ठकुलीनोऽसि धनवांश्च सुपण्डितः ।
क्वाहं कौलीन्यहीनोऽस्मि निःस्वो मूर्खश्च पामरः ॥६६
इत्थमुक्तोऽप्ययं विप्रः प्रोक्तवान्मां पुनः पुनः ।
दास्याम्येव हि कन्यां ते त्वया स्वीक्रियतामिति ॥६७

तदाहं प्रोक्तवानेनं श्रूयतां हे महामते ।
सम्मता न भविष्यन्ति स्त्रीपुत्रा ज्ञातयश्च ते ॥६८
न शक्यस्यात्मजां दातुं वाक् ते मिथ्या भविष्यति ।
तथाप्येष पुनर्विप्रोऽकथयत् ससमादरम् ॥६९
कन्यां तेऽहं प्रदास्यामि मा द्वैधं कुरु चेतसा ।
दास्येऽहमात्मनः कन्यां कोवा मां वारयेदिति ॥७०
तदाहं प्रोक्तवान् विप्रं द्रढयित्वा निजं मनः ।
गोपालस्याग्रत स्तिष्ठन् ब्रूहि सत्यमिदं वचः ॥७१
ततोऽयं ब्राह्मणो गत्वा गोपालमिद मब्रवीत् ।
त्वं विद्ध्यहं द्विजायास्मै तनयां दत्तवानिति ॥७२
गोपालस्य पदप्रान्ते ज्ञापयन् विनयानतिम् ।
तमेव साक्षिणं कुर्वन्नह मेव मवादिषम् ॥७३
यदि मह्यमयं विप्रस्तनयां न प्रदास्यति ।
अवधेहि तदाहं त्वामाह्वयिष्यामि साक्षिणम् ॥७४
ममास्मिन् वचने साक्षी वर्त्ततेऽसौ महान् प्रभुः ।
यस्यैव वचनं सत्यं मन्यते भुवनत्रयम् ॥७५
अथ वृद्धद्विजः प्रोचे यथार्थं वचनं तव ।
साक्ष्यं दास्यति गोपालो यदीह स्वयमागतः ॥७६
तदा दास्याम्यहं कन्यां तुभ्यं जानीहि निश्चितम् ।
तत्पुत्रोऽपि ततः प्रोचे साध्वीयं तव वागिति ॥७७
मेने स ब्राह्मणो वृद्धः कृष्णोऽतिकरुणामयः ।
अवश्यं मत्-प्रतिज्ञातं स प्रमाणं करिष्यति ॥७८
पुत्रो मेने न साक्ष्याय प्रतिमेष्यति जात्विति ।
तौ द्वौ द्विविधया बुद्ध्याऽभवतां तत्र सम्मतौ ॥७९
अथोवाच युवा विप्रः पत्रमेकं विरच्यताम् ।
ईदृशानि तु वाक्यानि न वाच्यानि यथा पुनः ॥८०

तदा सर्वै र्जनै स्तावत् पत्रमेक मलिख्यत ।
उभयो रेव सम्मत्या मध्यस्थश्च निरूपितः ॥८१
युवा विप्रस्ततः प्रोचे भवद्भिः श्रूयतां वचः ।
वृद्धोऽयं ब्राह्मणः सत्यवादी धर्मपरायणः ॥८२
स्ववाक्य मन्यथाकर्तुं नैवेच्छति कदाचन ।
अविस्पष्टं वचो ब्रूते स्वजनप्राणशङ्कया ॥८३
आनेष्याम्यस्य पुष्येन कृष्णमाहूय साक्षिणम् ।
रक्षिष्याम्यस्य विप्रस्य तदा सत्यप्रतिश्रुतिम् ॥८४
तच्छ्रुत्वोपहसन्ति स्म तत्रत्या नास्तिका जनाः ।
केऽप्यूचुः काममागच्छेदीश्वरः करुणामयः ॥८५
ततोऽसौ युवको विप्रो ययौ वृन्दावनं ततः ।
दण्डवत् प्रणतो देवं प्रोचे सर्वं सविस्तरम् ॥८६
अयि ब्रह्मण्यदेव त्व मैकान्तिककृपापरः ।
रक्ष त्वं सदयोधर्ममावयो विप्रयोर्द्वयोः ॥८७
कन्यां लप्स्येऽह मित्येवं सुखं मे नास्ति मानसे ।
ब्राह्मणस्य प्रतिज्ञासौ नश्यतीति महाव्यथा ॥८८
एतद्विज्ञाय साक्ष्यं मे देहि त्वं करुणामय ।
ज्ञात्वा साक्ष्यं न योदद्यात्तस्य पापं भवेदिति ॥८९
कृष्णेन कथितं विप्र प्रतियाहि निजालयम् ।
सभामाहूय लोकानां तत्र मां स्मर केवलम् ॥९०
आविर्भुय स्वयं तत्र साक्ष्यं दास्यामि निश्चितम् ।
तत्र गन्तुं न शक्नोमि प्रतिच्छायास्वरूपतः ॥९१
विप्रः प्रोचे चतुर्बाहुमूर्तिं चेद्धारयिष्यसि ।
तथापि तव वाक्येषु न प्रत्येष्यति कश्चन ॥९२
गत्वा चेदनया मूर्त्या साक्ष्यं दास्यस्यनेन च ।
श्रीमुखेन ततः सर्वे मानयिष्यन्ति मानवाः ॥९३

कृष्णेनोक्तं श्रुतं नैव यत् प्रतिमा चलेदिति ।
विप्रः प्रोवाच भूत्वापि प्रतिमा भाषसे कथम् ॥९४
प्रतिमा नासि देव त्वं साक्षाद्व्रजेन्द्रनन्दनः ।
कुरुषे विप्रकार्यार्थं मकर्तव्यमपि स्वयम् ॥९५
अथ प्रत्यवदत् कृष्णो हसंस्तं शृणु हे द्विज ।
त्वा मेवानुसरिष्यामि पथा गच्छन्त मग्रतः ॥९६
किन्तु पश्चात् परावृत्य मा मां जातु विलोकय ।
त्वं मां द्रक्ष्यसि यत्रैव लप्स्ये तत्रैव संस्थितिम् ॥९७
मम नूपुरयोः शब्दं गच्छन् श्रोष्यसि केवलम् ।
तेनैव खलु शब्देन त्वं प्रत्येष्यसि मे गतिम् ॥९८
एकसेरमितञ्चान्नं मम भोज्यं प्रदास्यसि ।
भुक्त्वा तदेव यास्यामि त्वया सार्द्धं महन्त्विति ॥९९
अन्येद्युर्ब्राह्मणो याचन् कृष्णाज्ञां प्रस्थितस्ततः ।
पश्चादनुक्रमेणास्य गोपालोऽनुजगाम च ॥१००
आनन्दितमना विप्रः श्रुत्वा तन्नूपुरध्वनिम् ।
अन्नं पक्त्वोत्तमं तत्र श्रीगोपाल मभोजयत् ॥१०१
एवमेवं व्रजन् विप्रो निजदेशं समागतः ।
स्वग्रामं निकषागत्य मनसैव मचिन्तयत् ॥१०२
इदानी मागतो ग्रामं प्रवेक्ष्यामि निजंगृहम् ।
वक्ष्ये ग्रामजनान् सर्वान् प्रत्यासन्नंञ्च साक्षिणम् ॥१०३
तं प्रत्यक्षमनालोक्य प्रतीति नैंव जायते ।
न तथापि भयं किञ्चित् स चेदत्रैव तिष्ठति ॥१०४
इत्यसौ चिन्तयन् विप्रः परावृत्य निरैक्षत ।
हसन् श्रीदेवगोपाल श्चक्रे तत्रैव च स्थितिम् ॥१०५
ऊचे च ब्राह्मणं देवो गच्छ त्वं निजमन्दिरम् ।
अवतिष्ठेऽहमत्रैव न गमिष्याम्यतोऽधिकम् ॥१०६

अथासौ ब्राह्मणो गत्वा ग्रामं सर्वानजिज्ञपत् ।
सर्वं श्रुत्वा च तत्रत्या जना विस्मयमाययुः ॥१०७
आगताश्च ततः सर्वे साक्षिणं तं निरीक्षितुम् ।
ते श्रीगोपालमालोक्य प्रणेमुर्दण्डवद्भुवि ॥१०८
दृष्ट्वा गोपालसौन्दर्यं ननन्दुः सकला जनाः ।
व्रजन्ती प्रतिमायाते त्याकर्ण्याश्चर्यमाप्नुवन् ॥१०९
अथासौ ब्राह्मणो वृद्ध आनन्दाप्लुतमानसः ।
गोपालस्याग्रतो गत्वा दण्डवत् प्रणनाम तम् ॥११०
गोपालोऽथ ददौ साक्ष्यं जनानां पुरतस्तदा ।
कन्यां वृद्धद्विजो यूने द्विजाय प्रत्तवानिति ॥१११
ततः श्रीभगवान् प्रोचे ताबुभौ ब्राह्मणाविदम् ।
प्रतिजन्मं युवां द्वौ हि भवथो मम किङ्करौ ॥११२
द्वयोस्तुष्टोऽस्मि सत्येन याचेथां मां युवां वरम् ।
अथ विप्रावयाचेतां वरं सानन्दमानसौ ॥११३
वरं दास्यसि चेद त्रावतिष्ठस्व तदा प्रभो ।
दासौ प्रत्यनुकम्पां ते जनाः सर्वे विदन्त्विति ॥११४
तत्रस्थ मथ गोपालमसेवेतामुभौ द्विजौ ।
आगताः सर्वदेशेभ्यो मानवास्तं निरीक्षितुम् ॥११५
तस्य देशस्य राजापि श्रुत्वागच्छत् सविस्मयः ।
तञ्च गोपालमालोक्य परमं तोष मासवान् ॥११६
मन्दिरं तत्र निर्माय सेवां प्रावर्त्तयच्च सः ।
साक्षिगोपाल इत्येवं ख्याति स्तस्य ततोऽभवत् ॥११७
इत्थं श्रीसाक्षिगोपालः स विद्यानगरे ततः ।
स्वीकुर्वन् सेवनं राजश्चिरं तत्रावतिष्ठते ॥११८
उत्कलानां नृपः कश्चिन्नाम्ना श्रीपुरुषोत्तमः ।
जित्वा जग्राह तं देशं कृत्वा विपुलसङ्गरम् ॥११९

स राजानं पराजित्य तत् सिंहासन मग्रहीत् ।
मणिभि र्नाम माणिक्यसिंहासन मलङ्कृतम ॥१२०
पुरुषोत्तम देवोऽसावार्योऽतीव च भक्तिमान् ।
मम राज्यं प्रयाहीति श्रीगोपालमयाचत ॥१२१
तस्य भक्तिवशीभूतो गोपालस्तं समादिशत् ।
तदा गोपालमानीय कटकं स समागमत् ॥१२२
जगन्नाथाय माणिक्यसिंहासनमसौ ददौ ।
कटके स्थापयामास श्रीगोपालस्य सेवनम् ॥१२३
महिषी तस्य गोपालं द्रष्टुमागच्छदेकदा ।
अलङ्कारान् बहून् भक्त्या तस्मै दत्तवती च सा ॥१२४
आसीत्तस्यास्तु नासायां महामूल्यञ्च मौक्तिकम् ।
राज्ञी तञ्चापि दित्सन्ती मनसैव मचिन्तयत् ॥१२५
अस्थास्यद् यदि देवस्य छिद्रंकं नासिकापुठे ।
दासीयं मौक्तिकेनास्याभूषयिष्यत्तु नासिकाम् ॥१२६
इत्थं विचिन्त्य नत्वा च राज्ञी स्वं भवनं ययौ ।
अन्तरात्रे च गोपालः स्वप्ने ता मेवमुक्तवान् ॥१२७
शैशवे मम नासायां छिद्रं मे जननी व्यधात् ।
मुक्तामामोचयच्चात्र बहुयत्नसमादरम् ॥१२८
तदेव छिद्र मद्यापि नासायां मम विद्यते ।
त्वमामोचय तां मुक्तां यां दातुं काङ्क्षितं त्वया ॥१२९
महिषी स्वप्नमालोक्य राज्ञे सर्वं न्यवेदयत् ।
मुक्तामादाय राज्ञा च ययौ सा देवमन्दिरम् ॥१३०
नासायां छिद्र मालोक्या मोचयामास मौक्तिकम् ।
महामहोत्सवं राज्ञी हृष्टचित्ता चकार च ॥१३१
तदा प्रभृति गोपालः कटके ह्यवतिष्ठते ।
अद्यापि साक्षिगोपाल इति नाम्नैव कीर्त्यते ॥१३२

नित्यानन्दमुखाच्छ्रुत्वा गोपालचरितं तदा ।
प्राप्तवान् परमं तोषं निजभक्तै र्महाप्रभुः ॥१३३

पुरो गोपालदेवस्य यदा तस्थौ महाप्रभुः ।
एकमूर्त्ती उभावेवादृश्येतामिव मानवैः ॥१३४

एकवर्णा वुभावेव सुविशालकलेवरौ ।
रक्तवर्णाम्बरौ तौ द्वौ गम्भीरप्रकृती उभौ ॥१३५

महातेजोमयं रूपं विभ्रतौ कमलेक्षणौ ।
भावावेशवशाक्रान्तचित्तौ चन्द्रसमाननौ ॥१३६

नित्यानन्दप्रभु र्दृष्ट्वा तावुभौ सकुतूहलम् ।
तत्र भक्तजनैः सार्द्धं जहासापाङ्गवीक्षया ॥१३७

महता कौतुकेनैवं वञ्चयंस्तां विभावरीम् ।
मङ्गलारात्रिकं दृष्ट्वा प्रभाते प्रस्थितः प्रभुः ॥१३८

भुवनेश्वरमार्गेण गच्छन् यद् यत् स ऐक्षत ।
श्रीवृन्दावनदासेन वर्णितं तत् सविस्तरम् ॥१३९

कमलपुरमागत्य नदीं भार्गीं वगाह्य च ।
नित्यानन्दकरे दण्डं न्यस्तवान् स महाप्रभुः ॥१४०

भक्तैः साकं प्रभौ याते कपोतेश्वर मीक्षितुम् ।
नित्यानन्दप्रभु र्दण्डंभग्नवांस्तं महाप्रभोः ॥१४१

खण्डयित्वा त्रिधा दण्डं स्रोतसाप्लावयच्च सः ।
ततः प्रत्यागतो भक्तैः प्रभु र्दृष्ट्वा महेश्वरम् ॥१४२

सावेशं दूरतो दृष्ट्वा श्रीजगन्नाथमन्दिरम् ।
दण्डवत् प्रणतः प्रेम्णा ननर्त्तासौ महाप्रभुः ॥१४३

आवेशेनाखिला भक्ता गायन्तो ननृतुः परम् ।
प्रभुणा राजमार्गेण प्रेमाविष्टाः प्रतस्थिरे ॥१४४

प्रभुर्जहास चक्रन्द सहुङ्कारं जगर्ज च ।
मेने क्रोशत्रयं शेषं योजनानां सहस्रवत् ॥१४५

व्रजन्नेवं प्रभुः प्राप्तस्ततोऽष्टादशनालिकाम् ।
अत्रागत्याभवत् किञ्चिद्बहिष्प्रज्ञो महाप्रभुः ॥१४६
नित्यानन्द मुवाचाथ दण्डो मे दीयतामिति ।
नित्यानन्द स्ततः प्रोचे दण्डः खण्डत्रयं गतः ॥१४७
प्रेमावेशात् पतन्तं त्वां यदा यातोऽवलम्बितुम् ।
दण्डस्योपरि तस्यैव पतितोऽस्मि त्वया सह ॥१४८
उभयो रेव भारेण दण्डोऽसौ खण्डशः कृतः ।
खण्डास्ते पतिताः क्वेति नैव जानामि किञ्चन ॥१४९
मदीयेनापराधेन दण्डोऽसौ तव खण्डितः ।
यथा स्यादुचितो दण्ड स्तथा दण्डय मामिति ॥१५०
तन्महाप्रभुराकर्ण्य किञ्चिद्दुःखं प्रकाश्य च ।
ततो वदितुमारेभे स ईषत् कोपसंयुतः ॥१५१
मां नीलाचलमानीय सर्वैर्मे विहितं हितम् ।
एकं दण्डधनं मेऽभूद् भवद्भिस्तच्च नाशितम् ॥१५२
यूयं सर्वेऽग्रतो यात श्रीजगन्नाथमीक्षितुम् ।
अथाहमग्रतो यानि मिलितो नैव याम्यहम् ॥१५३
उक्तं मुकुन्ददत्तेन प्रभो याहि त्वमग्रतः ।
पश्चाद् यामो वयं सर्वे नैव यामस्त्वया सह ॥१५४
इत्याकर्ण्य प्रभुस्तावदग्रतः सत्वरं ययौ ।
कोऽपि बोद्धुं न शक्तोऽभूदुभयो र्देवयोर्मतिम् ॥१५५
भग्नोऽनेन कथं दण्डः कथं वातेन भञ्जितः ।
भञ्जयित्वापि रुष्टोऽसा वित्यवोध्यं जनैरभूत् ॥१५६
दण्डभञ्जनलीलेयं गम्भीरा परमं मता ।
द्वयोः श्रीचरणे धीरा भक्तिर्यस्य स बुध्यते ॥२५७
ब्रह्मण्यदेवगोपालमहिमा धन्य एव हि ।
श्रोता यस्य हि चैतन्यो नित्यानन्दश्च वाचकः ॥१५८

यो जनः शृणुयादेतं श्रद्धायुक्तेन चेतसा ।
स लभेताचिरादेव श्रीगोपालपदाम्बुजम् ॥१५६
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१६०

इति श्रीचैतन्यचरितामृते मध्यखण्डे साक्षिगोपालचरितवर्णनं नाम पञ्चमः परिच्छेदः ।

—o—

मध्यलीलायां षष्ठः परिच्छेदः

"नौमि तं गौरचन्द्रं यः कुतर्ककर्कशाशयम् ।
सार्वभौमं सर्वभूमा भक्तिभूमानमाचरत् ॥१"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यसौ ।
जयत्वद्वैतचन्द्रोऽसौ गौरभक्ता जयन्तु च ॥१
प्रतस्थे प्रभुराविष्टः श्रीजगन्नाथमन्दिरम् ।
आलोक्य श्रीजगन्नाथं बभूव प्रेमविह्वलः ॥२
आलिङ्गितुं जगन्नाथ मभ्यधावन्महाप्रभुः ।
प्रेमाविष्टः पपातासौ मन्दिरस्यैव कुट्टिमे ॥३
सार्वभौमस्तदा तत्र सौभाग्येन ददर्श तम् ।
प्रहर्तुं मन्दिरप्रैष्यानुद्यतान् स न्यवारयत् ॥४
प्रभोः प्रेमविकारं तं सौन्दर्यञ्चावलोकयन् ।
विस्मयाम्बुनिधौ मग्नः सार्वभौमो बभूव च ॥५
स तमालोक्य देवस्य भोगकाले ह्युपस्थिते ।
चिरमप्राप्तचैतन्यमुपायं पर्यचिन्तयत् ॥६
स्वशिष्यै मन्दिरप्रैष्यै र्वाहयं स्तं निजालयम् ।
सुपवित्रतमस्थाने स्थापयामास शाययन् ॥७

श्वास-प्रश्वास-हीनं तमुदरस्पन्दवर्जितम् ।
पश्यन्नुद्विग्नचित्तोऽसौ भट्टाचार्यो बभूव च ॥८

सूक्ष्मतूलां समानीय नासाग्रे तस्य धारयन् ।
ईषद्विचलितां दृष्ट्वा स किञ्चिद्धैर्यमाश्रयत् ॥९

भट्टाचार्यः समासीनो मनसैवं व्यचिन्तयत् ।
अयं कृष्णमहाप्रेम्णो विकारः सात्त्विकः खलु ॥१०

सूद्दीप्तः सात्त्विको भावः प्रलयो नाम कथ्यते ।
नित्यसिद्धस्य भक्तस्य सोऽयं भावः प्रजायते ॥११

यस्याधिरुढभावोऽयं विकारस्तस्य सम्भवेत् ।
दृश्यते नरदेहेऽसा वित्ययं विस्मयो महान् ॥१२

इति सञ्चिन्तयन् भट्टाचार्य आसीत् कृतासनः ।
नित्यानन्दादयः सर्वे सिंहद्वार मुपस्थिताः ॥१३

तत्र तैः श्रुतमन्योन्यं वदतां वचनं नृणाम् ।
सन्न्यासी कश्चिदागत्य जगन्नाथं विलोकयन् ॥१४

मूर्च्छितोऽ मूच्छरीरे च तस्य नास्त्येव चेतना ।
सार्वभौमस्तथावस्थं नीतवांस्तं निजालयम् ॥१५

इति श्रुत्वैव तैर्ज्ञातं कार्यमेतन्महाप्रभोः ।
श्रीगोपीनाथ आचार्य स्तत्रैवोपस्थितस्तदा ॥१६

विशारदस्य जामाता नवद्वीपनिवासिनः ।
प्रभुस्वरूपविज्ञाता भक्तश्चासौ महाप्रभोः ॥१७

आसीन्मुकुन्ददत्तेन पूर्व्वमेव स संस्तुतः ।
मुकुन्दश्च तमालोक्य तदा विस्मयमाप्तवान् ॥१८

तं पश्यन्नुपगम्यासौ मुकुन्दः प्राणमच्च तम् ।
गोपीनाथस्तमालिङ्ग्याप्रृच्छद् वार्तां महाप्रभोः ॥१९

कथितञ्च मुकुन्देन प्रभुरागतवानिह ।
वयं सर्वे समं तेन प्रभुणात्रागता इति ॥२०

आचार्यः प्राणमन्नित्यानन्दगोस्वामिनं ततः ।
अपृच्छच्च प्रभोर्वार्तां मिलितांस्तान् जनान् पुनः ॥२१
कथितश्च मुकुन्देन प्रभुः सन्न्यासमाश्रयन् ।
अस्मान् सर्वान् समादाय स नीलाचल मागतः ॥२२
पथि त्यक्त्वा तु सर्वान्नो देवं द्रष्टुं गतोऽग्रतः ।
आगताश्च वयं पश्चात्तस्यान्वेषणतत्पराः ॥२३
जनानां मिथ आलापाद स्माभिर्यद्वचः श्रुतम् ।
सार्वभौमस्य गेहेऽस्ति प्रभुरित्यनुमीयते ॥२४
प्रभुः पश्यन् जगन्नाथमभूत् प्रेम्णा विचेतनः ।
गृहीत्वा सार्वभौमस्तं प्रापयन्निजमन्दिरम् ॥२५
यस्मिन् क्षणे त्वया सार्द्धं जातोऽहं मिलनोत् सुकः ।
तस्मिन्नेव क्षणे दिष्ट्या तव प्राप्तोऽस्मि दर्शनम् ॥२६
समवेता वयं यामः सार्वभौमस्य मन्दिरम् ।
प्रथमं प्रभुमालोक्य पश्चाद् द्रक्ष्याम ईश्वरम् ॥२७
इत्याकर्ण्य गृहीत्वा च गोपीनाथोऽखिलांश्च तान् ।
सार्वभौमगृहं यातो हर्षोत् फुल्लेन चेतसा ॥२८
सार्वभौमगृहं गत्वा स प्रभुं परिदृष्टवान् ।
आचार्यः प्रभु मालोक्य दुःखं हर्षञ्च लब्धवान् ॥२९
ज्ञापयन् सार्वभौमं स गृहान्तस्तान वेशयत् ।
सार्वभौमोऽनमन्नित्यानन्दगोस्वामिनं तदा ॥३०
सर्वैः साकं यथायोग्यं व्यवहारं स आचरत् ।
प्रभुं दृष्ट्वा तु ते सर्वे दुःखं हर्षञ्च लेभिरे ॥३१
सर्वे ते सार्वभौमेण प्रेरिता देवमीक्षितुम् ।
तैः सार्द्धं प्रेषितस्तेन स्वपुत्रश्चन्दनेश्वरः ॥३२
श्रीजगन्नाथमालोक्य तेऽभवन्नन्दितान्तराः ।
भावाविष्टो बभूवासौ नित्यानन्दप्रभुस्तदा ॥३३

ततः सर्वे मिलित्वा ते व्यदधुः सुस्थिरञ्च तम् ।
माल्यप्रसाद मानीय ददा वीश्वरसेवकः ॥३४
प्रसादं प्राप्य ते सर्वे बभुवु हृष्टमानसाः ।
पुनः सर्वे समागच्छन् समीपं श्रीमहाप्रभोः ॥३५
उच्चैः स्वरेण ते चक्रु र्नामसङ्कीर्तनं तदा ।
तृतीयप्रहरे वाह्यसंज्ञां लेभे महाप्रभुः ॥३६
उदतिष्ठत् सहुङ्कारं हरिर्हरि रिति ब्रुवन् ।
तस्य पादरजः सार्वभौमः सानन्द मग्रहीत् ॥३७
सार्वभौमोऽवदच्छीघ्रं कुरु माध्याह्निकाशनम् ।
भिक्षां महाप्रसादान्न महमद्य ददामि ते ॥३८
समुद्रमवगाह्यासौ प्रभुः सत्वर मागतः ।
ततः प्रक्षाल्य पादाब्जमासने समुपाविशत् ॥३९
प्रसादान्नानि भूरीणि सार्वभौमः समानयत् ।
आरेभे भोजनं कर्तुं सुखेनैव महाप्रभुः ॥४०
उत्तमव्यञ्जनैरन्नं स्थापितं स्वर्णभाजने ।
निजभक्तजनैः सार्द्धं सुखेन बुभुजे प्रभुः ॥४१
सार्वभौमः स्वयं तत्र कृतवान् परिवेषणम् ।
प्रभुणोक्त मये मह्यं देहि सङ्कीर्णतेमनम् ॥४२
घृताक्तपिष्टकान्येभ्यः सर्वेभ्यस्त्वं समर्पय ।
भट्टाचार्य उवाचाथ बद्धाञ्जलिपुटस्तदा ॥४३
श्रीजगन्नाथदेवेन भुक्त मास्वादितं कथम् ।
सर्वं महाप्रसादं त्व मद्यास्वादय पश्य च ॥४४
इत्युक्त्वा भोजितस्तेन पिष्ठकादीनि च प्रभुः ।
भिक्षाञ्च कारयित्वैवं पुनराचामितस्तथा ॥४५
अनुज्ञाप्य स आचार्य-गोपीनाथेन सङ्गतः ।
अन्तः प्रविश्य भुक्त्वा च पुनः प्रत्यागमत् प्रभुम् ॥४६

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

नमो नारायणायेति तेनोच्चार्य नमस्कृतः ।
स प्रत्युवाच गोस्वामी कृष्णे ते मतिरस्त्विति ॥४७
शृण्वता सार्वभौमेण मनसैवं विचारितम् ।
अयं वैष्णवसन्न्यासी वाचैवं ज्ञायते मया ॥४८
तं गोपीनाथमाचार्यं सार्वभौमोऽथ पृष्टवान् ।
ज्ञातुमिच्छामि कुत्रासीत् स्वामिनः पूर्वआश्रमः ॥४९
प्रत्युक्तं गोपीनाथेन नवद्वीपे गृहं तथा ।
नाम्नासीद् यो जगन्नाथः ख्यातो मिश्रपुरन्दरः ॥५०
पुत्रोऽयं तस्य विप्रस्य नाम्ना विश्वम्भरः पुनः ।
नीलाम्बराभिधानस्य दौहित्र श्चक्रवर्तिनः ॥५१
सार्वभौमोऽवदच्चक्रवर्त्ती नीलाम्बराभिधः ।
विख्यातोऽसौ सहाध्यायी विशारदस्य मत्पितुः ॥५२
जानेऽहं माननीयोऽभूत्तेन मिश्रपुरन्दरः ।
मन्ये तौ पितृसम्बन्धान्मम पूज्यावुभाविति ॥५३
स नवद्वीपसम्पर्कात् सार्वभौमो मुदान्वितः ।
इत्थं गदितु मारेभे स्वामिनं प्रीतमानसः ॥५४
स्वभावेनैव पूज्योऽसि सन्न्यासी त्वं ततः परम् ।
अतएव तव स्वीयः किङ्करो हि भवाम्याहम् ॥५५
प्रभुणा शृण्वतैवेदं श्रीविण्णुस्मरणं कृतम् ।
विनयेन ततः किञ्चिद् भट्टाचार्यो निवेदितः ॥५६
सर्वमानवकल्याणकारकस्त्वं जगद्गुरुः ।
अध्यापयसि वेदान्तान् यतीनामुपकारकः ॥५७
अहं वालकसन्न्यासी न जाने साध्वसाधु वा ।
आश्रितोऽस्मि भवन्तं तद् गुरुं मन्ये च सर्वथा ॥५८
भवतः सङ्गलाभार्थं मत्रैवागतवानहम् ।
अतः पालयितव्योऽहं भवता सर्वथाधुना ॥५९

अद्यैवापतिता याऽभूद्विपत्ति र्महती मम ।
भवानेवात्र निर्विघ्नं ततो मां त्रातवानिति ॥६०
भट्टः प्रोवाच नैकाकी देवं द्रष्टुं गमिष्यसि ।
यास्यसि त्वं मया सार्द्धमाहो मम जनैरिति ॥६१
प्रत्युवाच प्रभुर्नाहं यास्यामि मन्दिरान्तरम् ।
गरुडस्तम्भ-पार्श्वस्थः करिष्ये देवदर्शनम् ॥६२
श्रीगोपीनाथमाचार्यं सार्वभौमोऽवदत्ततः ।
त्वं गोस्वामिन मादाय कारयिष्यसि दर्शनम् ॥६३
मम मातृष्वसु र्गेहं वर्त्तते निर्जनं सदा ।
तत्रास्मै कल्पयावासं कुरु सर्वार्थसञ्चयम् ॥६४
गोपीनाथः प्रभुं नीत्वा तत्रावासम कल्पयत् ।
जलपात्रादिवस्तूनि सर्वाणि च समादधात् ॥६५
गोपीनाथोऽपरेद्यु स्त मुपागम्य महाप्रभुम् ।
सममादाय देवस्य शय्योत्थान मदर्शयत् ॥६६
सार्वभौम मुपागच्छन्मुकुन्ददत्त एकदा ।
सार्वभौमस्ततः किञ्चिद्बभाषे वचनञ्च तम् ॥६७
स्वभावेन विनीतोऽयं सन्न्यासी प्रियदर्शनः ।
ममास्मिन् विपुला प्रीतिः सततं परिवर्धते ॥६८
कतमं सम्प्रदायं स सन्न्यासस्य गृहीतवान् ।
किं नामधेय मेतस्य तन्मे शुश्रूषते मनः ॥६९
गोपीनाथो बभाषेऽयं कृष्णचैतन्यनामकः ।
गुरुरस्य महाधन्यो नाम्ना केशवभारती ॥७०
सार्वभौम उवाचास्य नामेदं विश्वविश्रुतम् ।
भारतीसम्प्रदायोऽयं मध्यमः कथ्यते पुनः ॥७१
गोपीनाथः प्रतिप्रोचे नायं बाह्यमपेक्षते ।
अतएवोत्तमं नाम सम्प्रदाय मुपेक्षते ॥७२

भट्टाचार्य उवाचास्य यौवनं प्रौढ़िमागतम् ।
भवेत् सन्न्यासधर्मोऽस्य कथङ्कारं सुरक्षितः ॥७३

श्रावयिष्यामि वेदान्तानहमेनं निरन्तरम् ।
नेष्यामि चेम मद्वैतमार्गं वैराग्यसंशितम् ॥७४

यदि ब्रूयात् स भूयोऽस्य कारयिष्यामि संस्कृतिम् ।
श्रेष्ठेन सम्प्रदायेन ददता योगपट्टिकाम् ॥७५

गोपीनाथो मुकुन्दश्च तच्छ्रुत्वा दुःखमाप्नुताम् ।
गोपीनाथस्तदाचार्यः किञ्चिदेवं तमब्रवीत् ॥७६

भट्टाचार्य भवानस्य महिमानं न बुध्यते ।
प्राप्तमत्रैव सीमानं भगवत्त्वस्य लक्षणम् ॥७७

तेनैव ख्यातिमापन्न ईश्वरः परमोह्ययम् ।
अविज्ञाना मबोध्योऽपि विज्ञानां ज्ञानगोचरः ॥७८

शिष्यैः पृष्टं प्रमाणेन केन तं वदसीश्वरम् ।
आचार्यः प्रावदद् विज्ञमतैरीश्वरलक्षणैः ॥७९

शिष्यै रूचेऽनुमानेन तत्व मीशस्य साध्यते ।
तान् प्रत्यवददाचार्य ईश्वरो नानुमानिकः ॥८०

अनुमानप्रमाणेन नेशतत्त्वं हि साध्यते ।
नेशतत्त्वं विजानीयात् कोऽपीशस्य कृपां विना ॥८१

ईश्वरस्य कृपालेशो यस्मिन्नेव प्रवर्तते ।
स एवेश्वरतत्त्वस्य ज्ञाता भवितु मर्हति ॥८२

"तथा हि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्यायेऽष्टाविंशश्लोके

ब्रह्मकृता श्रीकृष्णस्तुतिः—

तथापि ते देव पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि ।
जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥२"

यद्यप्यशेषशास्त्रज्ञो भवांस्तावज्जगद्गुरुः ।
पृथिव्यां कोऽपि नास्त्यैव पण्डितो भवता समः ॥८३

ईश्वरस्य कृपालेश स्त्वयि किन्तु न वर्तते ।
भवानीश्वरतत्त्वं तन्नैव शक्नोति वेदितुम् ॥८४
भवतो नास्ति दोषोऽत्र शास्त्रेणैवं हि कथ्यते ।
पाण्डित्यादिगुणैरीशतत्त्वं जातु न बुध्यते ॥८५
कथितं सार्वभौमेण ब्रह्माचार्यविधानतः ।
त्वयीश्वरकृपास्तीति प्रमाणं तत्र किं ननु ॥८६
तेनोक्तं वस्तुनो ज्ञानं तत्तद्विषयकं भवेत् ।
वस्तुन स्तत्त्वतो ज्ञानं कृपास्तित्वे प्रमाणकम् ॥८७
अस्ति श्रीविग्रहे तस्य सर्वमीश्वरलक्षणम् ।
महाप्रेम-समावेशो भवताप्यस्य लक्षितः ॥८८
तथापि त्वीश्वरज्ञानं भवतो नैव जायते ।
इदमैश्वरमायायाः कार्य मित्युच्यते मया ॥८९
पश्यन्तोऽपि न पश्यन्ति जनास्तं हि वहिर्मुखाः ।
इत्याकर्ण्य हसन् सार्वभौम एवं वचोऽब्रवीत् ॥९०
इष्टगोष्ठ्यां विचारोऽयं क्रियते त्वं तु मा रुषः ।
किञ्चिद् ब्रवीमि शास्त्रोक्त्या नापराधं गृहाण मे ॥९१
असौ चैतन्यगोस्वामी महाभागवतः खलु ।
अस्मिन् कलियुगे विष्णोरवतारो न विद्यते ॥९२
अतस्त्रियुग इत्येवं विष्णुर्नाम्नाभिधीयते ।
ज्ञातं शास्त्रविचारेण नावतारः कलाविति ॥९३
आकर्ण्यावददाचार्यो दुःखज्वलितमानसः ।
सर्वशास्त्रेष्वभिज्ञोऽह मिति त्वमभिमन्यसे ॥९४
शास्त्रेष्वपि प्रधाने द्वे श्रीभागवतभारते ।
नावधानं ददासि त्वं वाक्येषु ग्रन्थयोस्तयोः ॥९५
तौ ग्रन्था वाहतुः साक्षादवतारः कलाविति ।
त्वमेवात्थ कलौ विष्णोरवतारो न विद्यते ॥९६

कलौ लीलावतारं न विधत्ते भगवानिति ।
अतस्त्रियुग इत्याख्या कथ्यते तस्य साधुभिः ॥६७
कृष्णो युगावतारं तु करोत्येव कलौ युगे ।
हृदयं तर्कनिष्ठं ते न करोति विचारणाम् ॥६८

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये त्रयोदशश्लोके नन्दं प्रति गर्गवाक्यम्—

आसन् वर्णास्त्रयोह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथापीत इदानीं कृष्णतां गतः ॥३"

"तथाहि तत्रैवैकादशस्कन्धे पञ्चमाध्याये द्वात्रिंशश्लोके जनकं प्रति करभाजनवाक्यम्—

कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्तनप्रायै र्यजन्ति हि सुमेधसः ॥४"

"महाभारते च दानधर्म्मे विष्णुसहस्रनामस्तोत्रे (८०।६३)

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
सन्न्यासकृत् समः शान्तो निष्ठाशान्तिपरायणः ॥५"
न प्रयोजनमेताभिः कथाभिर्भवतोऽग्रतः ।
वीजानामूषरक्षेत्रे रोपणं हि बृथा भवेत् ॥९९
भविष्यति यदा तस्य कृपायोग स्तवोपरि ।
सर्वाने तांस्तु सिद्धान्तांस्तदा त्वं स्वीकरिष्यसि ॥१००
कुतर्कमतवादांस्ते शिष्या यद्वहुकल्पयन् ।
नापराधोऽय मेतेषां स मायाया अनुग्रहः ॥१०१

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे चतुर्थाध्याये षड्विंशश्लोके भगवन्तमुद्दिश्य दक्षवाक्यम्—

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥६

तथाहि तत्रैवैकादस्कन्धे द्वाविंशाध्याये चतुर्थश्लोक उद्धवंप्रति
श्रीकृष्णवाक्यम्—

युक्तयः सन्ति सर्व्वत्र भाषन्ते ब्राह्मणा यथा ।
मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ।७॥"
भट्टाचार्य स्ततः प्रोचे गच्छ गोस्वामिनः पुरः ।
आमन्त्रयस्व मे नाम कृत्वा तं स्वगणैः सह ॥१०२
महाप्रसाद मानीय तं भिक्षां कारयाग्रतः ।
पश्चान्मां समुपेत्य त्वं यथेच्छं शिक्षयिष्यसि ॥१०३
भट्टाचार्योऽभव च्छ्याल आचार्योभगिनीपतिः ।
निन्दास्तुत्युपहासैः स आचार्यस्तमशिक्षयत् ॥१०४
आचार्यकृतसिद्धान्तै र्मुकुन्द स्तोषमाप्तवान् ।
भट्टाचार्यस्य वाचा तु दुःखं रोषञ्च लब्धवान् ॥१०५
ततो गोस्वामिनः स्थान माचार्यः समुपागमत् ।
भट्टाचार्यस्य नाम्रा च न्यमन्त्रयत तं प्रभुम् ॥१०६
मुकुन्देन सहाचार्यो भट्टाचार्योक्त मब्रवीत् ।
भट्टाचार्यमनिन्दच्च तद्वाक्यव्यथितान्तरः ॥१०७
तन्महाप्रभुराकर्ण्य प्रोक्तवान्मैव मुच्यताम् ।
मय्येवानुग्रहस्तस्य भट्टाचार्यस्य वर्त्तते ॥१०८
मम सन्न्यासधर्म्मं स काङ्क्षते साधु रक्षितुम् ।
कृपां करोति वात्सल्यात् किमिवात्रास्य दूषणम् ॥१०९
भट्टाचार्येण सङ्गत्यापरेद्युः श्रीमहाप्रभुः ।
ददर्श श्रीजगन्नाथ मानन्दाप्लुतचेतसा ॥११०
भट्टाचार्यस्तमादाय निजमण्दिरमागतः ।
आसनं प्रभवे दत्त्वा स्वयमप्युपविष्टवान् ॥१११
अध्यापयितु मारेभे ततो वेदान्तदर्शनम् ।
प्रभुं स्नेहेन भक्त्या च किञ्चिदेवमुवाच च ॥११२

वेदान्तश्रवणं नित्यं धर्म्मः सन्न्यासिनः खलु ।
अतो निरन्तरं कार्य्यं वेदान्तश्रवणं त्वया ॥११३
श्रीमहाप्रभुणा प्रोक्तं कुरु त्वं मय्यनुग्रहम् ।
तथैव मम कर्तव्यं यथादिशसि मामिति ॥११४
यावत् सप्तदिनान्येवं वेदान्तान श्रृणोत् प्रभुः ।
निषीदन्नेव शुश्राव न तूचे साध्वसाध्विति ॥११५
अपृच्छत् सार्वभौमस्तं सम्प्राप्ते दिवसेऽष्टमे ।
कृतवान् दिवसान् सप्त वेदान्तश्रवणं भवान् ॥११६
साध्वसाध्विति न ब्रूते मौनमालम्ब्य तिष्ठति ।
नैतद्विज्ञातु मर्हामि बुध्यते वा न बुध्यते ॥११७
प्रभुणा वाचि मूर्खोऽहं नैवास्त्यध्ययनं मम ।
तवाज्ञामात्र माश्रित्य केवलं तच्छृणोम्यहम् ११८
कुर्वे श्रवण मेवाहं धर्मः सन्न्यासिनामिति ।
नाहं बोद्धुं समर्थोऽस्मि यथार्थं कुरुते भवान् ॥११९
भट्टाचार्योऽब्रवीन्नाहं बुध्य इत्येव वेत्ति यः ।
स एव निजबोधाय भूयो भूयस्तु पृच्छति ॥१२०
आकर्णयन्नपि त्वन्तु तूष्णीमेवावलम्बसे ।
हृदये ते किमस्तीति नैव शक्नोमि वेदितुम् ॥१२१
प्रभुणोक्तं मया स्पष्ट मर्थः सूत्रस्य बुध्यते ।
श्रृण्वत स्त्वत्कृतव्याख्यां मनो मे बिकलायते ॥१२२
तदेव प्रोच्यते भाष्यं यत् सूत्रार्थप्रकाशकम् ।
सूत्रस्यार्थं समाच्छाद्य भाष्यमाभाष्यते त्वया ॥१२३
अर्थो मुख्यस्तु सूत्रस्य नैव व्याख्यायते त्वया ।
मुख्यार्थः कल्पितार्थेन स्वयमाच्छाद्यते पुनः ॥१२४
य एवोपनिषत्प्रोक्ताः शब्दा मुख्यार्थका हि ते ।
तानेव भगवान् ब्यासः सर्वान् सूत्रैर्गृहीतवान् ॥१२५

मुख्यमर्थं परित्यज्य गौणार्थः कल्प्यते त्वया ।
क्रियते चाभिधावृत्तिं त्यक्त्वा शब्दस्य लक्षणा ॥१२६
सर्वेषां हि प्रमाणानां श्रुति र्मुख्यतमा भवेत् ।
श्रौतः शब्दो हि मुख्यार्थः श्रुतेः सैव प्रमाणता ॥१२७
अस्थि विष्ठा च जीवानां यथा द्वौ शङ्खगोमयौ ।
तावुभौ श्रुतिवाक्येन सम्मता वतिपावनौ ॥१२८
वेदाना मुच्यते सत्यं स्वतः प्रामाण्यमेव हि ।
लक्षणायां कृतायान्तु हीयन्ते ते ततो ध्रुवम् ॥१२९
भगवद्व्याससूत्राणामर्थाः सूर्यस्य रश्मयः ।
छाद्यन्ते भाष्यमेघेन कल्पितेन यथारुचि ॥१३०
सर्वैं वेदैः पुराणैश्च ब्रह्मतत्त्वं निरूप्यते ।
तद् ब्रह्म यद्बृहद्ब्रह्मस्तु परमेश्वरलक्षणम् ॥१३१
सर्वैश्वर्यैश्च सम्पूर्णं तत् स्वयं भगवानिति ।
तन्निराकार मित्युक्त्वा व्याख्यानं क्रियते त्वया ॥१३२
तन्निर्विशेषमित्येवमाहु र्याः श्रुतयः पुनः ।
प्राकृतं विनिवार्यैवाप्राकृतं स्थापयन्ति ताः ॥१३३

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके षष्ठाङ्कधृतहयशीर्ष पञ्चरात्रम्—

या या श्रुतिर्जल्पति निर्विशेषं
सा सा विधत्ते सविशेष मेव ।
विचारयोगे सति हन्त तासां
प्रायो वलीयः सविशेष मेव ॥८॥"

ब्रह्मणो जायते विश्वं ब्रह्मणैव च जीवति ।
ब्रह्मण्येव पुनस्तस्मिन् प्रलयं गच्छति ध्रुवम् ॥१३४
तत् कारकमपादानकरणाधारनामकम् ।
ईशितुः सविशेषत्वे तस्यैवं लक्षणत्रयम् ॥१३५

यदासौ कामयाञ्चक्रे भगवान् भवितुं बहु ।
निजां प्राकृतशक्तिं स ईक्षाञ्चक्रे स्वयं तदा ॥१३६
प्राकृतञ्च मनोनेत्रं जातं नासीत्तदा किल ।
अतएव मनोनेत्रं ब्रह्मणोऽप्राकृतं भवेत् ॥१३७
ब्रह्मशब्देन सम्पूर्णो भगवान् स्वय मुच्यते ।
तत् स्वयं भगवान् कृष्ण इति शास्त्रप्रमाणकः ॥१३८
निगूढोऽर्थो हि वेदानां न बोद्धं शक्यते जनैः ।
पौराणिकेन वाक्येन सोऽर्थो निश्चीयते ततः ॥१३९

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये त्रिंशश्लोके
श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

अहो भाग्य महो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥९॥"

जहात्यपाणिपादेति श्रुतिः प्राकृतपाणिपत् ।
जवनश्च ग्रहीतेति भाषते सा पुनर्यतः ॥१४०
अतएव श्रुतिर्ब्रह्म सविशेषं ब्रवीत्यथ ।
मन्यते निर्विशेषन्तु त्यक्ता लक्षणयाभिधाम् ॥१४१
पूर्णानन्दं षडैश्वर्यं परिपूर्णकलेवरम् ।
कथं त्वं भगवन्तं तं निराकारं प्रभाषसे ॥१४२
यत्र स्वाभाविकं शक्तित्रयं ब्रह्मणि वर्तते ।
तदपि ब्रह्म निःशक्ति त्वया निश्चीयते पुनः ॥१४३

"तथाहि श्रीभगवत्सन्दर्भे सत्त्वं रजस्तम इति त्रिवृदेकमित्यस्य व्याख्यायां
धृतो विष्णुपुराणस्य षष्ठांशीय सप्तमाध्यायस्यैकषष्टितमः श्लोकः—

बिष्णुभक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्याकर्मसंज्ञान्या तृतीया शक्ति रिष्यते ॥१०॥
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यत्र सन्ततान् ॥११

तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥१२"

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिभक्तिलहर्यां प्रथमश्लोक-व्याख्यायां धृतो विष्णुपुराणीयप्रथमांशस्य द्वादशाध्यायैकोनसप्ततितमाङ्क-पूर्वार्द्धात्मकः श्लोकः—

ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंश्रये ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥१३"
स्वरूपं सच्चिदानन्दमयमीशस्य सम्मतम् ।
अंशेषु त्रिषु चिच्छक्ती रूपत्रयमयी भवेत् ॥१४४
आनन्दे ह्लादिनी प्रोक्ता सदंशे सन्धिनी मता ।
चिदंशे च मता संविद् या ज्ञान मिति मन्यते ॥१४५
अन्तरङ्गा हि चिच्छक्ति स्तटस्था जीवशक्तिका ।
वहिरङ्गा च मायेति प्रेमभक्तिप्रदा त्रयी ॥१४६
चिच्छक्तेर्यो विलास स्तदैश्वर्यं षड्विधं प्रभोः ।
न मानयसि तां शक्ति महो ते साहसं परम् ॥१४७
मायाधीशत्व-वश्यत्वे भेदौ हीश्वरजीवयोः ।
तथापीश्वरजीवौ तावभिन्नौ त्वन्तु भाषसे ॥१४८
शक्तिर्हि वीजरूपेयं श्रीगीताशास्त्रसम्मता ।
ईश्वरेण समं तस्य जीवस्यैक्यमात्थ भोः ॥१४९

"तथाहि श्रीमद्भगवत्गीतायां सप्तमाध्याये पञ्चमः श्लोकः—

अपरेय मितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥१४"
सच्चिदानन्दरूपोहि परमेशस्य विग्रहः ।
सोऽपि सत्त्वगुणस्यैव विकारः कथ्यते त्वया ॥१५०
स पाषण्डी भवेद् यो न मन्यते श्रीलविग्रहम् ।
अस्पृश्योसावदृश्यश्च यमदण्डं स चार्हति ॥१५१

बेदानमानयन् बौद्ध स्तावन्नास्तिक उच्यते ।
वेदाश्रयेण नास्तिक्यं वौद्धादप्यधिकं खलु ॥१५२
निस्तारायैव जीवानां व्यासः सूत्राण्यकल्पयत्
मायावादाश्रयं भाष्यं श्रृण्वन्नश्यति सर्वथा ॥१५३
तत् परिणामवादोऽयं व्याससूत्रस्य सम्मतः ।
ईशः परिणतो विश्वरूपेणाचिन्त्यशक्तिमान् ॥१५४
हेमभारान् यथा सूते स्वयं निर्विकृतिर्मणिः ।
ईश्वरो विश्वरूपोऽपि तथास्त्यविकृतः स्वयम् ॥१५५
व्यासो भ्रान्त इतीवास्य तत्सूत्रमपि दूषयन् ।
स्वयं विवर्तवादं सोऽस्थापयन्निजकल्पितम् ॥१५६
आत्मबुद्धि र्भवेन्मिथ्या देहे जीवस्य केवलम् ।
जगन्नैव भवेन्मिथ्या केवलं तद्विनश्वरम् ॥१५७
प्रणवो हि महावाक्यं स एकाकृतिरीशितुः ।
प्रणवात् सर्ववेदानां जगताञ्च समुद्भवः ॥१५८
तत्त्वमसीति यज्जीवहेतोः प्रादेशिकं वचः ।
तदेवाह महावाक्यं प्रणवं तममानयन् ॥१५९
इतीत्थं कल्पितं भाष्यं शतशोऽदूषयत् प्रभुः ।
भट्टाचार्यः पुनः पूर्वपक्षांश्च कृतवान् बहून् ॥१६०
वितण्डा-निग्रहस्थानच्छलादीनि स चाश्रयत् ।
खण्डयंस्तानि सर्वाण्यस्थापयत् स्वमतं प्रभुः ॥१६१
सम्बन्धो भगवत्ताया भक्तेरेवा भिधेयता ।
प्रेम्णः प्रयोजनञ्चेति त्रयः वेदा उपादिशन् ॥१६२
यच्चान्यत् किञ्चिदूचेऽसौ सर्वं तन्निजकल्पितम् ।
वेदाः स्वतः प्रमाणानि न कुर्यास्तेषु लक्षणाम् ॥१६३
आचार्यस्य न दोषोऽत्र तं तथेश्वर आदिशत् ।
कल्पनामत माश्रित्य सं व्यधान्नास्तिकं मतम् ॥१६४

"तथाहि पद्मपुराणे उत्तरखण्डे सहस्रनामकथने द्विषष्टितमाध्याय एकत्रिंश-श्लोके शिवं प्रति श्रीकृष्णवाक्यम्—

स्वागमैः कल्पितै स्त्वञ्च जनान् मद्विमुखान् कुरु ।
माञ्च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा ॥१५"

तत्रैवोत्तरखण्डे पञ्चत्रिंशाध्याये सप्तमः श्लोकः—

मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते ।
मयैव विहितं देवि कलौ ब्राह्मणमूर्तिना ॥१६"
भट्टाचार्यस्तथा श्रुत्वा परमं विस्मयं गतः ।
स्तब्धस्य वदनात्तस्य वाणी नैव विनिःसृता ॥१६५
भट्टाचार्यं प्रभुः प्रोचे मा मैवं कुरु विस्मयम् ।
भक्तिः श्रीभगवत्येव पुरुषार्थोत्तमा मता ॥१६६
प्रकुर्वन्तीश्वरे भक्ति मात्मारामा अपि ध्रुवम् ।
इत्थं गुणगणोऽचिन्त्यः साक्षाद् भगवतो हरेः ॥१६७

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे सप्तमाध्यांये दशमश्लोके शौनकादीन् प्रति सूतवाक्यम्—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुवन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥१७"
इति श्रुत्वाऽब्रवीद् भट्टाचार्यः शृणु महाशय ।
इच्छामि श्रोतुमेतस्य श्लोकस्यार्थं तवाननात् ॥१६८
प्रत्युवाच प्रभुः पूर्वं कुर्वर्थं त्वं शृणोम्यहम् ।
यथा कञ्चन वेद्म्यर्थं करिष्ये तदनन्तरम् ॥१६९
भट्टाचार्यस्ततः श्लोकव्याख्यानं कृतवांस्तदा ।
तर्कशास्त्रानुसारेण बह्वीर्युक्तीः प्रदर्शयन् ॥१७०
नवधार्थं चकारासौ तर्कशास्त्रस्य सम्मतम् ।
इत्याकर्ण्य हसन्नीषत् किञ्चिदूचे महाप्रभुः ॥१७१

भट्टाचार्य विजानामि भवान् साक्षाद्बृहस्पतिः ।
शक्तिर्नास्त्येव कस्यापि शास्त्रं व्याख्यातुमीदृशम् ॥१७२
पाण्डित्यप्रतिभायोगाद्भवतार्थाः कृतास्त्विमे ।
एनानपि विनैवास्य श्लोकस्यास्त्याशयोऽपरः ॥१७३
व्याचख्यौ प्रार्थितो भट्टाचार्येणाथ महाप्रभुः ।
नवानां तत्कृतार्थानां नैकमप्यस्पृशत् पुनः ॥१७४
आत्मारामा इति श्लोके पदान्येकादशासते ।
पृथक् पृथक् कृतस्तेन पदानामर्थनिश्चयः ॥१७५
आत्मारामत्वसङ्गत्या तत्तत्पदप्रधानताम् ।
प्रदर्श्याष्टादशार्थान् स साशयं कृतवान् प्रभुः ॥१७६
भगवानथ तच्छक्तिरथ तद्गुणसंहतिः ।
प्रभावोऽचिन्त्य एतेषां त्रयाणां वागगोचरः ॥१७७
साध्यसाधनवस्तूनि समाच्छाद्यापराणि च ।
एतत्त्रयं हरेत् सिद्धसाधकानां मनांसि तु ॥१७८
तत्र सन्ति प्रमाणानि शुकदेवसनादयः ।
इत्येवं स बहूनर्थान् व्याचख्यौ श्रीमहाप्रभुः ॥१७९
इत्याकर्ण्याभवद् भट्टाचार्यो विस्मितमानसः ।
प्रभुं कृष्ण मभिज्ञाय स आत्मानं निनिन्द च ॥१८०
अयं तावत् स्वयं कृष्ण इत्यजानन्नहं पुनः ।
अत्यन्त मपराद्धोऽस्मि गर्वसंमूढमानसः ॥२८१
एवं कृतात्मधिक्कारः स प्रभुं शरणं ययौ ।
तदा तस्मिन् कृपां कर्तुं प्रभोरप्यभवन्मनः ॥१८२
प्रथमं दर्शयामास तस्मै रूपं चतुर्भुजम् ।
पश्चाद्वंशीमुखं श्यामं स्वात्मरूपमदर्शयत् ॥१८३
सार्वभौम स्तथा पश्यन्नपतद्दण्डवद्भुवि ।
पुनरेव समुत्थाय तमस्तौषीत् कृताञ्जलिः ॥१८४

तस्य सर्वाणि तत्त्वानि प्रास्फुरन् कृपया प्रभोः ।
नामप्रेमप्रदानादिमहत्त्वं तेन वर्णितम् ॥१८५
दण्डमात्रेण कालेन तेन श्लोकशतं कृतम् ।
बृहस्पतिरपि श्लोकांस्तथाकर्तुं नहि क्षमः ॥१८६
तदाकर्ण्य प्रभुस्तस्मै सुखेनालिङ्गनं ददौ ।
प्रेमावेशात्तदा भट्टाचार्योऽभूल्लुप्तचेतनः ॥१८७
ततोऽश्रुस्तम्भरोमाञ्चस्वेदवेपथुमान् स्फुरन् ।
नृत्यन् गायंश्च चक्रन्दापतद् गृह्णन् प्रभोः पदम् ॥१८८
तद् गोपीनाथ आचार्यो दृष्ट्वा हृष्टमना अभूत् ।
भट्टाचार्यस्य नृत्येन जहसुश्च प्रभोर्गणाः ॥१८९
श्रीगोपीनाथ आचार्यः प्रोवाचैवं महाप्रभुम् ।
भट्टाचार्यस्य तस्यापि भवतैषा कृता गतिः ॥१९०
प्रत्युवाच प्रभु स्त्वं हि भक्तोऽसि तव सङ्गमात् ।
कृतवान् श्रीजगन्नाथः कृपां साधीयसीमिह ॥१९१
इत्युक्त्वा प्रभुणा भट्टाचार्योऽसौ सुस्थिरीकृतः ।
महाप्रभुं समस्तौषीद् बहुधा दृढचेतसा ॥१९२
त्वया निस्तारितं विश्वमिति यत् कर्म ते लघु ।
मामुद्धारितवान् यस्त्व मिति शक्तिस्तवाद्भुता ॥१९३
तर्कशास्त्रसमभ्यासाज्जडोऽहं लौहपिण्डवत् ।
प्रचण्डो हि प्रतापस्ते सोऽप्यहं द्रावितस्त्वया ॥१९४
प्रभुस्ततस्तव माकर्ण्य निजावासं गतस्तदा ।
भिक्षामकारयद् भट्ट आचार्यामन्त्रितं प्रभुम् ॥१९५
अन्यदा श्रीजगन्नाथं द्रष्टुं यातो महाप्रभुः ।
शय्योत्थानञ्च देवस्य दृष्ट्वा हर्ष मुपागतः ॥१९६
ततो माल्यप्रसादान्ने प्रभवे पूजको ददौ ।
लभमानः प्रभुस्ते च हर्षातिशय मागमत् ॥१९७

प्रसादान्नञ्च माल्यञ्च बद्ध्वा वस्त्राञ्चलेन सः ।
आजगाम ततः शीघ्रं भट्टाचार्यनिकेतनम् ॥१९८
अरुणोदयकालेऽभूत् प्रभो रागमनं तदा ।
तस्मिन्नेव क्षणे भट्टाचार्यो निद्रामसुञ्चत ॥१९९
जाग्रदेव स्फुटं कृष्ण कृष्णेति व्याजहार सः ।
शृण्वतः कृष्णनामास्मादानन्दोऽवर्धत प्रभोः ॥२००
भट्टाचार्यो वहिर्द्देशे प्राप्यैव प्रभुदर्शनम् ।
ससम्भ्रमं समायातः प्रभोः पादाववन्दत ॥२०१
प्रभौ दत्तासने तेन तावुपाविशतामुभौ ।
तदुन्मोच्य प्रसादान्नं प्रभुस्तस्य करे ददौ ॥२०२
भट्टाचार्यः प्रसादान्नं प्राप्यानन्द मुपागमत् ।
श्रीचैतन्यप्रसादेन जाड्यहीनमनास्तदा ॥२०३
अस्नातोऽधौतदन्तोऽपि सन्ध्यां नार्चितवानपि ।
श्लोकमेतं पठित्वासौ प्रसादान्नम भक्षयत् ॥२०४

"तथाहि पद्मपुराणम्—

शुष्कं पर्युषितं वापि नीतं वा दूरदेशतः ।
प्राप्तमात्रेण भोक्तव्यं नात्र कालविचारणा ॥१८

तत्रैव—

न देशनियमस्तत्र न कालनियमस्तथा ।
प्राप्तमन्नं द्रुतं शिष्टै र्भोक्तव्यं हरिर ब्रवीत् ॥१९॥"

तत् समालोक्य हृष्टात्मा वभूव श्रीमहाप्रभुः ।
ततः प्रेमसमाविष्ट स्तमालिङ्गत् पुनः पुनः ॥२०५
तावु भावुभयं धृत्वा चक्रतु र्नर्तनं बहु ।
प्रभुभृत्यौ मिथः स्पर्शात् फुल्लचित्तौ बभूवतुः ॥२०६
स्वेदकम्पाश्रुसम्पन्नावानन्दप्लावनं गतौ ।
प्रेमाविष्टस्ततो वक्तु मेवं प्रारभत प्रभुः ॥२०७

मयाद्यैव विनायासं विजितं भुवनत्रयम् ।
अयत्नेन मयाद्यैव वैकुण्ठारोहणं कृतम् ॥२०८
अद्य सर्वेऽभिलाषा मे परिपूर्णाश्च सर्वथा ।
सार्वभौमस्य विश्वासो महाप्रसादमध्यभूत् ॥२०६
समाश्रितोऽसि कृष्णं त्वमद्यैवाकपटात्मना ।
अद्यैव त्वयि कृष्णश्च सदयोऽभूदकैतवम् ॥२१०
खण्डितं सर्वमद्यैव तव देहादिवन्धनम् ।
सर्वथाच्छिन्न मद्यैव मायया बन्धनं तव ॥२११
मनस्ते प्राप्त मद्यैव श्रीकृष्णप्राप्तियोग्यताम् ।
वेदधर्मानतिक्रम्य प्रसादो भक्षित स्त्वया ॥२१२

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे सप्तमाध्याय एकचत्वारिंश श्लोके नारदं प्रति ब्रह्मवाक्यम्—

येषां स एव भगवान्दययेदनन्तः
सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् ।
ते दुस्तरामतितरन्ति च देवमायां
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥२०॥"

इत्थमुक्त्वा निजावास माजगाम महाप्रभुः ।
तदा प्रभृत्यहङ्कारो भट्टाचार्यस्य खण्डितः ॥२१३
नान्यत् किञ्चन जज्ञौ स श्रीचैतन्यपदं विना ।
विना भक्तिञ्च शास्त्रस्य नान्यद् व्याख्यातवान् पुनः ॥२१४
तस्य वैष्णवतां गोपीनाथाचार्यो विलोकयन् ।
अनृत्यत् करतालीभि र्ब्रुवन् हरिहरीति च ॥२१५
दर्शनार्थं वहिर्गच्छन् भट्टाचार्योऽपरेद्यवि ।
अदृष्ट्वैव जगन्नाथ मुपागच्छन्महाप्रभुम् ॥२१६
तं नत्वा दण्डवद् भूमौ बहुधा स्तुतवानसौ ।
कथयामास दैन्येन स निजां पूर्वदुर्मतिम् ॥२१७

स मक्तेः साधनं श्रेष्ठं श्रोतुकामोऽभवद् यदा ।
तदोपदिष्टवांस्तस्मै नामसङ्कीर्तनं प्रभुः ॥२१८

"तथाहि श्रीहरिभक्तिविलासस्यैकादशविलासे द्वि-चत्वारिंशदधिकद्विशत तमाङ्कधृत-वृहन्नारदीयम्—

हरे र्नाम हरे र्नाम हरे र्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥२१॥"

प्रभुः श्रावितवानर्थं श्लोकस्यास्य सविस्तरम् ।
भट्टाचार्योऽभवच्छ्रुत्वा विस्मयाक्रान्तमानसः ॥२२६
श्रीगोपीनाथ आचार्यः प्रोचे चोक्तं यथा मया ।
पुरा ते श्रूयतां भट्टाचार्य जातं तथैव ते ॥२२०
भट्टाचार्यो नमस्कृत्य कथयामास तं तदा ।
प्रभु स्तवैव सम्पर्कात् करुणां कृतवान्मयि ॥२२१
महाभागवतोऽसि त्वं तर्केणान्धोऽहमस्मि भोः ।
प्रभुस्तवैव सम्बन्धात् कृतवान्मय्यनुग्रहम् ॥२२२
इति प्रह्ववचसुस्य श्रुत्वाशिश्लेष तं प्रभुः ।
ऊचे च श्रीजगन्नाथ मीक्षितुं गम्यतामिति ॥२२३
ततोऽसौ जगदानन्द-दामोदरसमन्वितः ।
निरीक्ष्य श्रीजगन्नाथ माजगाम निजालयम् ॥२२४
प्रसादांस्तावदानीय सुबहूनुत्तमोत्तमान् ।
प्रैरयच्च समं ताभ्यां निजविप्रकरार्पितान् ॥२२५
तालपत्रे लिखन् श्लोकौ स्वकृतौ न्यस्तवांस्ततः ।
जगदानन्दपाणौ स प्रभवे दीयतामिति ॥२२६
प्रसादं पत्रिकाञ्चैतौ गृहत्वोपगतौ प्रभुम् ।
पत्रीं मुकुन्ददत्तस्तु दृष्ट्वा जग्राह तत्करात् ॥२२७
वाह्यभित्तौ लिखित्वा तौ श्लोकौ सोऽस्थापयद यदा ।
तदा तां जगदानन्दः पत्रिकां प्रभवे ददौ ॥२२८

प्रभुः श्लोकौ पठन्नेव पत्रीं छिन्दंश्च सोऽक्षिपत् ।
कण्ठेन जगृहुर्भक्ताः श्लोकौ दृष्ट्वा च कुड्यके ॥२२९

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके षष्ठाङ्के धृतौ सार्वभौम-भट्टाचार्य-कृतौ श्लोकौ—

वैराग्य-विद्या-निज-भक्तियोग-
शिक्षार्थमेकः पुरुषः पुराणः ।
श्रीकृष्णचैतन्यशरीरधारी
कृपाम्बुधिर्यस्तमहं प्रपद्ये २२॥
कालान्नष्टं भक्तियोगं निजं यः
प्रादुष्कर्तुं कृष्णचैतन्यनामा
आविर्भूत स्तस्य पादारविन्दे
गाढं गाढं लीयतां चित्तभृङ्गः ॥२३॥"

एषा श्लोकद्वयी भक्तकण्ठानां मणिमालिका ।
सा कीर्तिः सार्वभौमस्य ढक्कावाद्येन घोष्यते ॥२३०
सार्वभौमो बभूवैकनिष्ठभक्तो महाप्रभोः ।
नैव वेत्त्यपरं सेव्यमन्तरेण स च प्रभुम् ॥२३१
प्रभुः श्रीकृष्णचैतन्यः शचीपुत्रो गुणालयः ।
इति ध्यानं जपश्चास्तां तन्नामग्रहणं सदा ॥२३२
एकदा सार्वभौमोऽसावागतः पुरतः प्रभोः ।
प्रणत्य पठितुं श्लोकं समारभत कञ्चन ॥२३३
श्रीमद्भागवते ब्रह्मस्तवान्तर्गत मेव तम् ।
श्लोकं पठंस्तदन्तस्थौ द्वौ वर्णौ पर्यवर्तयत् ॥२३४

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्यायेऽष्टमश्लोके श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

तत्तेऽनुकम्पां सुसमीक्षमाणो
भुञ्जान एवात्मकृतं विपाकम् ।

हृद्वाग्वपुर्भिर्विदधन्नमस्ते
जीवेत यो भक्तिपदे स दायभाक् ॥२४॥"

प्रभुः पप्रच्छ तं मुक्तिपद इत्यत्र पठ्यते ।
कोऽभिप्रायः कथं भक्तिपद इत्युच्यते त्वया ॥२३५
भट्टाचार्योऽवदद्भक्ति र्नैव मुक्तिफला भवेत् ।
भगवद्भक्तिहीनानां मुक्तिर्दण्डो हि केवलम् ॥२३६
कृष्णस्य विग्रहः सत्य इति योहि न मानयेत् ।
यो निन्दां तस्य कुर्याद्वा संग्रामं सह तेन वा ॥२३७
ब्रह्मसायुज्यमुक्तिर्हि तयो र्दण्डो भवेद् द्वयोः ।
तत्र कुर्यात्तु यो भक्तिं मुक्तिस्तस्य फलं नहि ॥२३८
अपि चेन्मुक्तयः पञ्चविधा नाम सलोकता ।
सामीप्यमथ सारूप्यं सार्ष्टिः सायुज्य मेव च ॥२३९
सालोक्याद्याश्चतस्रश्चेद् भवेयुः सेवनाश्रयाः ।
कदाचित्तर्हि तद्भक्ता स्ताः स्वीकुर्यु र्न चान्यथा ॥२४०
भक्तः श्रृण्वन् हि सायुज्यं प्राप्नोत्येव घृणाभये ।
सायुज्यं नतु गृह्णाति नरकं काङ्क्षते वरम् ॥२४१
सायुज्यं द्विविधं प्रोक्तं ब्रह्मणि च तथेश्वरे ।
गर्ह्यमीश्वरसायुज्यं ब्रह्मसायुज्यतोऽधिकम् ॥२४२

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे एकोनत्रिंशाध्याये त्रयोदशश्लोके देवहूतिं प्रति कपिलदेववाक्यम्—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्व मप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥२५॥"

प्रभुः प्रोवाच तं मुक्तिपदस्यार्थोऽपरोऽस्ति तु ।
यन्मुक्तिपदशब्देन साक्षादीश्वर उच्यते ॥२४३
यतो मुक्तिः पदं यस्य स स्यान्मुक्तिपदः किल ।
नवमस्य पदार्थस्य मुक्तेर्योवा समाश्रयः ॥२४४

कथं पाठव्यतीहारो द्वावर्थौ कृष्णमाहतुः ।
सार्वभौमोऽब्रवीदेष शब्दो वक्तुं न शक्यते ॥२४५
यद्यप्यर्थोऽस्य शब्दस्य भवतैव निगद्यते ।
तथापि श्लेषदोषेण व्यक्तं व्यक्तुं न युज्यते ॥२४६
जायेत पञ्चधावृत्ति र्मुक्तिशब्दस्य यद्यपि ।
रूढिवृत्त्या तु सायुज्ये तथापि प्रत्ययो भवेत् ॥२४७
वदतो मुक्तिशब्दं मे सञ्जायेते घृणाभये ।
ब्रुवतो भक्तिशब्दं तु ह्लादते मम मानसम् ॥२५८
इत्याकर्ण्य जहासासौ प्रभुरानन्दितान्तरः ।
समाशिश्लेष नीरन्ध्रं भट्टाचार्यं ततः प्रभुः ॥३४६
यो मायावाद मध्यैष्ट तथैवाध्यापयच्च यः ।
चैतन्यस्य प्रसादात् स भट्टाचार्योऽब्रवीत्तथा ॥२५०
स्पृष्ट्वा कृष्णायसं यावद् विदधाति न काञ्चनम् ।
तावत् स्पर्शमणिं कोऽपि नैवाभिज्ञातु मर्हति ॥२५१
भट्टाचार्यस्य पश्यन्तः सर्वे वैष्णवतां तथा ।
ज्ञातवन्तः प्रभुं तत्र साक्षाद् व्रजेन्द्रनन्दनम् ॥२५२
काशीमिश्रादयः सर्वे नीलाचलनिवासिनः ।
उपागत्य प्रभोः पादौ शरणं वव्रजुस्ततः ॥२५३
वर्णयिष्याम्यहं वार्तां तां तां सुव्यक्त मग्रतः ।
सार्वभौमो यथा चक्रे सेवनं श्रीमहाप्रभोः ॥२५४
परिपाट्या यया तस्य स भिक्षां निरवर्तयत् ।
वर्णयिष्यामि तच्चापि विस्तरेण तथाग्रतः ॥२५५
मिलनं सार्वभौमेण नाम लीलां महाप्रभोः ।
आकर्णयति यश्चेमां श्रद्दधानेन चेतसा ॥२५६
स ज्ञानकर्मपाशाभ्यां क्षणादेव विमुच्यते ।
स प्राप्नोत्यविलम्बेन चैतन्यचरणाम्बुजम् ॥२५७

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः।
ब्रूते स कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२५८

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीसार्वभौमोद्धारणो नाम षष्ठः परिच्छेदः।

—०—

मध्यलीलायां सप्तमः परिच्छेदः

"धन्यं तं नौमि चैतन्यं बासुदेवं दयार्द्रधीः।
नष्टकुष्ठं रूपपुष्टं भक्तितुष्टं चकार यः ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यसौ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
एवं स सार्वभौमस्य निस्तारं कृतवान् प्रभुः।
दाक्षिणात्यप्रदेशाय गन्तुकामोऽभवत्ततः ॥२
माघे मासि सिते पक्षे सन्न्यास मकरोत् प्रभुः।
आगत्य फाल्गुने मासि स नीलाचल मावसत् ॥३
फाल्गुनस्यान्तिमे भागे दोलयात्रां विलोकयन्।
कृतवान्नृत्यगीतानि प्रेमावेशादनेकधा ॥४
चैत्रे मासि स्थितस्तत्र सार्वभौमं विमोच्य सः।
ऐच्छत् प्रथमवैशाखे प्रयातुं दक्षिणां दिशम् ॥५
आनीय स्वगणान् सर्वान् प्रोचे सप्रश्रयं वचः।
गृहीत्वा श्रीकरग्राहं समाश्लिष्य च तान् प्रभुः ॥६
युष्मान् जानाम्यहं सर्वान् प्राणेभ्योऽप्यधिकान्मम।
प्राणां स्त्यक्तुं समर्थोऽस्मि न युष्मांस्त्यक्तु मुत्सहे ॥७
यूयं मे बन्धवः सर्वे यत्नेनानीय मामिह।
दर्शयन्तो जगन्नाथं बन्धुकर्मान्वतिष्ठत ॥८

दानमेकन्तु याचेऽहं सर्वान् वो निकषाधुना ।
दत्त सर्वे मिलित्वाज्ञां देशं गच्छामि दक्षिणम् ॥६
अवश्यमेव गच्छामि विश्वरूपं समुद्दिशन् ।
गमिष्याम्यह मेकाकी सार्द्धं नेष्यामि नापरम् ॥१०
सेतुबन्धात्तु यावन्न प्रत्यागच्छाम्यहं पुनः ।
तावदत्रावतिष्ठध्वं यूयं नीलगिराविति ॥११
ज्ञात्वापि विश्वरूपस्य सिद्धिप्राप्तिं महाप्रभुः ।
उद्धर्त्तुं दक्षिणं देशं छलमेवं गृहीतवान् ॥१२
सर्वेषां शृण्वतां चित्ते महद्दुःख मजायत ।
शिरसीवापतद्वज्रो मुखानि शोषमाप्नुवन् ॥१३
नित्यानन्दः प्रभुः प्रोचे सम्भवेत् कथमीदृशम् ।
गमिष्यसि त्व मेकाकी तत् को वा सोढ़ु मर्हति ॥१४
एको द्वौ वा समं यातां मा गमो हठवञ्चनाम् ।
आदिश्येते त्वया यौ हि तौ द्वौ यातां त्वया समम् ॥१५
दक्षिणापथतीर्थानां सम्यग्वेद्मि पथोऽखिलान् ।
त्वया सार्द्ध महं यामि मामेवाज्ञापय प्रभो ॥१६
प्रभुः प्रत्यवदत् सूत्रधारस्त्वं नर्तकस्त्वहम् ।
यथा नर्त्तयसि त्वं मां तथैव मम नर्तनम् ॥१७
अहं सन्न्यासमालम्ब्य गच्छन् बृन्दावनं प्रति ।
भवतैव समानीतोऽद्वैताचार्यनिकेतनम् ॥१८
त्वया खण्डीकृतो दण्डो नीलाचलपथे मम ।
गाढस्नेहेन युष्माकं कर्तव्यं मम भण्डितम् ॥१६
विषयान् जगदानन्दो मां भोजयितु मिच्छति ।
यद् यदेव ब्रवीत्येष कर्त्तुं चेष्टे भयेन तत् ॥२०
कदाचिद् यदि तद्वाक्य मन्यथा क्रियते मया ।
क्रोधात्त्रीणि दिनान्येष मयालापं विमुञ्चति ॥२१

त्रिः स्नानं शीतकालेऽपि भूतले शयनञ्चमे ।
सन्न्यासधर्ममालोक्य मुकुन्दो दुःखितः सदा ॥२२
न ब्रवीति मुखेनायं दुःखभारान् हृदा वहन् ।
द्विगुणं दुःख माप्नोमि पश्यन्नेनं सु-दुःखितम् ॥२३
अयं दामोदरब्रह्मचारी सन्न्यासिनन्तु माम् ।
शासितुं वर्तते नित्यं शिक्षादण्डं समुद्वहन् ॥२४
व्यवहारं न जानामि पुरतोऽस्य तु लौकिकम् ।
न साधु प्रतिभात्यस्य स्वतन्त्रं चरितं मम ॥२५
श्रीकृष्णकृपया चास्य लोकापेक्षा न विद्यते ।
किन्त्वहं तां परित्यक्तुं न शक्नोमि कदाचन ॥२६
यूयं सर्वेऽवतिष्ठध्व मतो नीलगिराविह ।
पर्यटिष्यामि तीर्थानि दिनान्येकाकी कानिचित् ॥२७
इति यै यैं र्गुणैरेषां सर्वेषां वशगः प्रभुः ।
दोषारोपच्छलात्तांस्तान् स्वयमास्वादयत्तदा ॥२८
प्रभोस्तद्भक्तवात्सल्यं वाचा वक्तुं न शक्यते ।
स्वयं वैराग्यदुःखं यत् सहते स्म महाप्रभुः ॥२६
तत् समालोक्य यो भक्तो यद्दुःखं प्राप्तवान् हृदि ।
तस्य भक्तस्य तद्दुःखं सोढुं नैवाशकत् प्रभुः ॥३०
गुणेष्वारोपयन्दोषांश्छद्मना तान्निवार्य च ।
तीर्थानि प्रभुरेकाकी वैराग्याद् गन्तुमुद्यतः ॥३१
ततस्तेषु चतुर्ष्वेव बहुशः प्रार्थयत्स्वपि ।
ईश्वरः स्वस्वतन्त्रत्वान्न जातु प्रत्यपद्यत ॥३२
नित्यानन्दस्ततः प्रोचे यथाज्ञापयसि प्रभो ।
मम दुःखं यथैवास्तु कर्तव्यं हि तथैव मे ॥३३
मया तु क्रियते यत्ते पुनरेकं निवेदनम् ।
निपुणं सुविचार्यैव तदङ्गीक्रियतां त्वया ॥३४

अन्तरेण वहिर्वासः कौपीनञ्चाम्बुभाजनम् ।
न यास्यत्यपरं किञ्चिद् व्यंन्तु भवता सह ॥३५
करौ द्वौ नामसंख्याने व्यापृतौ ते भविष्यतः ।
कथङ्कारं वहिर्वासो जलपात्रञ्च वक्ष्यसि ॥३६
प्रेमावेशाद् यदा मार्गे संज्ञाहीनी भविष्यसि ।
एतानि तव वस्तूनि संरक्षिष्यति कस्तदा ॥३७
कृष्णदासाभिधानोऽयं सरलप्रकृति र्द्विजः ।
एन मेव गृहाण त्वं मम रक्ष निवेदनम् ॥३८
वहिर्वासोऽम्बुपात्रञ्च वहन् यास्यत्ययं त्वया ।
करिष्यसि यथेच्छं त्वं नायं वक्ष्यति किञ्चन् ॥३६
इत्येतद्वचनं तस्य प्रभुः स्वीकृतवांस्तदा ।
गतश्चादाय तान् सर्वान् सार्वभौमस्य मन्दिरम् ॥४०
सार्वभौमो नमस्कुर्वन्नासनानि न्यवेदयत् ।
मिलित्वा च प्रभुः सर्वै रासने समुपाविशत् ॥४१
विविधं कृष्णवृत्तान्त मुक्त्वा तं प्रभुरब्रवीत् ।
अहं याचितु मादेशं निकषा त्वां समागतः ॥४२
दाक्षिणात्यं गतो विश्वरूपः सन्न्यासमाश्रयन् ।
अवश्य मेव कर्तव्य ममुष्यान्वेषणं मया ॥४३
त्वं मामाज्ञापयावश्यं देशं यास्यामि दक्षिणम् ।
सुखं प्रत्यागमिष्यामि पुनरत्र तवाज्ञया ॥४४
इत्येवं वचनं श्रुत्या सार्वभौमोऽतिकातरः ।
प्रत्युवाच विषादेन गृहीत्वा चरणौ प्रभोः ॥४५
बहुजन्मकृतैः पुण्यैः सङ्गं ते लब्धवानहम् ।
ईदृशं भवतः सङ्गं विधिः खण्डितवान्मम ॥४६
यदि शीर्षे पतेद्वज्रो म्रियेत तनयोऽथवा ।
सोढुं शक्नोमि तत् सर्वं विच्छेदं न सहे तव ॥४७

ईश्वरस्त्वं स्वतन्त्रोऽसि यथेच्छं गन्तुमर्हसि ।
दिनानि कतिचित्तिष्ठ पश्यामि चरणौ तव ॥४८
प्रभु स्तद्विनयेनैवं श्लथचित्तोऽभवत्तदा ।
कतिचिद्दिवसां स्तस्थौ गमनं न चकार च ॥४६
भट्टाचार्यः सनिर्बन्धं न्यमन्त्रयत तं प्रभुम् ।
स्वगृहे पाचयन् भोज्यं भोजयामास तञ्च सः ॥५०
षाठ्या मातेतिनामासौ तदीया सहधर्मिणी ।
स्वयं पक्त्वा ददौ भिक्षां तस्याश्चरितमद्भुतम् ॥५१
अग्रतः कथयिष्यामि तत् सर्वञ्च सविस्तरम् ।
दक्षिणापथयात्रान्तु वर्णये साम्प्रतं प्रभोः ॥५२
भट्टाचार्यान्तिके तिष्ठन्नुपपञ्चान्यहानि सः ।
ययाचे प्रभुरादेशं गमनाय ततः पुनः ॥५३
अभवत् सम्मतो भट्टो निर्बन्धेन प्रभोस्तदा ।
ययौ तं प्रभुरादाय श्रीजगन्नाथमन्दिरम् ॥५४
देवं पश्यन् यदादेशं ययाचे स तदग्रतः ।
ददौ माल्यं प्रसादञ्च प्रभवे पूजकस्तदा ॥५५
लब्ध्वाज्ञामालिकां हर्षा जगन्नाथं प्रणम्य च ।
सानन्दं गन्तु मारेभे गौराङ्गो दक्षिणापथम् ॥५६
भट्टाचार्यः प्रभोरात्मजनाश्च सहचारिणः ।
सर्वे प्रदक्षिणीकृत्य जगन्नाथं ययुः समम् ॥५७
गच्छन् समुद्रवेलाया मालालनाथवर्त्मना ।
श्रीगोपीनाथ माचार्यं सार्वभौमोऽब्रवीदिदम् ॥५८
चतुःशो वाह्यवासांसि कौपीनानि मया गृहे ।
स्थापितानि प्रसादञ्च ब्राह्मणेन, त्वमानय ॥५६
ततोऽसौ प्रभुपादाय सार्वभौमोन्यवेदयत् ।
अवश्यं भवता रक्ष्यं प्रभो मम निवेदनम् ॥६०

श्रीरामानन्दरायोऽस्ति गोदावरीसरित्तटे ।
स विद्यानगरे तत्राधिकृतो राजपूरुषः ॥६१
नैवासौ भवतोपेक्ष्यः शूद्रो विषयवानिति ।
मद्वाक्याद्भवतावश्यं कर्तव्य स्तस्य सङ्गमः ॥६२
स एवैको जनो नूनं भवतः सङ्गमर्हति ।
पृथिव्यां रसिकोभक्त स्तत्सभो नैव वर्तते ॥६३
पाण्डित्यस्य च भक्तेश्च तत्र सीमा द्वयोरपि ।
तस्य सम्भाषणादेव महिमा ज्ञास्यते त्वया ॥६४
अबुद्ध्वा तस्य वाचश्च चेष्टाश्चाहमलौकिकीः ।
वैष्णवोऽयमिति ज्ञात्वा तं पर्यहसमेकदा ॥६५
तत्तत्त्वं त्वत्प्रसादेन साम्प्रतं ज्ञातवानहम् ।
ज्ञास्यसि त्वं तदालापान्महिमास्य कियानिति ॥६६
इत्ये तद्वचनं तस्मै प्रतिश्रुत्य महाप्रभुः ।
विसर्जनार्थ मेतस्य ददावालिङ्गनं पुनः ॥६७
गृहे स्थित्वा भजन् कृष्णमाशिषं त्वं प्रयुङ्क्ष्व मे ।
प्रत्यावर्ते यथा नीलाचलं तेऽनुग्रहादिति ॥६८
एतावत् कथयन् यात्रां कर्तुं प्रारभत प्रभुः ।
सार्वभौमस्तु तत्रैव मूर्च्छितः पतितोऽभवत् ॥६९
प्रभुस्तूपेक्षमाणस्तं प्रतस्थे सत्वरं ततः ।
प्रभवेत् कोनु विज्ञातुं हृदयं श्रीमहाप्रभोः ॥७०
यतो महानुभावानां हृदयं स्यात् स्वभावतः ।
पुष्पवत् सुकुमारञ्च कठिनञ्चापि वज्रवत् ॥७१

"तथाहि भवभूतिकृतवीरचरितस्योत्तरचरिते तृतीयाङ्के त्रयोविंशश्लोकः—

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि कोनु विज्ञातु मर्हति ॥२॥"

नित्यानन्दप्रभु र्भट्टाचार्य मुत्थापयं स्तदा ।
स्वगेहं प्रेरयामास तं तदात्मजनैः सह ॥७२
शीघ्रमेत्य ततो भक्ताः प्रभुमासादयंस्तदा ।
आत्तवस्त्रप्रसादश्च गोपीनाथः समागतः ॥७३
आलालनाथ मायातः प्रभुः सर्वैश्च तैः सह ।
तं नमस्कृत्य तुष्टाव सर्वैश्चित्र्य मनेकधा ॥७४
कृतवान्नृत्यगीतानि प्रेमाविष्टः कियच्चिरम् ।
ततस्तं द्रष्टुमायात स्तत्र लोका उपाविशन् ॥७५
समन्तात् तेषु कुर्वत् सु ततो हरिहरिध्वनिम् ।
प्रेमावेशान्ननर्तासौ मध्ये गौरहरिः स्वयम् ॥७६
सुवर्णोज्ज्वलवर्णाङ्ग मरुणप्रभवाससम् ।
कम्पस्वेदाश्रुरोमाञ्चैरलङ्कारै रलङ्कृतम् ॥७७
तं दृष्ट्वैव जनाः सर्वे बभूवु स्ते चमत्कृताः ।
तत्रागताना मेकोऽपि नैव प्रतिययौ गृहम् ॥७८
ननृतुः केऽपि हे कृष्ण गोपालेति जगुः परे ।
अभूवन् प्लाविताः प्रेम्णा वालवृद्धास्तथा स्त्रियः ॥७९
नित्यानन्दो विलोक्यैवं प्रोचे भक्तगणं प्रति ।
भविष्यति प्रतिग्राममेवं नर्तनमग्रतः ॥८०
सुचिरेणापि तत्स्थान ममुञ्चत् सु जनेषु सः ।
श्रीनित्यानन्दगोस्वामी कौशलं समकल्पयत् ॥८१
प्रभुमादाय मध्याह्नकृत्यं कर्तुं स यातवान् ।
तथालोक्य जनाः सर्वे तत्रागच्छन् समन्ततः ॥८२
ततो माध्याह्निकं कृत्वा प्रविशन्देवमन्दिरम् ।
प्रवेश्य स्वगणांस्तत्र वहिर्द्वार मकीलयत् ॥८३
गोपीनाथस्तदा तौ द्वौ प्रभू भिक्षामकारयत् ।
प्रभोः शेषं प्रसादान्नं विभज्याभक्षयंश्च ते ॥८४

श्रावं श्रावं जनास्तत्तद् वहिर्द्वार मुपागमन् ।
सर्वे हरिहरीत्युक्त्वा चक्रुः कोलाहलञ्च ते ॥८५
तत उन्मोचयामास रुद्धद्वारोऽर्गलं प्रभुः ।
जनाः सानन्दमागत्य कृतवन्तस्तदीक्षणम् ॥८६
आसायमित्थमागच्छन्नगच्छंश्च जनास्तदा ।
सर्वेऽनृत्यन्नगायंश्च बभूवुस्तेऽपि वैष्णवाः ॥८७
इत्थं भक्तगणेनासौ तत्र स्थित्वा महाप्रभुः ।
श्रीकृष्णालापरागेण तां निशामत्यवाहयत् ॥८८
प्रातःकाले ततः स्नात्वा प्रभुः प्रस्थातुमुद्यतः ।
समाश्लिष्य च भक्तान् स्वान् विदायं तेभ्य आदिशत् ॥८९
ततस्ते भूर्च्छिताः सर्वे भक्ताः पेतुर्महीतले ।
परावर्त्य मुखं पश्चात् प्रभुर्नैक्षत तान् प्रति ॥९०
विच्छेदव्याकुलस्वान्तो दुःखितश्च ययौ प्रभुः ।
जलपात्रकरः कृष्णदासश्चानुससार तम् ॥९१
ते तु भक्तजनाः सर्वे तस्थुस्तत्रोपवासिनः ।
परेद्यु र्दुःखसंविग्नास्ततो नीलाचलं गताः ॥९२
मत्तसिंहसमोऽगच्छदव्याहतगतिः प्रभुः ।
नामसङ्कीर्तनं कुर्वन् प्रेमावेशवशः पथि ॥९३

"तथाहि श्रीकृष्णचैतन्यवाक्यम्—

कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण हे ।
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण हे ।
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण रक्ष माम् ।
कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण कृष्ण पाहि माम् ।
राम राम राम राम राम राम रक्ष माम् ।
राम राम राम राम राम राम पाहि माम् ।"

श्लोकानेवं पठन् गौरहरिः प्रस्थितवान् पथा ।
जनदर्श पथि प्रोचे ब्रूहि हरिहरीत्यसौ ॥६४
प्रेमोन्मत्तो जनः शृण्वन् हरे कृष्णेति चाब्रवीत् ।
अगच्छच्च प्रभोः पश्चात्तद्दर्शनतृषाकुलः ॥६५
कियत्कालान्तरे तस्मै प्रभुरालिङ्गनं ददौ ।
शक्तिं सञ्चारयंस्तस्मिन् विससर्ज च तं जनम् ।६६
स च गत्वा निजग्रामं कृष्णनाम ब्रुवन् सदा ।
उच्चैर्जहास चक्रन्द निर्विरामं ननर्त च ॥६७
यं सोऽपश्यत् तमेवोचे कृष्णनामोच्यतामिति ।
एवमेब निजग्रामं कृतवान् स च वैष्णवम् ॥६८
दैवाद् ग्रामान्तराद् यो यो जनस्तं निकषागतः ।
दर्शनानुग्रहात्तस्य समानस्तेन सोऽभवत् ॥६९
सोऽपि गत्वा निजग्रामं वैष्णवानकरोज्जनान् ।
एत्यान्यग्रामवासी तं दृष्ट्वा च वैष्णवोऽभवत् ॥१००
सोऽपि गत्वापरं ग्रामं जनानुपदिदेश च ।
एवं हि दक्षिणो देशः समग्रो वैष्णवोऽभवत् ॥१०१
इत्थ मेव पथा गच्छन् शतशो मानवान् प्रभुः ।
आलिङ्गनप्रदानेन वैष्णवानकरोत्तदा ॥१०२
यस्मिन् ग्रामे स्थितो भिक्षां कृतवान् यस्य मन्दिरे ।
तस्य ग्रामस्य यावन्तो जनास्तं द्रष्टुमागताः ॥१०३
महाभागवता जाता स्तावन्तः कृपया प्रभोः ।
आचार्या स्ते च संबृत्ता जगत् सर्व मतारयन् ॥१०४
सेतुबन्धं गतो यावत् तावदेवं व्यधात् प्रभुः ।
सर्वदेशोऽभवत्तस्य सम्बन्धेनैव वैष्णवः ॥१०५
या च शक्ति र्नवद्वीपे प्रभुणा न प्रकाशिता ।
तामाविष्कुर्वता देशो दक्षिणस्तारितः किल ॥१०६

यो भजेत प्रभुं तस्य तस्मिन्नेव कृपा भवेत् ।
स एवैताः प्रभोर्लीला विद्यात् सत्यतयाखिलाः ॥१०७
तस्यालौकिकलीलासु विश्वस्यान्नैव यो जनः ।
अयं लोकः परश्चास्य विनश्येतामुभावपि ॥१०८
मया प्रथम मेवोक्तं यथाभूद् गमनं प्रभोः ।
सर्वतो दक्षिणं देशं तथैवासीत् परिक्रमः ॥१०९
पर्यटन्नेवमेवासौ कूर्मस्थानमुपस्थितः ।
कूर्मदेवं समालोक्य संस्तुवन् प्राणमच्च तम् ॥११०
प्रेमाविष्टो हसन् क्रन्दन्नृत्यगीते चकार सः ।
तथा दृष्ट्वा जनाः सर्वेऽभवन् विस्मितचेतसः ॥१११
तदाश्चर्यं समाकर्ण्य जनास्तं द्रष्टुमागताः ।
रूपं प्रेम च संलक्ष्य प्रभोस्ते विस्मयं गताः ॥११२
दर्शनाद् वैष्णवा भूत्वा प्रोचुः कृष्ण हरीति ते ।
प्रेमावेशादनृत्यंश्च ते जना ऊर्द्ध्व वाहवः ॥११३
ते च लोकमुखाच्छ्रुत्वा कृष्णनाम निरन्तरम् ।
अपरग्रामवास्तव्यान् सर्वांश्चक्रुश्च वैष्णवान् ॥११४
देशा अनुक्रमेणेवं सर्वे वैष्णवतां गताः ।
कृष्णनाम सुधासारवन्यया प्लाविताश्च ते ॥११५
प्रभुः कियच्चिरेणैव वाह्यसंज्ञोऽभवद् यदा ।
तदा तं बहुमेनेऽसौ कूर्मदेवस्य सेवकः ॥११६
यं यं ग्रामं प्रभुः प्राप्तस्तत्रैवैवंक्रमोऽभवत् ।
इत्येकत्र मयोक्तं तन्न पुनः कथयिष्यते ॥११७
वैदिको ब्राह्मणो-नाम कूर्मस्तं ग्राम मावसत् ।
श्रद्धया बहुभक्त्या च न्यमन्तयत स प्रभुम् ॥११८
स गृहं प्रभुमानीय तत्पादौ निरनेजयत् ।
अपिवच्च स्ववंशीयै स्तत्पादक्षालनामृतम् ॥११९

बहुधा कारयामास भिक्षां स्नेहेन स प्रभुम् ।
गोस्वामिभुक्तशेषान्नं स्वकुल्यैः सह भुक्तवान् ॥१२०
उक्तवांश्च पदाब्जं ते यद् ब्रह्मा ध्यायति स्वयम् ।
साक्षात्तदेव सम्प्राप्तं ममाद्यास्मिन्निकेतने ॥१२१
मम सौभाग्यसीमेयं वाचा वक्तुं न शक्यते ।
अद्य श्लाघ्यानि जातानि धर्मजन्मकुलानि मे ॥१२२
प्रभो मामनुकम्पस्व प्रव्रजानि त्वया सह ।
विषयाब्धितरङ्गोत्थं दुःखं सोढुं न शक्यते ॥१२३
इत्याकर्ण्य प्रभुः प्रोचे मैवं ब्रूहि कदाचन ।
गृहे स्थित्वा गृहाण त्वं कृष्णनाम निरन्तरम् ॥१२४
ईक्षसे यं तमेव त्वं कृष्णनामैव शिक्षय ।
तारय त्वमिमं देशं गुरुर्भूत्वा ममाज्ञया ॥१२५
कदाचित्त्वां न बध्नीयु र्विषयाशयरज्जवः ।
अत्रैव मत्रैव भूयोऽपि लप्स्यसे मम सङ्गमम् ॥१२६
इत्येवं विदधे भिक्षां प्रभुर्यस्य निकेतने ।
स एव तं ब्रुवन्नेवं तेनाप्येवमशिक्ष्यत ॥१२७
पथा गच्छत एवास्य यत्र देवालयः पुरे ।
तत्र तिष्ठन् गृहे यस्य प्रभु र्भिक्षां गृहीतवान् ॥१२८
तस्मिन् महाजने रीतिः प्रभोः कूर्म इवाभवत् ।
पुन र्नीलाचलं यावत् प्रत्यावर्तत न प्रभुः ॥१२९
अतएव मयात्रैव कथितं तत् सविस्तरम् ।
तस्यैवं व्यवहारोऽभूत् सर्वत्रेत्यवगम्यताम् ॥१३०
इत्थं तस्यां विभावर्य्यां तत्र स्थित्वा महाप्रभुः ।
प्रातःकाले कृतस्नान स्ततो गन्तुं प्रचक्रमे ॥१३२
आजगाम प्रभुं कूर्मो वहदूर मनुव्रजन् ।
प्रेरयामास यत्नेन प्रभुस्तं स्वगृहं प्रति ॥१३२

ब्राह्मणो वासुदेवाख्यः कश्चिदासीन्महाशयः ।
कीटाकुलगलत् कुष्ठाक्रान्तसर्वाङ्ग एव सः ॥१३३
कीटः कश्चित् स्खलन्नङ्गाद् यदि तस्यापतद् भुवि ।
तदा तं स समुत्थाप्य तत्रैवाङ्के न्यधात् पुनः ॥१३४
स रात्रावशृणोत्तत्र प्रभुरागतवानिति ।
प्रातरुत्थाय तं द्रष्टु मागतः कूर्ममन्दिरम् ॥१३५
प्रभोः प्रस्थान माकर्ण्य ततः कूर्ममुखादसौ ।
महादुःखसमाक्रान्तो मूर्च्छितः पतितो भुवि ॥१३६
बहुधा विलपन्नासीन्नैराश्यैन यदा द्विजः ।
तदैव प्रभुरागत्य तमाशिश्लेष सादरम् ॥१३७
गतं तस्य प्रभुस्पर्शाद्दुःखं कुष्ठञ्च दूरतः ।
सोऽभूत् सुन्दरसर्वाङ्ग आनन्दोत्फुल्लमानसः ॥१३८
महाविस्मयमापन्नो ज्ञात्वा तां करुणां प्रभोः ।
श्लोकमेवं पठन्नस्तौद् गृहीत्वा चरणौ प्रभोः ॥१३६

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकाशीतितमाध्याये चतुर्दशश्लोके कृष्णमुद्दिश्य श्रीसुदामब्राह्मणवाक्यम्—

क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ।
ब्रह्मबन्धुरिति स्माहं वाहुभ्यां परिरम्भितः ॥३॥"

स प्रोवाच बहु स्तुत्वा श्रूयतां करुणामय ।
नायं गुणोऽस्ति जीवेषु भवत्येवास्ति केवलम् ॥१४०
मां दृष्ट्वा मम गन्धेन पामरोऽपि पलायते ।
ईदृशं स्पृशसि त्वं मां स्वतन्त्रो हि त्वमीश्वरः ॥१४१
अभवं किन्त्वहं साधु भूत्वैवमधमो भुवि ।
ममेदानी महङ्कारो निश्चयेन जनिष्यते ॥१४२
प्रभु रूचेऽभिमानस्ते न कदाचिद् भविष्यति ।
कृष्ण कृष्णेति नामैव गृहाण त्वं निरन्तरम् ॥१४३

कृष्णनामोपदेशेन जीवान्निस्तारयानिशम् ।
अचिरादेव कृष्णस्त्वां ध्रुवमङ्गीकरिष्यति ॥१४४

एतावत् कथयित्वैव प्रभुरन्तर्दधे ततः ।
अन्योन्यं कण्ठ मालिङ्गयाक्रन्दतां तौ गुणैः प्रभोः ॥१४५

आख्यानं कथितं वासुदेवोद्धाराभिधं मया ।
प्रभुर्नाम्नाभवद् वासुदेवामृतपदस्ततः ॥१४६

इदं तावन्मया प्रोक्तं प्रथमं गमनं प्रभोः ।
कूर्म्मस्य दर्शनं तत्र वासुदेवविमोचनम् ॥१४७

शृणुयाद् य इमां लीलां श्रद्धायुक्तेन चेतसा ।
प्राप्नुयात् सोऽचिरादेव चैतन्यचरणाम्बुजम् ॥१४८

श्रीमच्चैतन्यलीलाया आद्यन्तौ नैव वेद्म्यहम् ।
महतां वदनाम्भोजाद् यच्छृणोमि लिखामि तत् ॥१४९

अनेनाप्यपराधो मे हे भक्ता नैव गृह्यताम् ।
भवतां चरणाम्भोज मेकान्तशरणं मम ॥१५०

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
ब्रूते स कृष्णदास श्रीचैतन्यचरितामृतम् ॥१५१

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीवासुदेवोद्धारो नाम सप्तमः परिच्छेदः ।

—०—

मध्यलीलायामष्टमः परिच्छेदः

"सञ्चार्य रामाभिधभक्तमेघे स्वभक्तिसिद्धान्तचयामृतानि ।
गौराब्धिरेतैरमुना वितीर्णै स्तजज्ञत्व-रत्नालयतां प्रयाति ॥१॥"

जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१

पूर्वरीतिक्रमेणैवं जगाम प्रभुरग्रतः ।
जियडश्रीनृसिंहस्य क्षेत्रं प्राप्तः कियद्दिनैः ॥२

श्रीनृसिंहं समालोक्य दण्डवत् प्रणनाम सः ।
प्रेमाविष्टः प्रभुश्चक्रे नृत्यगीतिस्तुती बहु ॥३

श्रीनृसिंह जयस्तेऽस्तु हे नृसिंह जयोऽस्तुते ।
प्रह्लादेश जयस्तेऽस्तु पद्मास्यपद्मषट्पद ॥४

"तथाहि श्रीमद्भागवते सप्तमस्कन्धे नवमाध्याये प्रथमश्लोकस्य श्रीधर-स्वामिकृतव्याख्यायां धृतागमः—

उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेशरी ।
केशरीव स्वपोताना मन्येषामुग्रविक्रमः ॥२॥"

एवं नानाविधान् श्लोकान् पठन् स्तोत्रं चकार सः ।
तस्मै माल्यं प्रसादञ्च नृसिंहस्यार्चको ददौ ॥५

ततो विप्रेण केनापि पूर्ववत् स निमन्त्रितः ।
यापयंस्तत्र तां रात्रिं पुनर्गन्तुं समुद्यतः ॥६

प्रातःकाले समुत्थाय प्रेमावेशवशेन सः ।
दिग्-विदिग्-ज्ञानहीनः सन् गच्छन्नासीद्दिवानिशम् ॥७

पूर्ववद्वैष्णवीकुर्वं तत्र तत्र च मानवान् ।
प्रभु र्गोदावरीतीरं प्राप्तः कतिपयै र्दिनैः ॥८

नदीं गोदावरीं पश्यन् यमुनामस्मरत् प्रभुः ।
बृन्दावनञ्च सस्मार दृष्टा तीरस्थितं वनम् ॥९

कृतवान्नृत्यगीतानि वने तत्र कियच्चिरम् ।
ततो गोदावरीं तीर्त्वावागाहत महाप्रभुः ॥१०
तीर्थं त्यक्त्वा कियद्दूरं गत्वा च जलसन्निधौ ।
आसीनः कृतवान् कृष्ण-नाम-सङ्कीर्तनं प्रभुः ॥११
समारूढश्चतुर्दोलं वाद्यभाण्डानुवादितम् ।
श्रीरामानन्दरायोऽसौ तदैव स्नातुमागतः ॥१२
बहवो वैदिका विप्रास्तेन सार्द्धं समाययुः ।
यथाविध्यकरोत्तैश्च स स्नानतर्पणादिकम् ॥१३
तं पश्यन् रामरायोऽयमित्यभिज्ञातवान् प्रभुः ।
तत्सङ्गार्थं प्रभोश्चित्त मधावद्द्रुत मुत्थितम् ॥१४
तथाप्यासीत् स आसीन स्तत्रैव धैर्यमाश्रितः ।
दृष्ट्वा सन्न्यासिनं रामानन्दस्तूपजगाम तम् ॥१५
सहस्रांशुशतद्योत मरुणच्छविवाससम् ।
ससौष्ठवमहादेहं फुल्लपङ्कजलोचनम् ॥२६
तं सन्न्यासिनमालोक्य स चमत्कृतमानसः ।
समुपेत्य च साष्टाङ्गं दण्डवत् प्रणतोऽभवत् ॥१७
प्रभुणोक्तं समुत्थायोत्तिष्ठ कृष्णेति वाचय ।
तस्यालिङ्गनलाभाय प्रभुस्तृष्णाकुलोऽपि सन् ॥१८
तञ्च पप्रच्छ किं रायरामानन्दो भवानिति ।
स प्रत्यूचे स एवाहं दासः शूद्रोऽस्मि पामरः ॥१९
तं तदैव स्वबाहुभ्यामालिलिङ्ग प्रभु र्दृढम् ।
प्रभुभृत्यावुभौ प्रेमावेशादास्तामचेतनौ ॥२०
तदा स्वाभाविकः प्रेमा तयोः प्रादुरभूद् द्वयोः ।
अन्योन्यालिङ्गनाबद्धौ द्वावेवापततां क्षितौ ॥२१
स्तम्भस्वेदाश्रुरोमाञ्चकम्पवैवर्ण्ययुक्तयोः ।
तयोरास्यत उद्भूतः कृष्णशब्दः सगद्गदः ॥२२

दृष्ट्वैवं वैदिका विप्रास्तत्र ते विस्मयान्विताः ।
अन्योन्यं कथयामासुस्तर्कयन्त स्तयोर्गतिम् ॥२३
अस्य सन्न्यासिनस्तेजो ब्रह्मवत् प्रतिभाति नः ।
इमं शूद्रं समालिङ्ग्य क्रन्दत्येवमयं कथम् ॥२४
महाराजोऽपि गम्भीरो महापाण्डित्यवानयम् ।
अस्य सन्न्यासिनः स्पर्शात् संवृत्तो मत्तचञ्चलः ॥२५
इत्येवमेव विप्रेषु तर्कयत् सु महाप्रभुः ।
तानालोक्य विजातीयभावान् स्वं भावमावृणोत् ॥२६
तौ तदा स्वस्थभावेन तत्र स्थाने न्यषीदताम् ।
ततो महाप्रभुस्तावत् सहासमिदम ब्रवीत् ॥२७
अवदत् सार्वभौमो मां भट्टाचार्योगुणांस्तव ।
असौ मां तव सङ्गाय यत्नेनैवोपदिष्टवान् ॥२८
सङ्गमार्थं त्वया सार्द्धमह मागतवानिह ।
साधुवृत्तं विनायासं प्राप्तोऽहं तव दर्शनम् ॥२९
रायः प्रत्यवदत् सार्वभौमो मां वेत्ति भृत्यवत् ।
परोक्षेऽप्यवधत्तेऽसौ मम कल्याणसाधने ॥३०
तस्यैवाहं कृपाशक्त्या लब्धवांस्तव दर्शनम् ।
अद्यैव मानुषं जन्म मम साफल्यमागतम् ॥३१
सार्वभौमेऽनुकम्पायास्तवैतत् खलु लक्षणम् ।
यदस्प्राक्षीः कृपाधीनो मामस्पृश्यमपि प्रभो ॥३२
क्व भवानीश्वरः साक्षान्मूर्तो नारायणः स्वयम् ।
क्वाहं शूद्राधमो राजसेवको विषयाशयी ॥३३
घृणां वेदभयञ्च त्वं नाकृथाः स्पर्शनान्मम ।
निषेधयन्ति वेदा हि भवता मम दर्शनम् ॥३४
भवता निन्द्यकर्मापि कारयत्त्येव ते कृपा ।
कस्ते मर्म विजानीयाद् यतस्त्वं स्वयमीश्वरः ३५

मम निस्तारणायैव भवतोऽत्र शुभागमः ।
त्वं महाकरुणासिन्धुः पतितानाञ्च पावनः ॥३६

स्वभावेन महान्तो हि तारयन्त्येव पामरान् ।
स्वयं यान्ति गृहं तेषां विनापि स्वप्रयोजनम् ॥३७

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये तृतीयश्लोके गर्गं प्रति नन्दवाक्यम्—

महद्विचलनं नृणां गृहिणां दीनचेतसाम् ।
निःश्रेयसाय भगवन् कल्पते नान्यथा क्वचित् ॥३॥"

मया सार्द्धं समायाताः सहस्रं ब्राह्मणादयः ।
द्रवीभूतान्तराः सर्वे जाताः सन्दर्शनेन ते ॥३८

सर्वेषां श्रूयते कृष्णहरिनाम मुखान्मया ।
दृश्यन्तेऽङ्गेषु रोमाञ्चा अश्रुधाराश्च लोचने ॥३९

आकृत्या च प्रकृत्या च लक्षणैश्च त्वमीश्वरः ।
न सम्भवति जीवेषु सोऽय मप्राकृतो गुणः ॥४०

प्रत्युवाच प्रभु स्त्वं हि महाभागवतोत्तमः ।
तवैव प्रेक्षणात् सर्वे सञ्जाता द्रुतमानसाः ॥४१

अन्येषां का कथा मायावादिसन्न्यासिनोऽपि मे ।
प्लावनं जायते कृष्णप्रेम्णः स्पर्शात्तवैव हि ॥४२

हृदयस्य कठोरस्य शुद्धये मम केवलम् ।
जानेऽह सार्वभौमो मां तेव सङ्गमुपादिशत् ॥४३

एव मेवोभयस्यैव स्तुतवन्तौ गुणानुभौ ।
अन्योन्य-प्रेक्षणादेव जातौ सानन्दमानसौ ।४४

अस्मिन्नवसरे कश्चिद् वैदिको वैष्णवो द्विजः ।
प्रभुं न्यमन्त्रयामास दण्डवत् प्रणतो भुवि ॥४५

प्रभु स्तं वैष्णवं ज्ञात्वानुमेने तन्निमन्त्रणम् ।
अथेषत्स्मयमानास्यो रामानन्दम भाषत ॥४६

मनो मे जायते कृष्णकथां श्रोतुं मुखात्तव ।
यथा लभेय भूयोऽपि दर्शनं ते तथा कुरु ॥४७
रायेणोक्त मुपेतोऽसि नीचं शोधयितुं यदि ।
नहि दर्शनमात्रेण दुष्टं शुध्यति मेमनः ॥४८
पञ्च वा सप्त वाहानि स्थित्वा तत् परिमार्जय ।
इदं मे मानसं दुष्टं तदा शुद्धं भविष्यति ॥४६
ततो यद्यपि विच्छेदो नैव सह्योऽभवद् द्वयोः ।
तथापि रामरायस्तं दण्डवत् प्रणमन् ययौ ॥५०
प्रभु र्विप्रालयं गत्वा तत्र भिक्षां गृहीतवान् ।
दर्शनोत्कण्ठयान्योन्यं तयोः सन्ध्या समागता ॥५१
स्नानकृत्यं समाप्यैव प्रभौ तत्र निषीदति ।
आगत्यैकेन भृत्येन रायोऽभूत्तेन सङ्गतः ॥५२
नमश्चकार तं रायस्तमाशिश्लेष च प्रभुः ।
आसीनौ विजने तौ द्वौ कथयामासतुः कथाम् ॥५३
प्रभुणोक्तं पठ श्लोकं येन स्यात् साध्यनिर्णयः ।
रायेणोक्तं स्वधर्मेण विष्णुभक्तिः प्रजायते ॥५४

"तथाहि श्रीविष्णुपुराणे तृतीयांशेऽष्टमाध्याये नवमः श्लोकः—

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णु राराध्यते पन्था नान्य स्तत्तोषकारणम् ॥४॥"
प्रभुणोक्त मिदं वाह्यमत ऊर्द्ध न्तु वाचय ।
रायः प्रत्यवदत् साध्यसारः कृष्णे क्रियार्पणम् ॥५५

"तथाहि श्रीभद्भगवद् गीतायां नवमाध्याये विंशश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥५॥"

प्रभुणोक्त मिदं वाह्य मितोऽप्यूर्द्ध्वन्तु वाचय ।
स प्रोचे साध्यसारः स्व-धर्मत्यागस्य साधनम् ॥५६

"तथाहि श्रीमद्भागवत एकादशस्कन्ध एकादशाध्याये द्वात्रिंशश्लोक उद्धवं प्रति श्रीभगवद्वाक्यम्—

आज्ञायैव गुणान्दोषान्मयादिष्टानपि स्वकान् ।
धर्मान् सन्त्यज्य यः सर्वान्मां भजेत् स च सत्तमः ॥६॥"

"तथाहि श्रीमद्भगवद् गीतायामष्टादशाध्याये षट्षष्टितमश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥७॥
प्रभुणोक्त मिदं वाह्यमतोऽप्यूर्द्ध्वं पुनर्वद ।
तेनोक्तं ज्ञानमिश्रा हि भक्तिः साध्योत्तमा भवेत् ॥५७

"तथाहि श्रीमद्भगवद् गीतायामष्टादशाध्याये चतुष्पञ्चाशत्तमश्लोकेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥८॥"
प्रभुः प्रोवाच सा चापि वाह्या ब्रूहि ततोऽग्रतः ।
तेनोक्तं ज्ञानशून्यैव भक्तिः साध्यतमोत्तमा ॥५८

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये तृतीयश्लोके श्रीभगवन्तं प्रति ब्रह्मवाक्यम्—

ज्ञाने प्रयास मुदपास्य नमन्त एव
जीवन्ति सन्मुखरितां भवदीयवार्ताम् ।
स्थानस्थिताः श्रुतिगतां तनुवाङ्मनोभि-
र्ये प्रायशोऽजित जितोऽप्यसि तै स्त्रिलोक्याम् ॥९॥"
प्रभुणोक्तं भवेदेव मितोऽप्यूर्द्ध्वन्तु वाचय ।
तेनोक्तं प्रेमभक्तिर्हि सर्वसाध्योत्तमा भवेत् ॥५९

"तथाहि पद्यावल्यामेकादशाङ्कधृतो रामानन्दरायकृतः श्लोकः—

नानोपचारकृतपूजनमार्त्तबन्धोः
प्रेम्णैव भक्तहृदयं सुखविद्रुतं स्यात् ।
यावत् क्षुदस्ति जठरे जरठा पिपासा ।
तावत् सुखाय भवतो ननु भक्ष्यपेये ॥१०॥"

"तथाहि तत्रैव द्वादशाङ्कधृत स्तस्यैव श्लोकः—

कृष्णभक्तिरसभाविता मतिः क्रीयतां यदि कुतोऽपि लभ्यते ।
तत्र लौल्यमपि मूल्यमेकलं जन्मकोटिसुकृतै र्न लभ्यते ॥११॥"

प्रभुणोक्तं भवत्येवं कथय त्वमतोऽग्रतः ।
रायः कथितवान् दास्यप्रेमा साध्यगणोत्तमः ॥६०

"तथाहि श्रीमद्भागवते नवमस्कन्धे पञ्चमाध्याय एकादशश्लोकेऽम्बरीषं प्रति दुर्वाससोवचनम्—

यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासाना मवशिष्यते ॥१२॥"

तथाहि यामुनमुनिविरचितस्तोत्ररत्ने षट्चत्वारिंशः श्लोकः—

भवन्तमेवानुचरन्निरन्तरः प्रशान्तनिःशेषमनोरथान्तरः ।
कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितम् ॥१३॥"

प्रभुरूचे भवत्येवं ब्रूहि यत् स्यात्ततोऽग्रिमम् ।
रायः प्रत्युक्तवान् सख्यप्रेमा साध्यगणोत्तमः ॥६१

तथाहि श्रीमद्भागवते दशमस्कन्धे द्वादशाध्याये दशमश्लोके परीक्षितं प्रति शुकदेववाक्यम्—

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण सार्द्धं विजह्रुः कृतपुण्यपुञ्जाः ॥१४॥"

प्रभुणोक्त मयं साधु रितोऽप्यूर्द्ध्वं निगद्यताम् ।
रायः प्रोवाच वात्सल्यप्रेमा साध्यगणोत्तमः ॥६२

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये षट्त्रिंशश्लोके शुकदेवं प्रति परीक्षिद्वाक्यम्—

नन्दः किमकरो द्ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥२५॥

तत्रैव नवमाध्याये पञ्चदशश्लोके परीक्षितं प्रति शुकदेववाक्यम्—

नेमं विरिञ्चो त भवो न श्रीरप्यङ्गसंश्रया ।
प्रसादं लेभिरे गोपी यत्तत् प्राप विमुक्तिदात् ॥१६॥"

प्रभुणोक्तमयं साधुतरो ब्रूहि ततोऽग्रतः ।
रायः प्रत्युक्तवान् कान्ताप्रेमा साध्यतमोत्तमः ॥६३

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशाध्याये त्रयःपञ्चाशश्लोके गोपीः प्रत्युद्धववाक्यम्—

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजसुन्दरीणाम् ॥१७॥

तथाहि तत्रैव द्वात्रिंशाध्याये द्वितीयश्लोके परीक्षितं प्रति शुकदेववाक्यम्—

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मयः ॥१८॥"

कृष्णप्राप्तेरुपाया हि वर्त्तन्तेऽत्र पृथग्विधाः ।
तारतम्यानि तेषाञ्च विद्यन्ते सुबहून्यपि ॥६४
किन्तु यस्यास्ति यो भावस्तस्य सर्वोत्तमो हि सः ।
ताटस्थ्येन विचारेण तारतम्यन्तु भासते ॥६५

"तथाहि श्रीभक्तिरसामृतसिन्धौ दक्षिणविभागे स्थायिभावलहर्यां द्वाविंशश्लोके श्रीरूपगोस्वामिनोक्तम्—

यथोत्तरमसौ स्वादविशेषोल्लासमय्यपि ।
रतिर्वासनया स्वाद्वी भासते कापि कस्यचित् ॥१९॥"

रसानां पूर्वपूर्वेषां गुणाः सन्ति परे परे ।
वर्द्धन्ते द्वौ त्रयश्चैवमापञ्च गणनाक्रमात् ॥६६
स्वादाधिक्यं गुणाधिक्याद् वर्धते च रसे रसे ।
शान्तादीनां चतुर्णान्तु गुणा माधुर्य आसते ॥६७
यथाकाशादिभूतानां गुणा भूते परे परे ।
संख्यया द्वौ त्रय श्चैवं वर्धन्ते पञ्च च क्षितौ ॥६८
प्रेम्णोऽस्मादेव सम्पूर्णकृष्णप्राप्ति र्भवेत् खलु ।
अस्य प्रेम्णो वशः कृष्ण इति भागवतं वचः ॥६९

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्याय एकत्रिंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

मयि भक्तिर्हि भूताना ममृतत्वाय कल्पते ।
दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥२० ॥"

श्रीकृष्णस्य प्रतिज्ञा हि द्रढिष्ठा वर्तते सदा ।
यो यथा भजते कृष्णं स तथा भजते च तम् ॥७०

"तथाहि श्रीमद्भगवद्गीतायाम् (४।११)—

ये यथा मां प्रपद्यन्ते तां स्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥२१॥"

अस्य प्रेम्णोऽनुरूपं स प्रतिभक्तुमपारयन् ।
अधमर्णोऽभवत् कृष्ण इति भागवतं तचः ॥७१

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशाध्याय एकविंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—

न पारयेऽहं निरवद्यसंयुजां
स्वसाधुकृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जयगेहशृङ्खलाः
संवृश्च्य तद्वः प्रतियातु साधुना ॥२२॥"

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

अपि चेत् कृष्णमाधुर्यं माधुर्याणां धुरन्धरम् ।
तस्यापि व्रजदेवीभिः सह सौन्दर्य मेधते ॥७२

"तथाहि तत्रैव रासे त्रयस्त्रिंशाध्याये षष्ठश्लोके परीक्षितं प्रति शुकदेववाक्यम्—

तत्राति शुशुभे ताभि र्भगवान्देवकीसुतः ।
मध्ये मणीनां हैमानां महामारकतो यथा ॥२३॥"

प्रभुणोक्तमयं साध्यावधिरेव सुनिश्चितः ।
अस्ति किञ्चित्ततोग्रयं चेत् कृपया तत्त्वयोच्यताम् ॥७३
रायेणोक्त मितोऽप्यग्रयं प्रष्टुं शक्नोति यो जनः ।
इयच्चिरं न जानामि स आस्ते भुवनेष्विति ॥७४
तासां मध्ये नु राधायाः प्रेमा साध्यशिरोमणिः ।
व्याख्यातो महिमा यस्य सर्वशास्त्रेषु सर्वथा ॥७५

"तथाहि लघुभागवतामृत उत्तरखण्डे भक्तामृत एकचत्वारिंशाङ्कधृत-पद्मपुराणवचनम्—

यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥२४॥

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकत्रिंशाध्याये चतुर्विंशश्लोके श्रीराधिकामुद्दिश्य कस्याश्चिद् गोपिकाया वचनम्—

अनयाराधितो नूनं भगवान् हरिरीश्वरः ।
यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः ॥२५॥"

प्रभुणोक्तं ततोब्रूहि शृण्वन्नेव सुखं लभे ।
अपूर्वेयं सुधासिन्धुः प्रवहत्याननात्तव ॥७६
चोरयित्वानयद्राधां स गोपीभ्यो भयादिति ।
अपरापेक्षणे प्रेम्णो गाढ़ता न स्फूरत्यलम् ॥७७
राधिकायाः कृते साक्षाद् गोपिकाश्चेज्जहात्यसौ ।
गाढः प्रेमाऽस्ति कृष्णस्य तस्यामित्यवगम्यते ॥७८

रायोऽथोचे प्रभुं प्रेम्णो महिमाकर्ण्यतां पुनः ।
उपमा राधिकाप्रेम्णो नास्त्येवात्र जगत्त्रये ॥७९

कृष्णः सन्त्यज्य गोपीनां रासनर्तनमण्डलम् ।
राधां कामयमानस्तु विलपन्नभ्रमद्वनम् ॥८०

"तथाहि श्रीगीतगोविन्दे तृतीयसर्गे प्रथमश्लोके श्रीजयदेववाक्यम्—

कंसारि रपि संसारवासनाबद्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥२६॥

तत्रैव तृतीयसर्गे द्वितीयश्लोके श्रीजयदेववाक्यम्—

इतस्तत स्तामनुसृत्य राधिका-
मनङ्ग-वाण-व्रण-खिन्न-मानसः ।
कृतानुतापः स कलिन्द-नन्दिनी-
तटान्तकुञ्जे विषसाद माधवः ॥२७॥"

अस्य श्लोकद्वयस्यार्थं वेद्मि सुष्ठु विचारयन् ।
अर्थे विचार्यमाणेऽस्मिन्नुद्भातीव सुधाखनिः ॥८१

यस्य रासविलासोऽभूद् गोपीनां शतकोटिभिः ।
तस्यैको विग्रहस्त्वासीद्राधायाः पार्श्वसङ्गतः ॥८२

सर्वास्वेव समं दृष्ट्वा प्रेमसाधारणं हरेः ।
जानत्याः कुटिलः प्रेमा राधाया वामतां गतः ॥८३

"तथाहि श्रीउज्ज्वलनीलमणौ शृङ्गारभेदकथने चतुस्त्रिंशश्लोके श्रीरूपगोस्वामिवाक्यम्—

अहेरिव गतिः प्रेम्णः स्वभावकुटिलो भवेत् ।
अतो हेतो रहेतोश्च यूनोर्मान उदञ्चति ॥२८॥"

राधा रोषवशाद्रासं त्यक्त्वा मानात् पलायिता ।
तामपश्यन् हरिस्तत्र बभूव व्याकुलान्तरः ॥८४

सम्यग् वासनया कृष्णो रासलीलामभीष्टवान् ।
वासनायां पुनस्तस्यां राधिकैव हि शृङ्खला ॥८५

तां विना रासलीलाया भावं चेतस्यनाप्नुवन् ।
कृष्णस्तन्मण्डलं त्यक्त्वान्वेष्टुं राधां ततो ययौ ॥८६

राधां क्वापि न लब्ध्वासौ परिभ्राम्यन्नितस्ततः ।
कामवाणैश्च खिन्नात्मा विषादेनान्वतप्यत ॥८७

कामो निर्वापितो नापि गोपीनां शतकोटिभिः ।
इत्यनेनैव राधाया अनुमेया गुणावली ॥८८

प्रभुरूचे कृते येषामहं त्वां निकषागतः ।
ज्ञातवान् रसवस्तूनां तेषां तत्त्वानि सर्वथा ॥८९

मयेदानीं परिज्ञातः साध्यसाधननिर्णयः ।
ब्रूहि भूयोऽग्रतः किञ्चिन्मम शुश्रूषते मनः ॥९०

स्वरूपं वद कृष्णस्य राधिकायाश्च शंस मे ।
रसस्य तत्त्व माख्याहि प्रेम्णस्तत्त्वं निरूपय ॥९१

कृपयै तानि तत्त्वानि मामिदानीं निबोधय ।
त्वामन्तरेण कोऽप्येवं न निरूपयितुं क्षमः ॥९२

रायः प्रत्यवदन्नाह मेवं जानामि किञ्चन ।
यथा भाषयसि त्वं मां तथा शक्नोमि भाषितुम् ॥९३

शिक्षितः शुकपक्षीव पठामि तव शिक्षया ।
को नु वा वेत्तु ते मायां साक्षात्त्वं परमेश्वरः ॥९४

हृदा प्रेरयसि त्वं मां भाषयस्यपि जिह्वया ।
नैव किञ्चन वेदाहं किं ब्रुवे साध्वसाधु वा ॥९५

प्रभुणोक्तञ्च सन्न्यासी मायावादी भवाम्यहम् ।
भक्तितत्त्वं न जानामि मायावादोत्प्लुतात्मकः ॥९६

सान्निध्यात् सार्वभौमस्य मनोऽभून्निर्मलं मम ।
ततोऽपृच्छ महं कृष्णभक्तितत्त्वं वदेति तम् ॥९७

तेनाप्युक्तमहं कृष्णकथां जानामि नैव तु ।
रामानन्दो हि जानाति सर्वमित्यागतोऽस्म्यहम् ॥९८

महिमानं तवाकर्ण्य त्वामत्राहमुपागतः ।
मां सन्न्यासीति विज्ञाय कुरुषे त्वं मम स्तुतिम् ॥६६

ब्राह्मणो वाथ सन्न्यासी कामं शूद्रोऽपि वा पुनः ।
यो वेत्ता कृष्णतत्त्वस्य स एवायं गुरुर्भवेत् ॥१००

सन्न्यासीति निमित्तेन न त्वं मां वञ्चयाधुना ।
श्रीराधाकृष्णयोस्तत्त्व मुक्त्वा मे पूरयान्तरम् ॥१०१

अपि चेत् प्रेमिको रायो महाभागवतोऽपि सन् ।
अनाच्छादितचित्तोऽपि भगवत्कृष्णमायया ॥१०२

परमप्रवलं तावद भिलाषं महाप्रभोः ।
अवगत्य सपद्येव पारिप्लवमना अभूत् ॥१०३

रायेणोक्तं नटोऽहं भोः सूत्रधारो भवान् पुनः ।
यथा नर्तयसि त्वं मां तथा नर्तितु मुत्सहे ॥१०४

ममेयं रसना वीणा त्वं पुनर्वैणिकोत्तमः ।
यदुत्तिष्ठति ते चित्ते तदेवोच्चार्यते मया ॥१०५

ईश्वरः परमः कृष्णः स एव भगवान् स्वयम् ।
अवतारी च सर्वेषां सर्वकारणकारणम् ॥१०६

अनन्ता ये च वैकुण्ठा अनन्ता येऽवतारकाः ।
ब्रह्माण्डानि च सर्वाणि तेषां स एक आश्रयः ॥१०७

सच्चिदानन्ददेहोऽसौ व्रजराजस्य नन्दनः ।
ऐश्वर्यैश्च रसैः सर्वैः पूर्णोऽसौ सर्वशक्तिभिः ॥१०८

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये प्रथमः श्लोकः—

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादि रादि र्गोविन्दः सर्वकारणकारणम् ॥२६॥"

सोऽयमप्राकृते बृन्दावने नूतनमन्मथः ।
उपास्यः कामगायत्र्या कामवीजेन चैव यः ॥१०६

चराचराणां सर्वेषां पुरुषाणाञ्च योषिताम् ।
चित्तान्याकर्षतः साक्षान्मन्मथस्यापि मन्मथः ॥११०

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वात्रिंशाध्याये द्वितीयश्लोके परीक्षितं प्रति शुकवचनम्—

तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ।
पीताम्बरधरः स्रग्वी साक्षान्मन्मथ-मन्मथः ॥३०॥"

विविधानाञ्च भक्तानां विविधं स्याद्रसामृतम् ।
भवेदेतस्य सर्वस्य विषयश्चाश्रयश्च सः ॥१११

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे सामान्यभक्तिलहर्यां प्रथम-श्लोके श्रीरूपगोस्वामिवचनम्—

अखिलरसामृतमूर्त्तिः प्रसृमररुचिरुद्धतारकापालिः ।
कलितश्यामाललितो राधाप्रेयान् विधु र्जयति ॥३१॥"

मूर्त्तिमान् रसराजोऽयं शृङ्गारः स्वय मेव हि ।
अतः किमुत सर्वेषा मात्मनोऽपि मनोहरः ॥११२

"तथाहि श्रीगीतगोविन्दे प्रथमसर्गे एकादशश्लोके श्रीजयदेववाक्यम्—

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलै रुपनयन्नङ्गै रनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभि रभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्त्तिमानिव मधौ मुग्धोहरिः क्रीड़ति ॥३२॥"

श्रीकान्ताद्यवताराणा मपि सोऽयं मनोहरः ।
लक्ष्मीप्रभृतिदेवीनामपि चित्तं स कर्षति ॥११३

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकोननवतितमाध्याये अष्टापञ्चाश-श्लोके श्रीकृष्णार्जुनौ प्रति भूमपुरुषवाक्यम्—

द्विजात्मजा मे युवयो र्दिदृक्षुणा
मयोपनीता भुवि धर्मगुप्तये ।

कलावतीर्णा ववने भरासुरान्
हत्वेह भूयस्त्वरयेतमन्ति मे ॥३३॥"

"तत्रैव दशमस्कन्धे षोडशाध्याये द्वात्रिंशश्लोके श्रीकृष्णं प्रति नागपत्नीवाक्यम्—

कस्यानुभावोऽस्य न देव विद्महे
तवाङ्घ्रिरेणुस्पर्शाधिकारः।
यद्वाञ्छया श्रीर्ललनाचरत्तपो
विहाय कामान् सुचिरं धृतव्रता ॥३४॥"

आत्मन स्तस्य माधुर्यं हरत्यप्यात्मनो मनः।
स आलिङ्गितु मात्मानं काङ्क्षत्यन्वह मात्मना ॥११४

"तथाहि ललितमाधवेऽष्टमाङ्केऽष्टाविंशश्लोके मणिभित्तौ स्वप्रतिविम्वं दृष्ट्वा श्रीकृष्णवाक्यम्—

अपरिकलितपूर्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्यपूरः।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव ॥३५॥"

कृष्णस्यैतत् स्वरूपन्तु मया प्रोक्तं समासतः।
राधायाः साम्प्रतं तत्त्वं संक्षेपेणैव वक्ष्यते ॥११५

कृष्णस्य शक्तयोऽनन्ता स्तिस्रस्तासूत्तमा मताः।
चिच्छक्तिश्च तथा माया जीवशक्ति स्तथापरा ॥११६

ता उच्यन्तेऽन्तरङ्गा च वहिरङ्गा तटस्थिता।
अन्तरङ्गास्वरूपैव शक्तिः सर्वोपरिस्थिता ॥११७

"तथाहि भगवत्सन्दर्भे सत्त्वं रजस्तम इति त्रिदेव मित्यस्य व्याख्यायां धृतो विष्णुपुराणस्य षष्ठांशीयसप्तमाध्यायस्य षष्टितमश्लोकः—

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥३६॥"

श्रीकृष्णस्य स्वरूपं सच्चिदानन्दमयं भवेत् ।
अतः स्वरूपशक्तिश्च रूपत्रयवती भवेत् ॥११८
आनन्दे ह्लादिनी प्रोक्ता सदंशेनैव सन्धिनी ।
चिदंशे प्रोच्यते संविद् या ज्ञानमिति मन्यते ॥११९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिभक्तिलहर्यां प्रथमश्लोक-व्याख्यायां धृतो विष्णूपुराणस्य प्रथमांशीय द्वादशाध्यायस्याष्टा-चत्वारिंशः श्लोकः—

ह्लादिनी सन्धिनी संवित्त्वय्येका सर्वसंश्रये ।
ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥३७॥"
कृष्ण माह्लादयत्येषा ह्लादिनी नाम सा ततः ।
श्रीकृष्णो हि तया शक्त्या सुखं स्वादयति स्वयम् ॥१२०
सुखरूपः स्वयं कृष्णः सुखमास्वादयेदलम् ।
भक्तेभ्यः सुखदानाय ह्लादिन्येव तु कारणम् ॥१२१
ह्लादिन्या यो हि सारांशः प्रेमनाम्नाभिधीयते ।
प्रेम व्याख्यायते तावद्रस आनन्दचिन्मयः ॥१२२
प्रेम्णश्च परमः सारो महाभावोहि मन्यते ।
महाभावस्वरूपा सा राधा परमदेबता ॥१२३

"तथाह्युज्ज्वलनीलमणौ राधा-चन्द्रावल्योः श्रेष्ठताकथने द्वितीयश्लोकः—

तयोरप्युभयोर्मध्ये राधिका सर्वथाधिका ।
महाभावस्वरूपेयं गुणैरतिवरीयसी ॥३८॥"
देहः प्रेमस्वरूपोऽस्याः सैषा प्रेमविभाविता ।
कृष्णस्य प्रेयसी श्रेष्ठा विख्याता भुवनत्रये ॥१२४

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये त्रयस्त्रिंशः श्लोकः—

आनन्द-चिन्मय-रस-प्रतिभाविताभि-
स्ताभिर्य एष निजरूपतया कलाभिः ।

गोलोक एव निवसत्यखिलात्मभूतो
गोविन्द मादिपुरुषं तमहं भजामि ॥३६॥"
सोऽयं किल महाभावः सारश्चिन्तामणेरपि ।
पूरकः कृष्णवाञ्छाया स्तदेकास्य प्रयोजनम् ॥१२५
राधिकाया महाभावचिन्तामणिस्वरूपता ।
तत्कायव्यूहरूपाश्च तत्सख्यो ललितादयः ॥१२६
कृष्णस्नेहो हि राधायाः सुगन्ध्युद्वर्तनं पुनः ।
तत्र सौरभ मेवास्या देहकान्तिः समुज्ज्वला ॥१२७
तस्या हि प्रथमं स्नानं कारुण्यामृतधारया ।
तारुण्यामृतधाराभिः स्नानं तस्याश्च मध्यमम् ॥१२८
शेषं तदुपरिस्नानं लावण्यामृतधारया ।
स्वलज्जा श्यामकौषेयशाटी तस्या अधोंशुकम् ॥१२६
तस्याः कृष्णेऽनुरागोहि लोहितश्चोत्तरीयकम् ।
तस्याः प्रणयमानेन चोलेनोरउदञ्चनम् ॥१३०
सौन्दर्यं कुङ्कुमं देहे सखीप्रेमैव चन्दनम् ।
स्मितकान्तिश्च कर्पूर मित्येतद्वर्णकत्रयम् ॥१३१
कृष्णस्य रसमाधुर्यं तस्याः कस्तूरिकाभरः ।
तेन कर्बूरितं तस्याः समग्रञ्च कलेवरम् ॥१३२
प्रच्छन्नमानवाम्ये च धम्मिल्लस्य प्रसाधनम् ।
धीराधीरात्व धर्मोऽस्या अङ्गानां पटवासकम् ॥१३३
रागताम्बूलरागेणाधरविम्बं समुज्ज्वलम् ।
प्रेमकौटिल्य मेवास्याः कज्जलं नयनद्वये ॥१३४
सूद्दीप्तः सात्त्विको हर्षादयः सञ्चारिणश्च ये ।
तै र्भावै र्भूषणै स्तस्याः सर्वाङ्गं सम्भृतं किल ॥१३५
विंशत्या भूषिता भावैः सा किलकिञ्चितादिभिः ।
सर्वमङ्गं गुणश्रेण्या पूरितं पुष्पमालया ॥१३६

सौभाग्यं तिलकं चारु तस्या भालश्रियोज्ज्वलम् ।
प्रेमवैचित्त्यरत्नञ्च हृदये तरलायितम् ॥१३७
कैशोरक-वयः-सख्याः स्कन्धन्यस्तकराम्बुजा ।
कृष्णलीलामनोवृत्तिवयस्याभिः समावृता ॥१३८
आसीना गर्वपर्यङ्के स्वाङ्गसौरभमन्दिरे ।
सर्वदा कृष्णसङ्गं सा चिन्तयन्त्यवतिष्ठते ॥१३९
कृष्णनामगुणख्याति-कर्णपूरौ श्रुतिद्वये ।
कृष्णनामगुणख्याति-स्रोतो वहति तन्मुखात् ॥१४०
श्रीकृष्णं पाययत्येषा सदा श्यामरसं मधु ।
सर्वान् कामांश्च कृष्णस्य पूरयन्ती निरन्तरम् ॥१४१
श्रीकृष्णे निर्मलप्रेमरत्नानां खनिरेव सा ।
असामान्यगुणैस्तैस्तैः परिपूर्णकलेवरा ॥१४२

"तथाहि श्रीगोविन्दलीलामृत एकादशसर्गे द्वादशाधिकशत-
तमश्लोके राधाकुन्दवल्ल्योरुक्तिः—

का कृष्णस्य प्रणयजनिभूः, श्रीमती राधिकैका
कास्य प्रेयस्यनुपमगुणा, राधिकैका न चान्या ।
जैह्म्यं केशे दृशि तरलता निष्ठुरत्वं कुचेऽस्या-
वाञ्छापूर्त्यैं प्रभवति हरे राधिकैका न चान्या ॥४०॥"

सत्यभामापि सौभाग्यगुणान् यस्या अभीप्सति ।
यस्याः कलाविलासांश्च शिक्षन्ते च व्रजाङ्गनाः ॥१४३
श्रीगोर्यौ वाञ्छतो यस्याः सौन्दर्यप्रमुखान् गुणान् ।
यत्पातिव्रत्यधर्मञ्च सदा काङ्क्षत्यरुन्धती ॥१४४
यस्याः सद्गुणसंख्याने कृष्णोऽप्यन्तं न विन्दति ।
क्षुद्रोजीवः कथं तस्या गुणान् गणयितुं क्षमः ॥१४५
श्रीराधाकृष्णयोः प्रेमतत्त्वं सुविदितं मया ।
द्वयो र्विलासमाहात्म्यं ब्रूहीत्यूचे महाप्रभुः ॥१४६

रायः प्रत्यवदद् धीरललितो नायको हि सः ।
चरित्रं तस्य कृष्णस्य कामक्रीडैव सर्वदा ॥१४७

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्यां त्रयोविंशत्यधिकशततमश्लोके श्रीरूपगोस्वामिवाक्यम्—

विदग्धो नवतारुण्यः परिहासविशारदः ।
निश्चिन्तो धीरललितः स्यात् प्रायः प्रेयसीवशः ॥४१॥"

कृष्णो रात्रिन्दिवं कुञ्जे क्रीड़न् राधिकया सह ।
सफलं कृतवान् क्रीडारङ्गैः कैशोरकं वयः ॥१४८

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्यां चतुर्विंशत्यधिकशततमश्लोके श्रीरूपगोस्वामिवाक्यम्—

वाचा सूचित-शर्वरी-रतिकला-प्रागल्भ्यया राधिकां
व्रीडाकुञ्चितलोचनां विरचयन्नग्रे सखीनामसौ ।
तद्वक्षोरुहचित्रकेलिमकरीपाण्डित्यपारं गतः
कैशोरं सफलीकरोति कलयन् कुञ्जे विहारं हरिः ॥४२॥"

प्रभुणोक्तं भवत्येवं कथय त्वमितोऽग्रतः ।
रायेणोक्तमितोऽप्यूर्द्ध्वं न बुद्धिर्गन्तुमर्हति ॥१४९

एषां प्रेमविलासानां विवर्त्तो ह्येकधा भवेत् ।
शृण्वतस्तं भवेत् किंवा भवेन्नापि सुखं तव ॥१५०

इत्युदीर्य स सङ्गीत मेकं स्वरचितं जगौ ।
प्रभुः प्रेम्णा स्वहस्तेन च्छादयामास तन्मुखम् ॥१५१

"तथाहि गीतम्"—

प्रथमत एव हि रागो नयनभङ्ग मनुजातः ।
अनुदिन मुपचयमेतोऽवधि मधुनापि न यातः ॥१५२

नासौ रमणो ह्यो रमणी नाह मभीष्टा ।
हृदय-द्वितय मनङ्गे नैकीकृतमिव पिष्ट्वा ॥१५३

सखि तं प्रेमोदन्तं निखिलं वद्यसि कृष्णम् ।
जाने विस्मृतवन्तं तं मयि हन्त वितृष्णम् ॥१५४
नैवान्विष्यत दूती विचितो नान्य उपायः ।
मध्यत उभयोर्मिलने मन्मथ एव सहायः ॥१५५
सम्प्रति स खलु विरागी दूती त्वमसि नियुक्ता ।
एवमेव सुजनस्य प्रेमरीतिरतियुक्ता ॥१५६

"तथाह्युज्ज्वलनीलमणौ स्थायिभावकथने दशाधिकशततम-
श्लोके श्रीरूपगोस्वामिवाक्यम्—

राधाया भवतश्च चित्तजतुनी स्वेदैर्विलाप्य क्रमाद्
युञ्जन्नद्रिनिकुञ्जकुञ्जरपते निर्धूतभेदभ्रमम् ।
चित्राय स्वय मन्वरञ्जयदिह ब्रह्माण्डहर्म्योदरे
भूयोभि र्नवरागहिङ्गुलभरैः श्रृङ्गारकारुः कृती ॥४३॥"

प्रभुणोक्त मियं ह्येव सीमा साध्यस्य वस्तुनः ।
साम्प्रतं ते प्रसादेन निश्चितं ज्ञातवानहम् ॥१५७
न कोऽपि लभते साध्यवस्तु साधन मन्तरा ।
उपायः कथ्यतां राय कृपया तस्य लब्धये ॥१५८
रायेणोक्तं यथा त्वं मां वाचयसि ब्रुवे तथा ।
नाहं किञ्चन जानामि किं ब्रुवे साध्वसाधु वा ॥१५९
ईदृशो वर्त्तते धीरः को वास्मिन् भुवनत्रये ।
यस्तवात्र महानाट्ये स्थिरतां प्रतिपद्यते ॥१६०
मन्मुखेनैव वक्तासि स्वयं श्रोतासि च प्रभो ।
इदं रहस्य मत्यन्तं साधनं श्रूयतां पुनः ॥१६१
श्रीराधाकृष्णयो र्लीलात्यन्तं गूढतमा भवेत् ।
नैव स्याद् दास्यवात्सल्यादिभि र्भावैस्तु गोचरः ॥१६२
विद्यते ह्यधिकारोऽत्र सखीना मेव केवलम् ।
सखीभिः पुनरेताभि र्लीलेयं विस्तृता भवेत् ॥१६३

अन्तरेण सखी लींला नेयमाप्नोति पुष्टताम् ।
वितत्यैव सखी-लीलाः सख्य आस्वादयन्ति च ॥१६४
गतिर्नान्यस्य लीलायामस्यामस्ति सखी विंना ।
सख्या भावेन यः कुर्यात्तस्या अनुगतिं जनः ॥१६५
स साध्यं लभते राधाकृष्णयोः कुञ्जसेवनम् ।
नास्त्यन्यः कश्चनोपाय स्तत्साध्यप्रतिपत्तये ॥१६६

"तथाहि श्रीगोविन्दलीलामृते दशमसर्गे सप्तदशश्लोके वृन्दां प्रति नान्दीमुखीवचनम्—

विभुरपि सुखरूपः स्वप्रकाशोऽपि भावः
क्षणमपि नहि राधाकृष्णयो र्या ऋते स्वाः ।
प्रवहति रसपुष्टिं चिद्विभूतीरिवेशः
श्रयति न पद मासां कः सखीनां रसज्ञः ॥४४॥"

अनिर्वाच्यप्रकाशा हि सखीनां प्रकृति र्भवेत् ।
श्रीकृष्णेनात्मलीलायां तासां नास्त्येव कामना ॥१६७
सार्द्धं कृष्णेन राधाया लीलां यत् कारयन्ति ताः ।
सुखं कोटिगुणं तत्र प्राप्नुवन्त्यात्मकेलितः ॥१६८
राधिकैव हि कृष्णस्य प्रेमकल्पलता भवेत् ।
सख्य स्तस्या भवेयुस्ताः प्रसूनच्छदपल्लवाः ॥१६९
कृष्णलीलामृतेनैव सिच्यते सा लता यदि ।
भवेत् कोटिगुणं तासां सुख मात्मसुखादपि ॥१७०

"तथाहि श्रीगोविन्दलीलामृते दशमसर्गे षोडशश्लोके वृन्दां प्रति नान्दीमुखीवचनम्—

सख्यः श्रीराधिकाया व्रजकुमुदविधो र्ह्लादिनीनामशक्तेः
सारांशप्रेमवल्ल्याः किशलयदलपूष्पादितुल्याः स्वतुल्याः ।
सिक्तायां कृष्णलीलामृतरसनिचयैरुल्लसन्त्याममुष्यां
जातोल्लासाः स्वसेकाच्छतगुणमधिकं सन्ति यत्तन्न चित्रम् ॥४५॥"

सखीनामपि चेच्चित्तं नास्ति कृष्णेन सङ्गमे ।
राधा तथापि यत्नेन ताः कारयति तेन तम् ॥१७१
नानाच्छलेन ताः प्रेष्य कृष्णं सङ्गमयत्यसौ ।
सुखं कोटिगुणं प्राप्नोत्यात्मना कृष्णसङ्गमात् ॥१७२
रसोऽन्योन्यं तयोः प्रेम्णा विशुद्धेनैव पुष्यति ।
आस्वाद्य प्रेम सर्वासां तासां कृष्णोऽपि तुष्यति ॥१७३
गोपीनां सहजः प्रेमा न कामः प्राकृतो ह्यसौ ।
कामक्रीडनसादृश्यात् कामो नाम्नाभिधीयते ॥१७४

"तथाहि श्रीभक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्यां त्रिचत्वारिंशाधिकशताङ्कधृतगौतमीयतन्त्रम्—

प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम् ।
इत्युद्धवादयोऽप्येवं वाञ्छन्ति भगवत्प्रियाः ॥४६॥"

कामशब्दस्य तातपर्य्यं स्वेन्द्रियानन्दकारणे ।
गोपीभावस्य वर्यस्य तात्पर्यं कृष्णतर्पणे ॥१७५
निजेन्द्रियसुखाकाङ्क्षा गोपिकानां न वर्तते ।
विहारसङ्गौ कुर्वन्ति कृष्णसौख्यार्थमेव ताः ॥१७६

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याय ऊनविंशश्लोके श्रीकृष्णमुद्दिश्य गोपीवाक्यम्—

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभि र्भ्रमति धी र्भवदायुषां नः ॥४७॥"

गोपीभावामृते तस्मिन् यस्य लोभः प्रजायते ।
वेदधर्मानपि त्यक्त्वा स कृष्णं भजते सदा ॥१७७
यो रागानुगया भक्त्या मार्गेण भजते हि तम् ।
स एव जन आप्नोति व्रजे व्रजेन्द्रनन्दनम् ॥१७८

व्रजलोकस्य यं कश्चिद्भाव माश्रित्य यो भजेत् ।
भावयोग्यं वपुर्लब्ध्वा स व्रजे कृष्णमाप्नुयात् ॥१७६
तत्रोपनिषदि प्रोक्ताः श्रुतयः स्युरुदाहृताः ।
भजन्त्यो रागमार्गेण प्रापु र्व्रजेन्द्रनन्दनम् ॥१८०

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याये त्रयोविंशश्लोके भगवन्तमुद्दिश्य वेदस्तुतिः—

निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि य-
न्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ।
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो
वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ॥४८॥"

तत् समदृश इत्यस्य तद्भावानुगतार्थता ।
श्रुतयः प्राप्तगोपीत्वा इत्यर्थश्च समा इति ॥१८१
कृष्णसङ्गसुखं प्रोक्तमङ्घ्रिपद्मसुधा इति ।
कृष्णचन्द्रो व्रजे जातु विधिमार्गेण नाप्यते ॥१८२

"तथाहि श्रीमद्भागवते दशमस्कन्धे नवमाध्याय एकविंशश्लोके परीक्षितं प्रति शुकवाक्यम्—

नायं सुखापो भगवान्देहिनां गोपिकासुतः ।
ज्ञानिनाञ्चात्मभूतानां यथा भक्तिमतामिह ॥४६॥"

अङ्गीकृत्यैव तद्गोपीभावमन्तर्दिवानिशम् ।
विहारं चिन्तयेद्राधाकृष्णयो र्मनसा जनः ॥१८३
चिन्तयन् सिद्धदेहे स कुर्यात्तत्रैव सेवनम् ।
सखीभावेन चाप्नुयाद्राधाकृष्णपदाम्बुजम् ॥१८४
गोपीभावानुगत्येन विनैश्वर्यस्य बोधतः ।
भजमानोऽपि नाप्नुयाद् व्रजे व्रजेन्द्रनन्दनम् ॥१८५
लक्ष्यतां तत्र दृष्टान्तो लक्ष्मीः शश्वद्भजन्त्यपि ।
व्रजेन्द्रनन्दनं कृष्णं नैव प्राप्तवती व्रजे ॥१८६

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशाध्याये षष्टितमश्लोके
गोपीः प्रत्युद्धववाक्यम्—

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद् व्रजसुन्दरीणाम् ॥५०॥"

इतीयद्वचनं श्रुत्वा समाशिश्लेष तं प्रभुः ।
अन्योन्यं बाहुसंश्लिष्टकण्ठौ चक्रन्दतुश्च तौ ॥१८७
प्रेमावेशवशादेवं यापयन्तौ विभावरीम् ।
प्रभाते तौ प्रतस्थाते स्वकर्मविधये ततः ॥१८८
प्रस्थानावसरे रायो गृहीत्वा चरणौ प्रभोः ।
वचोभिर्विनयानम्रै रेवमेव मवोचत ॥१८९
मय्येवानुग्रहं कर्तुं भवानत्र समागतः ।
दशाहानि स्थितस्त्वं मे मनो दुष्टं विशोधय ॥१९०
जीवांस्तारयितुं नान्यस्त्वां विना कोऽपि विद्यते ।
कृष्णप्रेमप्रदानाय नास्त्येवान्य स्त्वया विना ॥१९१
प्रत्यूचे प्रभुराकर्ण्य गुणांस्तेऽह मिहागतः ।
त्वत्तः कृष्णकथां श्रुत्वा शुद्धये मम चेतसः ॥१९२
यथैवाकर्णितो दृष्टस्तथैव महिमा तव ।
त्वं राधाकृष्णयोः प्रेमरसज्ञाने परोऽवधिः ॥१९३
दशाहस्य कथा कैव यावज्जीवाम्यहं पुनः ।
तावदेव तु सङ्ग ते न परित्यक्तुमुत्सहे ॥१९४
त्वञ्चाहञ्च निवत्स्याव उभौ नीलाचले समम् ।
कृष्णवार्ताप्रसङ्गेन नेष्यावः समयं सुखम् ॥१९५
इत्युक्ते प्रभुणा तौ द्वौ गतवन्तौ स्वकर्मणे ।
रायः सायं समागत्य प्रभुणा मिलितः पुनः ॥१९६

उभौ निभृतमासीनौ कथयन्तौ परस्परम् ।
सानन्दमनसौ प्रश्नोत्तरगोष्ठीञ्च चक्रतुः ॥१९७

सम्पृष्टः प्रभुणा रामानन्दः प्रत्यवदत्तदा ।
एवं तस्यां निशायां तौ प्रोक्तवन्तौ परस्परम् ॥१९८

प्रभुः पप्रच्छ का विद्या श्रेष्ठा विद्यासु गण्यते ।
रायः प्रोचे विना कृष्णभक्तिं विद्यास्ति नापरा ॥१९९

महिष्ठा कतमा कीर्ति जींवानां सर्वकीर्तिषु ।
श्रीकृष्णप्रेमभक्तोऽयमितिख्याति र्महत्तमा ॥२००

जीवानां सम्पदां मध्ये का सम्पदिह गण्यते ।
श्रीराधाकृष्णयोः प्रेमा यस्य तस्य धनं महत् ॥२०१

दुःखानां परमं दुःखं गरिष्ठं कतमद्वद ।
कृष्णभक्तेन विच्छेदं विना दुःखं न विद्यते ॥२०२

मुक्तानामिह जीवानां को हि मुक्ततमो मतः ।
श्रीकृष्णप्रेम यस्यास्ति स हि मुक्तशिरोमणिः ॥२०३

गीतानां कतमद् गीतं स्वधर्मो जीवसंहतेः ।
राधिकाकृष्णयोः प्रेमकेलि हिं गीतजीवनम् ॥२०४

जीवानां श्रेयसां मध्ये किं श्रेयः परमं मतम् ।
विना श्रीकृष्णभक्तानां सङ्गाच्छ्रेयो न विद्यते ॥२०५

प्रधानं स्मरणं कस्य कुर्यु जींवाः प्रतिक्षणम् ।
कृष्णनामगुणग्रामलीलानां स्मरणं तथा ॥२०६

किञ्च मुख्यतमं ध्येयं जीवानां ध्येयवस्तुषु ।
राधाकृष्णपदाम्भोजध्यानं सर्वोत्तमोत्तमम् ॥२०७

जीवः सर्वं परित्यज्य कुत्र बासं समाचरेत् ।
रासलीलास्थितिर्यत्र तत्र वृन्दावनव्रजे ॥२०८

जीवानां श्रवणीयेषु किं हि श्राव्यं महत्तमम् ।
श्रीराधाकृष्णयोः प्रेमलीला कर्णरसायनम् ॥२०९

उपास्यानाञ्च मध्ये किं समुपास्यतमं भवेत् ।
श्रीराधाकृष्णयोर्युग्मनामोपास्यतमं मतम् ॥२१०
द्वयोः का का गति र्वास्या मुक्तिं भक्तिञ्च वाञ्छतोः ।
स्थावरात्मनि संस्थानं यथा वा देवतात्मनि ॥२११
यथा निम्बफलं तिक्त मरसज्ञोऽत्ति वायसः ।
रसज्ञः कोकिलो भुङ्क्ते मधुरं चूतकुट्मलम् ॥२१२
स्वादयत्यरसं ज्ञानं ज्ञानी भाग्यहत स्तथा ।
कृष्णप्रेमामृतं भक्तो भाग्यवांस्तु पिवत्यलम् ॥२१३
एवं तयोर्द्वयोः कृष्णकथानन्दरसेन च ।
रोदनैर्नृत्यगीतैश्च प्रभाताभूद्विभावरी ॥२१४
ततः प्रातः प्रतस्थाते तावुभौ स्वस्वकर्मणे ।
सायमागत्य रायश्च परेद्यु र्मिलितः पुनः ॥२१५
इष्टगोष्ठीं तथा कृष्णकथां कुर्वन् कियच्चिरम् ।
गृहीत्वा प्रभुपादाब्जं राय एवं न्यवेदयत् ॥२१६
श्रीराधाकृष्णयोस्तत्त्वे तत्त्वे च प्रेमलीलयोः ।
रसतत्त्वञ्च तान्येवं वरेण्यानि बहूनि च ॥२१७
तत्त्वानीयन्ति मच्चित्ते त्वं प्रकाशितवानिह ।
यथा नारायणो वेदान् ब्रह्माणं समबोधयत् ॥२१८
अन्तर्यामिण ईशस्य रीति रेवंविधा भवेत् ।
न बहिः कथयेद्वस्तु हृद्येवायं प्रकाशयेत् ॥२१९

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे प्रथमाध्याये प्रथमश्लोके व्यासदेववाक्यम्—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥५१॥"

एक एव हि सन्देहो वर्त्तते मम चेतसि ।
अतो मां वद निश्चित्य कृपया करुणानिधे ॥२२०
दृष्टः प्रथममेव त्वं मया सन्न्यासिविग्रहः ।
श्यामगोपतनुः स त्वं साम्प्रतं परिदृश्यसे ॥२२१
पुरतस्तव पश्यामि प्रतिमाञ्च हिरण्मयीम् ।
आवृतं तव सर्वाङ्गं गौरकान्त्या तदीयया ॥२२२
तथापि प्रकटं तत्र दृश्यसे मुरलीमुखः ।
नानाभावै र्विभातस्ते चञ्चले पद्मलोचने ॥२२३
एवं त्वामीक्षमाणस्य जातो मे विस्मयो महान् ।
ब्रूह्येतत् कारणं मह्यमव्याजेन महाप्रभो ॥२२४
प्रभुः प्रत्यवदत् कृष्णे गाढः प्रेमायमस्ति ते ।
स्वभावः प्रेम्ण एवायमिति जानीहि निश्चितम् ॥२२५
महाभागवतः पश्येद् यान् यान् स्थावरजङ्गमान् ।
तत्र तत्र भवेत् कृष्णस्फुरणं तस्य पश्यतः ॥२२६
अचरान् वा चरान् पश्यंस्तत्तन्मूर्त्तिं न पश्यति ।
सर्वत्रैव निजाभीष्टदेव स्तस्य प्रकाशते ॥२२७

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये पञ्चचत्वारिंशश्लोके जनकं प्रति हविर्वाक्यम्—

सर्वभूतेषु यः पश्येद् भगवद्भाव मात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥५२॥"

"तथाहि तत्रैव दशमस्कन्धे पञ्चत्रिंशाध्याये पञ्चमश्लोके श्रीकृष्णमुद्दिश्य गोपीवाक्यम्—

वनलतास्तरव आत्मनि विष्णुं
व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः
प्रेमहृष्टतनवो ववृषुः स्म ॥५३॥"

राधाकृष्णमहाप्रेमा वरीवर्त्ति यतस्तव ।
ततस्तौ राधिकाकृष्णौ स्फुरतो यत्र तत्र ते ॥२२८
रायः प्रोवाच मुञ्च त्वं वागाडम्बरचातुरीम् ।
मा गोपयात्मनोरूपं छलेनैवं ममाग्रतः ॥२२९
भावं कान्तिञ्च राधाया अङ्गीकुर्वन् स्वयेच्छया ।
स्वरसास्वादनायैवावतारं त्वं गृहीतवान् ॥२३०
तव गूढ़ं निजं कार्यं प्रेम्ण आस्वादनं परम् ।
कृतं त्रिभुवनं प्रेममयं तच्चानुषङ्गिकम् ॥२३१
मामेवोद्धर्त्तुकामस्त्वं स्वयमत्र समागतः ।
मां प्रतारयसीदानीं कीदृगाचरणं तव ॥२३२
ततो हसन् प्रभुस्तस्मै निजरूप मदर्शयत् ।
रसराज-महाभावद्वैत मद्वैत मेव तत् ॥२३३
रामानन्द स्तदालोक्यानन्देन मूर्च्छितस्तदा ।
अभवत् पतितो भूमौ देहं धर्त्तु मशक्नुवन् ॥२३४
प्रभुणा श्रीकरस्पर्शदानलम्भितचेतनः ।
दृष्ट्वा सन्न्यासिवेशं तं सोऽभूद्विस्मितमानसः ॥२३५
एवमाश्वासयामास तमालिङ्ग्य महाप्रभुः ।
त्वदृते रूपमेतन्मे न कश्चिद्द्रष्टु मर्हति ॥२३६
मम तत्त्वं तथा लीलारसस्ते गोचरौ यतः ।
ततो दर्शितवानस्मि तुभ्यं रूपमिदं मम ॥२३७
गौरवर्णो न मे देहो राधया स्पृष्ट एव सः ।
नान्यः शक्नोति तां स्प्रष्टुं श्रीगोपेन्द्रसुतं विना ॥२३८
मम देहं मनश्चैवं तस्या भावेन भावयन् ।
स्वमाधुर्यरसं तावदलमास्वादयाम्यहम् ॥२३९
न किञ्चिद गोपनीयं मे वर्तते हि तवाग्रतः ।
गोपितान्यपि मर्माणि वेत्सि प्रेमवलात् पुनः ॥२४०

एतन्मर्मवचो गुप्तं रक्ष नैव प्रकाशय ।
मम वातुलचेष्टेय मुपहासास्पदं नृणाम् ॥२४१
प्रथमो वातुलश्चास्मि द्वितीयस्त्वञ्च वातुलः ।
अतएव त्वया साम्यं वर्तते मम सर्वथा ॥२४२
इत्येवं नीतवान् रामानन्देन सहितः प्रभुः ।
दश रात्रीः सुखं कृष्णकथारङ्गमहोत्सवैः ॥२४३
निगूढरसलीलाया व्रजस्य कृतवानपि ।
विचारान् सुबहूंस्तस्याः पारं नैव जगाम सः ॥२४४
ताम्ररौप्यकहेम्नाञ्च मणेश्चिन्तामणेरुत ।
निधानञ्चेत् क्वचित् कश्चित् खनिं प्राप्य समुद्धरन् ॥२४५
स यथा लभते तत्तत् क्रमशश्चोत्तमोत्तमम् ।
प्रश्नोत्तरं प्रभो रामरायस्य च तथा भवत् ॥२४६
प्रभु र्विदाय मन्येद्यु रामानन्दमयाचत ।
स तमाज्ञापयच्चैवं प्रस्थानावसरे तदा ॥२४७
विषयांस्त्वं परित्यज्य गच्छ नीलाचलं प्रति ।
तीर्थेभ्योऽप्यागमिष्यामि तत्राल्पै र्दिवसैः पुनः ॥२४८
त्वमहञ्च निवत्स्याव उभावेकत्र संस्थितौ ।
सुखेन यापयिष्यावः कालं कृष्णकथोत्सवैः ॥२४९
इत्येवं कथयन् रामानन्द मालिङ्ग्य च प्रभुः ।
तं प्रस्थाप्य च गेहं स्वं शय्यामाश्रयत स्वयम् ॥२५०
प्रातरुत्थाय दृष्ट्वा च हनुमन्तं महाप्रभुः ।
भक्त्या तञ्च नमस्कृत्य यात्रार्थं प्रस्थित स्ततः ॥२५१
विद्यानगरवास्तव्या जना नानामताश्रिताः ।
वैष्णवा अभवंस्त्यक्त्वा स्वमतं प्रभुदर्शनात् ॥२५२
रामानन्दस्ततस्तत्र प्रभुविच्छेदविह्वलः ।
त्यक्त्वा च विषयान् सर्वान् प्रभुं ध्यायन्नवस्थितः ॥२५३

मया प्रोक्तं समासेन रामानन्देन मेलनम् ।
सहस्रास्योऽपि विस्तीर्य नैव वर्णयितुं क्षमः ॥२५४
स्वभावेनैव चैतन्यचरितं घनपायसम् ।
रामानन्दस्य चारित्रं तत्र खण्डाश्च राशिशः ॥२५५
श्रीराधाकृष्णयो र्लीला तत्र कर्पूरयोजनम् ।
यो भवेद्भाग्यवाँल्लोके स एवास्वादयेदिदम् ॥२५६
पिबति श्रवणद्वारा यो जनः सकृदप्यदः ।
तस्य श्रवणयुग्मं तत्त्यक्तुं न क्षमतेऽनिशम् ॥२५७
लभते सर्वतत्त्वानां ज्ञानं शृण्वन्निदं जनः ।
राधाकृष्णपदाम्भोजे प्रेमभक्तिञ्च विन्दति ॥२५८
गूढ़तत्त्वमितो ज्ञेयं चैतन्यस्य महाप्रभोः ।
शृण्वन्तु श्रद्धया सर्वे तर्कं कुर्वन्तु नान्तरे ॥२५९
अलौकिक्येव लीलेय मतिगुह्यतमा खलु ।
सुदूरं याति तर्केण विश्वासेनैव लभ्यते ॥२६०
श्रीचैतन्यपदे नित्यानन्दाद्वैतपदानि च ।
सर्वस्वान्येव यस्यासौ प्राप्नोत्येतद्धनं महत् ॥२६१
श्रीरामानन्दपादाब्जे कोटिः प्रणतयो मम ।
रसं विस्तारयामास प्रभुर्यस्य मुखाम्बुजात् ॥२६२
दामोदरस्वरूपस्य कडचा मनुगच्छता ।
श्रीरामानन्दमिलनलीला विज्ञापिता मया ॥२६३
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२६४

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीरामानन्दरायसङ्गोत्सवो नामाष्टमः परिच्छेदः ।

—०—

मध्यलीलायां नवमः परिच्छेदः

"नानामतग्रहग्रस्तान्दाक्षिणात्यजनद्विपान् ।
कृपारिणा विमुच्यैतान् गौरश्चक्रे स वैष्णवान् ॥१॥"
भूयो जयतु चैतन्यो नित्यानन्दो जयत्यसौ ।
जयोऽस्त्वद्वैतचन्द्रस्य गौरभक्ता जयन्तु च ॥१
भ्रमणं दाक्षिणात्येषु प्रभोरति विलक्षणम् ।
सोऽपश्यत्तत्र तीर्थानि पवित्राणि सहस्रशः ॥२
स्पृष्ट्वा तत्-सर्व-तीर्थानि महातीर्थानि सोऽकृत ।
तेनैव च्छद्मना लोकांस्तत्रत्यान्निरतारयत् ॥३
तेषां निखिलतीर्थानां क्रमो वक्तुं न शक्यते ।
अक्रमं दक्षिणे वामे तस्याभूत्तीर्थचङ्क्रमः ॥४
अतोऽहं गणयिष्यामि तीर्थानि नाममात्रतः ।
नैवानुक्रमतो वक्तुं पारयामि कथञ्चन ॥५
पूर्ववत्तं पथा यान्तं ददृशु र्ये जनाः प्रभुम् ।
यान् यान् ग्रामांश्च ते जग्मु र्वास्तव्यास्तेषु ये जनाः ॥६
ते पुन र्वैष्णवा भूत्वा प्रोचुः कृष्ण हरीति च ।
वैष्णवीकृत्य तेऽप्यन्यग्रामीणान्निरतारयन् ॥७
जना दक्षिणदेशस्था बहुप्रकृतयोऽभवन् ।
कोऽपि ज्ञानी च कर्म्मी वा पाषण्डी कोऽपि वाधमः ॥८
प्रभोर्दृष्टिप्रभावेण ते ते च निखिला जनाः ।
त्यक्त्वा स्वं स्वं मतं सर्वे बभूवुस्तत्र वैष्णवाः ॥९
श्रीरामोपासकाः सर्वे येऽभूवं स्तत्र वैष्णवाः ।
तेषु श्रीवैष्णवाः केचित् केचिद्वा तत्त्ववादिनः ॥१०
ते पुन र्वैष्णवाः सर्वे दर्शनेन महाप्रभोः ।
कृष्णस्योपासका जाता जगृहुः कृष्णनाम च ॥११

"राम राघव राम राघव राम राघव पाहि माम् ।
कृष्ण केशव कृष्ण केशव कृष्ण केशव रक्ष माम् ॥२॥"
इति श्लोकं पथा गायन् प्रस्थान मकरोत् प्रभुः ।
सम्प्राप्तो गोतमींगङ्गां तत्र स्नानं समाचरत् ॥१२
मल्लिकार्जुनतीर्थं स गत्वा पश्यन्महेश्वरम् ।
सर्वै रग्राहयत् कृष्णनाम तत्र जनैः पुनः ॥१३
दासरामं महादेव मवलोक्य महाप्रभुः ।
अहोबलनृसिंहस्य धाम प्रस्थितवांस्ततः ॥१४
नृसिंहं प्रेक्षमाणोऽसौ तं तुष्टाव ननाम च ।
यत्र सीतापतेर्मूर्त्ति स्तं सिद्धवट मागतः ॥१५
रघुनाथं विलोक्याथ कृतवान् प्रणतिस्तुती ।
तत्रैव ब्राह्मणः कश्चिन्न्यमन्त्रयत तं प्रभुम् ॥१६
रामस्य नाम जग्राह ब्राह्मणोऽसौ निरन्तरम् ।
रामनाम विना किञ्चिन्नापरं स वचोऽ ब्रवीत् ॥१७
तद्दिने तद्गृहे स्थित्वा प्रभु र्भिक्षां गृहीतवान् ।
ततोऽनुकम्पमान स्तं ययौ गौरहरिः पुरः ॥१८
स्कन्दक्षेत्राभिधे तीर्थे स्कन्ददेवं विलोक्य सः ।
त्रिमठञ्च समासाद्य तत्रापश्यत्त्रिविक्रमम् ॥१९
पुनः प्रत्यागतः सिद्धवटे तद्द्विजमन्दिरम् ।
द्विजं ददर्श गृह्णन्तं कृष्णनाम निरन्तरम् ॥२०
गृहीत्वा तत्र भिक्षां स तं पप्रच्छ महाप्रभुः ।
ब्रूहि ब्राह्मण सञ्जाता केयमद्य दशा तव ॥२१
पुरा निरन्तरं रामनामैव त्वं गृहीतवान् ।
अधुना कृष्णनाम त्वं कथं वदसि सर्वदा ॥२२
विप्रः प्रोचे प्रभावोऽयं दर्शनस्य तव प्रभो ।
आजन्मनः स्वभावो मे गतस्त्वामेव पश्यतः ॥२३

मया रामस्य नामैव गृहीतं शैशवावधि ।
सकृदुच्चारितं कृष्णनाम त्वामिह पश्यता ॥२४
तदा प्रभृति जिह्वायां निषण्णं कृष्ण नाम मे ।
रामनाम गतं दूरं कृष्णनाम स्फुरत्यलम् ॥२५
बाल्यकालात् प्रभृत्येव स्वभावोऽयं ममाभवत् ।
नाममाहात्म्यशास्त्राणि सञ्चितानि मया ततः ॥२६

"तथाहि पद्मपुराणे श्रीरामचन्द्रस्य शतनामस्तोत्रेऽष्टमश्लोके तथा तस्यैव चोत्तरखण्डे द्वाषष्टितमाध्याये श्रीविष्णोः सहस्रनाम-स्तोत्रे शेषः श्लोकः—

"रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥३॥

तथाहि श्रीमद्भागवते षष्ठस्कन्धे नवमाध्याये द्वाचत्वारिंश-श्लोकव्याख्यायां श्रीधरस्वामिधृतो महाभारतस्योद्योग-पर्वीयैकसप्ततितमाध्यायस्य चतुर्थः श्लोकः—

कृषि र्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥४॥"

नामद्वये समानं हि परं ब्रह्मेति दृश्यते ।
पुनः शास्त्रान्तरात् कश्चिद् विशेषः प्रतिलभ्यते ॥२७

"तथाहि पद्मपुराणे श्रीरामचन्दस्य शतनामस्तोत्रे नवमश्लोक-स्तथा तस्यैव चोत्तरखण्डे द्वाषष्टितमाध्याये श्रीविष्णोः सहस्रनामस्तोत्रे शेषः श्लोकः—

राम-रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामभिस्तुल्यं रामनाम वरानने ॥५॥"

"तथाहि श्रीहरिभक्तिविलासस्यैकादशविलासेऽष्टपञ्चा-शदधिकद्विशताङ्कधृतब्रह्माण्डपुराणम्—

सहस्रनाम्नां पुण्यानां त्रिरावृत्या तु यत् फलम् ।
एकावृत्त्या तु कृष्णस्य नामैकं तत् प्रयच्छति ॥६॥"
इत्युक्त्या महिमा कृष्णनाम्नोऽ पारोऽस्ति यद्यपि ।
न तथापि ग्रहीतुं तच्छक्तोऽहं शृणु कारणम् ॥२८
इष्टदेवो हि रामो मे तस्य नाम्ना सुखं लभे ।
सुखं सम्प्राप्य तन्नाम गायाम्येव निरन्तरम् ॥२६
यदा ते दर्शनादेव कृष्णनाम समागतम् ।
तदैवैतस्य माहात्म्यं संसक्तं हृदये मम ॥३०
सोऽयं कृष्ण स्त्वमेवेति प्रत्यक्षं निश्चितं मया ।
इत्युक्त्वा पतितो विप्रः पादयोः श्रीमहाप्रभोः ॥३१
विधायानुग्रहं तस्मिन्नन्येद्युः प्रस्थितः प्रभुः ।
वृद्धकाशीं ततो गत्वा कृतवान् शिवदर्शनम् ॥३२
ततः प्रतिष्ठमानोऽसौ ग्राममेकं समागतः ।
ब्राह्मणानां समाजे च लब्धवांस्तत्र विश्रमम् ॥३३
प्रभाववशत स्तस्य दर्शनार्थं समागताः ।
जना अर्बुदलक्षाणि गणनानर्हतां गताः ॥३४
दृष्ट्वा गोस्वामिसौन्दर्यं प्रेमावेशेन तत्र ते ।
सर्वेऽब्रुवत कृष्णेति देशोऽसौ वैष्णवोऽभवत् ॥३५
मीमांसका स्तथा मायावादिनो ये च तार्किकाः ।
सांख्याः पातञ्जलाः स्मार्त्ताः पुराणागमपण्डिताः ॥३६
स्वस्वशास्त्रसमुद्ग्राहे तेषां दुर्धर्षिणामपि ।
दूषयन्मतवादांस्तान् खण्डशः कृतवान् प्रभुः ॥३७
तेन वैष्णवसिद्धान्तं सर्वत्रैव समाहितम् ।
कोऽपि खण्डयितुं नाल मभवच्च कथञ्चन ॥३८
भूयो भूयो जिताः सर्वे प्रविष्टास्ते प्रभों मंतम् ।
एवं दक्षिणदेशोऽसौ समग्रो वैष्णवोऽभवत् ॥३६

प्रभोः पाण्डित्य माकर्ण्य सर्वे पाषण्डिनः पुनः ।
शिष्यबृन्दं समादाय दम्भेन प्रभुमागताः ॥४०
स्वमतानि नवीनानि बौद्धाचार्योऽतिपण्डितः ।
सोद्ग्राहं वक्तुमारेभे पुरतः श्रीमहाप्रभोः ॥४१
तं बौद्धं दर्शनानर्हम सम्भाष्यमपि प्रभुः ।
कथयामास तस्यैव दम्भं स्तम्भयितुं तदा ॥४२
वौद्धं तर्कप्रधानं तच्छास्त्रं नवमतं प्रभुः ।
तर्कैणैव निरास्थच्च न ते स्थापयितुं क्षमाः ॥४३
प्रस्थाननवकं बौद्धाचार्येणोदाहृतं यदा ।
दृढाभ्यां युक्तितर्काभ्यां प्रभुणा खण्डितं तदा ॥४४
ततो दार्शनिकाः सर्वे पण्डिताश्च पराजिताः ।
लोकोपहास्यतां याता बौद्धा भीताश्च लज्जिताः ॥४५
ते प्रभुं वैष्णवं ज्ञात्वा ययु बौद्धा निजालयम् ।
समवेतास्ततः सर्वे कृतवन्तः कुमन्त्रणाम् ॥४६
अपवित्रान्नपूर्णं ते समादायैकभाजनम् ।
विष्णुप्रसाद इत्युक्त्वा नीतवन्तोऽग्रतः प्रभोः ॥४७
तदैवैको महाकायः पक्षी तत् सान्नभाजनम् ।
हठादाच्छिद्य चञ्चुभ्यामुत्पपात तदुद्वहन् ॥४८
पेतु रन्नान्यमेध्यानि बौद्धानां विग्रहोपरि ।
सशब्दञ्चापतत् पात्रं बौद्धाचार्यस्य मूर्द्धनि ॥४९
तिर्यक्पतितपात्रस्य धारया कृत्तमस्तकः ।
मूर्च्छितो न्यपतद्भूमौ बौद्धाचार्योऽपि तत्क्षणात् ॥५०
तस्य शिष्यास्तदा सर्वे हाहेति रुरुदुः परम् ।
प्रभोः श्रीचरणं प्राप्य शरणञ्च प्रपेदिरे ॥५१
त्वं तावदीश्वरः साक्षा दपराधं क्षमस्व नः ।
जीवयास्मद्गुरुं देव प्रसादं कुरु नः प्रति ॥५२

प्रभुः प्रोवाच युष्माभि र्हरे कृष्णेत्युदीर्यताम् ।
गुरोः श्रवणयोरुच्चै कृष्णनाम च कथ्यताम् ॥५३
गुरुस्तदैव युष्माकं लप्स्यते चेतनामिति ।
सर्वे बौद्धा मिलित्वैव चक्रुस्ते कृष्णकीर्तनम् ॥५४
यदा राम हरे कृष्णेत्यूचु स्ते गुरुकर्णयोः ।
लब्धसंज्ञो हरीत्युक्त्वा बौद्धाचार्यस्तदोत्थितः ॥५५
कृष्णेत्युच्चारयंस्तस्थौ विनयेन प्रभुं प्रति ।
तदालोक्य जनाः सर्वे परमं विस्मयं ययुः ॥५६
एव मेव शचीपुत्रः कौतुकावलिमाचरन् ।
बभूवान्तर्हितः सद्यो नैव केनाप्यदृश्यत ॥५७
महाप्रभु र्व्रजन्नेवं त्रिमल्लत्रिपदीं ययौ ।
दृष्ट्वा चतुर्भुजां मूर्त्तिं प्रयातो वेङ्कटाचलम् ॥५८
श्रीरामश्च ददर्शासौ त्रिपदी मागतः प्रभुः ।
अग्रतो रघुनाथस्य तुष्टाव च ननाम च ॥५९
लोकान् सर्वान् प्रभावेण स्वेन कृत्वातिविस्मितान् ।
प्रभुः कारुणिकः पानानरसिंहं गतस्ततः ॥६०
प्रेमाविष्टो नृसिंहस्य कृतवान् प्रणतिस्तुती ।
जनाः सर्वे प्रभावेण प्रभोस्तत्र चमत्कृताः ॥६१
शिवकाञ्चीं समासाद्य शिवं दृष्ट्वा च स प्रभुः ।
वैष्णवीकृतवाञ् शाक्ताञ् शैवांश्च स्वप्रभावतः ॥६२
विष्णुकाञ्चीं गतो दृष्ट्वा लक्ष्मीनारायणौ प्रभुः ।
प्रणमन् परया भक्त्या तुष्टाव बहुभिः स्तवैः ॥६३
प्रेमाविष्टश्चकारासौ नृत्यगीतान्यनेकधा ।
स्थित्वा दिनद्वयं लोकान् कृष्णभक्तांश्चकार च ॥६४
ययौ त्रिमल्लमालोक्य त्रिकालहस्तिसन्निधिम् ।
तत्र दृष्ट्वा महादेवं सोऽनमद् भक्तिपूर्वकम् ॥६५

पक्षतीर्थं समालोक्य तत्रासौ दृष्टवाञ् शिवम् ।
ततोऽसौ वृद्धकालाख्यं तीर्थं यातो महाप्रभुः ॥६६
दृष्ट्वा श्वेतवराहञ्च नमस्कृत्य पुनः पुनः ।
पीताम्बरशिवक्षेत्रं ययौ गौरहरिस्ततः ॥६७
शृगालीं भैरवीं नाम देवीं तत्र विलोकयन् ।
कावेरीतीर मायातः श्रीशचीनन्दनः प्रभुः ॥६८
गोसमाजं शिवं दृष्ट्वा स वेदावन मागतः ।
अवलोक्य महादेवं ववन्दे तं महाप्रभुः ॥६९
शिवञ्चामृतलिङ्गाख्यं दृष्ट्वा वन्दितवानसौ ।
शिवालयेषु सर्वेषु शैवा जाताश्च वैष्णवाः ॥७०
देवस्थानं समागत्य विष्णुमालोकयत् प्रभुः ।
तत्र श्रीवैष्णवैः सार्द्धं गोष्ठीं चक्रे प्रतिक्षणम् ॥७१
कुम्भकर्णकपालाख्य मवलोक्य सरोवरम् ।
ईक्षाञ्चक्रे शिवक्षेत्रे शिवं गौराङ्गसुन्दरः ॥७२
पापनाशन मायातोऽपश्यद् विष्णुं महाप्रभुः ।
श्रीरङ्गक्षेत्रतीर्थञ्च तदनन्तर माययौ ॥७३
कावेरी मवगाह्यासौ रङ्गनाथं विलोक्य च ।
नत्वा स्तुत्वा च तं देवं धन्यम्मन्योऽभवत् प्रभुः ॥७४
प्रेमावेशवशाद् गीतं नृत्यञ्च कृतवान् बहु ।
तथालोक्य जना जाता विस्मयाक्रान्तचेतसः ॥७५
नाम्ना वेङ्कटभट्टो हि कोऽपि श्रीवैष्णव स्तदा ।
प्रभुं निमन्त्रयामास बहुमानपुरःसरम् ॥७६
तं नीत्वा स्वगृहं पादौ क्षालयामास स प्रभोः ।
तच्च पादोदकं तस्य स्ववंश्यै र्ब्राह्मणः पपौ ॥७७
प्रभुणा ग्राहयन् भिक्षां किञ्चिदेवं न्यवेदयत् ।
चातुर्मास्यं समासन्नप्रायं सम्प्रति हे प्रभो ॥७८

कृपया मयि तं कालमवतिष्ठस्व मद्‌गृहे ।
ब्रुवन् कृष्णकथां देव कृपयोद्धर मामिति ॥७९
तस्य गेहे स्थितः कृष्णकथासङ्गरसेन सः ।
अनयच्चतुरो मासान् सुखं भट्टेन सङ्गतः ॥८०
कावेर्यां प्रत्यहं स्नात्वा श्रीरङ्ग मवलोकयन् ।
नर्तनं कृतवान् प्रेमावेशाधीनो महाप्रभुः ॥८१
सौन्दर्यादिगुणान् प्रेमावेशञ्चालोकितुं प्रभोः ।
तत्रायाता जनाः सर्वे दृष्ट्वा दुःखशुचौ जहुः ॥८२
तं द्रष्टुं बहुदेशेभ्य आगता लक्षशो जनाः ।
पश्यन्तश्च प्रभुं सर्वे कृष्णनामाब्रुवन् सदा ॥८३
कृष्णनाम विना कोऽपि बभाषे नापरं वचः ।
अभवन् कृष्णभक्तास्ते सर्वे विश्वं चमत्कृतम् ॥८४
श्रीरङ्गक्षेत्रवास्तव्या यावन्तोऽप्यभवन् द्विजाः ।
न्यमन्त्रयन्त सर्वे ते दिनान्येकैकशः प्रभुम् ॥८५
एकैकशो दिनैरेवं पूर्णं मासचतुष्टयम् ।
कतिचिद् ब्राह्मणा भिक्षां दातुं कालं न चाप्नुवन् ॥८६
बैष्णवब्राह्मणः कश्चिदासीत्तत्क्षेत्रमावसन् ।
गीताबृत्तिं चकारासावासीनो देवमन्दिरे ॥८७
पपाठाष्टादशाध्यायानानन्दाविष्टमानसः ।
असाधु व्याहरन्तं तं श्रुत्वापजहसु र्जनाः ॥८८
जनानां सोऽपहासं वा निन्दां वा नाप्यमन्यत ।
सानन्दमनसाविष्टः स गीतामपठत् पुनः ॥८९
यावत्पाठ मभूत् कम्पस्वेदाश्रुपुलकोद्‌गमः ।
तस्य दृष्ट्वा तथा चेतो ननन्द श्रीमहाप्रभोः ॥९०
महाप्रभुर पृच्छत्तं श्रूयतां भो महाशय ।
जायते सुखमेतावत् कमर्थं जानतस्तव ॥९१

विप्रः प्रोवाच मूर्खोऽहं शब्दार्थौ विदितो न मे ।
आज्ञयैव गुरो र्गीतां पठामि साध्वसाधु वा ॥६२
अर्जुनस्य रथे कृष्णो वल्गा गृह्णंश्च वाजिनाम् ।
नूनमस्ति समासीनः श्यामलोज्ज्वलसुन्दरः ॥६३
कथयत्यर्जुनायैष उपदेशं शुभङ्करम् ।
आनन्दावेशसम्मूढ स्तमालोक्य भवाम्यहम् ॥६४
लभे तद्दर्शनं तावद् यावद् गीतां पठाम्यहम् ।
अतो मे मानसं गीतापाठं नैव विमुञ्चति ॥६५
प्रभुणोक्तं त्वमेवात्र गीतापाठेऽधिकार्यसि ।
गीताया अर्थसारं हि त्वमेव खलु वुध्यसे ॥६६
इत्येवं कथयन् विप्रमालिलिङ्ग महाप्रभुः ।
ब्राह्मणोऽपि प्रभोः पादौ गृहीत्वा स्तुतवांस्तदा ॥६७
ततोऽपि द्विगुणं सौख्यं दृष्ट्वा त्वां जायते मम ।
सोऽयं कृष्णस्त्वमेवेति मनसि प्रतिभाति मे ॥६८
कृष्णस्फूर्त्तिवशात्तस्य मन आसीत् सुनिर्मलम् ।
अतो महाप्रभोस्तत्त्वं सर्वमेव विवेद सः ॥६६
ततो महाप्रभुस्तस्मै दत्त्वा विप्राय शिक्षणम् ।
उक्तवान्नहि कस्मैचिदिमां वार्त्तां वदेति तम् ॥१००
बभूव ब्राह्मणश्चासौ महाभक्तो महाप्रभोः ।
न तत्याज प्रभोः सङ्गं जातु मासचतुष्टयम् ॥१०१
इत्थं भट्टगृहे तस्थौ भगवान् गौरचन्द्रमाः ।
भट्टेनास्वादयन् कृष्णकथानन्दं निरन्तरम् ॥१०२
लक्ष्मीनारायणौ भट्टः श्रीवैष्णवो न्यषेवत ।
तस्य भक्तिं समालोक्य प्रभुस्तुष्टमना अभूत् ॥१०३
सख्यं भावः प्रभोरासीत्तेन सार्द्धं निरन्तरम् ।
तत्स्वभावेन तौ हासं परिहासञ्च चक्रतुः ॥१०४

प्रभुः कथितवान् भट्ट लक्ष्मी स्तेऽभीष्टदेवता ।
कान्तवक्षःस्थिता नित्यं पातिव्रत्यशिरोमणिः ॥१०५
श्रीकृष्णोऽभीष्टदेवो मे गोपो गोचारकः पुनः ।
याचते सङ्गमं तस्य साध्वी सत्यपि सा कथम् ॥१०६
सुखभोगं परित्यज्य कृते तस्यैव सा चिरम् ।
अतप्यत तपोऽपारं नियमेन व्रतेन च ॥१०७

"तथाहि श्रीमद्भागवते दशमस्कन्धे षोड़शाध्याये द्वात्रिंश-
श्लोके श्रीकृष्णं प्रति नागपत्नीवाक्यम्—

कस्यानुभावोऽस्य न देव विद्महे
तवाङ्घ्रि रेणु-स्पर्शाधिकारः ।
यद्वाञ्छया श्रीर्ललना चरत्तपो
विहाय कामान् सुचिरं धृतव्रता ॥७॥"

भट्टेनोक्तमभिन्नौ हि कृष्णनारायणौ खलु ।
कृष्णे वैदग्ध्यलीलादिरूपाधिक्यं प्रकाशते ॥१०८
न पातिव्रत्यधर्मोऽस्यास्तत्स्पर्शेन विलुम्पति ।
याचते कौतुकादेव लक्ष्मीः कृष्णस्य सङ्गमम् ॥१०९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्यां
द्वात्रिंशश्लोके श्रीरूपगोस्वामिवाक्यम्—

सिद्धान्तत स्त्वभेदेऽपि श्रीशकृष्णस्वरूपयोः ।
रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः ॥८॥"

न पातिव्रत्यधर्मोऽस्याः कृष्णसङ्गेन नश्यति ।
किञ्च रासविलासान् साधिकाँल्लाभांश्च विन्दति ॥११०
अतो लक्ष्म्या विनोदिन्याः कृष्णे वाञ्छा प्रजायते ।
दोषः कोऽत्र भवान् कस्मात् परिहासं करोति मे ॥१११
प्रत्युक्तं प्रभुणा नास्ति दोषः कोऽपीति वेद्म्यहम् ।
लक्ष्मी नांसवती रासमिति शास्त्राच्छृणोमि च ॥११२

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्तचत्वारिंशाध्याये त्रयः-
पञ्चाशश्लोके गोपीः प्रत्युद्धववाक्यम्—

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः।
रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठ-
लब्धाशिषां य उदगाद्व्रजसुन्दरीणाम् ॥९॥"

नाप रासोत्सवं लक्ष्मीरित्यस्य किन्नु कारणम्।
तपस्तप्त्वा कथं कृष्णं श्रुतयः प्राप्नुवन् पुनः ॥११३

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याय
ऊनत्रिंशश्लोके श्रीभगवन्तं प्रति वेदस्तुतिः—

निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि य-
न्मुनय उपासते तदरयोऽपि ययुः स्मरणात्।
स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो
वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधाः ॥१०॥"

श्रुतयः प्राप्नुवँल्लक्ष्मी र्नापेति किं हि कारणम्।
भट्टेनोक्तं प्रवेशाय नात्र शक्नोति मे मनः ॥११४
क्षुद्रबुद्धिरहं जीवश्चञ्चलश्च स्वभावतः।
समुद्रकोटिगम्भीरा लीला भगवतः खलु ॥११५
स कृष्णः स्वयमेव त्वं विज्ञातासि स्वकर्मणाम्।
यान् ज्ञापयसि ते लीलामर्माणि विदुरेव ते ॥११६
प्रभुः प्रोवाच कृष्णस्य स्वभावो हि विलक्षणः।
सर्वेषां स हि चेतांसि स्वमाधुर्येण कर्षति ॥११७
व्रजलोकस्य भावेन लभन्ते तत् पदं जनाः।
तमीश्वर इति क्वापि न विदु र्व्रजवासिनः ॥११८
काचित् पुत्र इति ज्ञात्वा बध्नात्येत मुदूखले।
जित्वा रोहन्ति तत्स्कन्धं सखिबुद्ध्या च केचन ॥११९

मन्यन्ते व्रजवास्तव्या स्तं व्रजेन्द्रस्य नन्दनम् ।
ऐश्वर्यज्ञानहीनास्ते स्वसम्वन्धं हि मन्वते ॥१२०
य एव भजते कृष्णं भावेनैब व्रजौकसाम् ।
व्रजेन्दनन्दनं शुद्धं स एव लभते व्रजे ॥१२१

"तथाहि श्रीमद्भागवते दशमस्कन्धे नवमाध्याये षोडशश्लोके
परीक्षितं प्रति शुकवाक्यम्—

नायं सुखापो भगवान् देहिनां गोपिकासुतः ।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥११॥"

गोपीनामानुगत्येन गोपीभावसमाश्रिताः ।
व्रजेश्वर्याः सुतं कृष्णमभजञ्श्रुतयः पुरा ॥१२२
व्यूहान्तरेण ता गोपीदेहान् प्रापुर्यदा व्रजे ।
तै र्देहैः कृष्णसङ्गेन रासक्रीडां तदाप्नुवन् ॥१२३
गोपजाति रयं कृष्णः प्रेयस्यस्तस्य गोपिकाः ।
कृष्णो नाङ्गीकरोत्येव देवीर्वाप्यपराः स्त्रियः ॥१२४
लक्ष्मीः स्वेनैव देहेन कृष्णसङ्गमिच्छती ।
गोपीरागानुगा भूत्वा न कृष्णमभजत् किल ॥१२५
नैव रासविलासोऽयमन्यदेहेन लभ्यते ।
नायमित्यादिकं श्लोकं वेदव्यासो ब्रवीत्यतः ॥१२६
अभिमानो बभूवैवं पुरा भट्टस्य चेतसि ।
श्रीनारायण एवायं स साक्षाद् भगवानिति ॥१२७
तस्यैव भजनं सर्वभजनोपरि संस्थितम् ।
अतः श्रीवैष्णवानां हि भजनं सर्वतोऽधिकम् ॥१२८
इति तस्य निराकर्तु मभिमानं महाप्रभुः ।
परिहासच्छलेनैव प्रोक्तवान् वचनं तथा ॥१२९
प्रभुः कथितवान् भट्ट त्वं मैवं कुरु संशयम् ।
कृष्णो हि भगवान् साक्षादित्येवायं सुनिश्चयः ॥१३०

कृष्णस्यैव विलासोऽयं श्रीनारायणविग्रहः ।
लक्ष्म्यादीनाञ्च चेतांसि तत एव हरत्यसौ ॥१३१

"तथाहि श्रमद्भागवते प्रथमस्कन्धे तृतीयाध्यायेऽष्टाविंशश्लोके
सौनकादीन् प्रति सूतवचनम्—

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥१२॥"

नारायणाद्धि कृष्णस्यासाधारणतरो गुणः ।
अतएव भवेल्लक्ष्म्याः कृष्णे तृष्णा प्रतिक्षणम् ॥१३२

त्वया यः पठितः श्लोकः प्रमाणं तद्भवेदिह ।
तेनैवायाति यत् कृष्णः स स्वयं भगवानिति ॥१३३

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे द्वितीयलहर्यां
द्वात्रिंशश्लोके श्रीरूपगोस्वामिवाक्यम्—

सिद्धान्तत स्त्वभेदेऽपि श्रीशकृष्णस्वरूपयोः ।
रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः ॥१३॥"

तत् स्वयं भगवत्त्वेन कृष्णो लक्ष्म्या हरेन्मनः ।
नारायणो न गोपीनां हर्त्तुं शक्नोति मानसम् ॥१३४

नारायणस्य किं वाच्यं स्वयं कृष्णोऽपि कौतुकात् ।
गोपीना मुपहासाय यदा नारायणोऽ भवत् ॥१३५

सोऽदर्शयच्च गोपीनामग्रे मूर्त्तिं चतुर्भुजाम् ।
तस्मिन् कृष्णेऽपि गोपीनां नानुरक्तिरजायत ॥१३६

"तथाहि ललितमाधवे षष्ठाङ्के चतुर्दशश्लोके सूर्यपत्नीं
सवर्णां प्रति विशाखावाक्यम्—

गोपीनां पशुपेन्द्रनन्दनयुषो भावस्य कस्तां कृती
विज्ञातुं क्षमते दुरूहपदवीसञ्चारिणः प्रक्रियाम् ।
आविष्कुर्वति वैष्णवीमपि तनुं तस्मिन् भुजै जिंष्णुभि
र्यासां हन्त चतुर्भिरद्भुतरुचिं रागोदयः कुञ्चति ॥१४

इत्येवं कथयंस्तस्य प्रभुर्गर्वं विचूर्णयन् ।
परावर्त्य च सिद्धान्तं तं तोषयितुमब्रवीत् ॥१३७

भट्ट मैवं कृथा दुःखं परिहासः कृतो मया ।
शृणु शास्त्रस्य सिद्धान्तं विश्वस्युर्यत्र वैष्णवाः ॥१३८

एकमात्रस्वरूपौ हि कृष्णनारायणौ यथा ।
गोपीलक्ष्म्योर भेदेन तथा स्यादेकरूपता ॥१३९

लक्ष्मीः कृष्णरसास्वादं गोपीद्वारेण विन्दति ।
ईश्वरं तत्त्वतो भिन्नं मन्यमानोऽपराध्यति ॥१४०

एक एवेश्वरो भक्तैर्ध्यातरूपानुसारतः ।
नानारूपाणि गृह्णाति तत्रैकत्रापि विग्रहे ॥१४१

"तथाहि श्रीलघुभागवतामृते पूर्वखण्डे परावस्थायामून-
चत्वारिंशाङ्कधृतनारदपञ्चरात्रवचनम्—

मणिर्यथा विभागेन नीलपीतादिभिर्युतः ।
रूपभेद मवाप्नोति ध्यानभेदात्तथाच्युतः ॥१५॥"

कथयामास भट्टोऽसौ क्वाहं जीवोऽस्मि पामरः ।
क्व भवान् भगवान् कृष्णः स स्वयं परमेश्वरः ॥१४२

अगाधामैश्वरीं लीलां नाहं जानामि काञ्चन ।
यद् यदेव भवानाह मन्येऽहं सत्यमेव तत् ॥१४३

लक्ष्मीनारायणाभ्यां मे सम्पूर्णा करुणा कृता ।
मया ते चरणौ दृष्टौ तयो रेव कृपावशात् ॥१४४

कृपया कथितो मह्यं कृष्णस्य महिमा त्वया ।
यस्य रूपगुणैश्वर्यसीमां नाप्नोति कश्चन ॥१४५

अधुना ज्ञातवान् कृष्णभक्तिं सर्वोपरिस्थिताम् ।
ब्रुवतानुग्रहादेवं कृतार्थोऽस्मि कृत स्त्वया ॥१४६

इत्युक्त्वा पतितो भट्टः प्रभोः श्रीपादपद्मयोः ।
करुणावशतो भट्ट मालिलिङ्ग महाप्रभुः ॥१४७

चातुर्मास्येऽथ सम्पूर्णे भट्टेनानुमतः प्रभुः ।
श्रीरङ्गनाथमालोक्य प्रतस्थे दक्षिणां दिशम् ॥१४८
तेन सार्द्धमयाद् भट्टो न गृहं प्रत्यवर्तत ।
प्रभुस्तं वहुधा यत्नैः प्रत्यावर्तयदालयम् ॥१४९
विच्छेदेन प्रभोर्भट्टो लुप्तसंज्ञोऽभवत्तदा ।
चित्रा लीलाश्चकारैवं श्रीशचीनन्दनः प्रभुः ॥१५०
अथ गौरहरिः प्राप्तः ऋषभं नाम पर्वतम् ।
दृष्ट्वा नारायणं तत्र तुष्टाव च ननाम व ॥१५१
तत्रास्ते परमानन्दपुरी मासचतुष्टयम् ।
इत्याकर्ण्य प्रभुस्तस्य स्वामिनोऽन्तिक मागतः ॥१५२
पुरीगोस्वामिनः पादौ वन्दमानं महाप्रभुम् ।
सोऽप्याशिश्लेष गोस्वामी परमप्रेमनिर्भरम् ॥१५३
प्रेम्णा कृष्णकथासङ्गकौतुकाद्दिवसत्रयम् ।
निलये तस्य विप्रस्य युगपत्तावतिष्ठताम् ॥१५४
तमुवाच पुरीस्वामी याम्यहं पुरुषोत्तमम् ।
दृष्ट्वा देवं ततो यामि गौडान् गङ्गां वगाहितुम् ॥१५५
प्रोवाच प्रभु रायातु पुन र्नीलाचलं भवान् ।
सेतुबन्धादहं प्रत्यागमिष्याम्यल्पकैर्दिनैः ॥१५६
अन्तिके भवतः स्थातुं वाञ्छा मे जायते हृदि ।
तन्नीलाचलमायातु दयमानो भवान्मम ॥१५७
इत्येवं कथयं स्तस्मादाज्ञां लब्ध्वा महाप्रभुः ।
आरेभे दक्षिणं देशं प्रयातुं हृष्टचेचसा ॥१५८
प्रतस्थे परमानन्दपुरी नीलाचलं ततः ।
श्रीशैलं समनुप्राप्तो महाप्रभुरपि व्रजन् ॥१५९
तत्र दुर्गाशिवौ साक्षात्तस्थतु र्विप्रवेशिनौ ।
उल्लासं प्राप्तवन्तौ ताववलोक्य महाप्रभुम् ॥१६०

निमन्त्र्य प्रभवे भिक्षामदत्तां तौ दिनत्रयम् ।
अध्यासीनौ रहस्तौ द्वौ गुप्तसंवादमूचतुः ॥१६१
महाप्रभुः समं ताभ्यामिष्टगोष्ठीं चकार च ।
तयोराज्ञां समादाय कामकोष्ठीं पुरीं ययौ ॥१६२
दक्षिणां मथुरां प्राप कामकोष्ठ्यास्ततः प्रभुः ।
साक्षात्कारोऽभवत्तस्य तत्र विप्रेण केनचित् ॥१६३
स आसीद्रामभक्तश्च विरक्तश्च महाजनः ।
न्यमन्त्रयत विप्रोऽसौ सादरं तं महाप्रभुम् ॥१६४
स्नात्वा च कृतमालायां प्रभुस्तद्गृहमागतः ।
विप्रो दास्यति कां भिक्षां पाकं नैव करोति सः ॥१६५
इत्यालोच्य प्रभुः प्रोचे श्रूयतां भो महाशय ।
मध्याह्नोऽयं समासन्नः कथं पाको न जायते ॥१६६
प्रत्युवाच द्विजोऽस्मिन्मे वसतिः कानने प्रभो ।
पाकोपकरणं किञ्चिल्लभ्यते न वनेऽधुना ॥१६७
आनेष्यति फलं मूलं वन्यशाकांश्च लक्ष्मणः ।
यथाप्रयोजनं सीता ततः पाकं करिष्यति ॥१६८
इत्युपासाक्रमं तस्य श्रुत्वा तुष्टोऽभवत् प्रभुः ।
ततः ससम्भ्रमं विप्रो रन्धनं समपादयत् ॥१६९
तृतीयप्रहरे विप्रो भिक्षाञ्च प्रभवे ददौ ।
निर्वेदेन समाक्रान्तो विप्रः स्वय मुपावसत् ॥१७०
प्रभुः पप्रच्छ हे विप्र त्वया कस्मान्न भुज्यते ।
कथं ते दुःखमेतावत् कथं शोकेन मुह्यसि ॥१७१
प्रत्युवाच द्विजो नास्ति मम प्राणैः प्रयोजनम् ।
प्रविशन् जलमग्निं वा प्राणां स्त्यक्ष्यामि निश्चितम् ॥१७२
सीतादेवीं महालक्ष्मीं जगतां जननीमपि ।
राक्षसोऽस्पृशदित्येवं कर्णाभ्यां श्रूयते मया ॥१७३

तस्मादेतच्छरीरं मे धर्त्तुं जातु न युज्यते ।
तद्दुःखाद्दह्यते देहो नतु प्राणाः प्रयान्ति मे ॥१७४
प्रभुः कथितवानेवं भावनां मा कृथाः पुनः ।
न विचारयसे कस्मा न्मनसा पण्डितोऽपि सन् ॥१७५
ईश्वरप्रेयसी सीता या चिदानन्दविग्रहा ।
प्राकृतैरिन्द्रियै र्जातु सा द्रष्टुं नैव शक्यते ॥१७६
स्पर्श स्तस्याः सुदूरेऽस्तु दर्शनं नापि लभ्यते ।
मायया निर्मितां मूर्त्तिं सीताया रावणोऽहरत् ॥१७७
दृष्ट्वा रावणमायान्तं सीताप्यन्तर्दधे ततः ।
रावणस्य पुरो मायासीतां सा प्रजिघाय च ॥१७८
न खल्वप्राकृतं वस्तु प्राकृतेन्द्रियगोचरः ।
इति वेदपुराणानि कथयन्ति निरन्तरम् ॥१७९
अतः प्रभृति मद्वाक्ये विश्वासं रक्ष सर्वदा ।
हृदये मा कृथा भूय इमां कुत्सितभावनाम् ॥१८०
प्रभो र्वाक्येन विप्रस्य विश्वासः समजायत ।
ततोऽसौ भोजनं चक्रे सञ्जातास्य जिजीविषा ॥१८१
एवमाश्वासयन् विप्रं प्रस्थान मकरोत् प्रभुः ।
कृतमालाकृतस्नानो दुर्वेसन मुपागमत् ॥१८२
रघुनाथं ददर्शासौ ततो दुर्वेसने प्रभुः ।
महेन्द्रशैल मासाद्य पर्शुराममवन्दत ॥१८३
सेतुबन्धं समायातो धनुस्तीर्थं वगाह्य च ।
तत्र रामेश्वरं पश्यन् विश्राम मकरोत् प्रभुः ॥१८४
तस्याकर्णयतः कूर्मपुराणं विप्रसंसदि ।
पातिव्रत मुपाख्यान मुदतिष्ठत्तदन्तरा ॥१८५
रावणेन हृता मायासीतेति तत्र वर्णितम् ।
शृण्वन्नेव महानन्दमग्नचित्तोऽभवत् प्रभुः ॥१८६

सीता पतिव्रताशीर्षरत्नं जनकनन्दिनी ।
सर्वेषां जगतां माता श्रीरामसहधर्मिणी ॥१८७

सा दृष्ट्वा रावणं घोरमनलं शरणं ययौ ।
स च रावणनेत्रेभ्यः सीतादेवीं समावृणोत् ॥१८८

सीतामादाय पार्वत्याः करेऽसौ न्यस्तवांस्ततः ।
रावणं वञ्चयामास मायासीतां समर्पयन् ॥१८६

रघुनाथो यदायातो नाशयन् रावणं युधि ।
तत्रैवाग्निपरीक्षार्थं सीतामानाययच्च ताम् ॥१६०

मायासीता तदैवासौ नीतान्तर्धान मग्निना ।
सत्यसीता समानीता रामाय च ददे ततः ॥१६१

इत्यन्तं यावदाकर्ण्य परमानन्दमानसः ।
रामदासस्य विप्रस्य प्रभुः सस्मार तत्क्षणात् ॥१६२

एतान् सर्वांश्च सिद्धान्तान् श्रुत्वानन्दितमानसः ।
तत् पत्रं ब्राह्मणं याचन् सञ्जग्राह महाप्रभुः ॥१६३

लेखयित्वा नवं पत्रं ग्रन्थे तत्र निवेश्य च ।
विप्रप्रत्यायनार्थं तत् पत्रं प्राचीन मग्रहीत् ॥१६४

प्रत्यायात स्तदादाय दक्षिणां मथुरां पुनः ।
रामदासाय विप्राय तच्च पत्रं ददौ प्रभुः ॥१६५

"तथाहि कूर्मपुराणे—

सीतयाराधितो वह्निश्छायासीतामजीजनत् ।
तां जहार दशग्रीवः सीतावह्निपुरं गता ॥१६॥

परीक्षासमये वह्निं छायासीता विवेश सा ।
वह्निः सीतां समानीय तत्पुरस्तादनीनयत् ॥१७॥"

ब्राह्मणः प्राप्य तत् पत्रं बभूवानन्दितान्तरः ।
अरोदीच्चरणद्वन्द्वं गृहीत्वा च महाप्रभोः ॥१६६

कथयामास विप्रस्त्वं स्वयं श्रीरघुनन्दनः ।
कृतसन्न्यासिवेशो मे दर्शनं दत्तवानसि ॥१६७
त्वमुद्धारितवान्माञ्च महतो दुःखसागरात् ।
अद्य सानुग्रहं भिक्षामङ्गीकुरु गृहे मम ॥१६८
साधु भिक्षां तदा तेऽहं मनोदुःखान्न दत्तवान् ।
दिष्ट्याहं प्राप्तवानद्य तव भुयोऽपि दर्शनम् ॥१६६
इत्युक्त्वा ब्राह्मणः पाकं सुखेन कृतवांस्तदा ।
श्रेष्ठोपकरणै र्भिक्षां कारयामास च प्रभुम् ॥२००
तस्यां रात्रौ स्थितस्तत्र प्रभुः कुर्वन् कृपां द्विजे ।
पाण्ड्यदेशे गतस्ताम्रपर्णीं गौरहरिस्ततः ॥२०१
ताम्रपर्णीं वगाह्यासौ तस्यास्तीरे महाप्रभुः ।
स नयत्रिपदीं पश्यन्नभ्राम्यत् सकुतूहलम् ॥२०२
तीर्थे चियडतालाख्ये दृष्ट्वा श्रीरामलक्ष्मणौ ।
तिलकाञ्चीं समासाद्य सन्ददर्श प्रभुः शिवम् ॥२०३
गजेन्द्रमोक्षणे तीर्थे विष्णुमूर्त्तिं विलोकयन् ।
तीर्थं पानागडिं प्राप्तः सीतापतिं ददर्श सः ॥२०४
चामुडानुरमागत्य दृष्ट्वा श्रीरामलक्ष्मणौ ।
श्रीवैकुण्ठं समासाद्य विष्णुमालोकयच्च सः ॥२०५
वन्दमान स्ततोऽगस्त्यं प्राप्य मलयपर्वतम् ।
कन्याकुमारिकां तत्र सन्ददर्श महाप्रभुः ॥२०६
दृष्ट्वा मलीतलायां स रामं गौरहरिस्ततः ।
मल्लारदेशमागच्छद् यत्रासन् भट्टमारिणः ॥२०७
तमालकार्त्तिकं दृष्ट्वा स वेतापाणिमागतः ।
रघुनाथं विलोक्याथ तत्र,रात्रिमयापयत् ॥२०८
समं गोस्वामिना कृष्णादासाख्यो यो द्विजः स्थितः ।
साक्षात्कारोऽभवत्तस्य केनचिद्भट्टमारिणा ॥२०६

स स्त्रीर्धनञ्च सन्दर्श्य तस्य लोभमजीजनत् ।
सरलस्यार्यविप्रस्य बुद्धिमभ्रंशयच्च सः ॥२१०
प्रातरुत्थाय विप्रोऽसौ भट्टमारिगृहं गतः ।
तमन्विष्यन् समायातः शीघ्रं तत्र महाप्रभुः ॥२११
तत्रागत्यैव स प्रोचे सर्वांस्तान् भट्टमारिणः ।
युष्माभि र्मम विप्रोऽयं स्थापितः केन हेतुना ॥२१२
पश्याहमस्मि सन्नयासी यूयं सन्नयासिनोऽपि भोः ।
युष्माभिर्दीयते दुःखं न्याय्यं न प्रतिभाति मे ॥२१३
इत्याकर्ण्योद्गृहीतास्त्रा उत्थिता भट्टमारिणः ।
धावन्तः सर्वतः सर्वे निहन्तुं प्रभुमागताः ॥२१४
करेभ्यः पेतुरस्त्राणि तेषामङ्गेषु चात्मनः ।
समन्तात्ते पलायन्त खण्डिता भट्टमारिणः ॥२१५
भट्टमारिगृहे तत्र महत् क्रन्दनमुत्थितम् ।
केशेष्वाकृष्य तं विप्रं निनाय श्रीमहाप्रभुः ॥२१६
गत्वा तीरं पयस्विन्यास्तस्मिन्नेव दिने प्रभुः ।
तत्र स्नात्वा ततोऽगच्छदादिकेशवमन्दिरम् ॥२१७
तत्र केशवमालोक्य प्रेमाविष्टोऽभवत् प्रभुः ।
प्रणनाम प्रतुष्टाव जगौ बहु ननर्त्त च ॥२१८
जना स्तत्प्रेम संलक्ष्य महान्तं विस्मयं गताः ।
आदरेण च सत्कारं कृतवन्तो महाप्रभोः ॥२१९
तत्र तस्याभवद् गोष्ठी महाभक्तजनैः समम् ।
स ब्रह्मसंहिताध्यायं ग्रन्थं तत्रैव लब्धवान् ॥२२०
लेभे निःसीममानन्दं ग्रन्थं प्राप्य ततः प्रभोः ।
कम्पाश्रुपुलकस्वेदस्तम्भा विकृतयोऽभवन् ॥२२१
नास्ति सिद्धान्तशास्त्रं हि ब्रह्मसंहितया समम् ।
गोविन्दमहिमज्ञानलाभस्यैकावलम्बनम् ॥२२२

स्वल्पाक्षरैः सुसिद्धान्तः सम्यक् तत्रैव कथ्यते ।
सर्ववैष्णवशास्त्राणां मध्ये सारतमं हि तत् ॥२२३
लेखयित्वातियत्नेन ग्रन्थं तं स गृहीतवान् ।
हृष्टचित्तस्ततोऽनन्तपद्मनाभं समाययौ ॥२२४
पद्मनाभं ददर्शासौ तत्र स्थित्वा दिनद्वयम् ।
सानन्दचेतसा द्रष्टु मायातः श्रीजनार्दनम् ॥२२५
कीर्त्तनं नर्त्तनञ्चासौ तत्र कृत्वा दिनद्वयम् ।
पयोष्णीमेत्य शङ्करनारायणं ददर्श सः ॥२२६
शृङ्गेरीमठमायातः शङ्कराचार्यनिर्मितम् ।
स्नात्वासौ तुङ्गभद्रायां मत्स्यतीर्थं ददर्श सः ॥२२७
मध्वाचार्यमठं तत्त्ववादिनां वसतिं गतः ।
पश्यन्नुडुपकृष्णं स प्रेमास्वादपरोऽभवत् ॥२२८
सोऽयं नर्त्तकगोपालः कृष्णः परममोहनः ।
मध्वाचार्यं दिशन् स्वप्ने स निजस्थानमागतः ॥२२९
स आसीज्जलपोतान्त गोंपीचन्दनमन्तरा ।
कथमप्यागतो देवो मध्वाचार्यस्य सन्निधौ ॥२३०
मध्वाचार्यस्तमानीय समस्थापयदत्र च ।
अद्य प्रभृति सेवन्ते तं देवं तत्त्ववादिनः ॥२३१
कृष्णमूर्त्तिञ्च तां दृष्ट्वा प्रभु प्राप्य महासुखम् ।
प्रेमावेशाच्चिरं तत्र कृतवान् गीतनर्त्तने ॥२३२
मायावादीति विज्ञाय प्रभुं ते तत्त्ववादिनः ।
न किञ्चित् समभाषन्त प्रथमे तस्य दर्शने ॥२३३
प्रेमावेशं पुनः पश्चात् पश्यन्तस्ते चमत्कृताः ।
तस्य वैष्णवतां दृष्ट्वा सत्कारान् विदधु र्बहून् ॥२३४
तेषां वैष्णवतागर्वं विजानन् गौरचन्द्रमाः ।
आरेभे तैः समं सर्वैं गोंष्ठीं कर्तुं ततः परम् ॥२३५

तत्त्ववादिन आचार्यान् सर्वशास्त्रेषु पण्डितान् ।
तान् सर्वान् परिपप्रच्छ दीनचेता इव प्रभुः ॥२३६
नाहं सुष्ठु विजानामि साध्यसाधनसम्पदम् ।
तत् साध्यसाधनश्रेष्ठं विज्ञापयत मां बुधाः ॥२३७
प्राहाचार्यो भवेच्छ्रेष्ठं कृष्णभक्तस्य साधनम् ।
स्ववर्णाश्रमधर्माणां श्रीकृष्णाय समर्पणम् ॥२३८
प्राप्य पञ्चविधां मुक्तिं वैकुण्ठागमनं ततः ।
साध्यश्रेष्ठं तदेवेति सर्वशास्त्रै र्निरूप्यते ॥२३६
कथितं प्रभुणा शास्त्रं ब्रूते श्रवणकीर्तने ।
परमे साधने कृष्णप्रेमसेवाफलस्य हि ॥ २४०

"तथाहि श्रीमद्भागवते सप्तमस्कन्धे पञ्चमाध्यायेऽष्टादशश्लोके युधिष्ठिरं प्रति नारदवाक्यम्—

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्य मात्मनिवेदनम् ॥१८॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥१६॥"

श्रवणात् कीर्त्तनाच्चैव कृष्णे प्रेमा प्रजायते ।
पञ्चमः पुरुषार्थोऽयं पुरुषार्थस्य सोऽवधिः ॥२४१

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्यायेऽष्टात्रिंशश्लोके जनकं प्रति कवियोगेन्द्रवाक्यम्—

एवंव्रतः स्वप्रियनामकीर्त्त्या
जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गाय-
त्युन्मादवन्नृत्यति लोकवाह्यः ॥२०॥"

ब्रुवते सर्वशास्त्राणि निन्दां त्यागञ्च कर्मणः ।
कर्मणो जायते कृष्णे प्रेमभक्तिर्न कर्हिचित् ॥२४२

"तथाहि श्रीमद्भागवत एकादशस्कन्ध एकादशाध्याये द्वात्रिंशश्लोक
उद्धवं प्रति श्रीकृष्णवाक्यम्—

आज्ञायैव गुणान्दोषान्मयादिष्टानपि स्वकान्।
धर्मान् सन्त्यज्य यः सर्वान् मां भजेत् स च सत्तमः ॥२१॥

तथाहि श्रीमद्भगवद्गीतायामष्टादशाध्याये षट्षष्टितमश्लोकेऽर्जुनं प्रति
श्रीभगवद्वाक्यम्—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥२२॥

तथाहि श्रीमद्भागवत एकादशस्कन्धे विंशाध्याये नवमश्लोक उद्धवं प्रति
श्रीकृष्णवाक्यम्—

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥२३॥"

भक्ताः पञ्चविधां मुक्तिं सन्त्यजन्त्यवलीलया।
नरकेण समां मुक्तिमीक्षन्ते फल्गुमेव ते ॥२४३

"तथाहि श्रीमद्भागवते तृतीयस्कन्ध ऊनत्रिंशाध्याय एकादश-
श्लोके देवहुतिं प्रति कपिलदेववाक्यम्—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्यूत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥२४॥

तथाहि तत्रैव पञ्चमस्कन्धे चतुर्दशाध्याये त्रयश्चत्वारिंश-
श्लोके परीक्षितं प्रति शुकवाक्यम्—

यो दुस्त्यजान् क्षिति-सुत-स्वजनार्थदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम्।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्-
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥२५॥

तथाहि तत्रैव षष्ठस्कन्धे सप्तदशाध्याये त्रयोविंशश्लोके—

नारायणपराः सर्वे न कुतश्चन बिभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥२६॥"

परित्यजन्ति भक्ता द्वे वस्तुनी मुक्तिकर्मणी ।
साध्यसाधनरूपेण तद्द्वयं स्थाप्यते त्वया ॥२४४

मां सन्न्यासिनमालोक्य प्रतारयसि केवलम् ।
नोक्तवानसि तस्मात्त्वं साध्यसाधनलक्षणम् ॥२४५

इति तत्त्वविदाचार्यः श्रुत्वाभूल्लज्जितान्तरः ।
प्रभोर्वैष्णवतां वीक्ष्य विस्मयं परमं ययौ ॥२४६

आचार्येणोक्तमात्थ त्वं यत्तत् सत्यं भवेत् खलु ।
एवं सर्वेषु शास्त्रेषु वैष्णवानां सुनिश्चयः ॥२४७

तथापि कृतवान् मध्वाचार्यो निबन्धमेव यम् ।
साम्प्रदायिकसम्बन्धात् सर्वैराचर्यते हि सः ॥२४८

प्रभुणोक्तमुभौ कर्मिज्ञानिनौ भक्तिवर्जितौ ।
दृश्येते सम्प्रदाये ते ते द्वे एव हि लक्षणे ॥२४९

सम्प्रदाये तवैकोऽयं गुणः केवलमीक्ष्यते ।
ईश्वरस्तत्र निर्णीतः सत्यविग्रहवानिति ॥२५०

एवं तत्सम्प्रदायस्य गर्वं सञ्चूर्णयन्नसौ ।
फल्गुतीर्थं समायात स्ततोगौरहरिः प्रभुः ॥२५१

त्रितकूपविशालायाः कृतवान्दर्शनं ततः ।
श्रीशचीनन्दनः पञ्चाप्सरस्तीर्थमुपागमत् ॥२५२

गोकर्णं शिवमालोक्य देवीं द्वैपायनीं तथा ।
स शूर्पारकमायात स्तीर्थं न्यासिशिरोमणिः ॥२५३

लक्ष्मीं कोलापुरे दृष्ट्वा क्षीरभगवतीञ्च सः ।
लाङ्गागणेश मालोक्य दृष्टवांश्चौरपार्वतीम् ॥२५४

गौरचन्द्रः समायात स्ततः पाण्डुपुरं प्रभुः ।
लेभे परममानन्दं दृष्ट्वा विठ्ठलटक्कुरम् ॥२५५
प्रेमावेशवशश्चक्रे बहुशो नृत्यकीर्त्तने ।
न्यमन्त्रयत तत्रैको ब्राह्मणस्तं महाप्रभुम् ॥२५६
स बह्वादरयोगेन प्रभुं भिक्षामकारयत् ।
भिक्षां कुर्वन् प्रभुस्तत्र शुभसंवादमाप्तवान् ॥२५७
श्रीमाधवपुरीशिष्यः पुरीश्रीरङ्गनामकः ।
विश्राम्यन्नेव तत्रास्ते ग्रामे क्वापि द्विजालये ॥२५८
इति संवादमाकर्ण्य प्रभुस्तं द्रष्टुमागतः ।
ईक्षाञ्चक्रे तमासीनं ब्राह्मणस्य निकेतने ॥२५९
प्रेमावेशवशेनासौ दण्डवत् प्रणनाम तम् ।
तदङ्गादस्रवन् स्वेदाः कम्पाश्रुपुलकाञ्चितात् ॥२६०
तद्दृष्ट्वा विस्मितश्चाभूच्छ्रीरङ्गस्वामिनो मनः ।
हे श्रीपाद त्वमुत्तिष्ठेत्युक्त्वैवं स वचोऽब्रवीत् ॥२६१
स्वामिनो मम सम्बन्धं श्रीपादः किं गृहीतवान् ।
नैब प्रेम्नोऽस्य गन्धोऽपि तं विनान्यत्र विद्यते ॥२६२
इत्युक्त्वासौ तमुत्थाप्य समाशिश्लेष सादरम् ।
अन्योन्यं कण्ठसंलग्नावुभौ चक्रन्दतुश्च तौ ॥२६३
त्यक्त्वावेशं क्षणेनोभौ धैर्ययुक्तौ बभुवतुः ।
पुरीश्वरस्य सम्बन्धं प्रभुस्तस्मै व्यजिज्ञपत् ॥२६४
उभयोरद्भुतप्रेमवन्योच्छ्वासं गता तदा ।
अन्योन्यं मानयन्तौ तावानन्देन न्यषीदताम् ॥२६५
तत्र रात्रिन्दिवं कृष्णकथां तौ चक्रतुः परम् ।
पञ्च वा सप्त वाहानि तावित्थं निन्यतु स्तदा ॥२६६
पुरी जन्मभुवं तस्य पृष्टवान् सकुतूहलम् ।
प्रत्यूचे स नवद्वीपधामेति तं सकौतुकम् ॥२६७

पुरीश्रीमाधवेनासौ पुरीश्रीरङ्ग एकदा ।
पूर्वमागतवांस्तत्र श्रीनवद्वीपपत्तने ॥२६८
भिक्षां गेहे जगन्नाथमिश्रस्यासौ गृहीतवान् ।
मोचाघण्ट मपूर्वं स तदा तत्रैव भुक्तवान् ॥२६९
ब्राह्मणी श्रीजगन्नाथमिश्रस्यासीत् पतिव्रता ।
सा वात्सल्यमयी नूनं जगतां जननीसमा ॥२७०
रन्धने निपुणा कापि तत्समा न जगत्त्रये ।
सा भोजितवती स्नेहात् सन्न्यासिनः सुतानिव ॥२७१
तस्या योग्यः सुतः कोऽपि सन्न्यासं कृतवान् किल ।
शङ्करारण्यनामासौ वयसाल्पेन संयुतः ॥२७२
तीर्थेऽस्मिन् शङ्करारण्यः स सिद्धिं प्राप्तवानिति ।
एवमेव प्रसङ्गेन पुरीश्रीरङ्ग उक्तवान् ॥२७३
प्रभुः कथितवान् पूर्वाश्रमेऽसौ मेऽग्रजोऽभवत् ।
पूर्वाश्रमे जगन्नाथमिश्रश्चासीत् पिता मम ॥२७४
इत्थं कृतवतोरिष्टगोष्ठीं तत्र तयोर्द्वयोः ।
स श्रीरङ्गपुरीस्वामी द्वारकामीक्षितुं गतः ॥२७५
स्थापितस्तत्र विप्रेण प्रभुर्दिनचतुष्टयम् ।
भीमरथ्यां कृतस्नानोऽकरोद् विठ्ठलदर्शनम् ॥२७६
ततो महाप्रभुर्यातः कृष्णवेणीनदीतटम् ।
बहून्यैक्षत तीर्थानि तत्र देवगृहाणि च ॥२७७
समाज स्तत्र विप्राणां वैष्णवाचारसंयुतः ।
कृष्णकर्णामृतं ग्रन्थं सर्वे पेठुश्च वैष्णवाः ॥२७८
कृष्णकर्णामृतं श्रुत्वा प्रभुरानन्दितान्तरः ।
लेखयित्वा च तं ग्रन्थं सादराग्रहमग्रहीत् ॥२७९
कर्णामृतसमं वस्तु नास्त्यत्र भुवनत्रये ।
प्रेम ज्ञानञ्च जायेते शुद्धे कृष्णगते यतः ॥२८०

स वेद कृष्णलीलाया माधुरीसुपमावधिम् ।
कृष्णकर्णामृतं ग्रन्थमधीते योहि सर्वदा ॥२८१
स ब्रह्मसंहिताकर्णामृते द्वे प्राप्य पुस्तके ।
महारत्नसमे सार्द्धं मानिनाय महाप्रभुः ॥२८२
अवगाह्य नदीं तापीं ययौ माहिष्मतीं पुरीम् ।
नानातीर्थानि दृष्ट्वासौ नर्मदातीरमागतः ॥२८३
अवागाहत निर्विन्ध्यां धनुस्तीर्थं विलोक्य सः ।
दण्डकारण्यमागच्छद् यस्मिन्नृष्यमुखो गिरिः ॥२८४
अतिवृद्धानतिस्थूलानतीवोच्चप्रमाणकान् ।
काननाभ्यन्तरे सप्ततालवृक्षान्ददर्श सः ॥२८५
सप्ततालान् समालोक्य यदाश्लिष्यन्महाप्रभुः ।
शरीरेण समं सप्तताला अन्तर्दधुश्च ते ॥२८६
तच्छून्यस्थानमालोक्य जनाः सर्वे चमत्कृताः ।
श्रीरामस्यावतारोऽयं सन्न्यासीत्येवमब्रुवन् ॥२८७
सशरीरा गताः सप्तताला वैकुण्ठधाम ते ।
एकं रामं विना शक्तिरीदृशी कस्य विद्यते ॥२८८
कृतवान् प्रभुरागत्य स्नानं पम्पासरोवरे ।
एत्य पञ्चवटीं तत्र विश्रामञ्च गृहीतवान् ॥२८९
नासिकत्र्यम्बकं दृष्ट्वा ययौ ब्रह्मगिरिं ततः ।
कुशावर्तं गतः प्रादुर्भूता गोदावरी यतः ॥२९०
सप्त गोदावरी दृष्ट्वा तीर्थानि सुवहूनि च ।
पुनरप्यागतो विद्यानगरं तन्महाप्रभुः ॥२९१
श्रीरामानन्दरायस्तु श्रुत्वैवागमनं प्रभोः ।
आनन्देन समागच्छन् मिलितः प्रभुणा सह ॥२९२
गृहीत्वा चरणौ तस्य सोऽपतद् भुवि दण्डवत् ।
तं रामानन्द मुत्थाप्य परिरेभे महाप्रभुः ॥२९३

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

प्रेमावेशादुभावेव तदा चक्रन्दतुश्च तौ ।
द्वावेवाभवतां प्रेमानन्देन श्लथमानसौ ॥२९४
ततः कियच्चिरेणोभौ भूत्वा सुस्थिरचेतसौ ।
चक्रतुः सममासीनाविष्टगोष्ठीमनेकधा ॥२९५
वृत्तान्तां स्तीर्थयात्रायाः कथयित्वा महाप्रभुः ।
ते ब्रह्मसंहिताकर्णामृते तस्मै ददावुभे ॥२९६
प्रभुणोक्तं त्वया प्रेमसिद्धान्ता ये च भाषिताः ।
तेष्वेव साद्दयमेताभ्यां पुस्तकाभ्यां प्रदीयते ॥२९७
तत् पुस्तकद्वयं प्राप्य रायः सानन्दमानसः ।
प्रभुणा सममास्वाद्य लिखित्वास्थापयत् पुनः ॥२९८
गोस्वामी ग्राममायात इति कोलाहलोऽभवत् ।
सर्वे लोकाः समायाता स्तत्र द्रष्टुं महाप्रभुम् ॥२९९
गतवान् जनतां दृष्ट्वा रामातन्दो निजालयम् ।
मध्यांह्ने च समासन्ने प्रभु र्भिक्षार्थ मुत्थितः ॥३००
आगतायां ततो रात्रौ रायः पुनरुपागमत् ।
कृष्णवार्ताप्रसङ्गेन ताभ्यां जागरणं कृतम् ॥३०१
ऊभौ रात्रिन्दिवँ कृष्णकथां तावेव चक्रतुः ।
महानन्देन यातानि पञ्चसप्तान्यहान्यथ ॥३०२
रामानन्दो बभाषेऽथ प्रभोऽहं भवदाज्ञया ।
राज्ञे लिखितवान् पत्रीं विनयश्लक्ष्णभाषया ॥३०३
नीलाचलं यियासन्तं राजा मामन्वमन्यत ।
गमनाय मयोद्योगः साम्प्रतं तद्विधीयते ॥३०४
प्रभुणोक्त मतो ह्येव पुनरत्रागतं मया ।
त्वामादाय करिष्यामि यात्रां नीलाचलं प्रति ॥३०५
रायेणोक्तं प्रभो गच्छ त्वं नीलाचल मग्रतः ।
अह मत्रास्मि हस्त्यश्वसैन्यकोलाहलाकुलः ॥३०६

अत्र तिष्ठन्दशाहानि शेषं सर्व्वं समादधत् ।
प्रस्थानं भवतः पश्चात् करिष्यामि विलम्बितम् ॥३०७
ततो महाप्रभुस्तस्यागमनार्थं समादिशन् ।
नीलाचलं प्रतस्थे च महानन्दितचेतसा ॥३०८
पूर्वमागतवान् येन मार्गेण श्रीमहाप्रभुः ।
तेनैव प्रतिगच्छन् स जनैः सर्वै र्व्यलोक्यत ॥३०६
यत्रासौ गतवांस्तत्र लोकाः कृत्वा हरिध्वनिम् ।
उत्थिता ददृशु गौरहरिं सानन्दमानसाः ॥३१०
आलालनाथ मासाद्य नित्यानन्दादिकान् गणान् ।
स्वानाह्वाययितुं कृष्णदासं तं प्राहिणोत् प्रभुः ॥३११
श्रीनित्यानन्दरायोऽपि शृण्वन्नागमनं प्रभोः ।
उत्थाय प्रस्थितः प्रेम्णो नैव सीमा मविन्दत ॥३१२
मुकुन्दो जगदानन्दः श्रीदामोदरपण्डितः ।
शरीरोद्वेलितानन्दा नृत्यन्तस्ते त्रयो ययुः ॥३१३
श्रीगोपीनाथ आचार्यः प्रतस्थे च मुदान्वितः ।
प्रभुणा मिलिताः सर्वे पथ्येव प्राप्य दर्शनम् ॥३१४
प्रेमावेशवशः सर्वानालिलिङ्ग महाप्रभुः ।
सानन्दं रुरुदुः सर्वे प्रेमावेशवशेन ते ॥३१५
भट्टाचार्यश्चलन् सार्वभौमः सानन्दमानसः ।
प्राप्य तीरं समुद्रस्य प्रभुणा समगच्छत ॥३१६
सार्वभौमः पपातास्य पादयोः श्रीमहाप्रभोः ।
सोऽपि तञ्च समुत्थाप्य समाशिश्लेष सादरम् ॥३१७
प्रेमावेशवशात् सार्वभौमः क्रन्दितवांस्ततः ।
समं सर्वै र्जगन्नाथ मीक्षितुं प्रभुराययौ ॥३१८
पश्यतोऽथ जगन्नाथं प्रेमावेशोऽभवत् प्रभोः ।
कम्पस्वेदाश्रुरोमाञ्चा स्तस्योद्भान्ति स्म विग्रहे ॥३१६

बहुशो नृत्यगीतानि प्रेमावेशाच्चकार सः ।
मालाप्रसादहस्ताश्च तैर्थिका स्तमुपाययुः ॥३२०
तेभ्यो मालां प्रसादञ्च प्रभुः प्राप्य स्थिरोऽभवत् ।
सानन्दं मिलितास्तेन श्रीजगन्नाथसेवकाः ॥३२१
काशीमिश्रः समागत्य पतितः पादयोः प्रभोः ।
तं प्रभुर्मानयन्नेव समाशिश्लेष यत्नतः ॥३२२
जगन्नाथस्य ये प्रैस्याः प्रभुणा तेऽपि सङ्गताः ।
अथ यात स्तमादाय सार्वभौमो निजालयम् ॥३२३
भिक्षा ते मद्‌गृहेऽद्येति प्रभुमामन्त्र्य सादरम् ।
दिव्यान् महाप्रसादांश्च भूरिशोऽसौ समानयत् ॥३२४
प्रत्यासन्नश्च मध्याह्नः स्वगणै र्लपतः प्रभोः ।
आगत्य सार्वभौमस्य गृहे भिक्षां चकार सः ॥३२५
कारयित्वा प्रभुं भिक्षां भट्टः शायितवांस्ततः ।
पादौ संवाहयन्नासीत् स्वयं तत्र महाप्रभोः ॥३२६
प्रभुस्तं प्रेरयामास भोजनाय गृहान्तरम् ।
तस्याँ रात्रौ गृहे तस्य प्रीतये स्थितवांश्च सः ॥३२७
सहितः सार्वभौमेण समादाय निजान् गणान् ।
कथयं स्तीर्थयात्राया वृत्तं जागरितो निशाम् ॥३२८
प्रभुः प्रोवाच पर्याटं तीर्थानीयन्ति यद्यपि ।
त्वया तुल्यो न चैकोऽपि वैष्णवो लक्षितो मया ॥३२९
एक एव ददौ रामानन्दो मे विपुलं सुखम् ।
भट्टेनोक्त महं तस्य सङ्गार्थं त्वा मतोऽवदम् ॥३३०
तीर्थयात्राकथा ह्येषा संक्षेपेण समापिता ।
मया वर्णयितुं नैव शक्यतेऽसौ सविस्तरम् ॥३३१
अनन्ताः कृष्णचैतन्यलीला वक्तुं न वेद्म्यहम् ।
लज्जां विसृज्य लोभेन ताः कर्षामि निरन्तरम् ॥३३२

तीर्थयात्राकथां यस्तु शृणोत्येतां महाप्रभोः ।
चैतन्यचरणे गाढप्रेमवित्तं स विन्दति ॥३३३
श्रद्धाभक्तिसमायुक्त श्चैतन्यचरितं शृणु ।
त्यक्त्वा मात्सर्यं मास्येन ब्रूहि हरिहरीति भोः ॥३३४
कलिकालेऽत्र धर्मो हि वर्तते कोऽपि नापरः ।
वैष्णवै वैंष्णवैः शास्त्रैरियं मर्मकथोच्यते ॥३३५
लीलां चैतन्यचन्द्रस्य गम्भीरा मतलस्पृशम् ।
प्रवेष्टुं नैव शक्नोमि स्थितश्चास्मि तटं स्पृशन् ॥३३६
चैतन्यचरितं यो हि श्रुत्वा श्रद्धासमन्वितः ।
यावद्विचारयेत्तावत् प्राप्नुयात् प्रेमसम्पदम् ॥३३७
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥३३८

इति श्रीचैतन्यचरितामृते मध्यखण्डे दक्षिणदेशतीर्थभ्रमणं नाम नवमः परिच्छेदः ।

—०—

मध्यलीलायां दशमः परिच्छेदः

"तं वन्दे गौरजलदं स्वस्य यो दर्शनामृतैः ।
विच्छेदावग्रह-म्लान-भक्त-शस्यान्यजीवयत् ॥१॥"

भूयो जयतु चैतन्यो नित्यानन्दो जयत्यसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
दाक्षिणात्यं प्रभौ याते प्रतापरुद्रभूपतिः ।
भृत्यैरावाहयन् सार्वभौममानयदन्तिकम् ॥२
तस्योपवेशनायासौ नमस्कृत्यासनं ददौ ।
सार्वभौममपृच्छच्च वृत्तान्तं श्रीमहाप्रभोः ॥३

महाकारुणिकः कश्चिन्महात्मा ते निकेतनम् ।
गौडदेशात् समागत्य तिष्ठतीति श्रुतं मया ॥४

आहुः सर्वे स भूयिष्ठां कृपां ते कृतवानिति ।
कृपया तं महात्मान मवलोकय मामिति ॥५

भट्टः प्रोवाच सर्वं तत् सत्यं यच्छ्रुतवान् भवान् ।
तस्य सन्दर्शनं किन्तु भवता न घटिष्यते ॥६

विरक्तः सहि सन्नयासी सदा तिष्ठति निर्जने ।
न स्वप्नेऽपि करोत्येष कदाचिद्राजदर्शनम् ॥७

तथाप्यदर्शयिष्यं तं भवन्तं हि कथञ्चन ।
किन्त्वसौ दक्षिणं देशं साम्प्रतं गतवानिति ॥८

राजा प्रोचे जगन्नाथं त्यक्त्वासौ गतवान् कथम् ।
भट्टः कथिवानेषा लीला कापि महात्मनः ॥९

ते पर्यटन्ति तीर्थानि तानि पावयितुं किल ।
निस्तारयन्ति ते तत्र तत्र संसारिणो जनान् ॥१०

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे त्रयोदशाध्यायेऽष्ठमश्लोके विदुरं प्रति युधिष्ठिरवाक्यम्—

भवद्विधा भागवता स्तीर्थीभूताः स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥२॥"

वैष्णवानां स्वभावोऽयमेवं भवति निश्चलः ।
नहि जीवो भवत्येष स्वतन्त्रः सोऽयमीश्वरः ॥११

राज्ञोक्तं स त्वया कस्माद् गमनान्न निवर्तितः ।
वासितो वा न यत्नेन पादयोः पतता कथम् ॥१२

भट्टाचार्योऽवदत् सोऽयं स्वतन्त्रः स्वयमीश्वरः ।
साक्षाच्छ्रीकृष्ण एवायं नैवास्य परतन्त्रता ॥१३

कुर्वन्नपि महायत्नमहं स्थापयितुञ्च तम् ।
ईश्वरस्य स्वतन्त्रत्वान्न शक्तोऽस्मि कथञ्चन ॥१४

राजा कथितवान् भट्ट विज्ञानां त्वं शिरोमणिः ।
तं श्रीकृष्णं ब्रवीषीति तत् सत्यं मन्यते मया ॥१५
यद्येवात्र महात्मासौ पुनरप्यागमिष्यति ।
लप्स्ये सफलतामक्ष्णोः सकृदप्यवलोक्य तम् ॥१६
भट्टाचार्योऽवदच्चासावचिरेणागमिष्यति ।
प्रार्थयेऽस्यात्र वासाय स्थान मत्यन्तनिर्जनम् ॥१७
जगन्नाथसमीपस्थं निर्जनञ्च यथा भवेत् ।
विनिर्णीय तथास्थान मेकमर्पय तत्कृते ॥१८
प्रोक्तं राज्ञा तथास्थानं काशीमिश्रस्य मण्दिरम् ।
निकषा श्रीजगन्नाथं तथा परमनिर्जनम् ॥१९
इत्युक्त्वा च स्थिते राज्ञि समुत्कण्ठितमानसे ।
भट्टाचार्यस्ततो गत्वा काशीमिश्रं तथाब्रवीत् ॥२०
काशीमिश्रोऽवदद्भट्ट महं भाग्यवतां वरः ।
यतोऽवस्थास्यते श्रीमत्प्रभुपादो ममालये ॥२१
एव मेव जनाः सर्वे पुरुषोत्तमवासिनः ।
प्रभोः सङ्गमलाभायाभवन्नुदग्रीवचेतसः ॥२२
जनानां हृदयोत्कण्ठा यदात्यन्तमवर्द्धत ।
दाक्षिणात्या त्तदैवासौ प्रत्यावृत्तो महाप्रभुः ॥२३
तदागमन माकर्ण्य सर्वे सानन्दमानसाः ।
सार्वभौम मुपागत्य जना एवं न्यवेदयन् ॥२४
कृपया प्रभुणा सार्द्धं मस्माकं मिलनं कुरु ।
यथा चैतन्यपादाब्जं प्रसादात्ते लभेमहि ॥२५
भट्टाचार्योऽवदत् काशीमिश्रस्य निलये प्रभुः ।
श्वः समेष्यति तत्रैव मेलयिष्यामि तेन वः ॥२६
परेद्यवि समं भट्टाचार्येण श्रीमहाप्रभुः ।
ददर्श श्रीजगन्नाथं महाकौतूहलान्वितः ॥२७

महाप्रसाद मादाय सर्वान् भक्तान् समागतान् ।
समाशिश्लेष यत्नेन प्रत्येकं तान् महाप्रभुः ॥२८
जगन्नाथं समालोक्य वहिः प्रस्थातु मुद्यतम् ।
भट्टाचार्यः प्रभुं काशीमिश्रस्यालय मानयत् ॥२६
काशीमिश्रस्तमभ्येत्य पतितः पादयोः प्रभोः ।
तस्मै समर्पयामास स्वात्मानं सनिकेतनम् ॥३०
प्रभुश्चतुर्भुजां मूर्त्तिं दर्शयामास तां निजाम् ।
तत्क्षणादात्मसात् कृत्वा तमालिङ्गितवान् मुदा ॥३१
ततस्तत्र समासीन आसने श्रीमहाप्रभौ ।
नित्यानन्दादयो भक्ताः समन्तात् समुपाविशन् ॥३२
वासगेहस्य संस्थानं दृष्ट्वा प्राप सुखं प्रभुः ।
यत्र सर्वसमाधानं पर्याप्तं समपद्यत ॥३३
सार्वभौम उवाचेदं योग्यं वासगृहं तव ।
काशीमिश्रोऽय माशास्ते त्वयाङ्गीक्रियता मिति ॥३४
प्रभुणोक्तमयं देहो युष्माकमेव सर्वथा ।
वाच्यं यदेव युष्माभिः कर्त्तव्यं हि तदेव मे ॥३५
दक्षभागे प्रभोः सार्वभौमेणाथ निषीदता ।
प्रभुं सङ्गमिता एवं पुरुषोत्तमवासिनः ॥३६
प्रभो सर्वेजना एते श्रीनीलाचलवासिनः ।
तवैव सङ्गलाभार्थं वर्त्तन्तेऽत्र समुत्सुकाः ॥३७
मेघं द्रष्टुं तृषा हाहाकुर्वतश्चातकानिव ।
त्वां दिदृक्षूनिमान सर्वान् प्रभोऽङ्गीकुरु सम्प्रति ॥३८
अयं जनार्दनो नाम श्रीजगन्नाथसेवकः ।
अविरामेण देवस्य श्रीमदङ्गं निषेवते ॥३६
कृष्णदासाभिधानोऽयं स्वर्णवेत्रधरः प्रभोः ।
अयञ्च शिखिमाहाति र्देवलेखाधिकारकः ॥४०

नाम्ना प्रद्युम्नमिश्रोऽयं वैष्णवानां गणोत्तमः ।
श्रीजगन्नाथदासोऽयं सूपकारोत्तमः प्रभोः ॥४१
अयं मुरारिमाहातिः शिखिमाहातिसोदरः ।
अनन्यगतयश्चैते तव पादयुगं विना ॥४२
चन्दनेश्वरनामायं मुरारिब्राह्मणोऽप्ययम् ।
सिंहेश्वरविष्णुदासा वेते ध्यायन्ति ते पदम् ॥४३
श्रीमान् प्रहरराजाख्यो महापात्रो महामतिः ।
अस्य सङ्गी महापात्रः परमानन्दनामकः ॥४४
क्षेत्रस्य भूषणान्यस्य सर्व एते हि वैष्णवाः ।
भजन्त्यैकान्तिकत्वेन तव पाद-सरोरुहम् ॥४५
अथ सर्वे जनास्तत्र ते पेतुर्दण्डवत् क्षितौ ।
आलिलिङ्ग प्रभुः सर्वान् सप्रसादेन चेतसा ॥४६
तदैव श्रीभवानन्दरायस्तत्र समागतः ।
चतुर्भिस्तनयैः साकं पतितः पादयोः प्रभोः ॥४७
भट्टेनोक्तमयं रायः भवानन्दाभिधानकः ।
स रामानन्दरायो हि ज्येष्ठोऽस्यैव सुतः प्रभो ॥४८
ततो महाप्रभु स्तस्मै सादरालिङ्गनं ददौ ।
रामानन्दस्य वृत्तानि प्रशस्येदमुवाच च ॥४९
रामानन्दो महारत्नं यस्यासौ तनयो भवेत् ।
महिमा तस्य लोकेऽस्मिन्नैव शक्येत भाषितुम् ॥५०
स्वयं पाण्डुर्भवान् साक्षात् कुन्ती ते सहधर्मिणी ।
साक्षाच्च पाण्डवाः पञ्च सुधियः पञ्च ते सुताः ॥५१
रायेणोक्त महं शूद्रः पामरो विषयाशयी ।
यत्त्वं स्पृशसि मामेवं तदेवेश्वरलक्ष्म ते ॥५२
समं गेहेन वृत्त्या च भृत्यैश्च पञ्चभिः सुतैः ।
तव पादयुगं प्राप्य मया स्वात्मा समर्पितः ॥५३

वाणीनाथः सुतोऽयं मे चरणे तव तिष्ठतु ।
यदा करोषि यामाज्ञां तदा तां पालयत्वयम् ॥५४
मामात्मीय इति ज्ञात्वा सङ्कोचं मा कृथाः प्रभो ।
यदा योदेति वाञ्छा ते तदैवाज्ञां प्रदेहि मे ॥५५
प्रभुः प्रत्यवदत् कोऽत्र सङ्कोचो न परोऽसि मे ।
प्रतिजन्म समं वंश्यै स्त्वं मे भवसि किङ्करः ॥५६
पञ्चभिर्दिवसै रत्र रामानन्दः समेष्यति ।
आनन्दः परिपूर्णो मे तत्सङ्गे न भविष्यति ॥५७
इत्येवं कथयित्वा तमालिलिङ्ग महाप्रभुः ।
शिरोभि र्जगृहु स्तस्य तनयाश्चरणौ प्रभोः ॥५८
ततो महाप्रभुस्तञ्च प्रैरयत् स्वं निकेतनम् ।
स्वान्तिकेऽस्थापयद्वाणीनाथं तं पट्टनायकम् ॥५९
भट्टाचार्येण सर्वेषु जनेषु प्रहितेष्वथ ।
प्रभुराकारयत् कालाकृष्णदासं निजान्तिकम् ॥६०
प्रभुणोक्तं ततो भट्टाचार्यस्य चरितं शृणु ।
गतवान् दक्षिणं देशं मया सार्द्धमयं जनः ॥६१
भट्टमारिजनं प्राप्य गतोऽभून्मामयं त्यजन् ।
भट्टमारिगृहादेनमुद्धरन्नह मानयम् ॥६२
अधुनात्रैन मानीय गमनायादिशाम्यहम् ।
यथेच्छं यात्वयं नास्ति सम्बन्धोऽनेन मे पुनः ॥६३
इत्याकर्ण्य समारब्धे कृष्णदासे च रोदितुम् ।
गतवान् प्रभुरुत्थाय कर्तुं माध्याह्निकाशनम् ॥६४
मुकुन्दो जगदानन्दो नित्यानन्दप्रभुस्तदा ।
दामोदरश्च चत्वारो रहो युक्ति मकुर्वत ॥६५
गौड़े कस्यचिदेकस्य प्रेरणं युज्यतेऽधुना ।
आर्या विज्ञाप्यतां तेन प्रत्यावृत्ति महाप्रभोः ॥६६

श्रीवासाद्यास्तथाद्वैतः सर्वे भक्ता महाप्रभोः ।
प्रत्यावर्तन माकर्ण्य ते समेष्यन्ति निश्चितम् ॥६७
गौडे तु प्रेरयिष्यामः कृष्णदासमिमं वयम् ।
इत्युक्त्वा सान्त्वयित्वा च तमवास्थापयंस्तु ते ॥६८
अपरेद्युः प्रभोः पार्श्वं गत्वा सर्वे न्यवेदयन् ।
कोऽपि प्रेरयितव्यो नो गौड़ मित्यनुमन्यताम् ॥६९
यातं दक्षिणदेशाय त्वां श्रुत्वा जननी शची ।
तथाद्वैतादयो भक्ता वर्तन्ते दुःखितान्तराः ॥७०
तत्र गत्वा शुभां वार्त्तां तेभ्यः कोऽपि वदत्विति ।
प्रभुः कथितवान् यूयं यथेच्छं कुरुतेति तान् ॥७१
तदा ते कृष्णदासं तं गौडदेशमयापयन् ।
ददुर्महाप्रसादञ्च वैष्णवानां कृते पुनः ॥७२
गौडदेशं ततः कालाकृष्णदासो व्रजंस्तदा ।
नवद्वीपे शचीदेव्या आर्याया अन्तिकं ययौ ॥७३
तस्यै महाप्रसादं स नमस्कृत्य समार्पयत् ।
प्रभुः प्रत्यागतो देशाद्दक्षिणादित्युवाच ताम् ॥७४
तदाकर्ण्य शचीमाता बभूवानन्दविह्वला ।
श्रीवासप्रमुखा भक्ता भक्ताश्चान्ये महाप्रभोः ॥७५
शृण्वन्तः प्रभुवृत्तान्तं परमोल्लासमाप्नुवन् ।
कृष्णदासस्ततोऽगच्छदद्वैताचार्यमन्दिरम् ॥७६
स आचार्यं नमस्कृत्य प्रसादञ्च समर्पयन् ।
सम्यङ् निवेदयामास वृत्तान्तं श्रीमहाप्रभोः ॥७७
तच्छ्रुत्वाचार्यगोस्वामी सानन्दप्रेमविह्वलः ।
बहुनर्त्तनगीतानि हुङ्कारांश्च चकार सः ॥७८
ठक्कुरो हरिदासश्च परमानन्द माययौ ।
शिवानन्दवासुदेवदत्तगुप्तमुरारयः ॥७९

श्रीमदाचार्यरत्नश्च श्रीवक्रेश्वरपण्डितः ।
तथाचार्यनिधिर्नाम पण्डितश्च गदाधरः ॥८०
श्रीरामपण्डितो दामोदरनामा च पण्डितः ।
तथैव पण्डितः श्रीमान् श्रीधरो विजयः पुनः ॥८१
आचार्यो नन्दनो नाम तथा राघवपण्डितः ।
कतीनां नाम वक्ष्यामि ये ये भक्तजनाः प्रभोः ॥८२
प्रभोरुदन्त माकर्ण्य परमोल्लासनिर्भराः ।
समवेता गताः सर्वे श्रीमदद्वैतमन्दिरम् ॥८३
आचार्यचरणद्वन्द्वं सर्वे तत्र ववन्दिरे ।
सर्वांश्चाचार्यगोस्वामी तानाश्लिष्यत् पृथक् पृथक् ॥८४
कृत्वाचार्यस्ततो द्वित्रान् दिवसांश्च महोत्सवम् ।
गन्तुं नीलाचलं युक्तिं द्रढ़यामास तत्क्षणात् ॥८५
सर्वे गत्वा नवद्वीप मेकत्र मिलितास्ततः ।
आज्ञां लब्ध्वा शचीमातु र्नीलाद्रिं ते प्रतस्थिरे ॥८६
वार्त्तां महाप्रभोः श्रुत्वा कुलीनग्रामवासिनः ।
सत्यराजस्तथा रामानन्दद्यास्तैश्च सङ्गताः ॥८७
नरहरि र्मुकुन्दश्च श्रीखण्डाद्रघुनन्दनः ।
गन्तुं नीलाचलं तेऽपि तत्राचार्यमुपाययुः ॥८८
तदैव परमानन्दपुरी दक्षिणदेशतः ।
गङ्गातीरपथेनैव 'नवद्वीपपुरीमयात् ॥८९
स च जग्राह विश्राम मार्याया मन्दिरे सुखम् ।
आर्या तस्मै ददौ भिक्षां बहुसम्मानपूर्वकम् ॥९०
प्रभोरागमनोदन्तं तत्रैवाकर्णयन्नसौ ।
शीघ्रमेव ततो नीलाचलं गन्तुमना अभूत् ॥९१
भक्तं कञ्चित् प्रभोर्विप्रं कमलाकरनामकम् ।
आदाय परमानन्दो ययौ नीलाचलं प्रति ॥९२

तत्रागत्याविलम्वेन प्रभुणा समगच्छत ।
तं प्राप्य परमानन्दं प्रभुरानन्दितोऽभवत् ॥९३
प्रेमाविष्टो ववन्दे च तस्य पादाम्बुजद्वयम् ।
प्रेमावेशाच्च तेनापि गाढमालिङ्गितः प्रभुः ॥९४
अब्रवीद्भवता सार्द्धं स्थातुं वाञ्छति मे मनः ।
कृपया मयि नीलाद्रिं भवानाश्रयतामिति ॥९५
पुरी प्रोचेऽहमाकाङ्क्षन्नवस्थातुं त्वया सह ।
गौडदेशात् समायातो नीलाचलपुरीं व्रजन् ॥९६
प्रत्यागमनमाकर्ण्य तव दक्षिणदेशतः ।
शचीमाता च भक्ताश्च सर्वे हर्षमुपागताः ॥९७
आगच्छन्ति च ते सर्वे तव दर्शनकाङ्क्षया ।
तेषां विलम्बमुत्प्रेक्ष्य समायातोऽस्मि सत्वरम् ॥९८
निर्दिदेश प्रभुस्तस्मै काशीमिश्रनिकेतने ।
रहोवासगृहञ्चैकं सेवार्थं तस्य किङ्करम् ॥९९
दामोदरस्वरूपश्च समायातोऽपरेद्यवि ।
स प्रभोरतिमर्मज्ञ स्तथासीद्रससागरः ॥१००
पूर्वाश्रमे स नाम्नासीदाचार्यः पुरुषोत्तमः ।
अध्युवास नवद्वीपं प्रभोश्चरणमाश्रयन् ॥१०१
महाप्रभोस्तु सन्न्यासं पश्यन्नुन्मत्त एव सः ।
ततो वाराणसीं गत्वा तत्र सन्न्यासमग्रहीत् ॥१०२
चैतन्यानन्दनामास्य गुरु राज्ञापयच्च तम् ।
स्वयं स्वधीत्य वेदान्तानध्यापय जनानिति ॥१०३
असौ परमवैराग्य स्तथा परमपण्डितः ।
कायेन मनसा चासीच्छ्रीकृष्णचरिताश्रितः ॥१०४
कृष्णं भद्यामि निश्चिन्तमनसेत्येव कारणात् ।
उन्मादव्याकुलो भूत्वा सन्न्यासं स गृहीतवान् ॥१०५

शिखासूत्रपरित्यागरूपं सन्नयास माचरन् ।
योगपट्टं न जग्राह स्वरूपो नाम सोऽभवत् ॥१०६
याचमानो गुरोराज्ञां स नीलाचल मागतः ।
कृष्णप्रेमभरानन्दविह्वलोऽभूद्दिवानिशम् ॥१०७
पाण्डित्यस्य परां काष्ठां गतोप्यालापवर्जितः ।
जनै रज्ञात एवासीत् संस्थितो विजने सदा ॥१०८
श्रीकृष्णरसतत्त्वज्ञो मूर्त्तप्रेमकलेवरः ।
द्वितीयात्मस्वरूपोऽसौ साक्षादेव महाप्रभोः ॥१०९
पुस्तकश्लोकगीतानि प्रभुं नीतानि केनचित् ।
स्वरूपेणेक्षितान्येव पश्चात्तान्यशृणोत् प्रभुः ॥११०
रसाभासं तथा भक्तिसिद्धान्तानां विरोधि यत् ।
तदाकर्णयतो नाभूच्चित्तोल्लासो महाप्रभोः ॥१११
अतः स्वरूपगोस्वामी चक्रे सर्वपरीक्षणम् ।
शुद्धं यन्निजसम्मत्या तदेवाश्रावयत् प्रभुम् ॥११२
विद्यापति-चण्डिदास-गीतगोविन्द-गीतयः ।
व्यदधुः परमानन्दमेतास्तिस्रो महाप्रभोः ॥११३
गन्धर्व इव सङ्गीते शास्त्रे साक्षाद्बृहस्पतिः ।
दामोदर इव क्वापि कोऽपि नासीन्महामतिः ॥११४
अद्वैतपरमप्रेष्ठो नित्यानन्दप्रियोत्तमः ।
श्रीवासादिकभक्ताना मसौ प्राणसमोऽभवत् ॥११५
स दामोदर आगत्य दण्डवत् प्रणतो भुवि ।
श्लोकं पठितु मारेभे गृहीत्वा चरणौ प्रभोः ॥११६

"तथाहि श्रीचैतन्यचन्द्रोदयनाटकेऽष्ठमाङ्के विंशश्लोक आकाशे लक्ष्यं वद्ध्वा श्रीरूपगोस्वामिवाक्यम्—

हेलोद्धूलितखेदया विशदया प्रोन्मीलदामोदया
छृशाम्यच्छास्त्रविवादया रसदया चित्तार्पितोन्मादया ।

शश्वद्भक्तिविनोदया समदया माधुर्यमर्यादया
श्रीचैतन्यदयानिधे तव दया भूयाद मन्दोदया ॥३॥"
समुत्थाप्य तमालिङ्गदादरेण महाप्रभुः ।
प्रेमावेशादुभावेव तदाभूतामचेतनौ ॥११७
स्थिरतां प्रत्यपद्येतां कालेन कियताथ तौ ।
ततो भाषितु मारेभे तमेवं श्रीमहाप्रभुः ॥११८
स्वपने तद्ददर्शाहं त्वमद्यायास्यसीति यत् ।
साधु वृत्तमहो अन्धो द्वे नेत्रै प्राप्तवानिव ॥११९
स्वरूपोऽकथयद्दोषः क्षम्यतां मे महाप्रभो ।
त्वां त्यक्त्वान्यत्र यातोऽहं प्रमादान् कृतवान् यतः ॥१२०
नैवास्ति प्रेमलेशो मे तव पादसरोरुहे ।
त्वां परित्यज्य पापोऽह मन्यं देशं प्रयातवान् ॥१२१
त्वामहं त्यक्तवानस्मि नैव त्वं त्यक्तवांस्तु माम् ।
गले बद्ध्वा कृपापाशै स्त्वं मामानीतवानसि ॥१२२
स्वरूपोऽथ ववन्दे श्रीनित्यानन्दपदाम्बुजम् ।
नित्यानन्दप्रभुः प्रेम्णा समाशिश्लेष तं पुनः ॥१२३
मुकुन्दो जगदानन्दः सार्वभौमश्च शङ्करः ।
स्वरूपेण यथायोग्यं सङ्गतास्ते परस्परम् ॥१२४
स्वरूपः परमानन्दपुर्य्याः पादाववन्दत ।
पुरीस्वामी च सप्रेम तमाशिश्लेष वक्षसा ॥१२५
महाप्रभु र्ददौ तस्मै वासगृहं सुनिर्जनम् ।
जलादिपरिचर्यायाः कृते कञ्चिच्च किङ्करम् ॥१२६
सार्वभौमादिभि र्भक्तैः सहान्येद्यु र्महाप्रभुः ।
आसाञ्चक्रे यदा कृष्णकथासङ्गरसं पिवन् ॥१२७
तदानीमेव गोविन्द स्तत्रागच्छन्नुपस्थितः ।
दण्डवत् प्रणतो भूत्वा विनयेनैव मब्रवीत् ॥१२८,

पुरीश्वरस्य भृत्योऽहं गोविन्द इति नाम मे ।
पुरीगोस्वामिनाज्ञप्तः प्राप्तोऽहं तव सन्निधिम् ॥१२९
सिद्धिप्राप्त्यवकाशेऽसौ गोस्वामी मां समादिशत् ।
कृष्णचैतन्य मभ्येत्य त्वयासौ सेव्यतामिति ॥१३०
आगमिष्यति तीर्थानि पश्यन् काशीश्वरोऽचिरात् ।
द्रुतं प्राप्तोऽस्मि ते पादावाज्ञयैव प्रभोरिति ॥य३१
तं प्रत्युवाच गोस्वामी वात्सल्येन पुरीश्वरः ।
कृपया च मयि त्वाद्य मत्पार्श्वे प्राहिणोदिति ॥१३२
तच्छ्रुत्वा सार्वभौमेण पृष्ट एवं महाप्रभुः ।
शूद्रभृत्यं पुरीस्वामी कथं स्थापितवानिति ॥१३३
प्रत्युक्तं प्रभुणा सम्यक् स्वतन्त्रो भवतीश्वरः ।
ईश्वरस्यानुकम्पायां न वेदपरतन्त्रता ॥१३४
ईश्वरस्य कृपा जातिकुले जातु न मन्यते ।
भोजनं कृतवान् कृष्णो विदुरस्य निकेतने ॥१३५
कृष्णस्य करुणा स्नेहलेशमेव व्यपेक्षते ।
कृष्णः स्वतन्त्र माचारं स्नेहाधीनः करोत्यपि ॥१३६
सुखं कोटिगुणं मानात् स्नेहस्याचरणे भवेत् ।
लभ्यते परमानन्दो यस्य श्रवणमात्रतः ॥१३७
इति प्रोच्यैव गोविन्द मालिलिङ्ग महाप्रभुः ।
सर्वेषामथ गोविन्दः कृतवान् पादवन्दनम् ॥०३हुं
भट्टाचार्यमथ प्रोचे प्रभुः कुरु विचारणाम् ।
श्रीगुरोः किङ्करो यः स्यात् स भवेन्मान्य आत्मनः ॥१३९
तेन कारयितुं सेवामात्मनो नैव युज्यते ।
गुरुस्तु दत्तवानाज्ञां मया किं क्रियतामिति ॥१४०
भट्टोऽवदद् गुरोराज्ञा सर्वथैव वलीयसी ।
अलङ्घ्या हि गुरोराज्ञा सर्वशास्त्रप्रमाणतः ॥१४१

"तथाहि रघुवंशे चतुर्दशसर्गे सीतावनवासप्रसङ्गे त्रयःपञ्चाशत्तमः श्लोकः—

स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात् प्रहृतं द्विषद्वत् ।
प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ॥४॥"

तथोक्ते सति गोविन्दं स्वीचकार महाप्रभुः ।
तस्मै स्वस्याङ्गसेवायामधिकारञ्च दत्तवान् ॥१४२
स च मान्योऽभवत् सर्वैः प्रियभृत्यः प्रभोरिति ।
वैष्णवानाञ्च सर्वार्थं गोविन्दोऽपि सदादधात् ॥१४३
हरिदासावुभौ खुल्लज्येष्ठौ कीर्त्तनकारिणौ ।
तथा रामाइ नन्दाई गोविन्दमुप ते स्थिताः ॥१४४
गोविन्देनैव सार्द्धं ते प्रभुं नित्यं सिषेविरे ।
को गोविन्दस्य सौभाग्यसीमां वर्णयितुं क्षमः ॥१४५
अन्येद्युः प्रभु मभ्येत्य मुकुन्दोदत्त उक्तवान् ।
द्रष्टुं त्वां भारतीस्वामी ब्रह्मानन्दोऽय मागतः ॥१४६
आनेतव्यः स चेदत्र तदा ज्ञापय मामिति ।
प्रभुणोक्तं गुरुर्मेऽयमेनं प्रत्युद्व्रजाम्यहम् ॥१४७
इत्यसौ कथयन्नेव सार्द्धं भक्तजनैः प्रभुः ।
भारतीस्वामिनो ब्रह्मानन्दस्य गतवान् पुरः ॥१४८
मृगचर्म वसानं तं ब्रह्मानन्दं विलोकयन् ।
प्राप्तवान् सुमहद्दुःखं हृदयेन महाप्रभुः ॥१४९
चकार च्छद्म दृष्ट्वापि तमपश्यन्निव प्रभुः ।
मुकुन्दं परिपप्रच्छ गोस्वामी क्वास्ति भारती ॥१५०
मुकुन्देनोक्त मीक्षस्व विद्यतेऽय मिहाग्रतः ।
प्रभुस्तं कथयामास निर्बोधस्त्व मयं न सः ॥२५१
त्वमेकं कथयस्यन्यं नास्ति ज्ञानं ते किञ्चन ।
गोस्वामी भारती चर्म कस्मात् परिदधात्विति ॥१५२

ब्रह्मानन्द स्तदाकर्ण्य हृदयेन व्यतर्कयत् ।
न साधु प्रतिभात्यस्य धृतं चर्म्माम्बरं मया ॥१५३

सुष्ठु प्रोक्तमहं दम्भकृते चर्म्माम्बरं वसे ।
चर्म्माम्बरं वसानोऽपि निस्तरामि न संसृतिम् ॥१५४

अद्य प्रभृति नो चर्म्माम्बरं परिदधाम्यहम् ।
इति तस्यान्तरं ज्ञात्वा वहिर्वासोऽनयत् प्रभुः ॥१५५

वासः परिदधौ ब्रह्मानन्दश्चर्म परित्यजन् ।
तत्क्षणात् प्रभुरागत्य तस्य पादाववन्दत ॥१५६

भारत्योक्तं तवाचारो लोकशिक्षार्थकः खलु ।
न कुरु प्रणतिं भूयो भयं प्राप्नोमि चेतसा ॥१५७

द्वे एव ब्रह्मणी अत्र साम्प्रतं ते चलाचले ।
अचलोऽयं जगन्नाथश्चलं ब्रह्म भवान् पुनः ॥१५८

गौरब्रह्म भवान् ब्रह्म श्यामवर्णं दधत् स च ।
जगत्तारयतः सर्वं ते एव ब्रह्मणी उभे ॥१५९

प्रभुः कथितवानात्थ सत्य मागमनेन ते ।
पुरुषोत्तमधाम्न्यस्मिन् ब्रह्मणी द्वे प्रकाशिते ॥१६०

त्वं ब्रह्मानन्दनामासि गौरब्रह्म चलं पुनः ।
आसीनोऽत्र जगन्नाथः श्यामब्रह्मास्ति निश्चलम् ॥१६१

उवाच भारती सार्वभौमं माध्यस्थ्यमाश्रयन् ।
सहानेन वितर्कं मे बोद्धुं चेष्टस्व चेतसा ॥१६२

व्याप्य-व्यापकता जीवब्रह्मणोर्ज्ञायते मया ।
जीवो व्याप्य स्तथा ब्रह्म व्यापकं शास्त्रसम्मतम् ॥१६३

परित्याजितचर्म्माणं मां संशोधितवानयम् ।
इदमेवोभयो र्व्याप्यव्यापकत्वेऽस्ति कारणम् ॥१६४

"तथाहि महाभारते दानधर्मे ऊनपञ्चाशदधिकशततमाध्याये
सहस्रनाम्नि एकनवतितमः श्लोकः—
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
सन्न्यासकृच्छमः शान्तो निष्ठाशान्तिपरायणः ॥५॥"
एषां नाम्नाञ्च सर्वेषामयमेव निजास्पदम् ।
भुजयोश्चन्दनालिप्ताः प्रसादडोरकाङ्गदाः ॥१६५
भट्टेन कथितं स्वामिन् जितवानसि भारति ।
प्रभुः प्रोचे यदेवात्थ निश्चितं सत्यमेव तत् ॥१६६
भवेत् सत्यं जितः शिष्यो विचारे गुरुशिष्ययोः ।
अब्रवीद् भारती मैव मन्यदस्त्यत्र कारणम् ॥१६७
एष एव स्वभावस्ते यद् भक्तात् स्वपराजयः ।
श्रूयतामपरोऽप्येकः प्रभावस्ते निजात्मनः ॥१६८
आजन्मनो निराकारं चेतसा ध्यातवानहम् ।
साक्षात् कृष्णः स्फुरत्येष त्वां तु पश्यत एव मे ॥१६९
कृष्णनाम स्फुरत्यास्ये कृष्णश्चित्ते च नेत्रयोः ।
त्वां पश्यतोऽपि तद्रूपं हृदयं मे न तृप्यति ॥१७०
यादृशीमात्मनोऽवस्था मुक्तबान् विल्वमङ्गलः ।
तादृश्येव ममावस्था जातेयं दृश्यते मया ॥१७१
"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे शान्तिभक्ति-
लहर्यां विंशाङ्कधृतः श्लोकः—
अद्वैतवीथीपथिकै रुपास्याः
स्वानन्दसिंहासनलब्धदीक्षाः ।
हठेन केनापि वयं शठेन
दासीकृता गोपवधूविटेन ॥६॥"
प्रभुः प्रत्यवदत् कृष्णे गाढः प्रेमायमस्ति ते ।
यत्र ते पततो नेत्रे तत्र कृष्णः स्फुरत्यलम् ॥१७२

भट्टाचार्योऽवदत् सत्यं तवेदं वचनं भवेत् ।
पुरतश्चेत् स्वयंकृष्णो दद्यात् साक्षात् स्वदर्शनम् ॥१७३
साक्षात्कारो न तस्य स्याद् विना प्रेम कदाचन ।
अनुकम्पावलेनास्य तस्य सन्दर्शनं भवेत् ॥१७४
प्रभुः प्रत्यवदद् विष्णु र्विष्णुः किमिदमुच्यते ।
सार्वभौम भवेन्निन्दालक्ष्म तेऽयमतिस्तवः ॥१७५
इत्युक्त्वा प्रभुरादाय भारतीस्वामिनं तदा ।
ययौ वासगृहं तत्र सोऽवसत् प्रभुणा सह ॥१७६
आचार्यौ रामभद्रश्च भगवांश्च प्रभोः पदम् ।
श्रयन्तौ सर्वकर्माणि त्यक्त्वा तत्रैव तस्थतुः ॥१७७
श्रीकाशीश्वरगोस्वामी तत्रायातः परेद्यवि ।
प्रभुस्तञ्च निजावासे ससम्मान मवासयत् ॥१७८
प्रत्यहं स जगन्नाथं महाप्रभु मदर्शयत् ।
अग्रतो जनसम्बाधं पथि सर्वं निवारयन् ॥१७८
समुद्र मुपतिष्ठन्ते सरितश्च नदा यथा ।
तत्र तत्र च वास्तव्या स्तथा भक्ता महाप्रभोः ॥१८०
एत्य श्रीचरणं सर्वे तं तथैवोपतस्थिरे ।
प्रभुणा कृपया सर्वे स्ववासे स्थापिताश्च ते ॥१८१
इति तावन्मया प्रोक्तं प्रभो र्वैष्णवसेवनम् ।
श्रुत्वेदं जन आप्नोति श्रीचैतन्यपदाश्रयम् ॥१८२
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१८३

इति श्रीचैतन्यचरितामृते मध्यखण्डे बैष्णवमिलनं नाम
दशमः परिच्छेदः ।

—०—

मध्यलीलायामेकादशः परिच्छेदः

"अत्युद्दण्डं ताण्डवं गौरचन्द्रः कुर्वन् भक्तैः श्रीजगन्नाथगेहे ।
नानाभावालङ्कृताङ्गः स्वधाम्ना चक्रे विश्वं प्रेमवन्यानिमग्नम् ॥१॥"

भूयो जयतु चैतन्यो नित्यानन्दोजयत्यसौ ।
जयत्वद्वैतचन्द्रोऽसौ गौरभक्ता जयन्तु च ॥१
अन्येद्युः कथयामास सार्वभौमो महाप्रभुम् ।
निवेदयामि ते किञ्चिदभयं चेद्ददासि मे ॥२
प्रत्युक्तं प्रभुणा ब्रूहि नास्ति किञ्चिद्भयं तव ।
योग्यं चेत्तत् करिष्येऽहमयोग्यं चेत्तदा नहि ॥३
कथितं सार्वभौमेण मिलितुं सर्वदा त्वया ।
प्रतापरुद्ररायोऽयमिच्छत्युत्कण्ठितान्तरः ॥४
कर्णौ पिधाय हस्ताभ्यां प्रभु र्नारायणं स्मरन् ।
अब्रवीत् सार्वभौम त्वमयौग्यं भाषसे कथम् ॥५
सन्न्यासिना विरक्तेन मयेदं राजदर्शनम् ।
नारीदर्शनतुल्यं स्याद् यथा गरलभक्षणम् ॥६

"तथाहि श्रीचैतन्यचन्द्रोदयनाटकेऽष्टमाङ्के पञ्चविंशश्लोके सार्वभौमं प्रति श्रीचैतन्यदेववाक्यम्—

निष्किञ्चनस्य भगवद्भजनोन्मुखस्य
पारं परं जिगमिषो र्भवसागरस्य ।
सन्दर्शनं विषयिणामथ योषिताञ्च
हा हन्त हन्त विषभक्षणतोऽप्यसाधु ॥२॥"

सार्वभौमः पुनः प्रोचे सत्यं ते वचनं प्रभो ।
भक्तोत्तमस्तु राजायं श्रीजगन्नाथसेवकः ॥७
प्रभुणोक्तं तथाप्येष कालसर्पाकृति नृपः ।
स्पृष्टा दारुमयी नारी विकारं जनयेद् यथा ॥८

"तथाहि तत्रैवाङ्के ऽष्टाविंशः श्लोकः—

आकारादपि भेतव्यं स्त्रीणां विषयिणामपि ।
यथाहे मनसः क्षोभस्तथा तस्याकृतेरपि ॥३॥"
भूयोऽप्येवं वचो जातु मुखेनोदीर्यतां त्वया ।
वक्ष्यसे चेत्तदा नात्र पुनर्द्रक्ष्यसि मामिति ॥६
श्रुत्वा भीतस्ततः सार्वभौमो निजगृहं गतः ।
राजा प्रतापरुद्रश्च पुरुषोत्तम मागतः ॥१०
श्रीगजपतिना तेन रामानन्दोऽप्यथाययौ ।
अभूत् प्रथम मेवासौ प्रभुणा मिलितो मुदा ॥११
प्रणमन्तं ततो रायमालिलिङ्ग महाप्रभुः ।
प्रेमावेशवशेनोभौ कृतवन्तौ च रोदनम् ॥१२
रायं प्रति प्रभोः स्नेहव्यवहारं विलोकयन् ।
अभूद्भक्तगण स्तत्र विस्मयाक्रान्तमानसः ॥१३
प्रोक्त' रायेण राजानं तवाज्ञां तां व्यजिज्ञपम् ।
राजा मां विषयान्मुक्त' कृतवांश्च तवेच्छया ॥१४
मयोक्तोऽसौ भवेन्नैव मया विषयसेवनम् ।
चैतन्यचरणौ सेवे यद्याज्ञां मे प्रयच्छसि ॥१५
आकर्ण्य तव नामासौ राजा सानन्दमानसः ।
मामालिङ्गितवान् गाढं समुत्थाय तदासनात् ॥१६
तव श्रुत्वैव नामासौ प्रेमाविष्टमना अभूत् ।
हस्तयो र्मां गृहीत्वा च सप्रेमेद मथा ब्रवीत् ॥१७
तव या वर्त्तते वृत्ति स्त्वया सैवोपभुज्यताम् ।
सदा निश्चिन्तचेतास्त्वं चैतन्यचरणौ भज ॥१८
अतितुच्छोऽस्मि नार्हामि तं द्रष्टुमपि चक्षुषा ।
यस्तमेव भजेन्नित्य' सफलं तस्य जीवनम् ॥१६

व्रजेन्द्रनन्दनः सोऽयं करुणावरुणालयः ।
अवश्यं दर्शनं मह्यं दास्यति क्वापि जन्मनि ॥२०
इति प्रेम्णार्त्ति मद्वाक्यं त्वयि तस्य हि यावता ।
लेशोऽपि तावतः प्रेम्णो न ममास्ति मनागिति ॥२१
प्रत्युक्तं प्रभुणा कृष्णभक्तानां हि त्वमग्रणीः ।
त्वयि यः कुरुते प्रीतिं भवत्येव स भाग्यवान् ॥२२
यत एतावतीं प्रीतिं राजासौ कृतवांस्त्वयि ।
कृष्ण स्तेन गुणेनैव तं खल्वङ्गीकरिष्यति ॥२३

"तथाहि लघुभागवतामृत उत्तरखण्डे भक्तामृते सप्तमाङ्क-
धृतमादिपुराणेऽर्जुनं प्रति श्रीकृष्णवाक्यम्—

ये मे भक्तजनाः पार्थ न मे भक्ताश्च ते जनाः ।
मद्भक्तानाञ्च ये भक्तास्ते मे भक्ततमा मताः ॥४॥

तथाहि श्रीमद्भागवत एकादशस्कन्ध ऊनविंशाध्याय
एकविंशश्लोक उद्धवं प्रति श्रीकृष्णवाक्यम्—

मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥५॥

तथाहि लघुभागवतामृत उत्तरखण्डे पञ्चमाङ्कधृतं पद्मपुराणे
पार्वतीं प्रति शिववाक्यम्—

आराधनानां सर्वेषां विष्णो राराधनं परम् ।
तस्मात् परतरं देवि तदीयानां समर्चनम् ॥६॥

तथाहि श्रीमद्भागवते तृतीयस्कन्धे सप्तमाध्याये विंशश्लोके
मैत्रेयं प्रति विदुरवाक्यम्—

दुरापा ह्यल्पतपसः सेवा वैकुण्ठ-वर्त्मसु ।
यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥७॥"

नित्यानन्दः स्वरुपश्च पुरीस्वामी च भारती ।
इत्येषां कृतवान् रायश्चतुर्णां पादवन्दनम् ॥२४

मुकुन्दजगदानन्दप्रभुखै र्भक्तसज्जनैः ।
सर्वैः सार्द्धं यथायोग्यं तत्रासौ समगच्छत ॥२५
प्रभुः पप्रच्छ राय त्वं दृष्टवान् पद्मलोचनम् ।
रायः प्रोचेऽधुना यामि तस्य प्राप्स्यामि दर्शनम् ॥२६
प्रभुः कथितवान् राय किमिदं कृतवानसि ।
अनालोक्येश्वरं कस्मादत्रादौ प्राप्तवानसि ॥२७
रायः कथितवान् पादौ स्यन्दनं हृच्च सारथिः ।
तत्र याति रथी जीव स्तेन यत्रैव नीयते ॥२८
अहं किन्तु करिष्यामि हृदयं मामिहानयत् ।
विचारो न कृतस्तेन जगन्नाथस्य दर्शने ॥२९
प्रभुरादिष्टवान् गत्वा त्वरितं कुरु दर्शनम् ।
तत एव गृहं गत्वा कुटुम्बैः सङ्गतो भव ॥३०
रायः प्राप्य प्रभोराज्ञां प्रतस्थे दर्शनाय सः ।
बोद्धुं रायस्य कः प्रेमभक्तिरीतिमलं भवेत् ॥३१
क्षेत्रमासाद्य राजासौ सार्वभौमं समाह्वयत् ।
आगतश्च नमस्कृत्य तमेवं परिपृष्टवान् ॥३२
मदर्थं प्रभुपादाय भवता किं निवेदितम् ।
प्रत्युक्तं सार्वभौमेण बहु यत्नः कृतो मया ॥३३
तथा सत्यप्यसौ राजदर्शनं न करिष्यति ।
त्यक्ष्यत्येव पुरीक्षेत्रं यदि भूयो निवेद्यते ॥३४
इति श्रुत्वा वचो राजा तदा दुःखितमानसः ।
सविषादं समारेभे किञ्चिदेवं प्रभाषितुम् ॥३५
उद्धर्तुं पापिनो नीचानवतीर्णो महाप्रभुः ।
श्रुतं जगाई माधाई स एवोद्धृतवानिति ॥३६
प्रतापरुद्रवर्जं स विश्वं निस्तारयिष्यति ।
इत्येवं किं प्रतिज्ञायावतारं कृतवान् प्रभुः ॥३७

"तथाहि श्रीचैतन्यचन्द्रोदयनाटकेऽष्टमाङ्के सप्ततितमश्लोके
सार्वभौमं प्रति प्रतापरुद्रवाक्यम्—

अदर्शनीयानपि नीचजातीन्
स वीक्षते हन्त तथापि नो माम्।
मदेकवर्जं कृपयिष्यतीति
निर्णीय किं सोऽवततार देवः ॥८॥"

प्रतिज्ञा चेत् कृता तेन न स द्रक्ष्यति मामिति ।
मया तर्हि प्रतिज्ञातं प्राणांस्त्यक्ष्यामि तं विना ॥३८
यदि तस्य कृपावित्तं न लभेऽहं महाप्रभोः ।
किं राज्येन च देहेन सर्वमेतदकारणम् ॥३९
इत्याकर्ण्य वचः सार्वभौमश्चिन्तान्वितोऽभवत् ।
राज्ञोऽनुरागमालोच्य प्राप्नोच्चातीव विस्मयम् ॥४०
भट्टाचार्य उवाचेदं विषादं देव मा कृथाः ।
प्रसादोऽवश्यमेवास्य प्रभोस्त्वयि भविष्यति ॥४१
प्रेमाधीनः प्रभुः सोऽयं प्रेमा गाढतरस्तव ।
कृपामवश्यमेवासौ त्वयि राजन् करिष्यतिं ॥४२
तथाप्येक मुपायं ते कथयाम्यधुना नृप ।
उपायेनैव तेन त्वं प्रभोश्चरणमाश्रय ॥४३
रथयात्रादिने सर्वैं भक्तैः सार्द्धं महाप्रभुः ।
प्रेमाविष्टो रथस्याग्रे नर्त्तनं स करिष्यति ॥४४
यदासौ कुसुमोद्यानं प्रेमावेशात् प्रवेक्ष्यति ।
तस्मिन्नेवावकाशे त्वं त्यक्त्वा राजपरिच्छदम् ॥४५
श्रीकृष्णरासलीलायाः पञ्चाध्यायीपदं पठन् ।
गत्वैकाकी पदाम्भोजं ग्रहीष्यसि महाप्रभोः ॥४६
कृष्णनाम समाकर्ण्य वाह्यज्ञानविवर्जितः ।
तदा त्वां वैष्णवं ज्ञात्वालिङ्गिष्यति महाप्रभुः ॥४७

श्रीरामानन्दरायोऽद्य तव प्रेमगुणावलीम् ।
अवादीत् प्रभवे तेन प्रत्यावृत्तं प्रभोर्मनः ॥४८
इत्थं गजपतिः श्रुत्वा प्राप्तवान् परमं सुखम् ।
प्रभुणा मिलितुं चित्तं सुदृढं कृतवांश्च सः ॥४९
भविष्यति कदा स्नानयात्रेति पृष्टवांस्ततः ।
भट्टेनावाचि यात्रायाः शिष्यते दिवसत्रयम् ॥५०
सान्त्वयित्वा स राजानं भट्टो निजगृहं गतः ।
स्नानयात्रादिने हृष्टमानसोऽभून्महाप्रभुः ॥५१
सुखं लेभे महत् स्नानयात्रां दृष्ट्वा पुनस्ततः ।
दर्शनानवकाशेऽसौ देवस्याभूत् सुदुःखितः ॥५२
गोपीभावेन विच्छेदव्याकुलात्मा प्रभुस्ततः ।
आलालनाथ मागच्छत् सर्वानेव परित्यजन् ॥५३
पश्चाद्भक्तजनाः सर्वे सम्प्राप्ताः प्रभुसन्निधिम् ।
न्यवेदयंश्च गौडेभ्यो भक्ता अत्रागता इति ॥५४
सार्वभौमः प्रभुं नीलाचलमानीय सत्वरम् ।
गत्वा चोवाच राजानं प्रभुरागतवानिति ॥५५
गोपीनाथस्तदाचार्यो गत्वा राजान माशिषा ।
संवर्द्धय चाब्रवीद् भट्टाचार्य माकर्ण्यतामिति ॥५६
द्वे शते वैष्णवा गौडदेशादत्र समागताः ।
सर्वे महाप्रभोर्भक्ता महाभागवता हि ते ॥५७
नरेन्द्रसरसस्तीरे ते सर्वे सन्ति सम्प्रति ।
वासगेहैः प्रसादैश्च तेषामर्थे प्रयोजनम् ॥५८
राजावादीन्मया प्रैष्यजन आज्ञापयिष्यते ।
स निवासादिकं सर्वं यथाभीष्टं प्रदास्यति ॥५९
भट्टाचार्येह गौडेभ्यो ये ये चाद्य समागताः ।
दर्शयैकैकशो मह्यं गणांस्तांस्तान्महाप्रभोः ॥६०

भट्टः कथितवान् राजन् हर्म्म्यमारुह्यतां त्वया ।
गोपीनाथोऽभिजानाति सर्वां स्ते दर्शयिष्यति ॥६१
नाभिजानाम्यहं कञ्चिन्मनो जिज्ञासते तु मे ।
गोपीनाथः पुनः सर्वांस्तानभिज्ञापयिष्यति ॥६२
इत्युक्ते ते त्रयो हर्म्यतलमारुरुहुर्यदा ।
तदा ते वैष्णवाः सर्वे बभुबुर्नेत्रगोचराः ॥६३
दामोदरस्वरूपश्च गोविन्द स्तत्र जग्मतुः ।
मालाप्रसादपाणी तौ स्थितास्ते यत्र वैष्णवाः ॥६४
ताबुभौ प्रेरयामास प्रथमं श्रीमहाप्रभुः ।
राजापृच्छदिमौ कौ द्वौ परिचायय मामिति ॥६५
भट्टेनोक्तमयं दामोदरस्वरूपनामकः ।
श्रीमन्महाप्रभोरेष द्वितीयं श्रीकलेवरम् ॥६६
द्वितीयश्चैष गोविन्दो भृत्यस्ताभ्या मिहाधुना ।
मालाः प्रेरितवां स्तेषां गौरवार्थं महाप्रभुः ॥६७
आदौ दामोदरो माला मद्वैतं पर्यधापयत् ।
गोविन्देन ततो माला द्वितीयास्मै समर्पिता ॥६८
अथ प्राणमदाचार्यं गोविन्दो दण्डवद्भुवि ।
तमाचार्योऽनभिज्ञाय स्वरूपं प्रति पृष्टवान् ॥६९
स्वरूपः प्रतिवक्तिस्म नाम्ना गोविन्द इत्ययम् ।
पुरीस्वामीश्वरस्यायं सेबको गुणवानति ॥७०
प्रभोः सेवार्थमाज्ञप्तः श्रीपुरीस्वामिना यतः ।
प्रभुस्तं स्थापयामास ततः स्वसन्निधाविति ॥७१
राजा कथितवान् द्वाभ्यां यस्मै माले समर्पिते ।
महान् मोहान्तकः कोऽयमाचार्य कथ्यतामिति ॥७२
आचार्यः प्रत्युवाचायमद्वैताचार्यसंज्ञकः ।
सर्वेषाञ्च शिरोधार्यो मानपात्रं प्रभोरपि ॥७३

श्रीवासपण्डितश्चायं स वक्रेश्वरपण्डितः ।
स विद्यानिधिराचार्यः पण्डितोऽयं गदाधरः ॥७४
श्रीमानाचार्यरत्नोऽयमाचार्योऽसौ पुरन्दरः ।
गङ्गादासः पण्डितोऽयमयं पण्डितशङ्करः ॥७५
असौ मुरारिगुप्तश्च स नारायणपण्डितः ।
ठक्कुरो हरिदासोऽयं भुवनत्रयपावनः ॥७६
नृसिंहानन्दनामायमसौ भट्टहरिस्तथा ।
श्रीवासुदेवदत्तोऽयं शिवानन्दाभिधोऽप्ययम् ॥७७
एते माधवगोविन्दवासुदेवाश्च घोषजाः ।
एषां कीर्त्तनगानेन भ्रातॄणां तुष्यति प्रभुः ॥७८
असौ नन्दन आचार्यो राघवोऽयञ्च पण्डितः ।
श्रीकान्तोऽयमसौ नारायणः श्रीमांश्च पण्डितः ॥७९
इमं शुक्लाम्बरं पश्य विजयश्रीधरौ च तौ ।
इमं वल्लभसेनञ्च पुरुषोत्तमसञ्जयौ ॥८०
श्रीसत्यराजखानाख्यं कुलीनग्रामवासिनम् ।
रामानन्दादिकानत्र पश्य सर्वानुपस्थितान् ॥८१
नरहरिं मुकुन्दञ्च दासं श्रीरघुनन्दनम् ।
सुलोचनं चिरञ्जीवं पश्य श्रीखण्डवासिनः ॥८२
कियद् वक्ष्यामि यावन्तो दृश्यन्ते ये जनास्त्वया ।
चैतन्यस्य गणा एते सर्वे चैतन्यजीवनाः ॥८३
राजोवाच विलोक्येमान् प्राप्तोऽहं विस्मयं परम् ।
नेदृक् तेजो मया पूर्वं वैष्णवानां विलोकितम् ॥८४
कोटिसूर्यसमाः सर्वे प्रत्यग्रोज्ज्वलदीप्तयः ।
न दृष्टा जातु नैवेत्थं श्रुतं मधुरकीर्त्तनम् ॥८५
ईदृक् प्रेमेदृशं नृत्यमीदृशश्च हरिध्वनिः ।
न कुत्रापि मयादृष्टं नेत्थं क्वापि मया श्रुतम् ॥८६

भट्टाचार्यो वभाषे तं सत्यमेतद्वच स्तव ।
श्रीचैतन्यस्य सृष्टिर्हि प्रेमसङ्कीर्त्तनं महत् ॥८७
चैतन्येनावतीर्येह कृतं धर्मप्रचारणम् ।
कीर्त्तनं कृष्णनाम्नो हि धर्म एव कलौ युगे ॥८८
यः सङ्कीर्त्तनयज्ञेन तस्याराधन मीहते ।
सुमेधाः सोऽयमेव स्यादन्ये कलिहता जनाः ॥८९

"तथाहि श्रीमद्भागवत एकादशस्कन्धे पञ्चमाध्याय ऊनत्रिंश-
श्लोके जनकं प्रति करभाजनवाक्यम्—

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥१०॥"

राज्ञोक्तं शास्त्रमानेन चैतन्यः कृष्ण एव चेत् ।
तत् कथं पण्डिताः सर्वे तत्र वैतृष्ण्यमागताः ॥९०
भट्टेनोक्तं कृपालेशो यस्मिन्नस्य प्रजायते ।
स एवाङ्गीकरोत्येनं श्रीकृष्ण इति चेतसा ॥९१
नास्ति तस्य कृपा यत्र पण्डितोऽपि भवन्नसौ ।
दृष्ट्वा श्रुत्वापि तं साक्षादीश्वरं नैव मन्यते ॥९२

"तथाहि तत्रैव दशमस्कन्धे चतुर्दशाध्यायेऽष्टत्रिंशश्लोके
श्रीकृष्णं प्रति ब्रह्मवाक्यम्—

तथापि ते देव पदाम्बुजद्वय-
प्रसादलेशानुगृहीत एव हि ।
जानाति तत्त्वं भगवन्महिम्नो
न चान्य एकोऽपि चिरं विचिन्वन् ॥११॥"

राज्ञा पृष्ट मद्दृष्ट्वैव जगन्नाथ मिमे जनाः ।
चैतन्यस्य निवासाय कथं धावन्ति सत्वरम् ॥९३
भट्टेनोक्तमियं प्रेमरीतिः स्वाभाविकी भवेत् ।
सङ्गन्तुं प्रभुणैवैते सर्वे सोत्कण्ठचेतसः ॥९४

प्रथमं तेन सङ्गत्य गृहीत्वा च तमग्रतः ।
तेन सार्द्धं जगन्नाथं गत्वा द्रक्ष्यन्ति ते पुनः ॥६५
राज्ञा पृष्टं भवानन्दसुतोऽयं पञ्चषै र्जनैः ।
महाप्रसाद मुद्दाह्य वाणीनाथो महाप्रभोः ॥६६
आवासनिलयं यातः पुनः किञ्चात्र कारणम् ।
भवेन्महाप्रसादैः किमेतावद्भिः प्रयोजनम् ॥६७
भट्टेनोक्तं समायाता भक्ता इत्यवगच्छतः ।
प्रभोरिङ्गित मुत्प्रेक्ष्य प्रसादानानयन्ति ते ॥६८
राजा पप्रच्छ तीर्थस्य विधिं क्षौरमुपोषणम् ।
अकृत्वैवान्नपानानि भोक्ष्यन्ते कथमेव ते ॥६९
भट्टः कथितवानेष वैधोधर्मस्त्वयोच्यते ।
सूक्ष्मधर्मस्य मर्मास्मिन् रागमार्गे तु वर्त्तते ॥१००
ईश्वरस्य परोक्षाज्ञा क्षौरकर्मोपवासयोः ।
प्रसादभोजने किन्तु साक्षादाज्ञा भवेत् प्रभोः ॥१०१
प्रसादो नास्ति यत्रैव तत्र कुर्यादुपोषणम् ।
प्रभो राज्ञापराधः स्यात् प्रसादत्यागजो महान् ॥१०२
विशेषाच्छ्रीकरेणैव प्रभुणा परिवेष्यते ।
त्यक्त्वा तथाविधं लाभं कथं कार्यमुपोषणम् ॥१०३
पुरा मह्यं प्रसादान्नं प्रभु रानीय दत्तवान् ।
प्रातः शय्योपविष्टोऽहं तदन्नं भुक्तवांस्तदा ॥१०४
अनुकम्पावशेनासौ हृदये यं प्रचोदयेत् ।
वैदिकाँल्लौकिकान्धर्मान् स त्यजेत् कृष्णमाश्रयन् ॥१०५

"तथाहि श्रीमद्भागवते चतुर्थस्कन्ध ऊनविंशाध्याये त्रयश्चत्वारिंशश्लोके प्राचीनवर्हिषं प्रति नारदवाक्यम्—

यदा यस्यानुगृह्णाति भगवानात्मभावितः ।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥१२॥"

सौधोपरितलाद्राजा तदानीमवतीर्णवान् ।
काशीमिश्रं तथा प्रैष्यपात्रञ्चोभयमाह्वयत् ॥१०६
राज्ञा प्रतापरुद्रेण समादिष्टौ च तावुभौ ।
प्रभोर्वासगृहं प्राप्ता यावन्तोऽत्र प्रभोर्गणाः ॥१०७
तेभ्यो वासं प्रसादञ्च दत्तं तच्छन्दतो युवाम् ।
छन्दाद्दर्शयतं देवं यथा नैकोऽपि हीयते ॥१०८
प्रभोः पालयतञ्चाज्ञां सावधानं सदा युवाम् ।
आज्ञा नाप्तावपि ज्ञात्वा कुरुतञ्चेङ्गितं प्रभोः ॥१०९
इत्युक्त्वा विससर्जोभौ राजा तावधिकारिणौ ।
सार्वभौमस्तदागच्छ द्रष्टुं वैष्णवमेलनम् ॥११०
श्रीगोपीनाथ आचार्यो भट्टाचार्यश्च तावुभौ ।
दूराद्ददृशतु स्तत्र प्रभो र्वैष्णवसङ्गमम् ॥१११
सिंहद्वार मतिक्रम्य दक्षपार्श्वस्थितं ततः ।
वैष्णवास्ते पथा जग्मुः काशीमिश्रालयं प्रति ॥११२
तत्रैव स्वगणैः सार्द्धं समागत्य महाप्रभुः ।
हर्षोल्लासयुतो मार्गे वैष्णवैः समगच्छत ॥११३
अद्वैतः कृतवान् पादवन्दनं श्रीमहाप्रभोः ।
तमाचार्यमपि प्रेम्णा समाशिश्लेष च प्रभुः ॥११४
परामस्थिरतां प्राप्तौ प्रेमानन्देन तावुभौ ।
आललम्बे प्रभुः किञ्चिद्धैर्यं कालं विचिन्तयन् ॥११५
श्रीवासप्रमुखा भक्ताः प्रभोः पादौ ववन्दिरे ।
एकैकशस्तु तान् सर्वान् प्रेम्णालिङ्गन्महाप्रभुः ॥११६
समभाषत तान् भक्तान्निखिलान् स पृथक् पृथक् ।
समादाय च तान् सर्वान्निवासाभ्यन्तरं ययौ ॥११७
अत्यल्पपरिमाणेऽपि मिश्रस्यावासवेश्मनि ।
तेऽसंख्या वैष्णवास्तत्र पर्याप्तं स्थान माप्नुवन् ॥११८

आत्मनः सन्निधौ सर्वांस्तानुपावेशयत् प्रभुः ।
तेभ्य श्चन्दनमाल्यानि प्रददौ च स्वपाणिना ॥११६
भट्टाचार्यस्तथाचार्यो द्वावुपेत्य महाप्रभुम् ।
आलापेन यथार्हेण सर्वैं स्तैः सह सङ्गतौ ॥१२०
अथाद्वैतं प्रभुः प्रोचे सुधामधुरया गिरा ।
अद्याहं परिपूर्णोऽस्मि तवागमनसम्पदा ॥१२१
अद्वैतेनोक्त मीशस्य स्वभावोऽयं भवत्यहो ।
अपि चेत् स स्वयं पूर्णः सर्वैश्वर्यमयः प्रभुः ॥१२२
तथाप्यस्य सुखोल्लासो भक्तैः सार्द्धं विवर्धते ।
विलासान् विविधान्नित्यं सह भक्तैः करोत्यसौ ॥१२३
वासुदेवमथालोक्य प्रभु रानन्दितान्तरः ।
स्पृशन् हस्तेन तस्याङ्गं किञ्चिद्वक्तुं प्रचक्रमे ॥१२४
यद्यप्ययं मुकुन्दो मे वयस्यः शैशवावधि ।
पश्यता त्वां मया प्राप्तं तस्मादप्यधिकं सुखम् ॥१२५
प्रत्युक्तं वासुदेवेन मुकुन्दः प्रथमं तव ।
सङ्गेन चरणौ प्राप्तः पुनर्जन्मास्य तत् खलु ॥१२६
कनिष्ठोऽपि मुकुन्दो मे ज्येष्ठोऽभूत्तेन सम्प्रति ।
गुणैः सर्वैरसौ श्रेष्ठः केवलं कृपया तव ॥१२७
पुनरेव प्रभुः प्रोचे मया तव कृते पुनः ।
पुस्तकद्वय मानीत मत्र दक्षिणदेशतः ॥१२८
स्वरूपस्य समीपेऽस्ति प्रतिलिख्य गृहाण तत् ।
वासुदेवोऽथ तत् प्राप्य परमानन्दितोऽभवत् ॥१२६
प्रत्येकं वैष्णवास्तत्र जगृहुः प्रतिलिख्य तत् ।
सर्वत्रैवं परिव्याप्तं क्रमशः पुस्तकद्वयम् ॥१३०
प्रभुणाथ महाप्रीत्या श्रीवासादय ऊचिरे ।
चत्वारो भ्रातरो यूयं क्रीतवन्तः पणेन माम् ॥१३१

श्रीवासः कथयामास कथं ब्रूषे विपर्ययम् ।
कृपामूल्येन चत्वारः क्रीताः स्मो भ्रातर स्त्वया ॥१३२
विलोक्य शङ्करं प्रोचे प्रभुर्दामोदरं प्रति ।
गौरवेण युता प्रीति स्त्वयि मे, वर्त्तते पुनः ॥१३३
विशुद्ध' केवलं प्रेम शङ्करे मम विद्यते ।
अतएव मया सार्द्ध मिह स्थापय शङ्करम् ॥१३४
अथ दामोदरेणोक्त' कनिष्ठः शङ्करो मम ।
तवैव कृपयेदानीं स मे ज्येष्ठः सहोदरः ॥१३५
प्रभुरूचे शिवानन्दं विदितं मेऽस्ति पूर्वतः ।
अनुरागोऽतिगाढो मे त्वय्यस्ति सुचिरादिति ॥१३६
शृण्वन्नेव शिवानन्दो दण्डवत् प्रणतो भुवि ।
प्रेमावेशादिमं श्लोकं पपाठ श्रीप्रभुं प्रति ॥१३७

"तथाहि श्रीचैतन्यचन्द्रोदयनाटकेऽष्टमाङ्केऽशीतितमश्लोके श्रीचैतन्यदेवं प्रति शिवानन्दसेनवाक्यम्—

निमज्जतोऽनन्तभवार्णवान्त-
श्चिराय मे कूलमिवासि लब्धः ।
त्वयापि लब्धं भगवन्निदानी
मनुत्तमं पात्रमिदं दयायाः ॥१३॥"

एतावत् कालपर्यन्त मनालोक्य महाप्रभुम् ।
आसीन्मुरारिगुप्त स्तु दण्डवत् पतितो वहिः ॥१३८
अनालेक्य मुरारिन्तु विचिकाय यदा प्रभुः ।
तं तदैव समानेतु मधावन् बहवो जनाः ॥२३९
तृणगुच्छद्वयं दन्तैरवलम्ब्य मुरारिणा ।
यातं महाप्रभोरग्रे दैन्याक्रान्तेन चेतसा ॥१४०
प्रभुर्मुरारि मालोक्य मेलितुं यावदागतः ।
तावत् पलायमानोऽसौ पश्चाद्गत्यैवम ब्रवीत् ॥१४१

मा मैवं स्पृश मां देव पामरोऽहं महाप्रभो ।
कलेवरं मम ह्येतत् स्पर्शयोग्यं भवेन्नते ॥१४२
प्रभुणोक्तं मुरारे त्वं दैन्यं संवर संबर ।
तव दैन्यं समालोक्य हृदयं मे विदीर्यते ॥१४३
इत्येवं कथयन्नेव तमालिङ्ग्य महाप्रभुः ।
उपवेश्य समीपे च तदङ्गानि परामृशत् ॥१४४
विद्यानिध्याचार्यरत्नं पण्डितञ्च गदाधरम् ।
गङ्गादासं तथा चार्यौ हरिभट्टपुरन्दरौ ॥१४५
एकैकशश्च तान् सर्वान् संस्तुवन् गुणगीतिभिः ।
भूयोभूयः सभाश्लिष्यत् ससम्मानं महाप्रभुः ॥१४६
सर्वान् सम्मानयन्नेवं सोल्लासहृदयः प्रभुः ।
हरिदास मदृष्ट्वोचे हरिदासः क्व भो इति ॥१४७
हरिदासस्तु गोस्वामी दूराद्दृष्ट्वा महाप्रभुम् ।
आसीद्राजपथप्रान्ते दण्डवत् पतितस्तदा ॥१४८
मिलनस्थानमागत्य प्रभुणासौ न सङ्गतः ।
दूरे राजपथप्रान्तेऽवतस्थे पतितः परम् ॥१४९
हरिदासमथानेतुं भक्ता धावन्त ऊचिरे ।
हरिदास द्रुतं गच्छ प्रभुस्ते सङ्गमीप्सति ॥१५०
प्रत्युक्तं हरिदासेन तुच्छोऽहं नीचजातिकः ।
प्रयातुं नाधिकारोऽस्ति मन्दिरं निकपापि मे ॥१५१
निर्जनोपवनान्तश्चेत् स्थानं किञ्चिल्लभे क्वचित् ।
एकाकी पतित स्तत्र तदा कालं नयाम्यहम् ॥१५२
यत्र स्थितस्य मे स्पर्शो जगन्नाथस्य सेवकैः ।
नाप्यतेऽहं पतंस्तत्र स्थास्यामीति मतं मम ॥१५३
इति तस्य वचो लोकाः प्रभुं गत्वा न्यवेदयन् ।
शृण्वतस्तत् प्रभोश्चित्ते महासौख्य मजायत ॥१५४

अस्मिन्नवसरे काशीमिश्रः प्रैष्यश्च तावुभौ ।
कृतवन्तौ समागत्य प्रभोश्चरणवन्दनम् ॥१५५
दृष्ट्वा तौ वैष्णवान् सर्वान् प्राप्तवन्तौ महासुखम् ।
सानन्दं समगच्छेतां यथायोग्यञ्च तैः सह ॥१५६
तावुभौ प्रभुपादाय कृतवन्तौ निवेदनम् ।
आज्ञापयानुतिष्ठावो वैष्णवानां प्रयोजनम् ॥१५७
एषां वासगृहस्थान मत्रावाभ्यां निरूपितम् ।
अतो महाप्रसादानां निर्वाहश्च करिष्यते ॥१५८
गोपीनाथं प्रभुः प्रोचे गच्छ त्वं वैष्णवैः सह ।
यत्र यत्रोच्यते वास स्तत्र तेभ्यस्तमर्पय ॥१५९
ततो महाप्रसादान्नं वाणीनाथाय दीयताम् ।
वैष्णवानां कृते सोऽत्र समाधानं करिष्यति ॥१६०
मम सन्निहितञ्चैतत् कुसुमोद्यानमन्तरा ।
कुटीरं वर्त्तते चैकं सदा परमनिर्जनम् ॥१६१
तच्च प्रदीयतां मह्यं तेन मेऽस्ति प्रयोजनम् ।
तत्र निभृतमासीनः करिष्ये स्मरणं हरेः ॥१६२
मिश्रेणोक्तं तवैवेदं सर्वं तद् याचसे कथम् ।
यथेच्छं तद् गृहाण त्वं येन तेऽस्ति प्रयोजनम् ॥१६३
तव दासावुभावावां त्वदाज्ञाप्रतिपालकौ ।
यथा प्रयोजनीयं ते तथा नौ कृपया दिश ॥१६४
इति श्रुत्वा वच स्तौ द्वौ विससर्ज महाप्रभुः ।
गोपीनाथं तथा वाणीनाथं ताभ्यां जिघाय च ॥१६५
ताभ्यां वासगृहं सर्वं गोपीनाथाय दर्शितम् ।
दत्तो महाप्रसादश्च वाणीनाथाय भूरिशः ॥१६६
गृहीत्वान्नञ्च पिष्टञ्च वाणीनाथः समाययौ ।
वासगेहानि संस्कृत्य गोपीनाथोऽप्युपागतः ॥१६७

महाप्रभुरुवाचाथ सर्वे शृण्वन्तु वैष्णवाः ।
स्व स्वं वासगृहं सर्वे यूयं गच्छत साम्प्रतम् ॥१६८
समुद्र मवगाह्यादौ श्रीचूडामवलोक्य च ।
पुनर्यूयमिहागत्य कुरुताद्यात्र भोजनम् ॥१६९
अथ सर्वे प्रभुं नत्वा स्वं स्वं वासगृहं ययुः ।
श्रीगोपीनाथ आचार्यस्तेभ्यस्तत्तदर्शयत् ॥१७०
अथ श्रीहरिदासेन सङ्गन्तुं प्रभुरागतः ।
कुर्वन्नासीदसौ प्रेम्णा नामसङ्कीर्त्तनं तदा ॥१७१
स तत्र प्रभुमालोक्य दण्डवत् पतितोऽग्रतः ।
महाप्रभु स्तमुत्थाप्य समाशिश्लेष सादरम् ॥१७२
कृतवन्तावुभावेव प्रेमावेशेन रोदनम् ।
परस्परगुणास्वादात् प्रभु भृत्यश्च विह्वलौ ॥१७३
कथितं हरिदासेन न मां स्पृश महाप्रभो ।
नीचोऽहमहमस्पृश्य स्तथा परमपामरः ॥१७४
प्रत्युक्तं प्रभुणात्मानं पवितुं त्वां स्पृशाम्यहम् ।
पवित्रास्त्वयि ये सन्ति धर्मा मयि न सन्ति ते ॥१७५
प्रतिक्षणं करोषि त्वं सर्वतीर्थावगाहनम् ।
तपोयज्ञञ्च दानञ्च करोषि त्वं क्षणे क्षणे ॥१७६
सर्वान् वेदानधीषे त्वं निरन्तर मतन्द्रितः ।
द्विजन्यासिजनेभ्योऽपि नितरां पावनोह्यसि ॥१७७

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे त्रयस्त्रिंशाध्याये सप्तम-
श्लोके कपिलदेवं प्रति देवहूतिवचनम्—

अहो वत श्वपचोऽतो गरीयान्
यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या
ब्रह्मानूचु र्नाम गृणन्ति ये ते ॥१४॥"

इत्युक्त्वा तं गृहीत्वा च पुष्पोद्यानं गतः प्रभुः ।
तत्रात्यन्तरहो गेहे वासार्थं निर्दिदेश तम् ॥१७८
अत्र गेहेऽवतिष्ठस्व नामसङ्कीर्त्तनं कुरु ।
अहं प्रत्यह मागत्य मेलिष्यामि त्वया सह ॥१७६
मन्दिरोपरि चक्रञ्च पश्यन् प्रणम दूरतः ।
आयास्यति प्रसादान्नमत्र ते वसता विंति ॥१८०
नित्यानन्दप्रभु र्दामोदरश्च हरिदासकः ।
मुकुन्दजगदानन्दौ ननन्दु र्मिलिताश्च ते ॥१८१
समुद्रस्नानमाचर्य प्रभौ वासगृहं गते ।
अद्वैतप्रमुखाः सर्वे जग्मुः सिन्धुं वगाहितुम् ॥१८२
ततश्चूडां जगन्नाथमन्दिरस्या वलोक्य ते ।
आगत्य च प्रभोर्वासं प्रसादान्नमभक्षयन् ॥१८३
यथाक्रमं यथार्हञ्च सर्वांस्तानुपवेश्य च ।
स्वयं गौरहरिश्चक्रे सर्वेभ्यः परिवेषणम् ॥१८४
देय मन्नं प्रभुर्मुष्ट्या ग्रहीतुं नाल्प मर्हति ।
ददौ द्वित्रजनैर्भोज्य मेकैकस्यैव भाजने ॥१८५
अभुञ्जाने प्रभौ कोऽपि भोक्तुं नैवोपचक्रमे ।
हस्तमुत्तोल्य ते सर्वे भक्तास्तूष्णीं समासत ॥१८६
ततः स्वरूपगोस्वामी प्रभु मेवं न्यवेदयत् ।
त्वयि भोक्तु मनासीने भुङ्क्ते नैवात्र कश्चन ॥१८७
सन्न्यासिनोऽत्र यावन्तोऽवतिष्ठन्ते त्वया सह ।
श्रीगोपीनाथ आचार्यो न्यमन्त्रयत तावतः ॥१८८
समादाय प्रसादान्न माचार्योऽपि समागतः ।
श्रीपुरी-भारती-स्वामियुगलं त्वां प्रतीक्षते ॥१८६
त्वं नित्यानन्दमादाय भिक्षार्थमास्स्व साम्प्रतम् ।
करोमि वैष्णवेभ्योऽहमिदानीं परिवेशनम् ॥१६०

ततो दत्त्वा प्रसादान्नं गोविन्दस्य करे प्रभुः
सयत्नं प्रेरयामास हरिदासाय तं तदा ॥१९१
स्वयं सन्न्यासिभिः सर्वै रुपविष्टे महाप्रभौ ।
श्रीगोपीनाथ आचार्यो हृष्टात्मा पर्यवेषयत् ॥१९२
दामोदरः स्वरूपश्च जगदानन्द इत्यमी ।
वैष्णवेभ्यस्त्रयस्तत्र सानन्दं पर्यवेषयन् ॥१९३
आकण्ठं पूपपेयानि भुञ्जानाः सुबहूनि ते ।
वैष्णवा दध्वनुः प्रोच्चैर्हरि रित्यन्तरान्तरा ॥१९४
ततः समापिताहारान् विहिताचमनान् प्रभुः ।
माल्यैश्चन्दनपङ्कैश्च सर्वांस्तानध्यवासयत् ॥१९५
विश्रामार्थं ततः सर्वे स्वं स्वं वासगृहं ययुः ।
पुनः सायं समायाताः प्रभुणा समगच्छत ॥१९६
तस्मिन्नेव क्षणे रामानन्दे प्रभु मुपागते ।
प्रभुः सङ्गमयामास तं सर्वै वैष्णवैः सह ॥१९७
निनायाथ प्रभुः सर्वान् श्रीजगन्नाथमन्दिरम् ।
नामसङ्कीर्त्तनं तत्र समारेभे च तैः सह ॥१९८
धूपनीराजनं सायं दृष्ट्वा तान् कीर्त्तनोद्यतान् ।
प्रैष्याः प्रसाधयामासु र्निखिलान्माल्यचन्दनैः ॥१९९
सम्प्रदायाश्च चत्वारः समन्तात् कीर्त्तनं जगुः ।
श्रीशचीनन्दनो देवो मध्यभागे ननर्त्त च ॥२००
मृदङ्गा अष्ट झल्लर्यो द्वात्रिंशच्चात्र वादिताः ।
कृत्वा हरिध्वनिं प्रोचुः साधु साध्विति वैष्णवाः ॥२०१
कीर्त्तनस्योत्थित स्तत्र यो महामङ्गलध्वनिः ।
लोकांश्चतुर्दशापूर्य ब्रह्माण्डं तेन भेदितम् ॥२०२
पुरुषोत्तमवास्तव्या जना स्तद्द्रष्टुमागताः ।
ओड्रीया विस्मयं प्राप्ताः पश्यन्तः कीर्त्तनोत्सवम् ॥२०३

वेष्टयित्वा ततः श्रीमज्जगन्नाथस्य मन्दिरम् ।
नृत्यन् प्रदक्षिणीकृत्य पर्यभ्राम्यन्महाप्रभुः ॥२०४
जगौ पुरोऽस्य पश्चाच्च सम्प्रदायचतुष्टयम् ।
देहप्रपातकालेषु नित्यानन्दोऽदधात् प्रभुम् ॥२०५
अश्रु-प्रस्वेद-रोमाञ्च-हुङ्कार-कम्पनादिकम् ।
प्रेम्णो विकार मालोक्य जनाः सर्वे चमत्कृताः ॥२०६
शृङ्गयन्त्रादिवोत्क्षिप्ता तस्याक्षिभ्यां विनिःसृता ।
अश्रुधारा जनान् सर्वान् स्नापयामास सर्वतः ॥२०७
एवं कियच्चिरं कृत्वा प्रभुर्वेष्टनकीर्त्तनम् ।
मन्दिरस्य स्थितः पश्चाज्जगौ सङ्कीर्त्तनं ततः ॥२०८
सम्प्रदायाश्च चत्वारो जगुरुच्चैः समन्ततः ।
कृतवांस्ताण्डवं नृत्यं मध्ये गोरहरिः प्रभुः ॥२०९
सुचिरं नर्त्तनं कृत्वा सुस्थिरः सन्महाप्रभुः ।
मोहान्तां श्चतुरस्तत्र नर्त्तनाय समादिशत् ॥२१०
ननर्त्ताद्वैत आचार्यः सम्प्रदाय इहैकतः ।
श्रीनित्यानन्दरायश्च तथान्यत्र ननर्त्त च ॥२११
सम्प्रदाये तथान्यस्मिन् श्रीवक्रेश्वर पण्डितः ।
श्रीवासोऽनृत्यदन्यस्य सम्प्रदायस्य मध्यतः ॥२१२
तेषामभ्यन्तरे स्थित्वा पश्यतस्तन्महाप्रभोः ।
तत्रैवाविर्बभूवैक मैश्वर्यं विस्मयावहम् ॥२१३
समन्तान्नृत्यगीतानि कुर्वन्तो निखिला जनाः ।
मेनिरे प्रभुमालोक्य प्रभुः पश्यति मामिति ॥२१४
चतुर्णां नर्तनं तेषां द्रष्टुं येच्छा प्रभोरभूत् ।
इच्छयैव तया तस्य तदैश्वर्यं प्रकाशितम् ॥२१५
प्रभुः सन्दर्शनाविष्ट इत्येव विविदु र्जनाः ।
ईक्षतेऽसौ कथङ्कारं समन्तादिति नाविदुः ॥२१६

भुञ्जानं पुलिने कृष्णं मध्यस्थं तत्सखा यथा ।
चतुर्दिक्षु स्थिताः प्रोचुः कृष्णः पश्यति मामिति ॥२१७
य एव नर्त्तनं कुर्वन् सन्निधानं प्रभोर्ययौ ।
अतिगाढं तमेवासौ समाश्लिष्यन्महाप्रभुः ॥२१८
महानृत्यं महाप्रेम महासङ्कीर्त्तनञ्च तत् ।
दृष्ट्वा नीलाद्रिवास्तव्या जाता प्रेममुदाप्लुताः ॥२१९
महत्त्वं कीर्त्तनस्यैवं श्रुत्वा गजपति र्नृपः ।
अट्टालिकां समारूढो ददर्श स्वगणैः सह ॥२२०
कीर्त्तनोत्सवमालोक्य राजा तत्र चमत्कृतः ।
निःसीमा प्रभुणा तस्य सङ्गोत्कण्ठा व्यवर्द्धत ॥२२१
सङ्कीर्त्तनं समाप्यैवं दृष्ट्वा पुष्पाञ्जलिं प्रभुः ।
वैष्णवांस्तान् गृहीत्वा च सर्वान् वासगृहं ययौ ॥२२२
देवप्रैष्यः समानीय प्रसादान् भूरिशो ददौ ।
ईश्वरो वण्टयित्वा तान् सर्वेभ्यः प्रददौ ततः ॥२२३
शयनाय ततः सर्वा स्तानन्वज्ञापयत् प्रभुः ।
इत्येवं विविधा लीलाः कृतवान् श्रीशचीसुतः ॥२२४
यावदासंश्च ते सर्वे श्रीमहाप्रभुणा सह ।
तावत् प्रतिदिनं चक्रुः सङ्कीर्त्तनमहोत्सवम् ॥२२५
सङ्कीर्त्तनविलासोऽयमुक्तस्तावन्मया प्रभोः ।
य एवाकर्णयेदेनं स स्याच्चैतन्यकिङ्करः ॥२२६
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२२७

इति श्रीचैतन्यचरितामृते मध्यखण्डे वेष्टनकीर्त्तनविलासवर्णनं नामैकादशः परिच्छेदः ।

—०—

मध्यलीलायां द्वादशः परिच्छेदः

"श्रीगुण्डिचामन्दिर मात्मबृन्दैः सम्मार्जयन् क्षालनतः स गौरः।
स्वचित्तवच्छीतलमुज्ज्वलञ्च कृष्णोपवेशौपयिकं चकार ॥१॥"

भूयः श्रीकृष्णचैतन्यो जयतु श्रीमहाप्रभुः।
नित्यानन्दप्रभु र्जीयाद्धन्योऽद्वैतो जयत्वसौ ॥१
श्रीवासप्रभुखा गौरभक्ताः सर्वे जयन्ति च।
सर्वे यच्छन्तु मे शक्तिं चैतन्यचरितं ब्रुवे ॥२
यदा पूर्वं समायातः प्रभु र्दक्षिणदेशतः।
तदा गजपतिस्तस्य सङ्गायोत्कण्ठितोऽभवत् ॥३
प्राहिणोत् सार्वभौमाय पत्रीमेकां लिखन्नसौ।
प्रभुं द्रष्टुं गमिष्यामि तस्याज्ञा चेद्भवेदिति ॥४
प्रभो र्नाभवदाज्ञेति भट्टाचार्योऽलिखल्लिपिम्।
अथ राजा पुनस्तस्मै प्रेरयत् पत्रिकामिमाम् ॥५
वर्त्तन्ते तत्र यावन्तो भक्ताः सन्निहिताः प्रभोः।
तावद्भ्यो मत्कृते कार्यं भवता मे निवेदनम् ॥६
ते च कारुणिकाः सर्वे नूनं मय्यनुकम्पया।
मदर्थ मनुनेष्यन्ति प्रभुपादं दयानिधिम् ॥७
तेषामेव प्रसादेन प्रभोर्लप्स्ये पदाम्बुजम्।
प्रतिभाति न मे राज्यं विना तस्यानुकम्पया ॥८
यदि गौरहरि र्देवो नैव मामनुकम्पते।
प्राणांस्त्यजामि राज्यं वा हित्वा भिक्षु र्भवाम्यहम् ॥९
भट्टाचार्यः पठन् पत्रीं चिन्ताक्रान्तेन चेतसा।
ताञ्च पत्रीं समादाय भक्तानां सन्निधिं ययौ ॥१०
समवेतांश्च तान् सर्वान् राज्ञो बृत्त मवोचत।
अदर्शयच्च तां पत्रीं सर्वेभ्यस्तदनन्तरम् ॥११

पत्रिकां तां समालोक्य सर्वेऽभूवन् सुविस्मिताः ।
अहो गजपते र्भक्तिरियती प्रभुपादयोः ॥१२
सर्वे प्रोचुः प्रभु र्जातु तत्सङ्गं न करिष्यति ।
अस्माभिः प्रार्थितो नूनं दुःख मेव स लप्स्यते ॥१३
सार्वभौमोऽवदत् सर्वै रस्माभि स्तत्र गम्यताम् ।
राज्ञो वद्याम आचारं नैव तेन तु मेलनम् ॥१४
इत्युक्ते तेन ते सर्वे प्रभोः सन्निधि मागताः ।
किञ्चिन्नैवा ब्रुवन् वक्तुमुन्मुखा अपि ते तदा ॥१५
प्रभुः प्रोवाच किं वक्तुं सर्वे यूय मिहागताः ।
विवक्षूनिव वीक्षे वः कथं न ब्रूथ किञ्चन ॥१६
नित्यानन्द उवाचैवं त्वां विवक्षामहे वयम् ।
अनुक्ता नैव तिष्ठेम बिभीमो वदितुं पुनः ॥१७
निवेदयितु मिच्छामो योग्यायोग्यं तवाखिलम् ।
अलब्धे तव सङ्गे तु राजा योगी बुभूषति ॥१८
इति वाचं प्रभुः श्रुत्वा मृदूभूतमना अपि ।
तान् सर्वान् कथयामास वहिर्निष्ठुरभाषणम् ॥१९
युष्माकमभिलाषोऽयं सर्वेषां मन्यते मया ।
मामितः कटकं नीत्वा राज्ञा सम्मेलयिष्यथ ॥२०
सुदूरं परमार्थोऽस्तु निन्दिष्यन्त्येव मां जनाः ।
कामं निन्दन्तु ते दामोदरो मां भर्त्सयिष्यति ॥२१
युष्माकमाज्ञया नाहं करिष्ये राजमेलनम् ।
मेलिष्यामि समं तेन यदि दामोदरो वदेत् ॥२२
ऊचे दामोदर स्त्वं हि स्वतन्त्रः परमेश्वरः ।
कर्त्तव्यं वाप्यकर्त्तव्यं निखिलं विदितं तव ॥२३
कः पुनः क्षुद्रजीवोऽहं दातुमर्हामि ते विधिम् ।
मिलिष्यसि स्वयं तेन तच्च द्रक्ष्याम्यहं पुनः ॥२४

त्वयि स्निह्यति राजासौ त्वञ्च स्नेहवशंवदः ।
तदीयः स्नेह एव त्वां तत्स्पर्शं प्रापयिष्यति ॥२५
यद्यपीश्वर एवासि परमा ते स्वतन्त्रता ।
तथापि त्वं स्वभावेन प्रेमाधीनोऽसि सर्वदा ॥२६
नित्यानन्दो बभाषे च तादृशः को नु वर्त्तते ।
यो जन स्त्वां वदेद्राजदर्शनं क्रियतामिति ॥२७
प्रेमिकस्य स्वभावोऽय मेक एव हि क्ष्यते ।
प्रेष्ठमलभमानोऽसौ प्राणैरिव विमुच्यते ॥२८
याज्ञिकद्विजपत्न्यत्र प्रमाणं पत्युरग्रतः ।
सा कृष्णस्य कृते प्राणान् परित्यक्तवती सुखम् ॥२६
उपायो वर्त्ततेऽत्रैकस्त्वया चेदवधीयते ।
अकृतेऽपि त्वया सङ्गे तस्य स्थास्यति जीवनम् ॥३०
कृपयैकं वहिर्वासो यदि तस्मै प्रदास्यसि ।
तत् प्राप्यैव निजप्राणान् रक्षिस्यति तवाशया ॥३१
प्रभुः कथितवान् यूयं सर्वे परमपण्डिताः ।
यथा भवति साधिष्ठं तथा कुरुत साम्प्रतम् ॥३२
श्रीनित्यानन्दगोस्वामी गोविन्दं निकषा तदा ।
याचित्वा श्रीप्रभोरेकं वहिर्वासः समाददे ॥३३
ददौ तच्च वहिर्वासः सार्वभौमाय तत्क्षणात् ।
सार्वभौमोऽपि तद्वासो राज्ञे प्रेरितवां स्ततः ॥३४
वस्त्रं प्राप्य तदा राजा बभूवानन्दितान्तरः ।
तच्च साक्षात् प्रभुं मत्वा पूजयामास सर्वदा ॥३५
दक्षिणस्याः पुरा रामानन्दरायः समागतः ।
राज्ञे न्यवेदयत् स्वस्य तिष्ठासां प्रभुणा सह ॥३६
सन्तुष्ट-हृदयो राजा तमाज्ञापितवां स्तदा ।
प्रभुणा सङ्गलाभार्थं स्वस्य वक्तुं प्रचक्रमे ॥३७

महाप्रभुः करोत्येव महतीं करुणां त्वयि ।
सङ्गार्थं मे त्वयावश्यं श्रीप्रभुः साध्यतामिति ॥३८
युगपत्तावुभौ चेत्रमागत्योपस्थितौ ततः ।
श्रीरामानन्दरायस्तु प्रभुणा मिलितस्तदा ॥३९
प्रभुपादाय तां प्रेमभक्तिं राज्ञो न्यवेदयत् ।
इत्थं लब्धप्रसङ्गोऽसौ वारंवार मुवाच च ॥४०
रामानन्दो नृपामात्यो व्यवहारविचक्षणः ।
अद्रावयत् प्रभोश्चित्तं राज्ञः प्रीतिमुदीरयन् ॥४१
नालं प्रतापरुद्रोऽसौ स्थातु मुत्कण्ठया यदा ।
प्रभुणा सह सङ्गार्थं रामानन्द मसाधयत् ॥४२
चकार प्रभुपादाय रामानन्दो निवेदनम् ।
सकृत् प्रतापरुद्राय दर्शय श्रीपदे इति ॥४३
प्रभुः कथितवात् ब्रूहि रामानन्द विचारयन् ।
समं सम्मेलितुं राज्ञा सन्न्यासी किन्तु युज्यते ॥४४
राजसम्मेलनाद्भिक्षो र्लोकौ द्वावेव नश्यतः ।
बहवोऽत्र जना लोके सर्वदोपहसन्ति तम् ॥४५
रामानन्दोऽवद त्वं हि स्वतन्त्रः परमेश्वरः ।
विद्यते ते भयं कस्मान्नास्ति ते परतन्त्रता ॥४६
प्रभुणोक्तं मनुष्योऽहं संन्न्यासी चाश्रमेण तु ।
सदा कायमनोवाग्भि र्व्यवहाराद् बिभेमि च ॥४७
शुक्लवस्त्रे मसीविन्दुरेखा नैव निलीयते ।
गोयतेऽल्पमपि च्छिद्रं जनैः सन्नयासिना मिह ॥४८
रायः प्रोवाच पापिष्ठाः कियन्तोऽपि त्वयोद्धृताः ।
असौ गजपति र्भक्तस्तव चेश्वरसेवकः ॥४९
प्रभुः प्रत्यवदत् पूर्णो वारिणा कलसो यथा ।
सुरा-विन्दु-निपातेन स्पृश्यते नहि केनचित् ॥५०

तथा प्रतापरुद्रोऽसौ सर्वथा गुणवानपि ।
राजेत्येकेन नाम्नैव मलिनीक्रियते खलु ॥५१
तथा सत्यपि यद्यस्ति महानत्याग्रहस्तव ।
तदा तत् पुत्रमानीय मया सम्मेलयाधुना ॥५२
आत्मा वै जायते पुत्र इति शास्त्रीयभाषणम् ।
संयोगेनैव पुत्रस्य संयुज्यत इव स्वयम् ॥५३
अथ राय स्ततो गत्वा राज्ञे सर्वं न्यवेदयत् ।
आगच्छच्च समादाय पुत्रं तस्याज्ञया प्रभोः ॥५४
अतीव सुन्दरश्रीकः श्यामकान्ति नृपात्मजः ।
कैशोरकवया दीर्घोत्फुल्लराजीवलोचनः ॥५५
पीताम्बरधरो रत्नभूषा-मण्डित-विग्रहः ।
श्रीकृष्णस्मरणस्यासौ बभूवोद्दीपनस्तदा ॥५६
तं महाप्रभु रालोक्य जातकृष्णस्मृतिः पुनः ।
प्रेमावेशान्मिलं स्तेन वक्तुमेवं प्रचक्रमे ॥५७
महाभागवतः श्रीमानयं यस्य विलोकनात् ।
जायते सर्वलोकानां व्रजराजसुतस्मृतिः ॥५८
अस्यैवालोकनेनाहं प्राप्तोऽस्म्यद्य कृतार्थताम् ।
इत्युक्त्वा तं समाश्लिष्यद् भूयोभूयो महाप्रभुः ॥५९
राजपुत्रः प्रभुस्पर्शात् प्रेमाविष्टोऽभवत्तदा ।
स्वेद-कम्पाश्रु-रोमाञ्च-स्तम्भाक्रान्तकलेवरः ॥६०
बभाषे कृष्ण कृष्णेति ननर्त च रुरोद च ।
भक्तास्तद्भाग्यमालोक्य प्रशंसन्तिस्म निर्भरम् ॥६१
ततस्तं प्रापयद्धैर्यं राजपुत्रं महाप्रभुः ।
एत्यान्वहं मया सङ्गं कुर्वित्युक्त्वा व्यसर्जयत् ॥६२
लब्धानुज्ञेन रायेण नृपं नीतोऽथ तत्सुतः ।
राजा प्राप महानन्दं दृष्ट्वा पुत्रस्य चेष्टितम् ॥६३

अथ पुत्रं समालिङ्गय प्रेमाविष्टोऽभवन्नृपः ।
साक्षात् स्पर्शमिव प्राप्त स्तदानीं स महाप्रभोः ॥६४
अंसौ तदा प्रभृत्येव भाग्यवान् राजनन्दनः ।
श्रीमन्महाप्रभो र्भक्तजनेष्वेकतमोऽभवत् ॥६५
इत्थं महाप्रभुः सर्वै र्निजभक्तगणैः सह ।
सङ्कीर्त्तनप्रमोदेन सञ्चिक्रीडे निरन्तरम् ॥६६
आचार्यप्रमुखै र्भक्तजनै रामन्त्रितः प्रभुः ।
तत्र तत्रैव जग्राह भिक्षां भक्तगणान्वितः ॥६७
एवं नानाविधोल्लासै र्गतं तस्य कियच्चिरम् ।
रथयात्रा जगन्नाथदेवस्यासन्नतां गता ॥६८
अथ प्रथमतः काशीमिश्र माकारयत् प्रभुः ।
प्रैष्यपात्रं तथा सार्वभौमं पश्चात् समानयत् ॥६९
ततः पार्श्वगतांस्तांस्त्रीन् जनानूचे हसन् प्रभुः ।
याचे मार्जनसेवां वो गुण्डिचामन्दिरेष्विति ॥७०
प्रैष्यः प्रत्यवदत् सर्वे वयं ते सेवकाः प्रभो ।
यथा वाञ्छति ते चित्त मस्माभिः कार्यमेव तत् ॥७१
वयं विशेषतो राज्ञा सम्प्रत्याज्ञापिताः किल ।
युष्माभिः सत्वरं कार्यं यदेवेष्टं प्रभोरिति ॥७२
युज्यते मार्जनासेवा मन्दिरस्य नतु त्वया ।
तवेयमपि लीलैका यथेच्छसि तथा कुरु ॥७३
घटैः सम्मार्जनीभिश्च वहुभिस्तु प्रयोजनम् ।
आनेष्याम्यत्र तत् सर्वमद्यैवादिश्यता मिति ॥७४
ततो घटशतं नव्यं मार्जनीनां शतं तथा ।
प्रैष्यस्ततः समानीय न्यस्तवानग्रतः प्रभोः ॥७५
परेद्यवि प्रभुः प्रातः समादाय निजान् गणान् ।
श्रीहस्तेन च सर्वेषा मङ्गान्यालिप्य चन्दनैः ॥७६

एकैकां मार्जनीं तेभ्यो दत्त्वा श्रीमत्करेण सः ।
गणांस्तान् सममादाय प्रतस्थे श्रीप्रभुः स्वयम् ॥७७
सम्मार्जयितुकामोऽसौ गुण्डिचामन्दिरं गतः ।
सर्वं व्यशोधयच्चादौ मार्जनीभिः समन्ततः ॥७८
उपर्यन्तश्च निर्णिज्य मन्दिरस्य तथा मृजन् ।
सिंहासनञ्च कुड्यानि चत्वार्येव व्यशोधयत् ॥७९
मन्दिराण्यपुनान्मृष्ट्वा क्षुद्राणि च महान्ति च ।
अशोधयदथालिन्दं जगमोहननामकम् ॥८०
समन्ताच्च शतं भक्तजनान् सम्मार्जनीकरान् ।
शोधनं शिक्षयामास स्वयं संशोधयन् प्रभुः ॥८१
कृष्णनाम प्रभुर्गायन् प्रेमोल्लासाद शोधयत् ।
कृष्णेत्यूचु स्तथा भक्ताः स्वस्वकर्माण्यकुर्वत ॥८२
धूलिधूसरिताङ्गोऽपि प्रभुः परमशोभनः ।
मन्दिरं मार्जयामास क्वापि क्वाप्यश्रुवारिभिः ॥८३
भोगमन्दिर मापूय चत्वरं समशोधयत् ।
स सर्वान् शोधयामास तानावासाननुक्रमात् ॥८४
तृण-कर्कर-धूलीश्च समाहृत्यैकतः प्रभुः ।
वहिर्वस्त्रेण बद्ध्वा च प्रचिक्षेप वहिस्ततः ॥८५
एव मेव प्रभोर्भक्ता बद्ध्वा स्वेनैव वाससा ।
तृणधूलीः समस्ता स्ता हर्षेण वहि रक्षिपन् ॥८६
प्रभुरूचे कृता केन कियती मार्जनक्रिया ।
दृष्ट्वा तृणरजःपुञ्जं ज्ञास्ये तस्य परिश्रमम् ॥८७
मार्जितोत्सारिताः स्तूपाः सर्वेषां मिलिताश्च ये ।
तेभ्यः प्रभुकृतश्चैव भारोऽधिकतरोऽभवत् ॥८८
इत्थ मभ्यन्तरे सम्यक् कृतसम्मार्जने पुनः ।
सर्वेभ्यो वण्टयन् स्थानं प्रभुं रेवमवोचत ॥८९

सूक्ष्माः सर्वेऽपनीयन्तां तृणधूलिदृषत्कणाः ।
देवस्यान्तःपुरं सुष्ठु युष्माभिः शोध्यतामिति ॥६०
मन्दिरं वैष्णवैः सर्वैं र्द्विः संशोध्य महाप्रभुः ।
सर्वतो निपुणं पश्यन् परितुष्टमना अभूत् ॥६१
शतं कुम्भान् समादाय वारिपूर्णान् शतं जनाः ।
आसन् प्रागेव तिष्ठन्तः प्रतीक्ष्यावसरं प्रभोः ॥६२
भो आनयत वारीति ब्रुवत्येव महाप्रभौ ।
तान् कुम्भान् शतमानीय दधुस्ते पुरतः प्रभोः ॥६३
आदौ प्रक्षालयामास मन्दिरं तन्महाप्रभुः ।
ऊर्द्ध्वाधोभित्तिकाः सिंहासनञ्चान्तर्गृहं ततः ॥६४
अद्भिः खर्परमापूर्य तास्तेनोर्द्ध्वं प्रभुः क्षिपन् ।
भित्तेरूर्द्ध्वगतं सर्वं ताभिः प्राक्षालयत्ततः ॥६५
स्वयं प्रक्षालयामास स सिंहासनवेदिकाम् ।
आत्मनैव पुनस्तस्या मार्जनं कृतवान् प्रभुः ॥६६
धौतवन्तश्च ते भक्ता स्ततः सर्वे गृहान्तरम् ।
मन्दिरं मार्जयामासुः स्वेन स्वेन च पाणिना ॥६७
जलं केचित् समानीय न्यस्तवन्तः प्रभोः करे ।
छद्मना प्रददुः केचित् पादयोरुपरि प्रभोः ॥६८
तच्च पादोदकं कश्चित् पपौ गोपनमाश्रितः ।
याचंस्तत् कोऽपि जग्राह कोऽप्यन्यस्मै ददौ पुनः ॥६९
जलं धौतगृहं मुक्तं प्रणालीमिश्च निसृतम् ।
प्राङ्गनं परितः सर्वमवातिष्ठत सम्भृतम् ॥१००
गृहं सम्मार्जयामास प्रभुः स्वेनैव वाससा ।
तथैव प्रोञ्छयामास देवसिंहासनं स च ॥१०१
मन्दिरं मार्जितं तेन कलसीशतवारिभिः ।
शुशुभे मन्दिरं पूतं निजचित्तमिव प्रभोः ॥१०२

मन्दिरं कृतवान् स्निग्धं निर्मलञ्च सुशीतलम् ।
अस्थापयद्वहिष्कुर्वन्निव स्वं हृदयं प्रभुः ॥१०३
शतशः पूरयाञ्चक्रु र्जना वारि सरोवरात् ।
तीर्थे स्थान मलब्ध्वा च केऽपिकूपादुदञ्चयन् ॥१०४
उद्वहन्तो घटान् पूर्णान् शतं भक्ताः समाययुः ।
रिक्तकुम्भान् गृहीत्वान्ये तथा जग्मुः शतं जनाः ॥१०५
नित्यानन्द स्तथाद्वैतः स्वरूपो भारती पुरी ।
इत्ये तेभ्य ऋते सर्वे प्रपूर्य जल मानयन् ॥१०६
घटैः सङ्घट्ट मासाद्य भग्नाश्च कतिचिद् घटाः ।
जनास्तत्र समाजग्मु गृ ीत्वा शतशो घटान् ॥१०७
पूरयन्तो जलं कुम्भान् भञ्जन्तश्च हरिध्वनिम् ।
अकुर्वंस्ते श्रुतं नान्यद् विना कृष्णहरिध्वनिम् ॥१०८
ब्रुवन्तः कृष्णकृष्णेति जनाः सर्वे घटान्ददुः ।
कृष्णकृष्णेति गायन्तः प्रार्थयन्ते स्म ते च तान् ॥१०६
यो यदेवाब्रवीत् कृष्णनामपूर्वं स चाब्रवीत् ।
कृष्णनामैव सङ्केतो वभूवाखिलकर्मसु ॥११०
प्रेमावेशवशात् कृष्णकृष्णनाम ब्रुवन् प्रभुः ।
प्रेम्णा जनशतार्हञ्च कर्मैकाकी समापयत् ॥१११
प्रभु र्हस्तशतेनेव चक्रे क्षालनमार्जने ।
शिक्षयामास तान् सर्वान् गत्वा प्रत्येकशोऽन्तिकम् ॥११२
कुर्वन्तं साधु कर्माणि प्रशशंस जनं प्रभुः ।
अभर्तसयत् सवैदग्ध्यं कुर्वन्तञ्चामनोमतम् ॥११३
कृतवानसि सुष्ठु त्वं शिक्षयस्वापरानपि ।
इत्थ मेव यथाकर्म तेऽपि कुर्वन्ति साध्विति ॥११४
एतद्वचन माकर्ण्य सर्वे सङ्कुचितान्तराः ।
ते सौष्ठवेन कर्माणि कृतवन्तः सचेतसः ॥११५

प्रभुः प्रक्षालयामासालिन्दं श्रीजगमोहनम् ।
ततोऽसौ धावयाञ्चक्रे सयत्नं भोगमन्दिरम् ॥११६
प्रक्षाल्य नाट्यशालाञ्च धौतवानपि चत्वरम् ।
पाकशालाप्रमुखानि सर्वाण्यक्षालयत्ततः ॥११७
अथ प्रक्षालयामास मन्दिरस्य समन्ततः ।
सर्वं मन्तगृहं साधु धावयामास च प्रभुः ॥११८
तदानी मेव गौडीयः सरलः कोऽपि बुद्धिमान् ।
घट मावर्जयन् वारि ददौ पादयुगे प्रभोः ॥११९
तच्च वारि समादाय स स्वयं पीतवानिति ।
पश्यता प्रभुणा दुःखरोषौ प्राप्तौ च चेतसि ॥१२०
अपि चेत् प्रभुगोस्वामी पर्यतुष्यदमुं प्रति ।
तथापि लोकशिक्षार्थं तत्र रोषमदर्शयत् ॥१२१
ततः स्वरूपगोस्वामी प्रभुणाहूय भाषितः ।
गौडीयानां त्वदीयाना माचारोऽयं विलोक्यताम् ॥१२२
क्षालयन्नेव मत्पादावयमीश्वरमन्दिरे ।
तत् पादोदकमादाय स्वयं सम्प्रति पीतवान् ॥१२३
अनेनैवापराधेन का गति र्मे भविष्यति ।
त्वदीया गौडवास्तव्याः कुर्वन्त्येव मुपप्लवम् ॥१२४
इति स्वरूप आकर्ण्य धृत्वा चांसे करेण तम् ।
प्रसह्य प्रेरयन् पुर्या वहिः स्थापितवान् जनम् ॥१२५
पुनरेत्य प्रभोः पादौ विनयेन न्यवेदयत् ।
अपराधोऽय मज्ञस्य क्षमणीय स्त्वयेति तम् ॥१२६
ततस्तुष्टमना देवः सर्वान् पङ्क्तिक्रमेण तान् ।
तत्रोपवेशयामास पार्श्वयो रुभयोस्तदा ॥१२७
तेषां मध्ये समासीनः स्वहस्तेन स्वयं प्रभुः ।
तृण-कण्टक-तुच्छानि समद्धर्तुं प्रचक्रमे ॥१२८

कियत् केनोज्झितं सर्वं कार्यमेकत्र तन्मया।
यस्याल्पं स्याद् ग्रहीष्यामि पूपपानीयकं ततः ॥१२६
इत्येवं वचनात् सर्वैः पुरी सम्यग् विशोधिता।
शीतला निर्मलाकारि मनोवृत्ति रिवात्मनः ॥१३०
ततः प्रणालिकामुक्तं सलिलं स्रोतसा वहत्।
उपातिष्ठत पाथोधिं नवीनेव सरिद्वरा ॥१३१
नृसिंहमन्दिरस्यान्तर्वहिश्च तै र्विशोधितम्।
मुहूर्त्तमिव विश्रम्य समारब्धञ्च नर्तनम् ॥१३२
एवमेव पुरद्वारस्याग्रतो यावतः पथः।
सर्वं शोधितवन्तस्ते तावतः को नु वर्णयेत् ॥१३३
समन्तात्तत्र ते भक्ताः सङ्कीर्त्तन मकुर्वत।
मध्यभागे ननर्त्तासौ मत्तसिंहसमः प्रभुः ॥१३४
कम्प-प्रस्वेद-वैवर्ण्य-हुङ्कार-पुलकाञ्चितः।
स्वान्यङ्गान्यश्रुधाराभि र्धावयंस्ता अवाहयत् ॥१३५
ताभिः प्राक्षालयच्चासौ भक्ताङ्गानि समन्ततः।
अतिवर्षन्निवासारैः श्रावणीयो बलाहकः ॥१३६
कीर्तनध्वनिभिर्व्याप्त मन्तरिक्षं महोच्चकैः।
समजायत भूकम्प स्ताण्डवेन महाप्रभोः ॥१३७
उच्चगीतिः स्वरूपस्य प्रभवेऽरोचतानिशम्।
महानन्देन गौराङ्गो ननर्त्तैवं महोद्धतम् ॥१३८
एवं कियच्चिरं कृत्वा नर्त्तनं श्रीमहाप्रभुः।
प्राप्तकालं समालोच्य ततो विश्रामम ग्रहीत् ॥१३६
अद्वैताचार्यगोस्वामि-सुतं गोपालसंज्ञकम्।
गौर आज्ञापयामास नर्त्तनाय ततः परम् ॥१४०
प्रेमावेशवशेनासौ नृत्यं कुर्वंश्च मूर्च्छितः।
अचैतन्यं गतस्तत्र पतितोऽभून्महीतले ॥१४१

अमुमाचार्यगोस्वामी क्रोड़े कृत्वा ससम्भ्रमम् ।
दृष्ट्वा च श्वासहीनं तमत्यन्तं व्याकुलोऽभवत् ॥१४२
नृसिंहमन्त्र मुच्चार्य जलैः प्रोक्षितवान् स तम् ।
विदीर्णमिव हुङ्कारै र्ब्रह्माण्डम भवत्तदा ॥१४३
कृतेऽपि तेन बह्वेवं नासौ चेतनतां गतः ।
आचार्येण समं सर्वे भक्तास्ते रुरुदुर्भृशम् ॥१४४
ततो निधाय बालस्य वक्षसि श्रीकरं प्रभुः ।
उत्तिष्ठोत्तिष्ठ गोपालेत्येव मुच्चै रवोचत ॥१४५
तच्छ्रृण्वन्नेव गोपालस्तत्क्षणा च्चेतनोऽभवत् ।
भक्ता हरिध्वनिं कृत्वा सर्वे ते ननृतुस्तदा ॥१४६
श्रीबृन्दावनदासेन लीलेयं वर्णिता प्रभोः ।
अतएव मया सेयं संक्षेपेणैव वर्ण्यते ॥१४७
अथासौ लब्धविश्रामः क्षणमेव महाप्रभुः ।
कृतवान्निखिलै र्भक्तै र्जलक्रीडां सरोवरे ॥१४८
ततस्तीरे समुत्तीर्णो वसानः शुष्क मम्बरम् ।
प्रभु र्नृसिंहमालोक्य नत्वा चोपवनं ययौ ॥१४९
अध्यासीने तदुद्यानं प्रभौ भक्तजनैः सह ।
महाप्रसाद मानीय वाणीनाथः समागतः ॥१५०
काशीमिश्र स्तुलस्याख्यः प्रैष्यश्च तावुभौ जनौ ।
प्रेरयामासतु स्तावदन्नं पानञ्च पिष्टकम् ॥१५१
पञ्चशत्या जनानाञ्च भोक्तव्यं यावदेव तत् ।
अवलोक्य प्रभोश्चित्तं सन्तोषमगमत्तदा ॥१५२
महाप्रभुः पुरीस्वामी श्रीब्रह्मानन्दभारती ।
अद्वैताचार्यगोस्वामी नित्यानन्दप्रभु स्तथा ॥१५३
श्रीवासाचार्यरत्नौ चाचार्यनिधिगदाधरौ ।
न्यायाचार्यः शङ्करश्च श्रीवक्रेश्वरराघवौ ॥१५४

आज्ञताः प्रभुणा सार्वभौमश्चोपाविशंस्तदा ।
एतावद्भि र्जनैः सार्द्धं पीठमध्यास्त च प्रभुः ॥१५५
तदधस्तदधस्तावद् यथानुक्रममेव ते ।
उद्यानं निखिलं व्याप्य भक्ता भोक्तु मुपाविशन् ॥१५६
अभीक्ष्णं हरिदासेति समाहूतवति प्रभौ ।
दूरे तु हरिदासेन तिष्ठतैवं निवेदितम् ॥१५७
प्रभो भक्तजनैः साकं प्रसादो गृह्यतां त्वया ।
तुच्छोऽस्मि नैव योग्योऽहमेभिः सद्भिः सहासितुम् ॥१५८
पश्चाद्दास्यति गोविन्दः प्रसादं तोरणेऽत्र मे ।
इत्युक्त्या तन्मनो ज्ञात्वा किञ्चिन्नोचे पुनः प्रभुः ॥१५६
स्वरूपो जगदानन्दो गोपीनाथश्च शङ्करः ।
तथा काशीश्वरो वाणीनाथदामोदरौ च तौ ॥१६०
एते सप्तजना स्तत्र विदधुः परिवेशनम् ।
हरिध्वनिश्च भक्तानामुच्चचारान्तरान्तरा ॥१६१
श्रीकृष्णः कृतवान् पूर्वयुगे पुलिनभोजनम् ।
लीलां ता मेव सस्मार मनसा श्रीमहाप्रभुः ॥१६२
प्रेमावेशवशाद्देवो गतवानप्यधीरताम् ।
प्राप्तकालं समोलोच्य नीतवान् धैर्यमन्तरम् ॥१६३
प्रोक्तवांश्च प्रभु र्मिश्र व्यञ्जनं मे प्रदीयताम् ।
अमृतगुटिकापूपपानं भक्तगणाय च ॥१६४
सर्वज्ञः श्रीप्रभु र्जज्ञे यस्मै यद्रोचनं परम् ।
तच्च तच्च स्वरूपेण तस्मै तस्मा अदापयत् ॥१६५
व्यचरज्जगदानन्दः कुर्वाणः परिवेशनम् ।
अतर्केण प्रभोः पात्रे ददौ द्रव्यं सुरोचकम् ॥१६६
तथा द्रव्यप्रदानेन कुप्यत्यपि महाप्रभौ ।
ददौ व्याजात् प्रसह्यासौ दत्त्वैवं स तुतोष च ॥१६७

पुनरागत्य तद्द्रव्यं जगदानन्द ऐक्षत ।
तद्दृष्ट्वा च प्रभुः किञ्चिद् भक्षयामास तद्भयात् ॥१६८
अभुक्ते जगदानन्द उपवासं करिष्यति ।
ईति त्रस्तमना देवोऽभुङ्क्त किञ्चित्तदग्रतः ॥१६६
स्वरूपस्तु समानीय प्रसादान् मधुरोत्तमान् ।
प्रभु मावेदयामास पुरस्तात्तस्य च स्थितः ॥१७०
प्रभो महाप्रसादोऽयमल्प आस्वाद्यतां त्वया ।
ज्ञायताञ्च जगन्नाथः कथं भक्षितवान्निति ॥१७१
इत्युक्त्वा स प्रभोरग्रे यच्च किञ्चित् समार्पयत् ।
तत्र स्नेहवशेनासौ तच्चाल्पं भुक्तवांस्ततः ॥१७२
इत्थङ्कार मुभावे तौ कृतवन्तौ पुनः पुनः ।
स्नेहाचारो विचित्रोऽय मनयो र्भक्तयो र्द्वयोः ॥१७३
स्वपार्श्वे प्रभुणा सार्वभौमस्तत्रोपवेशितः ।
भक्तयोरनयोः स्नेहं विलोक्यासौ जहास च ॥१७४
उत्तमं सार्वभौमाय प्रसादं दापयन् प्रभुः ।
सस्नेहं सानुरोधञ्च भोजयामास तं मुहुः ॥१७५
श्रीगोपीनाथ आचार्यः सार्वभौमाय तत्क्षणात् ।
प्रसाद मुत्तमं दत्त्वा प्रोक्तवान् मधुरां गिरम् ॥१७६
क्वासौ पूर्वजडाचारो भट्टाचार्यस्य वर्त्तते ।
क्वायं वा परमानन्द इत्येवाद्य विचार्यताम् ॥१७७
प्रत्युक्तं सार्वभौमेण कुबुद्धि रस्मि तार्किकः ।
तवैवात्र प्रसादेन सम्पत्सिद्धि रियं मम ॥१७८
विना महाप्रभुं कोऽपि क्षितौ नास्ति दयामयः ।
काकोऽपि क्रियते येन गरुडः कोऽस्ति तादृशः ॥१७६
तार्किकैः फेरुभिः सार्द्धं येन वुक्कितवान् पुरा ।
मुखेनैवाधुना तेन हरे कृष्णेत्यहं ब्रुवे ॥१८०

क्क वहिर्मुखशिष्याणां तार्किकाणां स सङ्गमः ।
क्कायं सुधासमुद्रेण तुल्यः साधुसमागमः ॥१८१

प्रभुणोक्तं तव प्रीतिः कृष्णे सिद्धैव पूर्वतः ।
सर्वेषां नो मतिः कृष्णे जाता ते सङ्गमादिति ॥१८२

भक्तेभ्यः सुखदानाय तन्महिम्नश्च वृद्धये ।
महाप्रभुं विना नान्यो विद्यते भुवनत्रये ॥१८३

ततः प्रत्येकशः सर्वभक्तानां नाम गृह्णता ।
पिष्टपानप्रसादाश्च प्रभुणा तत्र दापिताः ॥१८४

नित्यानन्द स्तथाद्वैतो द्वावेकत्र न्यषीदताम् ।
तत्रैव मुभयोः क्रीडाकलहः समपद्यत ॥१८५

ऊचेऽद्वैतोऽवधूतेन सहास्मि कृतभोजनः ।
एकपङ्क्त्युपविष्टोऽहं न जाने कां गतिं लभे ॥१८६

प्रभु स्तावत्तु सन्न्यासी नास्य कश्चिदपत्नयः ।
सन्न्यासिनोऽन्नदोषेण भवेयु र्नैव दूषिताः ॥१८७

मस्करी नान्नदोषेणेत्येवं शास्त्रप्रमाणतः ।
अहं तावद् गृही विप्रो ममैवेदं हि दूषणम् ॥१८८

अविज्ञातकुलाचार-जन्मशीलै र्जनैः सह ।
भक्षणञ्चैकपङ्क्तौ यद् गर्हिताचरणन्तु तत् ॥१८९

नित्यानन्द उवाच त्व मद्वैताचार्य उच्यसे ।
बाधतेऽद्वैतसिद्धान्तः शुद्धभक्तिपरम्पराम् ॥१९०

तव सिद्धान्तसङ्गे हि प्रीति र्यस्योपजायते ।
एकं वस्तु विना सोऽयं द्वितीयं नैव मन्यते ॥१९१

ईदृशेन त्वया सार्द्धं यन्ममैकत्र भोजनम् ।
न जाने तत् कथङ्कारं त्वया मे सङ्गतं मनः ॥१९२

इत्थं संलेपतु र्व्याजस्तुत्या तौ द्वौ परस्परम् ।
भर्त्सयन्ताविवान्योन्यं गालिपूर्णकटूक्तिभिः ॥१९३

नामोल्लेखेन सर्वेषां वैष्णवानां ततः प्रभुः ।
प्रसादं दापयामास तेभ्यः सिक्तं कृपामृतैः ॥१९४

भक्त्वा सर्वे समुत्तस्थुः कुर्वन्तश्च हरिध्वनिम् ।
सोऽयं हरिध्वनिः स्वर्गं मर्त्यञ्च व्याप्तवानिव ॥१९५

ततो महाप्रभुः श्रीमत्पाणिभ्यां माल्यचन्दनैः ।
सर्वान् प्रसाधयामास भक्तानेकैकशो निजान् ॥१९६

श्रीस्वरूपादयः सप्तजनास्ते परिवेशकाः ।
प्रसादं भक्षयामासु रुपविष्टा गृहान्तरे ॥१९७

गोबिन्दः स्थापयामास भुक्तशेषं महाप्रभोः ।
तस्माच्च हरिदासाय किञ्चिदन्नं ददौ पुनः ॥१९८

भक्ताः सम्प्रार्थ्य गोविन्दं किञ्चिदाददिरे ततः ।
गोविन्दस्तत् प्रसादान्नं भक्षयामास च स्वयम् ॥१९९

कृतवान् विविधाः क्रीडाः स्वतन्त्रः प्रभुरीश्वरः ।
धौति-प्रक्षालनी-नामा भवल्लीला प्रभोरियम् ॥२००

अन्येद्यु रभवन्नेत्रोत्सवो नाम महोत्सवः ।
श्रीजगन्नाथदेवस्य भक्तप्राणसमो हि सः ॥२०१

देवस्यादर्शनात् पक्षकालं लोकाः सुदुःखिताः ।
इदानीं प्रापु रानन्दं जगन्नाथस्य दर्शनात् ॥२०२

सर्वैं भक्तजनैः सार्द्धं सुखेनैव महाप्रभुः ।
ईक्षितुं श्रीजगन्नाथं प्रस्थानं कृतवां स्तदा ॥२०३

काशीश्वरोऽग्रतोऽगच्छद् वारयन् जनसङ्कटम् ।
गोविन्दः प्रययौ पश्चात् करङ्कं पाणिनावहन् ॥२०४

पुरी च भारती च द्वौ स्वामिनौ पुरतः प्रभोः ।
अद्वैतश्च स्वरूपश्च पार्श्वयोस्तस्य जग्मतुः ॥२०५

ततो भक्तजनाः सर्वे प्रभोः पश्चात् प्रतस्थिरे ।
दर्शनोत्कण्ठयागच्छन् जगन्नाथस्य मन्दिरम् ॥२०६

प्रभु र्दर्शनलोभेन मर्यादामतिलङ्घयन् ।
भोगमण्डप मासाद्य ददर्श श्रीमदाननम् ॥२०७

तृष्णार्त्त मभवन्नेत्रभृङ्गयुग्मं महाप्रभोः ।
कृष्णस्याननराजीव मपिवद् गाढतृष्णया ॥२०८

नेत्रयुग्मञ्च कृष्णस्य प्रफुल्लाम्भोजजित्वरम् ।
दीप्तं गण्डयुगं नीलमणिदर्पणकान्तिहृत् ॥२०६

जितबण्धुलपुष्पौ च सुरक्तौ दशनच्छदौ ।
तस्य सुस्मितकान्तिश्च सुधामयतरङ्गवत् ॥२१०

तस्य श्रीमुखसौन्दर्यं वर्द्धमानं प्रतिक्षणम् ।
पीयमानञ्च भक्तानां कोट्या नयनषट्पदैः ॥२११

तै र्यावच्च पपे तावत् तृष्णैव ववृधे भृशम् ।
ययु र्नान्यत्र नेत्राणि त्यक्त्वा तस्य मुखाम्बुजम् ॥२१२

एवं सर्वान् समादाय निजभक्तान् महाप्रभुः ।
मध्याह्नावधि कृष्णस्य चकाराननदर्शनम् ॥२१३

स्वेद-कम्पाश्रु-वारीणि तन्वन्त्यपि निरन्तरम् ।
दर्शनस्य प्रलोभेन प्रसह्यासौ समावृणोत् ॥२१४

मध्ये मध्येऽभवद् भोगो दर्शनञ्चान्तरान्तरा ।
भोगकालेषु देवस्य विदधे कीर्तनं प्रभुः ॥२१५

प्रभुः सर्वं विसस्मार दर्शनानन्दमोहितः ।
मध्याह्ने तं समानीय भक्ताः सर्वे समागताः ॥२१६

रथयात्रा भवेत् प्रातरिति विज्ञाय सेवकाः ।
श्रीकृष्णस्य समाजह्रु र्भोगान् द्विगुणितां स्ततः ॥२१७

गुण्डिचामार्जनीलीला संक्षेपात् कथिता मया ।
पापिनां कृष्णभक्तिः स्यात् पश्यतां शृण्वताञ्च याम् ॥२१८

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स कृष्णदास आह श्रीचैतन्यचरितामृतम् ॥२१६

इति श्रीचैतन्यचरितामृते मध्यखण्डे गुण्डिचागृहमार्जनं
नाम द्वादशः परिच्छेदः ।

मध्यलीलायां त्रयोदशः परिच्छेदः

"स जीयात् कृष्णचैतन्यः श्रीरथाग्रे ननर्त्त यः ।
येनासीज्जगतां चित्रं जगन्नाथोऽपि विस्मितः ॥१॥"
जीयाच् श्रीकृष्णचैतन्यो नित्यानन्दो जयत्यसौ । ।-
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ॥१
श्रोतारो जयतेदानीं शृणुतावहितान्तराः ।
नर्त्तनं रथयात्रायां प्रभोः परममोहनम् ॥२
अन्येद्युः सावधानेन चेतसा श्रीमहाप्रभुः ।
रात्रौ गणैः सहोत्थाय प्रातःस्नानं समाचरत् ॥३
अथ द्रष्टुमसौ पाण्डुविजयं गतवान् यदा ।
प्रतस्थे श्रीजगन्नाथ स्तदा सिंहासनं त्यजन् ॥४
स्वयं प्रतापरुद्रोऽसौ निजपात्रै रदर्शयत् ।
गणान्महाप्रभोः सर्वान् प्रस्थानविजयं तदा ॥५
भक्तैः सानन्द मद्वैतनित्यानन्दादिभिः सह ।
प्रतिष्ठमानमद्राक्षीज्जगन्नाथं महाप्रभुः ॥६
देवस्य वाहकाः सर्वे वलिष्ठा मत्तहस्तिवत् ।
धृत्वा हस्तैश्च हस्तैश्चाकारयन् विजयं प्रभोः ॥७
कतिचिद्वाहकाः स्कन्धमीश्वरस्यालालम्बिरे ।
केचिद्वा जगृहु स्तस्य श्रीमच्चरणपङ्कजे ॥८
पट्टडोरै र्दृढस्थूलै र्वद्ध्वा कटितटे प्रभुम् ।
धृत्वा चोत्थापयामासुरभितो देववाहकाः ॥९
स्थूलां स्तूलमयान् पीठान् विन्यस्येतस्ततश्च ते ।
एकत स्तूलिकापीठादन्यं निन्यु र्द्रुतं प्रभुम् ॥१०
तूलपीठाः पदाघातात् प्रभो र्जाताश्च खण्डशः ।
तेभ्यस्तूलाः समुत्पेतुः शब्दोऽभूत्तुमुलस्तदा ॥११

विश्वम्भरं जगन्नाथं कश्चालयितुमर्हति ।
विहारं कर्त्तुकामोऽसौ प्रचचाल स्वयेच्छया ॥१२
'मणिमे'ति ब्रुवन्नुच्चैर्ध्वनिं चक्रे महाप्रभुः ।
न केनापि श्रुतो नानावाद्यकोलाहलेन सः ॥१३
स्वयं प्रतापरुद्रोऽथ सेवां कर्त्तुं प्रचक्रमे ।
असौ काञ्चनमार्जन्या पन्थानं सममार्जयत् ॥१४
अभ्यषिञ्चच्च पन्थानं ततश्चन्दनवारिभिः ।
राजसिंहासनस्थोऽपि तुच्छां सेवां चकार सः ॥१५
उत्तमोऽप्याचरद् यस्मादसौ तत्तुच्छसेवनम् ।
श्रीजगन्नाथदेवस्य तस्मात् सोऽभूत् कृपास्पदम् ॥१६
पश्यंस्तस्य च तां सेवां सुखं लेभे महाप्रभुः ।
सेवयैव तया तस्मिन् कृपा जाता महाप्रभोः ॥१७
रथसज्जां समालोक्य लोका आसंश्चमत्कृताः ।
रथा हेममया नव्याः सुमेरुगिरिसन्निभाः ॥१८
शतशश्चामरश्रेष्ठै दर्पणैश्च समुज्ज्वलाः ।
शोभितोद्ध्वाः पताकाभि र्वितानैश्च सुनिर्मलैः ॥१९
किङ्किणीभिः क्वणन्तीभि र्घण्टाभिश्चावलम्बिताः ।
चित्रितैर्विविधैः पट्टवसनैश्च विभूषिताः ॥२०
आरुरोह जगन्नाथो लीलयैकतमं रथम् ।
सुभद्रा वलरामश्च द्वावन्यावधिरोहताम् ॥२१
व्याप्य पञ्चदशाहानि महालक्ष्म्या सहेश्वरः ।
अतिनिर्जनमासीनः पर्य्यक्रीड़त लीलया ॥२२
तस्याः सम्मतिमासाद्य भक्तान् सुखयितुं प्रभुः ।
तदानीं रथमारुह्य विहर्त्तुं वहिरागतः ॥२३
श्वेतवालुमयः पन्था यमुनापुलिनं यथा ।
तञ्चोभयत उद्यानश्रेणी बृन्दावनोपमा ॥२४

पथा तेन रथारूढ़ो जगन्नाथोऽगमत्तदा ।
अभितोऽसौ तथा पश्यन्नभूच्चानन्दितान्तरः ॥२५
गौड़ैराकृष्यमानास्तै र्निखिलै र्हृष्टमानसैः ।
क्षणं शीघ्रं रथाश्चेलु र्मन्दवेगेन च क्षणम् ॥२६
क्षणं तस्थु र्न चेलु श्चाकृष्यमाना वलादपि ।
ईश्वरस्येच्छया जग्मुर्न कस्यापि वलेन ते ॥२७
ततो महाप्रभु र्भक्तजनानानीय सन्निधिम् ।
प्रासाधयत् स्वहस्तेन तान् सर्व्वान्माल्यचन्दनैः ॥२८
पुरी श्रीपरमानन्दो ब्रह्मानन्दश्च भारती ।
श्रीहस्ताच्चन्दनं प्राप्य लेभाते परमां मुदम् ॥२९
प्रभु रद्वैत आचार्यो नित्यानन्दप्रभुश्च तौ ।
लब्ध्वा श्रीकरसंस्पर्शं महानन्दौ वभूवतुः ॥३०
श्रीवासश्च स्वरूपश्च येषु मुख्यतमा वुभौ ।
तेभ्यः कीर्त्तनकारिभ्यः स ददौ माल्यचन्दने ॥३१
चतुर्षु सम्प्रदायेषु चतुर्विंशतिसंख्यकाः ।
वभूवु र्गायनाश्चाष्टौ तत्र मार्दङ्गिका द्विशः ॥३२
ततो महाप्रभुस्तां स्तान् स्वयमालोच्य चेतसा ।
चतुर्भ्यः सम्प्रदायेभ्यो वण्टयामास गायनान् ॥३३
नित्यानन्दं तथाद्वैताचार्य्यञ्च हरिदासकम् ।
वक्रेश्वरञ्च नृत्याय स्वयमाज्ञपयत् प्रभुः ॥३४
प्रथमे सम्प्रदाये श्रीस्वरूपः प्रमुखः कृतः ।
अन्ये पञ्चजनास्तेन तत्सहायाः समर्पिताः ॥३५
दामोदरश्च गोविन्ददत्तो नारायण स्तथा ।
राघवः पण्डितश्चैते गोविन्दानन्दपञ्चमाः ॥३६
प्रभुणा तत्र नृत्यायाद्वैत एव न्यदिश्यत ।
सम्प्रदायान्तरे तेन श्रीवासो विहितोऽग्रिमः ॥३७

गङ्गादासः शुभानन्दः श्रीमान् श्रीरामपण्डितः ।
हरिदासश्च तत्रैते नित्यानन्दो ननर्त्त च ॥३८
मुकुन्दप्रमुख स्तेन सम्प्रदायः कृतोऽपरः ।
वासुदेवो मुरारिश्च श्रीकान्तः सेनवल्लभः ॥३९
गोपीनाथश्च पञ्चैते तत्र गानसहायकाः ।
ठाकुरो हरिदासोहि प्रभुणा तत्र नर्त्तितः ॥४०
गोविन्दघोषमुख्ये च सम्प्रदायान्तरे कृते ।
राघवो हरिदासश्च विष्णुदासश्च ते जगुः ॥४१
माधवो वासुदेवश्च घोषौ द्वौ च सहोदरौ ।
नर्त्तनं कृतवांस्तत्र श्रीवक्रेश्वरपण्डितः ॥४२
सङ्कीर्त्तनसमाजोऽन्यः कुलीनग्रामवासिनाम् ।
रामानन्दसत्यराजौ चक्रतु स्तत्र नर्त्तनम् ॥४३
शान्तिपुरस्य संघोऽन्यो य आचार्यप्रतिष्ठितः ।
तत्रान्ये च जगुः सर्वेऽच्युतानन्दो ननर्त्त च ॥४४
श्रीखण्डसम्प्रदायोऽन्यश्चकारान्यत्र कीर्त्तनम् ।
श्रीरघुनन्दनस्तत्र नृत्तौ नरहरिश्च तौ ॥४५
चत्वारः सम्प्रदायाश्च जगन्नाथस्य पूर्वतः ।
द्वौ द्वयोः पार्श्वयोस्तस्य पश्चादेकश्च ते जगुः ॥४६
चतुर्दश मृदङ्गास्तेऽवाद्यन्त गणसप्तके ।
श्रुत्वा येषां ध्वनिः जाता वैष्णवा उन्मदिष्णवः ॥४७
वैष्णवाम्बुधरै र्वर्षाडम्बरस्तत्र सूचितः ।
नयनाम्बून्यवृष्यन्त कीर्त्तनामृतधारया ॥४८
भुवनत्रय मापूर्य्य कीर्त्तनध्वनिरुत्थितः ।
नैवाश्रूयत केनापि तत्र वाद्यान्तरध्वनिः ॥४९
प्रभु र्हरिहरीत्युक्त्वा भ्राम्यन् स्थानेषु सप्तसु ।
जगन्नाथ जयेत्युक्त्वा हस्तयुग्म मुदक्षिपत् ॥५०

तत्रैका प्रभुणा शक्तिरपराहि प्रकाशिता ।
युगपद् विलसन्नासीदसौ तत्स्थानसप्तके ॥५१
सर्वैः कथितमत्रास्ते सम्प्रदाये मम प्रभुः ।
नैव स्थानान्तरं याति मय्येवानुग्रहादिति ॥५२
अचिन्त्या सा प्रभोः शक्ति र्लक्ष्या केनापि नाभवत् ।
अन्तरङ्गास्तु भक्ता ये ते विदुः शुद्धभक्तयः ॥५३
सङ्कीर्त्तनं तदाकर्ण्य जगन्नाथोऽपि नन्दितः ।
आकर्णयितुकामस्तत् तत्र स्थगितवान् रथम् ॥५४
तदा प्रतापरुद्रोऽसौ परमं विस्मयं गतः ।
दृष्ट्वा प्रेममयो राजा भवद्वैवश्य माश्रितः ॥५५
काशीमिश्रमुवाचासौ महिमानञ्च तं प्रभोः ।
न ते सीमास्ति भाग्यस्ये त्यूचे मिश्रोऽथ तं तदा ॥५६
राजा च सार्वभौमश्चान्योन्यं चक्रतुरिङ्गितम् ।
विविदुर्नापरे केऽपि श्रीचैतन्यस्य चातुरीम् ॥५७
यस्मिंस्तस्य कृपा ज्ञातुं स एव क्षमते हि तम् ।
ब्रह्माद्या अपि नार्हन्ति तं वेत्तुं तत् कृपां विना ॥५८
तुच्छसेवां कृतां राज्ञा दृष्ट्वा तुष्टमनाः प्रभुः ।
तद्रहस्यमतो राज्ञा तत्प्रसादाद्विलोकितम् ॥५९
प्रत्यक्षं दर्श्यते नात्मा परोक्षं क्रियते दया ।
इति चैतन्यचन्द्रस्य को मायां वेत्तु मर्हति ॥६०
सार्वभौमस्तथा काशीमिश्रश्च द्वौ महाशयौ ।
दृष्ट्वा राज्ञि प्रसादं तं प्रभो र्विस्मयमागतौ ॥६१
इत्येवं कृतवाँल्लीलां प्रभुस्तत्र कियच्चिरम् ।
स्वयं गायन्निजान् भक्तजनान्नर्त्तितवान् पुनः ॥६२
मूर्त्तिमेकविधां जातु दधद्बहुविधां क्वचित् ।
शक्तिं प्रकाशयामास कार्य्यस्य सदृशीं प्रभुः ॥६३

नासीदात्मानुसन्धानं लीलावेशवशात् प्रभोः ।
लीलाशक्तिः समाधत्त स्वयं ज्ञात्वा तदीप्सितम् ॥६४

पुरा रासादिकालीला यथा वृन्दावनेऽकरोत् ।
तथैवालौकिकीर्लीला गौरश्चक्रे प्रतिक्षणम् ॥६५

भक्तैरेवानुभूतास्ता नान्यैर्ज्ञाता मनागपि ।
श्रीमद्भागवतं शास्त्रं प्रमाणं तत्र वर्त्तते ॥६६

इत्येवं कृतवान्नृत्यलीलोल्लासं महाप्रभुः ।
सर्वानुत्प्लावयामास जनान् प्रेममयोर्मिभिः ॥६७

एवं बभूव कृष्णस्य रथारोहमहोत्सवः ।
स्वभक्तान्नर्त्तयामास प्रभुरेवं तदग्रतः ॥६८

श्रूयतां श्रीजगन्नाथो गुण्डिचां गतवान् यथा ।
अनृत्यच्च यथा तस्य पुरतः श्रीमहाप्रभुः ॥६९

प्रभुरेवं कियत्कालं कृतवान् कीर्त्तनोत्सवम् ।
विधाय स्वय मुद्योगं स्वांश्च भक्ताननर्त्तयत् ॥७६

स्वयं नर्त्तितु मिच्छाभूद् यदा श्रीमन्महाप्रभोः ।
सम्प्रदायाश्च ते सप्त तदैकत्र समाहृताः ॥७१

श्रीवासो हरिदासश्च गोविन्दानन्दमाधवौ ।
द्वौ गोविन्दौ मुकुन्दश्च रामाइश्च रघुस्तथा ॥७२

इत्येते नव सम्प्रयच्छः स्वरूपस्य निरूपिताः ।
तदानीं प्रभुणा नृत्यं कर्त्तुकामेन ताण्डवम् ॥७३

ततोऽगायन्नधावंश्च प्रभुणा ते जना दश ।
सम्प्रदायाश्च सर्वेऽन्ये गायन्तिस्म समन्ततः ॥७४

दण्डवत् प्रणतो भूमौ वद्धाञ्जलिपुटः प्रभुः ।
उन्मुखः स्तोतुमारेभे जगन्नाथं विलोकयन् ॥७५

"तथाहि विष्णुपुराणे प्रथमांश ऊनविंशाध्यायेऽष्टाचत्वारिंश-श्लोकस्तथा च श्रीहरिभक्तिविलासस्य तृतीयविलास एकषष्टितमाङ्कधृतमहाभारतीयश्लोकश्च—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥२॥

तथाहि पद्यावल्यामष्टाधिकशततमः मुकुन्दमालायां तृतीयश्च श्लोकः—

जयति जयति देवो देवकीनन्दनोऽसौ
जयति जयति कृष्णो वृष्णिवंशप्रदीपः।
जयति जयति मेघश्यामलः कोमलाङ्गो
जयति जयति पृथ्वीभारनाशो मुकुन्दः ॥३॥

तथाहि श्रीमद्भागवते दशमस्कन्धे नवतितमाध्यायेऽष्ट-चत्वारिंशश्लोकः—

जयति जननिवासो देवकीजन्मवादो
यदुवरपरिषत् स्वैर्दोर्भिरस्यन्नधर्मम्।
स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन
व्रजपुरवणितानां वर्द्धयन् कामदेवम् ॥४॥

तथाहि पद्यावल्यां द्वासप्ततितमः श्लोकः—

नाहं विप्रो नच नरपति र्नापि वैश्यो न शूद्रो।
नाहं वर्णी न च गृहपति र्नो वनस्थो यति र्वा।
किन्तु प्रोद्यन्निखिलपरमानन्दपूर्णामृताब्धे-
र्गोपीभर्त्तुः पदकमलयोर्दासदासानुदासः ॥५॥"

इत्येतान् वाचयन् श्लोकान् प्रणनाम पुनः प्रभुः।
ततो युक्तकरा भक्ता भगवन्तं ववन्दिरे ॥७६
प्रभुस्ताण्डवनृत्येन हुङ्कार मकरोत्तदा।
अलातचक्रवचक्रभ्रम्या पर्य्यभ्रमद्वहु ॥७७

नृत्यकालेऽपतद् यत्र यत्र पादतलं प्रभोः ।
सशैलसागरा तत्र मही पारिप्लवाभवत् ॥७८
स्तम्भ-प्रस्वेद-रोमाञ्च-वैवर्ण्य-कम्पनाश्रुभिः ।
गर्व-वैवश्य-हर्षैश्च दैन्येन प्रभुराश्रितः ॥७९
प्रस्खलच्चरणो भुमौ लुठतिस्म पतन् प्रभुः ।
लुठन्निव धरापृष्ठे कलधौतधराधरः ॥८०
नित्यानन्दप्रभु र्धावन् प्रसार्य्य द्वौ भुजौ निजौ ।
अवलम्वनदानार्थम भ्रमत् परितः प्रभुम् ॥८१
आचार्यश्च प्रभोः पश्चात् सहुङ्कारं पुनः पुनः ।
हरिं ब्रूहि हरिं ब्रूहीत्युक्त्वा पर्य्यचरन्मुहुः ॥८२
निषेद्धुं जनसंघट्टं संवृत्तं मण्डलत्रयम् ।
प्रथमे मण्डले तस्थौ नित्यानन्दो महावलः ॥८३
काशीश्वर-मुकुन्दाद्यैः सर्वै र्भक्तजनैस्ततः ।
हस्तै र्हस्तान् समालम्व्य द्वितीयं मण्डलं कृतम् ॥८४
वहिः प्रतापरुद्रोऽपि निजपात्रसमन्वितः ।
मण्डलाकारमास्थाय जनतां तां न्यवारयत् ॥८५
स हरिचन्दस्यांसे न्यस्तहस्तावलम्वनः ।
नृत्यन्तं प्रभुमद्राक्षीद्राजाविष्टमना यदा ॥८६
तदैव श्रीनिवासेन सप्रेमावेशचेतसा ।
राज्ञ एवाग्रतः स्थित्वा ददृशे नर्त्तनं प्रभोः ॥८७
श्रीनिवासं पुरो राज्ञो दृष्ट्वासौ हरिचन्दनः ।
अन्यत स्त्वं भवेत्युक्त्वा हस्तेनैव तमस्पृशत् ॥८८
नृत्यावेशवशात् किञ्चिच् श्रीनिवासो विवेद न ।
हस्तेन प्रेषितो भूयः क्रोधोन्मत्तमना अभूत् ॥८९
चपेटेन तमाहत्य वारयामास तत्क्षणात् ।
चपेटेनाहतस्तेन क्रुद्धोऽभूद्धरिचन्दनः ॥९०

स च क्रोधवशात् किञ्चित्तं वक्तुमुपचक्रमे ।
स्वयं प्रतापरुद्रस्त मेवमुक्त्वा न्यवारयत् ॥६१
भाग्येनैव करस्पर्शमस्य त्वं प्राप्तवानसि ।
हरिचन्दन धन्योऽसि दुर्भाग्यान्नाहमाप्तवान् ॥६२
अवलोक्य प्रभो नृत्यं जनाः सर्वे चमत्कृताः ।
अन्ये सन्तु जगन्नाथोऽप्यपारानन्दभागभूत् ॥६३
स्थैर्य्यं नीतो रथ स्तेन भूयो नैव ययौ पुरः ।
चक्षुर्भ्यां निर्णिमेषाभ्यां ददृशे नर्त्तनं प्रभोः ॥६४
सञ्जातो हृदयोल्लासः सुभद्रा-वलरामयोः ।
हासः श्रीमुखयोः स्फूर्त्तः पश्यतोर्नर्त्तनं द्वयोः ॥६५
विकारा अद्भुता जाताः प्रभो स्ताण्डवनर्त्तने ।
युगपत् प्रादुरासंस्ते भावा अष्टौ च सात्त्विकाः ॥६६
समांसव्रण-रोमाञ्चव्याप्तसर्वकलेवरः ।
स बभौ कण्टकाकीर्णो यथा शाल्मलिपादपः ॥६७
एकैकशश्च दन्तानां कम्पोऽभूद्भीमदर्शनः ।
पतन्ति स्खलिता दन्ता इति लोकाः शशङ्किरे ॥६८
प्रस्वेदोऽस्रवदङ्गेभ्यः शोणितस्रावसंयुतः ।
मुखा ज्जजगगेत्येव मुद्गतं गद्गदं वचः ॥६९
अवहन्नयनाश्रूणि यन्त्रोन्मुक्ताम्बुधारवत् ।
तैः सिक्ता अभवं स्तस्य पार्श्वस्थाः सकला जनाः ॥१००
गौरकान्तिः स्वतो देहो दृष्टो जातवरुणप्रभः ।
कदाचिदेव भातिस्म मल्लिकाकुसुमोपमः ॥१०१
स्तम्भेन निश्चलो जातु प्रभुर्जात्व लुठद् भुवि ।
शुष्ककाष्ठसमं हस्तपादं नैवाप्यचालयत् ॥१०२
कदाचित् पतितो भूमौ श्वासहीनोऽभवत् प्रभुः ।
तथा दृष्ट्वा च भक्तानां प्राणाः संक्षयमाप्नुवन् ॥१०३

नासानेत्राञ्जलं जातु मुखात् फेनश्च सस्रतुः ।
चन्द्रबिम्बात् सुधाधारे बहन्ती इव रेजतुः ॥१०४

शुभानन्दः समादाय फेनं तं पीतवान् मुदा ।
कृष्णप्रेमामृतोन्मत्तः स आसीत् खलु भाग्यवान् ॥१०५

एव मेव कियत्कालं कृत्वा ताण्डवनर्त्तनम् ।
प्रभु र्भावविशेषेऽथ सन्निविष्टमना अभूत् ॥१०६

त्यक्त्वा ताण्डवनृत्यं स स्वरुपं प्रभुरादिशत् ।
तस्यासौ हृद्गतं भावं ज्ञात्वा गातुं प्रचक्रमे ॥१०७

"तथाहि पदम्"

तं पुनराप्तवती हृदयेशम् ।
यस्य कृतेऽस्मि गता वत मदनदहनहुतशेषम् ॥१०८

इत्येवं ध्रुवकं प्रोच्चै र्जगौ दामोदरो यदा ।
सानन्दं मधुरं नृत्यं कृतवानीश्वरस्तदा ॥१०९

शनैः शनै र्जगन्नाथः प्रस्थातु मुपचक्रमे ।
प्रतस्थे च पुरो नृत्यन् श्रीशचीनन्दनः प्रभुः ॥११०

न्यस्तनेत्रा जगन्नाथे नृत्यन्तश्च जगु र्जनाः ।
गच्छन्नासीत् प्रभुस्तेषां पश्चात् कीर्त्तनकारिणाम् ॥१११

महाप्रभु र्जगन्नाथे मज्जयन् नेत्रचेतसी ।
श्रीकराम्बुजयुग्मेन तद्गीत मभिनीतवान् ॥११२

पश्चाज्जगाम गौरश्चेत्तदा श्यामः स्थिरोऽभवत् ।
गौरो यद्यग्रतोऽगच्छद् ययौ श्यामः शनैः शनैः ॥११३

गौरश्यामावुभावेवं कर्षतः स्म परस्परम् ।
गौराङ्गः सरथं श्यामं पुनः स्थापितवान् वली ॥११४

प्रभुरेवं मुहुर्नृत्यन् प्राप्तो भावान्तरं हृदि ।
हस्तावुत्तोलयन् श्लोकमेकमुच्चैर वाचयत् ॥११५

"तथाहि काव्यप्रकाशे प्रथमोल्लासे चतुर्थाङ्कधृतं तथा पद्यावल्यां षड़शीत्य-
धिकत्रिशताङ्कधृतं साहित्यदर्पने च (१।१०)
कस्याश्चिन्नायिकाया वचनम्—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥६॥"

वारंवार मिमं श्लोकं पपाठ श्रीमहाप्रभुः ।
विना स्वरूप मर्थोऽस्य विविदे नैव केनचित् ॥११६
इमं श्लोकमहं पूर्वं सम्यग् व्याख्यातवानिह ।
इदानी मस्य भावार्थं वितनोमि समासतः ॥११७
यथा पूर्वं कुरुक्षेत्रे सर्व्वास्ता गोपयोषितः ।
श्रीकृष्णं परिपश्यन्त्यो जाताः सानन्दमानसाः ॥११८
प्रभुर्दृष्ट्वा जगन्नाथं तथा भावाकुलोऽभवत् ।
ध्रुवकं गापयामास स च तद्भावविह्वलः ॥११९
अथान्ते राधिका कृष्णमेव मेव न्यवेदयत् ।
स एव त्वञ्च सैवाहं स एव नवसङ्गमः ॥१२०
तथापि ह्रियते वृन्दावनेन हृदयं मम ।
साम्प्रतं श्रीपदद्वन्द्वोदयं वृन्दावने कुरु ॥१२१
अय मत्र जनारण्ये हस्त्यश्वस्यन्दनध्वनिः ।
तत्रास्ते कुसुमारण्ये भृङ्गकोकिलनिस्वनः ॥१२२
अत्रायं राजवेशस्ते राजन्यैः सह संस्थितिः ।
तत्र गोपाः सखायो हि मुरलीवदनस्य ते ॥१२३
व्रजे तत्र त्वया सार्द्धं यत् सुखं स्वादितं मया ।
अत्र तस्य सुखाम्भोधेः कणिकापि न विद्यते ॥१२४

मामादाय पुनर्लीलां कुरु बृन्दावनेऽधुना ।
तर्ह्येवेयं मनोवाञ्छा मम पूर्णा भवेदिति ॥१२५

अस्ति भागवते ग्रन्थे राधिकावचनं यथा ।
सूत्रेष्वेव मया पूर्वं निखिलं वर्णितं तथा ॥१२६

भावावेशेन तेनैवापठच्छ्लोकान्तरं प्रभुः ।
नाबुध्यन्त जना स्तस्य सम्यगर्थं कथञ्चन ॥१२७

एकः स्वरूपगोस्वामी बुद्ध्वाप्यर्थं न चावदत् ।
तदर्थस्य प्रचारस्तु रूपगोस्वामिना कृतः ॥१२८

यस्यार्थं श्रीस्वरूपेन सहास्वादितवान् प्रभुः ।
वाचयामास तं श्लोकं नृत्यकाले तदा स्वयम् ॥१२९

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्यायेऽष्टाचत्वारिंश-
श्लोके श्रीकृष्णं प्रति गोपीवाक्यम्—

आहुश्च ते नलिननाभ पदारविन्दं
योगेश्वरै हृदि विचिन्त्य मगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं
गेहं युषामपि मनस्युदियात् सदा नः ॥७॥"

"अस्यार्थः-यथारागः ।"

अन्यस्यान्यविधं मनो मम मनो बृन्दावनं केवल
मेकं वेद्मि मनो वनञ्च, चरणौ तत्रैव चेन्नेष्यसि ।
मन्ये पूर्णकृपां तदा मयि श्रृणु प्राणेश सत्यार्थनां
त्वत्-सङ्गे न विना मम व्रजगृहे नो जीवनं स्थास्यति ॥१३०

योगज्ञानविधिः पुरोद्धवमुखेनोक्त स्त्वया चाधुना
साक्षादेव कृपानिधान, हृदयं जानासि मे नागर ।
वक्तुं मां न तथोचितं तव यत स्त्वत्तः स्वचित्तं वला-
दाच्छेत्तुं प्रभवामि नैव विषये यत्नान्निधितुसन्त्यपि ॥१३१

ध्यानं तामपि मां दिशन् जनगणं जेघ्नीयसे हासयन्
पात्रापात्रविवेचनास्त्यपि न ते, गोप्यो न योगेश्वराः।
ध्यायन्त्यस्तव पादपङ्कजमिमा विन्दन्ति सन्तोषणं,
कुप्यन्त्येव तु कूटकौटिलयुजा वाक्पारिपाट्येन ते ॥१३२
यासां नास्त्यनुचिन्तनं निजतनो स्तासां भवान्धुः कुत-
आत्मानं तत एव ताः क्षणमहो नोद्धर्त्तुकामाः पुनः।
घोरानङ्गतिमिङ्गिलो गिलति ता विच्छेदसिन्धोर्जले
गोपीस्ता नय तस्य पारमपरं, याचन्ति ता नापरम् ॥१३३
बृन्दारण्यपदञ्च यामुनतटं गोवर्द्धनञ्चाटवी
स्तान् कुञ्जांश्च मनोज्ञवल्लरिबृतान् रासादिलीलाश्रयान्।
तौ मातापितरौ सखीन् व्रजभुवः सर्वांश्च लोकान् कथं
सम्यग् विस्मृतवानसीति सुमहच्चित्रं विभात्येव नः ॥१३४
त्वं स्निग्धः करुणो मृदुः सुचरितो वैदग्ध्यवान् सद्गुणो
दोषाभासकणोऽपि सम्भवति नो पूते चरित्रे तव।
चित्तं ते तु तथापि यद् व्रजजनान्न स्मर्त्तुमाकाङ्क्षति
दौर्भाग्यस्य विलास एष सुतरामस्माक माभासते ॥१३५
दुःखं स्वस्य न गण्यते व्रजजनै दृष्ट्वा व्रजाधीश्वरी-
वक्त्रं किन्तु शुचा विदीर्णहृदयै स्तूष्णीमवस्थीयते।
आहो त्वं व्रजवासिनो जहि, न चेदेत्यात्र तान् जीवय
दुःखं साहयितुं कथं पुन रिमान् सञ्जीवयन् रक्षसि ॥१३६
वेशस्त्वन्यविधस्तवापरजनैः सङ्गश्च देशान्तरे
वासश्चेति न भाति सुष्ठु हृदये जातु व्रजावासिनाम्।
त्वाम प्राप्य मुमूर्षवोऽपि नहि ते त्यक्तुं क्षमन्ते व्रजं
कः पन्था व्रजवासिनां नु भविता प्राणेश निर्दिश्यताम् ॥१३७
त्वं हि प्राणधनं व्रजक्षितिपतेः साक्षादहो जीवनं
तस्य त्वं व्रजमण्डलस्य च पुनः सर्वाश्च सम्पत्तयः।

गत्वा तत्र कृपार्द्रमानस तव श्रीपादपद्मोदयं
कुर्वं स्त्वदृगतजीवनान् व्रजजनानुज्जीवय प्राणद ॥१३८
इत्याकर्ण्य स राधिकोक्तवचनं कृष्णः स्मरंस्तं व्रज-
प्रेमाणं हृतधैर्य्य-देहहृदयो भावैरभूद्व्याकुलः।
तत् प्रेम व्रजवासिनामनुभवन् मत्वाधमर्णं निजं
श्रीराधां परितर्प्य च श्रुतिसुखै र्वाक्यैः समाश्वासयत् ॥१३६
सत्यं मे वचनं शृणु प्रियतमे रात्रिन्दिवं वः स्मरन्
सिक्तोऽस्मि स्रवदस्रनिर्झरजलैः को वेत्ति दुःखं मम।
ते माता-पितृ-वन्धवो व्रजजना सर्वे मम प्राणवत्
साक्षाज्जीवनमेषु गोपवनिता स्त्वं जीवजीवोऽसि मे ॥१४०
युष्मत्प्रेमरसैर्वशोऽह मधुनाधीनोऽस्मि ते केवलं
दुर्दैवं प्रवलं विवासयति मां दूरेऽत्र सन्त्याज्य वः।
कान्ता कान्तमृते प्रियाश्च दयितः सत्यं न तौ जीवतः
श्रुत्वासौ लभते दशां मम यदीत्याशङ्क्य तौ प्राणितः ॥१४१
सैव प्रेमवती सती स च पतिः प्रेमी वियोगे हि यौ
मन्वानौ स्वसुखं तृणं हितसुखे कान्तार्थ माकाङ्क्षतः।
तौ द्वौ सम्मिलतोऽचिरादिति मया त्वज्जीवनं रक्षितुं
भक्त्यैकान्तिकचेतसा प्रतिदिनं नारायणः सेव्यते ॥१४२
तच्छक्त्याहमिह त्वया सह मिलन् संक्रीड्य च प्रत्यहं
भूयो द्वारवतीं प्रयामि मनुषे भावोदितं त्वं तु माम्।
मद्भाग्यान्मयि ते परोऽतिवलवान् प्रेमा रहो मां नयन्
क्रीड़ां कारयति त्वया प्रकटतां शीघ्रं स नौ नेष्यति ॥१४३
दुष्टाः कंससखा हता यदुकुलामित्रा मया शेषतो
हत्वैतानिह जीवितां स्त्रिचतुरान् वृन्दावनं यास्यते।
शत्रुभ्यो व्रजवासिनोऽवितु मुदासीनोऽस्मि राज्ये त्विह
यन्मे स्त्रीसुतवित्तराज्यवरणं तुष्ट्यै यदूनां हि तत् ॥१४४

मां ते प्रेमगुणस्तु कर्षति सदा बृन्दावनं मामितो
नेष्यत्येव पुनर्दिनैश्च दशभि र्वा विंशकै र्निश्चितम् ।
तत्रागत्य दिवानिशं व्रजपुरी-सीमन्तिनीभिः पुन
र्युष्माभिः प्रियकेलिभिः परिवृतोलीलां विधास्याम्यहम् ॥१४५
इत्येवं कथयन् व्रजं जिगमिषुः कृष्णः स्वयं वाचय-
न्नेकं श्लोकमनुत्तमं प्रियतमामाश्रावयद्राधिकाम् ।
तं श्रुत्वैव विखण्डिताखिलमहावाधा च राधा ततः
कृष्णः प्राप्त इति प्रतीति मगमन्निःसंशयां तत्क्षणात् ॥१४६

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्व्यशीतितमाध्याये
चतुश्चत्वारिंशश्लोके गोपीः प्रति श्रीकृष्णवाक्यम्—
मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ।
दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥८॥"

इति श्लोकसमूहस्य स्वरूपेन समं प्रभुः ।
अर्थमास्वादयामास गृहे स्थित्वा दिवानिशम् ॥१४७
तद्भावेन समाविष्टो नृत्यकाले महाप्रभुः ।
जगन्नाथमुखं दृष्ट्वा नृत्यन् श्लोकानवाचयत् ॥१४८
गोस्वामिनः स्वरूपस्य सौभाग्यं वर्णनातिगम् ।
यस्य कायमनोवाचः समाविष्टा महाप्रभौ ॥१४९
इन्द्रियेषु स्वरूपस्य स्वेन्द्रियाणि महाप्रभोः ।
आविष्टान्येव कुर्वन्ति सङ्गीतास्वादनं तदा ॥१५०
भावाविष्टः प्रभु र्जातु समासीनो धरातले ।
अवाचीनमुखाम्भोजस्तर्जन्या व्यलिखद् भुवम् ॥१५१
सम्भवेत् क्षत मङ्गुल्यामित्याशङ्क्य प्रभोः करः ।
दामोदरस्वरूपेन स्वकरेण निवारितः ॥१५२
स्वरूपस्य च सङ्गीतं प्रभोर्भावानुसङ्गतम् ।
यदाभूत्तस्य यो भावश्चक्रे मूर्त्तं स तद्रसम् ॥१५३

श्रीजगन्नाथदेवस्य तदा श्रीमन्मुखाम्बुजम् ।
नेत्रयोर्युगलं तत्र दीप्यमानं मनोहरम् ॥१५४
भानोः किरणपातेन जाज्वल्यमान माननम् ।
माल्यवस्त्रानि दिव्यानि भूषणानि च भूरिशः ॥१५५
दृष्ट्वानन्दाब्धिरुद्वेलो वभूव हृदये प्रभोः ।
झञ्झावात इवोन्मादः सपद्येव समुत्थितः ॥१५६
आनन्दोन्मादवातेनोत्थापिता भाववीचयः ।
बहुभिर्भावसैन्यैश्च युद्धलीला प्यजायत ॥१५७
भावाना मुदयः शान्तिः सन्धिः शवलता तथा ।
स्वभावप्रवला भावाः स्थायि-सञ्चारि-सात्त्विकाः ॥१५८
एते सर्वे प्रभो र्देहे शुद्धकाञ्चनपर्वते ।
बभूवुः पुष्पिता नूनं भावपुष्पमहीरुहाः ॥१५९
दर्शनाय प्रभो र्लोका आसन्नाकृष्टचेतसः ।
स सर्वेषां मनोऽसिञ्चत् प्रेमपीयूषवर्षणैः ॥१६०
यावन्तो राजपात्राश्च श्रीजगन्नाथसेवकाः ।
नीलाद्रिबासिनो लोका आगता यात्रिकाश्च ये ॥१६१
प्रभोस्ते प्रेमनृत्यञ्च दृष्ट्वा सर्वे चमत्कृताः ।
कृष्णप्रेमोपजातश्च सर्वेषां हृदये तदा ॥१६२
नृत्यन्तस्ते जगुः प्रेम्ना चक्रुः कोलाहलं जनाः ।
व्यदधु र्यात्रिणो नृत्यै मङ्गलं तच्चतुर्गुणम् ॥१६३
अन्येषां का कथा साक्षाज्जगन्नाथहलायुधौ ।
प्रभोर्नृत्यञ्च पश्यन्तौ चेलतुः सुखमन्थरम् ॥१६४
स्थापयित्वा रथं जातु नृत्यं ददृशतुः सुखम् ।
कौतुकं तदपश्यन् ये तेऽभवंस्तत्र साक्षिणः ॥१६५
एवं नृत्यन् प्रभुस्तत्र परिभ्राम्यन्नितस्ततः ।
पुरः प्रतापरुद्रस्य बभूवासौ पतन्निव ॥१६६

ततः प्रतापरुद्रेण गृहीतोऽसौ ससम्भ्रमम् ।
तदा तमवलोक्यैव वाह्यसंज्ञोऽभवत् प्रभुः ॥१६७
राजान मवलोक्यासौ धिक्कारं कृतवान् प्रभुः ।
धिग् धिग् विषयिणा स्पर्शो मम जात इति ब्रुवन् ॥१६८
भावावेशात्तदा नित्यानन्दोऽनवहितोऽभवत् ।
गोविन्दप्रमुखाः काशीश्वरश्चान्यत्र संस्थिताः ॥१६६
राज्ञो हड्डिपवन्नीचसेवां दृष्ट्वा प्रभुः स्वयम् ।
प्रसन्नमानस स्तेन कामयामास सङ्गमम् ॥१७०
तथापि स्वगणस्यैवावधानाय महाप्रभुः ।
रोषाभासं वहिः कञ्चिद्दर्शयामास तादृशम् ॥१७१
प्रभोस्तादृशवाक्येन राजा भीतमना अभूत् ।
स चोक्तः सार्वभौमेन संशयं मा कृथा नृप ॥१७२
सुप्रसन्नं प्रभोश्चित्तं त्वयीति प्रतिभाति मे ।
एष त्वामुपलक्ष्यैव स्वकान् शिक्षयति प्रभुः ॥१७३
विज्ञातावसरस्तेऽहं करिष्यामि निवेदनम् ।
तदैव प्रभुणा सार्द्धं सम्मेलिष्यसि सर्वथा ॥१७४
अथ प्रदक्षिणीकृत्य रथं तत्र महाप्रभुः ।
शिरसा प्रेरयामास पश्चाद् गत्वा रथस्य च ॥१७५
प्रेर्य्यमाणो रथोऽधावत् सशब्दं प्रभुणा ततः ।
सर्वे हरि हरी त्यूचु र्जनाः प्रोच्चैः समन्ततः ॥१७६
निजभक्तजनैः सार्द्धं तदा श्रीमन्महाप्रभुः ।
लीलया च ननर्त्ताग्रे सुभद्राबलरामयोः ॥१७७
तत्र कृत्वा कियन्नृत्यं जगन्नाथाग्रमागतः ।
तत्रासौ नर्त्तनं कुर्वन् प्रस्थानमकरोत् प्रभुः ॥१७८
वलगण्डिपथं प्रापदेवमेव चलन् रथः ।
तं संस्थाप्य जगन्नाथो ददर्शोभयपार्श्वतः ॥१७६

नारिकेलवनं वामे तत्रासीद्विप्रशासनम् ।
दक्षिणे कुसुमोद्यानं यथा वृन्दावनं नवम् ॥१८०
अनृत्यत् पुरतो गौरः सर्वभक्तजनैः सह ।
स्थापयित्वा रथं तत्र जगन्नाथो व्यलोकत ॥१८१
तत्रस्थाने भवेद् भोगो नियमोऽस्ति सनातनः ।
भोगकोटिं जगन्नाथस्तत्रास्वादयति ध्रुवम् ॥१८२
जगन्नाथस्य ये भक्ता उत्तमा अधमा अपि ।
सर्वे स्वकल्पितान् भोगानर्पयन्ति पृथक् पृथक् ॥१८३
राजा राजमहिष्यश्च पात्रमित्रगणास्तथा ।
उत्तमाधममध्याश्च नीलाचलनिवासिनः ॥१८४
अनेकदेशवास्तव्या देशसंस्थाश्च यात्रिकाः ।
निवेदयन्ति सर्वे ते भोगान् स्वान् स्वान् पृथक् पृथक् ॥१८५
पार्श्वयोः पुरतः पश्चादुद्यानाभ्यन्तरे वने ।
नियमेन विना भोगानुत्सृजन्ति ततस्ततः ॥१८६
भोगप्रदानकालेऽथ महती जनता भवत् ।
तां दृष्ट्वा नर्त्तनं त्यक्त्वोपवनं गतवान् प्रभुः ॥१८७
प्रेमावेशात् समासाद्य तत्रोद्यानं महाप्रभुः ।
तदुद्यानगृहालिन्दे शयानः समतिष्ठत ॥१८८
नर्त्तनश्रमजातेन घर्मेणाप्लुतविग्रहः ।
सुगन्धं शीतलं तत्र प्रभुर्वायु मसेवत ॥१८९
तदुद्यानगताः सर्वे भक्ताः कीर्त्तनकारिणः ।
प्रतिवृक्षतलासीना विश्रामं जगृहु स्तदा ॥१९०
इत्येतत् कथितं तावन्महासङ्कीर्त्तनं मया ।
नर्त्तनञ्च यथा चक्रे जगन्नाथाग्रतः प्रभुः ॥१९१
वर्णितो नृत्यविस्तारो रथस्याग्रे महाप्रभोः ।
रूपगोस्वामिना स्तोत्रे चैतन्याष्टकनामके ॥१९२

"तथाहि स्तवमालायां श्रीचैतन्यदेवस्तवे सप्तमश्लोके
श्रीरूपगोस्वामिवाक्यम्—

रथारूढ़स्यारादधिपदवि नीलाचलपते-
रदभ्रप्रेमोर्मिस्फुरितनटनोल्लासविवशः ।
सहर्षं गायद्भिः परिबृततनु वैंष्णवजनैः
स चैतन्यः किं मे पुनरपि दृशो र्यास्यति पदम् ॥६॥"

अस्य श्रोता लभेतैव श्रीचैतन्यपदाश्रयम् ।
प्रेमभक्ति र्भवेच्चास्य द्रढिष्ठश्रद्धयान्विता ॥१६३
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचेतन्यचरितामृतम् ॥१६४

इति श्रीचैतन्यचरितामृते मध्यखण्डे रथाग्रे नर्त्तनं नाम
त्रयोदशः परिच्छेदः ।

—o—

मध्यलीलायां चतुर्दशः परिच्छेदः

"गौरः पश्यन्नात्मबृन्दैः श्रीलक्ष्मीविजयोत्सवम् ।
श्रुत्वा गोपीरसोल्लासं हृष्टः प्रेम्ना ननर्त्त सः ॥१॥"

जीयाच् श्रीकृष्णचैतन्यो जीयाच् श्रीगौरचन्द्रमाः ।
नित्यानन्दो मुहुर्जीयाद्धन्योऽद्वैतो जयत्वसौ ॥१
श्रीवासाद्या स्तथा भक्ता जीयासु गौड़वासिनः ।
श्रोतारो विजयन्तां ते गौरप्राणधना हि ये ॥२
अथ तत्र तथा प्रेमाविष्टे विश्राम्यति प्रभौ ।
राजा प्रतापरुद्रोऽसौ तत्रागत्य प्रविष्टवान् ॥३
सार्वभौमोपदेशेन राजवेशं परित्यजन् ।
वैष्णवार्हेण वेशेन तत्रैकाकी समागतः ॥४

लब्ध्वाज्ञां सर्वभक्तानां कृताञ्जलिपुटस्ततः ।
हृदि साहसमालम्ब्यापतद्धृत्वा प्रभोः पदम् ॥५
प्रेम्णा मीलितनेत्रस्य शयानस्य भुवि प्रभोः ।
पादौ संबाहयामास नैपुण्येन स भूपतिः ॥६
अस्तौषीद्रासलीलायाः श्लोकांस्तांस्तांश्च वाचयन् ।
'जयति तेऽधिक' मित्यादि मध्यायमुपचक्रमे ॥७
शृण्वन्नेव प्रभुः श्लोकान् सन्तोषं परमं ययौ ।
ब्रूहि ब्रूहीति वाचं स वारंवारं तमब्रवीत् ॥८
तव कथामृतेत्यादिश्लोकं यावन्नृपोऽपठत् ।
प्रेमावेशात् प्रभुस्तावदुत्थायाश्लिष्यदेव तम् ॥९
भवानमूल्यरत्नानि मह्यं भूरीणि दत्तवान् ।
देयं नास्ति मया किञ्चिद् दत्तमालिङ्गनं ततः ॥१०
इत्युक्त्वा प्रभुणा श्लोके पठ्यमाने पुनः पुनः ।
कम्पोऽङ्गेषु द्वयोरेव नेत्रेभ्यश्चाश्रुनिर्झरः ॥११

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकत्रिंशाध्याये नवम-
श्लोके श्रीकृष्णमुद्दिश्य गोपीवाक्यम्—

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ॥२॥"

तच्चालिङ्गितवानुक्त्वा भूरिदा भूरिदा इति ।
न विवेद प्रभुः किञ्चिज्जनोऽयं को भवेदिति ॥१२
तुच्छसेवां पुरा दृष्ट्वा तस्मिन् जातकृपः प्रभुः ।
विना तदनुसन्धानं प्रसादं कृतवानिह ॥१३
चैतन्यस्य कृपा कीदृग् वलिष्ठेति निरीक्ष्यताम् ।
अन्तरेणानुसन्धानं कृतार्थयति सा जनम् ॥१४
प्रभुणोक्तमये कस्त्वं कृतवानसि मे हितम् ।
पाययस्येत्य मां सद्यः कृष्णलीलासुधामिति ॥१५

राज्ञोक्तं तव दासानामहं दासोऽस्मि सर्वथा ।
भृत्यानां कुरु भृत्यं मामित्याशंसे महाप्रभो ॥१६

ततो महाप्रभुस्तस्मै स्वमैश्वर्य्यमदर्शयत् ।
मा प्रकाशय कस्मैचिदिति तञ्च न्यवारयत् ॥१७

अयं राजेत्यभिज्ञानं प्रभुणा न प्रकाशितम् ।
औदासीन्यं गृहीतञ्च जानताप्यखिलं हृदि ॥१८

भाग्यं प्रताएरुद्रस्य दृष्ट्वा भक्तजनास्तदा ।
प्रशंसन्ति स्म राजानं सर्वे सानन्दचेतसा ॥१६

अथ राजा प्रभुं नत्वा दण्डवद् वहिरागतः ।
वद्धाञ्जलिपुटः सर्वांस्ततो भक्तानवन्दत ॥२०

प्रभौ भक्तजनैः सार्द्धं कृतमाध्याह्निकक्रिये ।
तत्र प्रसादमादाय वाणीनाथः समाययौ ॥२१

तत्रैवं सार्वभौमेण रामानन्देन चाधिकान् ।
प्रसादान् प्रेरयामास वाणीनाथेन भूपतिः ॥२२

बलगण्डिस्थभोगस्य प्रसादा बहुधोत्तमाः ।
अरन्धिताः प्रसादाश्च संख्यातीताः समागताः ॥२३

आमिक्षा पानकं पारेवताम्र-पनसानि च ।
नारिकेलानि रम्भाश्च विविधास्तालशस्यकम् ॥२४

छोहारा मधुजम्वीरं वीजपूराण्यनेकधा ।
द्राक्षा-वदाम-नारङ्ग-पिण्डखर्जूरकाणि च ॥२५

मनोहरादिनामानो लड्डुकाः शतशो-विधाः ।
अमृतगुटिकाद्याश्च बहुधा क्षीरकूर्चिकाः ॥२६

आमिक्षा-वटकर्पूरकेली चामृतमण्डिका ।
सरामृतानि सम्भृष्टसराश्च सरपूरिकाः ॥२७

हरिवल्लभ-सेवत्यौ तथा कर्पूरमालती ।
दाड़िम्वान्यमृतीखण्डचक्रमरीचलड्डुकाः ॥२८

खाजाः पद्मसिताः खण्डसाराश्च चन्द्रकान्तयः ।
व्रैहेय्यः कदमाः पूपास्तिलमय्योऽप्यनेकधा ॥२६
आम्रच्छोलङ्गनारङ्गवृक्षाणां सममूर्त्तयः ।
नानाखण्डविकाराश्च फलपल्लवपुष्पिणाम् ॥३०
रसाला दधिदुग्धञ्च तक्रं शिखरिणी तथा ।
सैन्धवाक्ताश्च मुद्गानामङ्कुरा आर्द्रकाणि च ॥३१
खण्डितान्यम्ललेहाश्च निम्बूकबदरादिजाः ।
प्रसादानां प्रकारास्ते शक्यन्ते नैव लेखितुम् ॥३२
उद्यानस्यार्द्धभागश्च प्रसादैः पूरितोऽभवत् ।
दृष्ट्वा जायत सन्तोषो मनसि श्रीमहाप्रभोः ॥३३
भुङ्क्ते श्रीमज्जगन्नाथो भोगानेवंविधानिति ।
सुखेनानेन सन्तृप्ते प्रभो नैत्रे बभूवतुः ॥३४
पञ्चषाः केतकीपत्रद्रोणीभाराः समागताः ।
एकैकस्य दशाद्रोण्यो भाजनायावकल्पिताः ॥३५
गौररायस्तु विज्ञाय श्रमं कीर्त्तनकारिणाम् ।
सर्वान् भोजयितुं तांश्च धावमानमना अभूत् ॥३६
पङ्क्तिक्रमेण तान् सर्वान् स भक्तानुपवेशयन् ।
स्वयमेव तदारेभेऽनुष्ठातुं परिवेशनम् ॥३७
अभुञ्जाने प्रभौ कश्चिद् यदा तत्र न भुक्तवान् ।
तदा स्वरूपगोस्वामी प्रभुमेवं न्यवेदयत् ॥३८
भोक्तुमध्यास्यतामग्रे भवतैव महाप्रभो ।
कश्चिद् भक्त्यभुञ्जाने न भोक्तुं शक्नुयादिति ॥३९
तदा भक्तान् समादाय समासीनो महाप्रभुः ।
आकण्ठं पूरयित्वा तां स्तत्र सर्वानभोजयत् ॥४०
समाप्य भोजनं तेष्वाचान्तेषूपविशत्सु च ।
ततः प्रसादमुद्वृत्तं सहस्रं बुभुजे नृणाम् ॥४१

गोविन्दः प्रभुणाज्ञतो दीनान् हीनांश्च दुःखितान् ।
अकिञ्चनांस्तथाहूय प्रसादांस्तानभोजयत् ॥४२
गौराङ्गो भोजनोल्लासं दरिद्राणां विलोकयन् ।
सर्वान् हरिं वदेत्युक्त्वा तांस्तानुपदिदेश च ॥४३
ते ते हरिं वदेत्युक्त्वा वभूवुः प्रेमसंप्लुताः ।
एवमेवाद्भुता लीला गौराङ्गः कृतवांस्तदा ॥४४
पुनश्चलनकालेऽथ जगन्नाथरथस्य तु ।
गौड़ैराकृष्यमाणोऽपि न चचालाग्रतो रथः ॥४५
अशक्नुवन्त आक्रष्टुं रथं गौड़ा यदात्यजन् ।
पात्रमित्राणि चादाय राजा व्यग्रतया ययौ ॥४६
आदिदेश महामल्लान् रथं चालयितुं नृपः ।
संलग्नोऽपि स्वयं क्रष्टुं रथं नैव शशाक सः ॥४७
आनाय्य व्याकुलो राजा स्वकीयान्मत्तहस्तिनः ।
रथं चालयितुं तत्र योजयामास तेन तान् ॥४८
कर्षत्स्वपि यथाशक्ति तं रथं मत्तहस्तिषु ।
न चचाल पदञ्चैकं रथोऽवातिष्ठताचलः ॥४९
तच् श्रुत्वा स्वगणं गृह्य स्तत्रायातो महाप्रभुः ।
तिष्ठन्ददर्श तान् मत्तान् हस्तिनः कर्षतो रथम् ॥५०
उच्चकैर्गर्जनं चक्रुरङ्कुशैराहता गजाः ।
न चचाल रथो लोका हाहाकारञ्च चुक्रुशुः ॥५१
ततो महाप्रभुः सर्वान् मोचयामास तान् गजान् ।
स्वगणान् रथरज्जूनां कर्षणार्थं दिदेश च ॥५२
स्वयं पश्चात् स्थितो मूर्द्ध्ना प्रेरयामास तं रथम् ।
ततः शब्दायमानोऽसौ रथो धावंश्चचाल च ॥५३
जग्मुर्भक्तजना रज्जूरवलम्ब्यैव पाणिभिः ।
रथोऽगच्छत् स्वयं नैवाकर्षणीयोऽभवत्तदा ॥५४

सानन्दं कृतवन्तस्ते जना जयजयध्वनिम् ।
न श्रुतोऽन्यो जगन्नाथ जयेत्युक्तिं विना ध्वनिः ॥५५
रथो निमेषमात्रेण गुण्डिचाद्वारमागतः ।
चैतन्यस्य प्रभावेण जनाः सर्वे च विस्मिताः ॥५६
जय श्रीकृष्णचैतन्य गौरचन्द्र जयेति ते ।
इत्थं कोलाहलं चक्रु र्धन्यम्मन्या जनास्तदा ॥५७
दृष्ट्वा प्रतापरुद्रस्तत् पात्रमित्रगणैः सह ।
महिमानं प्रभोर्बुद्ध्वा प्रेम्णाङ्गस्फीतिमाययौ ॥५८
श्रीपाण्डुविजयं चक्रुः सेवकास्तदनन्तरम् ।
निजं सिंहासनं प्राप्य जगन्नाथ उपाविशत् ॥५९
सुभद्रा वलरामश्च स्वं स्वं सिंहासनं गतौ ।
आरेभाते जगन्नाथदेवस्य स्नानभोजने ॥६०
निजभक्तान् समादाय चत्वरे श्रीमहाप्रभुः ।
सानन्दं कर्त्तुमारेभे नर्त्तनं कीर्त्तनं ततः ॥६१
आनन्देन प्रभोः प्रेमा यात उद्वेलतामिति ।
दृष्ट्वा तत्र जनाः सर्वेऽप्लवन्त प्रेमसागरे ॥६२
एवं नृत्यन् प्रभुः सायं पश्यंश्चारात्रिकं ततः ।
जात्युद्यानं समासाद्य विश्रामं कृतवान् पुनः ॥६३
अथाद्वैतादिभि र्भक्तैः प्रभोरामन्त्रणं कृतम् ।
मुख्या नव जना एव दिनानि नव लेभिरे ॥६४
यावद्भिर्दिवसैश्चातुर्मास्यमेकैकशश्च तान् ।
दिवसान् वण्टयामासुरपरे भक्तसज्जनाः ॥६५
चातुर्मास्यदिनान्येवं मुख्यभक्ता व्यभाजयन् ।
अन्ये भक्तजना नैव प्राप्ता अवसरं पुनः ॥६६
मिलितैः प्रभुरेकाहं द्वित्रैर्भक्तैर्न्यमन्त्र्यत ।
एवं निमन्त्रणाकेलि र्बभूव श्रीमहाप्रभोः ॥६७

प्रातरुत्थाय च स्नात्वा स जगन्नाथमैक्षत ।
ततो भक्तजनैः सार्द्धं चक्रे कीर्त्तननर्त्तने ॥६८
अद्वैतं नर्त्तयन् जातु नित्यानन्दं कदाचन ।
कदाचिदच्युतानन्दं हरिदासं कदापि वा ॥६६
जातु वक्रेश्वरञ्चान्यानपि भक्तान् कदाचन ।
त्रिसन्ध्यं कीर्त्तनं चक्रे गुण्डिचाप्राङ्गणे प्रभुः ॥७०
कृष्णो वृन्दावनं प्राप्त इत्थं जाता मतिः प्रभोः ।
कृष्णस्य विरहस्फूर्त्तिरवसानं गता तदा ॥७१
समं राधिकया कृष्णलीलेति ज्ञातवान् प्रभुः ।
स्वयं मग्नस्तदैवासीत्तस्मिन् प्रेमरसाम्बुधौ ॥७२
उद्यानेष्वाचरद् बृन्दावनलीलां गणैः सह ।
चकारासौ जलक्रीड़ामिन्द्रद्युम्नसरोवरे ॥७३
असिञ्चत् सकलान् भक्तान् स्वयंक्षिप्तेन वारिणा ।
भक्तास्तं सिषिचुः सर्वे वेष्टमानाः समन्ततः ॥७४
जात्वेकं मण्डलं कृत्वा कदाचिद्वा बहून्यपि ।
जलमण्डूकवाद्यं ते चक्रुः करतलेन च ॥७५
व्यापृतौ जलयुद्धेन द्वौ द्वौ भक्तौ परस्परम् ।
केऽपि जिग्युर्जिताः केचिदित्यैक्षत महाप्रभुः ॥७६
नित्यानन्द स्तथाद्वैतोऽन्योन्यं चिक्षिपतुर्जलम् ।
आचार्यस्तु जितः पश्चात्तं शशाप कटूक्तिभिः ॥७७
स्वरूपेण जलक्रीड़ां चक्रे विद्यानिधिस्तदा ।
चक्रतु र्जलकेलिञ्च गुप्तदत्तौ परस्परम् ॥७८
श्रीवासेन जलक्रीड़ामकरोच्च गदाधरः ।
तथा चिक्रीड़तु र्वक्रेश्वरराघवपण्डितौ ॥७६
अक्रीड़त् सार्वभौमेण रामानन्दो जलं क्षिपन् ।
तौ द्वौ प्रनष्टगाम्भीर्यौ शिशुभावं समाश्रितौ ॥८०

तयो र्विलोक्य चापल्य मेवं तत्र महाप्रभुः ।
श्रीगोपीनाथ माचार्य्यं किञ्चिदूचे हसंस्तदा ॥८१
गम्भीरौ पण्डितौ प्रामाणिकावेतौ जनावुभौ ।
कुरुतो बालचापल्यं वारय त्व मिमाविति ॥८२
गोपीनाथः प्रतिप्रोचे करुणासागरस्तव ।
यदैवोद्वेलतां याति तस्यैकेनापि विन्दुना ॥८३
पर्वतावपि मज्ज्येते सर्वथा मेरुमन्दरौ ।
अनयोस्तु कथा कैव क्षुद्रयोर्गण्डशैलयोः ॥८४
शुष्कतर्कखलिं भुक्त्वा व्ययितं येन जीवनम् ।
त्वया लीलामृतं सोऽपि पाय्यतेऽहो कृपा तव ॥८५
हसित्वाथ प्रभुस्तत्राद्वैताचार्य्यं समानयत् ।
तं जलोपरि संस्थाप्य शेषशय्या मकल्पयत् ॥८६
स्वयं तस्योपरि स्थित्वा चकार शयनं प्रभुः ।
तदा प्रकाशयामास लीलां श्रीशेषशायिनः ॥८७
श्रीमानद्वैत आचार्य्यो निजां शक्तिं प्रकाशयन् ।
सलिले प्रभुमादाय प्लवमानोऽ भ्रमत्तदा ॥८८
एवमेव जलक्रीड़ा मनुष्ठाय कियच्चिरम् ।
प्रभुर्भक्तान् गृहीत्वा च जात्युदानं समागतः ॥८९
ये पुरी-भारतीमुख्या निखिला भक्तसत्तमाः ।
तत्र ते भोजनं चक्रु राचार्य्येण निमन्त्रिताः ॥९०
प्रसादान् यावतो वाणीनाथस्तत्र समानयत् ।
तावन्तो भक्षिता नूनं भक्तवृन्दै र्महाप्रभोः ॥९१
अपराह्णे प्रभुर्गत्वा देवं दृष्ट्वा च नृत्तवान् ।
तत उद्यान मागत्य शयनं कृतवान्निशि ॥९२
अन्येद्युः प्रभु रागत्य कुर्वन्नीश्वरदर्शनम् ।
प्राङ्गणे नृत्यगीतानि कृतवांश्च कियच्चिरम् ॥९३

पुनर्भक्तजनैः सार्द्ध मुद्यानं तत आगतः ।
बृन्दावनविहारेण भक्तैस्तै र्व्यलसत् प्रभुः ॥९४
अभवन् प्रभुमालोक्य बृक्षा वल्ल्यश्च पुष्पिताः ।
जगुः कोकिलभृङ्गाश्च शीतलः पवनोऽवहत् ॥९५
प्रतिबृक्षलतं गत्वा नर्त्तनं कृतवान् प्रभुः ।
एकाकी वासुदेवो हि दत्तो गानं चकार च ॥९६
स एकैकं जगौ गीत मेकैकस्य तरोस्तले ।
एकाकी परमावेशाद् गौराङ्गो नृत्यमाचरत् ॥९७
नर्त्तनाय ततो वक्रेश्वर मादिष्टवान् प्रभुः ।
तस्मिन्नृत्यत्यसौ गातुमारेभे च स्वयं प्रभुः ॥९८
तेन सार्द्धं स्वरूपाद्या जगुः कीर्त्तनकारिणः ।
दिग्विदिग्ज्ञानहीनास्ते बभू वुः प्रेमवन्यया ॥९९
एवमेव कियत्कालं वनलीलां समाचरन् ।
ययौ कर्त्तुं जलक्रीड़ां स नरेन्द्रसरोवरे ॥१००
समापितजलक्रीड़ः पुनरुद्यान मागतः ।
चक्रे भोजनलीलाञ्च प्रभु र्भक्तजनैः समम् ॥१०१
जगन्नाथे नवाहानि गुण्डिचाया मवस्थिते ।
इत्थं महाप्रभु र्लीलां भक्तैः सार्द्धं चकार च ॥१०२
पुष्पारामे जगन्नाथवल्लभाख्ये महत्यसौ ।
प्रभुस्तानि नवाहानि तत्र विश्राममग्रहीत् ॥१०३
पञ्चमीं तिथिमासन्नां होराख्यामवगच्छता ।
राज्ञा विज्ञापितः काशीमिश्रः सादरचेतसा ॥१०४
श्वो लक्ष्मीविजयो होरापञ्चम्यां भवितेत्यतः ।
उत्सव स्तादृशः कार्यो यादृशो जातु नाभवत् ॥१०५
सम्भाराणां विशेषोऽत्र तथाहार्य्यो महोत्सवे ।
गमिष्यति चमत्कारं यथा दृष्ट्वा महाप्रभुः ॥१०६

जगन्नाथस्य भाण्डारं भाण्डारञ्च तथा मम ।
मण्ड्येतां चित्रवासोभिः किङ्किनीच्छत्रचामरैः ॥१०७
घण्टाभिश्च क्वनन्तीभिः पताकाभिर्ध्वजैस्तथा ।
नानावादित्रनृत्यैश्च दोलिकापि सुसज्ज्यताम् ॥१०८
द्विगुणीक्रियतां सर्वोपहाराणाञ्च संहतिः ।
यथास्या रथयात्राया अप्याधत्ते चमत्कृतिम् ॥१०९
तथैव क्रियतां भक्तान् यथादाय महाप्रभुः ।
स्वच्छन्देन समागत्य कुर्य्यादीश्वरदर्शनम् ॥११०
प्रभातेऽथ स्वभक्तानां गण मादाय च प्रभुः ।
सुन्दराचल मागत्य श्रीजगन्नाथ मैक्षत ॥१११
पुन र्भक्तजनैः सार्द्धं स नीलाचलमागतः ।
द्रष्टुमुत्कण्ठितो होरापञ्चम्यास्तं महोत्सवम् ॥११२
काशीमिश्रस्तदा बह्वादरसम्भृतचेतसा ।
प्रभु मध्यासयामासोत्तमस्थानं गणैः सह ॥११३
प्रभू रसविशेषाणामास्वादाय समुत्सुकः ।
स्वरूपं परिपप्रच्छ स्मयमानमुखाम्बुजः ॥११४
द्वारकायां विहारेऽस्मिन् जगन्नाथस्य यद्यपि ।
वर्त्तते परमौदार्य्यं सुप्रकाशं स्वभावतः ॥११५
वर्षमध्ये तथाप्यस्य सकृच्चेतसि जायते ।
द्रष्टुं वृन्दावनं रम्य माकाङ्क्षा वलवत्तमा ॥११६
एता उपवनश्रेण्यो वृन्दावनसमा इति ।
भवतीच्चितु मप्येताः सोत्कण्ठहृदयः प्रभुः ॥११७
रथयात्राच्छलं तस्माद् बाह्यदृष्ट्या करोत्यसौ ।
नीलाचलं परित्यज्य यात्यतः सुन्दराचलम् ॥११८
पुष्पोद्यानेष्वनेकेषु क्रीड़न्नपि दिवानिशम् ।
लक्ष्मीदेवीं न गृह्णाति स कस्मादात्मना सह ॥११९

प्रत्युवाच स्वरूपस्तं प्रभो तत्कारणं शृणु ।
श्रीवृन्दावनलीलासु नाधिकारो भवेच् श्रियाः ॥१२०
तासु लीलासु कृष्णस्य सहायाः स्यु र्व्रजाङ्गनाः ।
विना ताभि र्मनोहर्त्तुं तस्य शक्नोति कापि न ॥१२१
पृष्टोऽसौ प्रभुणा यात्राच्छलात् कृष्णः प्रतिष्ठते ।
सुभद्रावलरामौ द्वौ सहितौ तेन गच्छतः ॥१२२
गोपीभिः कुरुते लीलाः सर्वेषूपवनेष्वसौ ।
गूढ़ः कृष्णस्य भावोऽयं ज्ञायते नैव केनचित् ॥१२३
अतः कृष्णस्य सुस्पष्टो दोषो नास्त्येव कश्चन ।
तत् कथं रोष एतावाँल्लक्ष्मीदेव्याः प्रजायते ॥१२४
स्वरूपेनोक्तमेषैव प्रेमिन्याः प्रकृति र्भवेत् ।
जायते क्रोध औदास्याभासेनापि प्रियं प्रति ॥१२५
इत्यत्रावसरे तत्र नानारत्नकरम्बितम् ।
लक्ष्मीदेवी समारुह्य चतुर्दोलं हिरण्मयम् ॥१२६
पताकाचामरच्छत्रध्वजदण्डै र्विमण्डितम् ।
नानावाद्यैः पुरो देवदासीनृत्यैश्च सङ्कुलम् ॥१२७
धृत-व्यजन-भृङ्गार-पर्णसम्पुट-चामरैः ।
दिव्यभूषाम्बरै र्दासीशतैश्च परितो वृता ॥१२८
ऐश्वर्य्यैः परिवारैश्च बहुभिः परिवेष्टिता ।
महाक्रोधसमाविष्टा सिंहद्वार मुपस्थिता ॥१२९
मुख्य-मुख्याश्च ते सर्वे जगन्नाथस्य किङ्कराः ।
लक्ष्मीदेव्यास्तु दासीभिरभवन् कृतबन्धनाः ॥१३०
तथा नीताश्च ताभिस्ते लक्ष्म्याः पादतलेऽर्पिताः ।
वलादाच्छिद्य लोप्त्राणि दण्डिता इव तस्कराः ॥१३१
पुनस्ता स्ताड़यामासु र्हतचेतनवच्च तान् ।
प्रददु र्बहुधा गालिं दुःश्रवै र्भण्डभाषणैः ॥१३२

लक्ष्म्या सार्द्धञ्च दासीनां तथा दृष्ट्वा प्रगल्भताम् ।
हस्तेन मुखमाच्छाद्य जहसुस्ते प्रभोर्गणाः ॥१३३

अथ दामोदरः प्रोचे मानस्यैतादृशो विधिः ।
न दृष्टो न श्रुतोऽप्येवं कदाचिद्भुवनत्रये ॥१३४

मानिनी हि निरुत्साहा त्यक्तसर्वविभूषणा ।
लिखति स्वनखै र्भूमिमासीना मलिनाम्बरा ॥१३५

श्रूयते सत्यभामाया मान एवं पुराभवत् ।
व्रजे गोपीगणस्यैव मानो रसनिधिः स्मृतः ॥१३६

लक्ष्मी स्त्वेषा प्रकाश्यैव निखिलाः सम्पदो वहिः ।
प्रिय मप्यभिगृह्णाति स्वयं सन्नाह्य सैनिकान् ॥१३७

प्रभुः प्रोचे प्रकारं मे व्रजमानस्य वर्णय ।
तेनोक्तं गोपिकामानः शतधारा नदी यथा ॥१३८

नायिकानां स्वभावस्य प्रेमवृत्तेश्च भूयसी ।
भिन्नता स्यात्ततो माना उद्भिद्यन्तेऽप्यनेकधा ॥१३९

मानो यद्यपि गोपीनां सम्यग् वक्तुं न शक्यते ।
तथाप्येकद्वभेदेन दिङ्मात्रं दर्श्यते मया ॥१४०

माने काचिद्भवेद्धीरा काप्यधीरा भवेत् पुनः ।
धीराधीरा च कापि स्यादेवं भेदास्त्रयो मताः ॥१४१

कान्तं दूरे समालोक्य प्रत्युत्थानं करोति या ।
ददात्यासनमायाते समीपं या ससम्भ्रमम् ॥१४२

हृदि कोपो मुखे यस्या वर्त्तते मधुरं वचः ।
आश्लेषोद्यतमालक्ष्य कान्तं साश्लिष्यति स्वयम् ॥१४३

सा धीरा सरलाचारै र्मानं स्वं परिपुष्यति ।
किं वा सोल्लुण्ठणैर्वाक्यैः प्रियमेव निरस्यति ॥१४४

अधीरा निष्ठुरै र्वाक्यै र्भर्त्सयेत्ताड़येदुत ।
कर्णोत्पलेन किंवासौ बध्नीयाच्च प्रियं स्रजा ॥१४५

धीराधीरा तु वक्रोक्त्या तथोपहसति प्रियम्।
जातु निन्दति वा स्तौति किं वौदास्यं श्रयत्यसौ ॥१४६
मुग्धा मध्या प्रगल्भेति त्रिधा भिन्नास्तु नायिकाः।
मुग्धा मानस्य वैदग्ध्यं नैव वेत्ति विशेषतः ॥१४७
मुख माच्छाद्य हस्ताभ्यां सैषा रोदिति केवलम्।
नम्रवाक्येन कान्तस्य मनस्तस्याः प्रसीदति ॥१४८
मध्याप्रगल्भयोरेव भेदा धीरादिकास्त्रयः।
स्वभावानां पुनस्तासां त्रैविध्यात्त्रिविधाश्च ताः ॥१४६
प्रखरा कापि मृद्वी च काचित् कापि भवेत् समा।
कृष्णस्य प्रेमसीमानं वर्द्धयन्ति स्वभावतः ॥१५०
प्राखर्य्यं मार्दवं साम्यं स्वभावा दोषवर्जिताः।
तेन तेन स्वभावेन कृष्णं सन्तोषयन्ति ताः ॥१५१
इत्येवं वचनं श्रुत्वा परमानन्दितः प्रभुः।
ब्रूहि दामोदर ब्रूहीत्येव मूचे पुनः पुनः ॥१५२
ततो दामोदरः प्रोचे कृष्णो रसिकशेखरः।
रसास्वादनकारी स रसात्मककलेवरः ॥१५३
प्रेमाधीनं स्वभक्तानां स प्रेममयविग्रहः।
शुद्धप्रेमरसानान्तु गुणै र्गोप्यो ह्यनुत्तमाः ॥१५४
न रसाभासदोषोऽस्ति गोपीनां प्रेम्णि कश्चन।
अतः कृष्णस्य कुर्वन्ति सन्तोषं परमञ्च ताः ॥१५५

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशाध्याये षड्विंशश्लोके परीक्षितं प्रति शुकदेववाक्यम्—

"एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरतावलागणः।
सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥३॥"

गोप्यः काश्चन वामास्ता अपरा दक्षिणाः पुनः।
श्रीकृष्णं बहुभिर्भावै रसमास्वादयन्ति ताः ॥१५६

तासु सर्वासु गोपीषु श्रेष्ठा भवति राधिका ।
प्रेमरत्नखनिः शुद्धसमुज्ज्वलरसा हि सा ॥१५७
स्वभावेन समा सेयं मध्यमे वयसि स्थिता ।
प्रेमभावोऽतिगाढ़ोऽस्या वामता च निरन्तरम् ॥१५८
तस्या वाम्यस्वभावेन मानः शश्वदुदञ्चति ।
तस्या वाम्येन कृष्णस्यानन्दाब्धि रुपचीयते ॥१५६

"तथाह्युज्ज्वलनीलमणौ शृङ्गारभेदकथने त्रिचत्वारिंशश्लोके श्रीरूपगोस्वामिवाक्यम्—

अहे रिव गतिः प्रेम्णः स्वभावकुटिलो भवेत् ।
अतो हेतोरहेतोश्च यूनोर्मान उदञ्चति ॥४॥"

ववृधे शृण्वतस्तत्तत् प्रभोरानन्दसागरः ।
ब्रूहि ब्रूहीति तेनोक्तः प्रोचे दामोदरः पुनः ॥१६०
अधिरूढ़महाभावो राधायाः प्रेम निर्मलम् ।
बिशुद्धञ्च यथा हेम दशकृत्वो विशोधितम् ॥१६१
दर्शनं सा तु कृष्णस्य लभते यद्य तर्कितम् ।
नानाभावै रलङ्कारैः सद्यो भवति भूषिता ॥१६२
अष्टौ च सात्त्विका भावा हर्षाद्या व्यभिचारिणः ।
प्रेमा च सहजो भावा अलङ्काराश्च विंशतिः ॥१६३
विलासो ललितं कुट्टमितञ्च किलकिञ्चितम् ।
मोट्टायितञ्च विव्वोको मुग्धता चकितं तथा ॥१६४
इत्येतैर्भूषितां भावभूषणैं राधिकातनुम् ।
दृष्ट्वोद्गच्छन्ति कृष्णस्य सुखसागरवीचयः ॥१६५
किलकिञ्चित मित्यादि भावानां विवृतिं शृणु ।
मनो हरति कृष्णस्य राधा यै र्भावभूषणैः ॥१६६
दृष्ट्वैव राधिकां कृष्णो यदि तां स्प्रष्टु मिच्छति ।
दानघट्टपथेनै तां गमनाद्वारयत्युत ॥१६७

चिन्वती मुत पुष्पाणि तामुपेत्य निषेधति ।
सखीनां वा पुरस्तस्या अङ्गे हस्तं निधित्सति ॥१६८

इत्येतेष्ववकाशेषूद्भिद्यते किलकिञ्चितम् ।
आदौ हर्षाख्यसञ्चारिभावोऽस्य मूलकारणम् ॥१६९

"तथाह्युज्ज्वलनीलमणावनुभावकथन एकसप्ततितमश्लोके
श्रीरूपगोस्वामिवाक्यम्—

गर्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
सङ्करीकरणं हर्षादुच्यते किलकिञ्चितम् ॥५॥"

अथ सप्तापरे भावास्तमायान्ति स्वभावतः ।
अष्टाभिर्मिलितै र्भावै महाभावः प्रजायते ॥१७०

अभिलाषो भयं गर्वस्तथा शुष्कञ्च रोदनम् ।
असूया च तथा क्रोधः समं मन्दस्मितेन च ॥१७१

नानास्वादा इमे भावा अष्टावेकत्र सङ्गताः ।
एषामास्वादनेनैव मनः कृष्णस्य तृप्यति ॥१७२

दधिखण्डाज्यमध्वेलाः कर्पूरञ्च मरीचकम् ।
इत्येषां मेलनेन स्याद्रसाला मधुरा यथा ॥१७३

दृष्ट्वै तद्भावसंयुक्तं राधाया मुखलोचनम् ।
सुखं कोटिगुणं कृष्णो लभते सङ्गमादपि ॥१७४

"तथाहि दानकेलिकौमुद्यां प्रथमश्लोके उज्ज्वलनीलमणौ
अनुभावप्रकरणे त्रिसप्ततितमश्लोके च
श्रीरूपगोस्वामिवाक्यम्—

अन्तःस्मेरतयोज्ज्वला जलकणव्याकीर्णपक्ष्माङ्कुरा
किञ्चित् पाटलिताञ्चला रसिकतोत्सिक्ता पुरःकुञ्चती ।
रुद्धायाः पथि माधवेन मधुरव्याभुग्नतारोत्तरा
राधायाः किलकिञ्चितस्तवकिनी दृष्टिः श्रियं वः क्रियात् ॥६॥

"तथाहि गोविन्दलीलामृते नवमसर्गेऽष्टादशश्लोके

ग्रन्थकारवाक्यम्—

वाष्पव्याकुलितारुणाञ्चलचलन्नेत्रं रसोल्लासितं
हेलोल्लासचलाधरं कुटिलितं भ्रू युग्ममुद्यत्-स्मितम्।
राधायाः किलकिञ्चिताञ्चितमसौ वीक्ष्याननं सङ्गमा-
दानन्दं तमवाप कोटिगुणितं योऽभून्न गी र्गोचरः ॥७॥"

इत्येतद्वच आकर्ण्य परमानन्दमानसः।
ऊचे स्वरूप माश्लिष्य सुखाविष्टो महाप्रभुः ॥१७५
विलासादिकभावानां लक्षणं कथयाधुना।
मनो हरति कृष्णस्य राधा यै र्भावभूषणैः ॥१७६
ततः स्वरूपगोस्वामी व्याख्यातुमुपचक्रमे।
तदाकर्ण्य प्रभोर्भक्ताः प्राप्तवन्तो महासुखम् ॥१७७
यदि राधा समासीनाथ वा बृन्दावनं गता।
अभ्युपेत मतर्केण श्रीगोविन्दं निरीक्षते ॥१७८
पश्यन्त्या एव जायन्ते तदा भावा विलक्षणाः।
विलासभूषणं नाम तद्वैलक्षण्यमुच्यते ॥१७९

तथाह्युज्ज्वलनीलमनावनुभावकथने सप्तषष्टितमश्लोके

श्रीरूपगोस्वामिवाक्यम्—

गतिस्थानासनादीनां मुखनेत्रादिकर्मणाम्।
तत्कालिकन्तु वैशिष्ट्यं विलासः प्रियसङ्गजम् ॥८॥"

लज्जा हर्षोऽभिलाषश्च भयं वाम्यञ्च सम्भ्रमः।
इत्येतै र्मिलितैर्भावै राधिका चञ्चलायते ॥१८०

"तथाहि गोविन्दलीलामृते नवमसर्गे एकादशश्लोके

ग्रन्थकारवाक्यम्—

पुरः कृष्णालोकात् स्थगितकुटिलास्या गतिरभूत्
तिरश्चीनं कृष्णाम्बरदरबृतं श्रीमुखमपि।

चलत्तारं स्फारं नयनयुगमाभुग्नमिति वा
विलासाख्य-स्वालङ्करणवलितासीत् प्रियमुदे ॥६॥"

राधिका यदि तिष्ठन्ती पुरः कृष्यस्य वर्त्तते ।
भवत्यङ्गत्रये भङ्गि भ्रुवौ तस्याश्च नृत्यतः ॥१८१

नाना भावोद्गम स्तस्या जायते मुखलोचने ।
ललितालङ्कृतिर्नाम कान्ताभावोऽयमुच्यते ॥१८२

"तथाह्युज्ज्वलनीलमनावनुभावकथने पञ्चसप्ततितमश्लोके श्रीरूपगोस्वामिवाक्यम्—

विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा ।
सुकुमारा भवेत् यत्र ललितं तदुदाहृतम् ॥१०॥"

ललितालङ्कृतां राधां यदि कृष्णो निरीक्षते ।
तदा मेलितुमन्योन्यं तावुभावेव तृष्यतः ॥१८३

"तथाहि गोविन्दलीलामृते नवमसर्गे चतुर्दशश्लोके ग्रन्थकारवाक्यम्—

ह्रिया तिर्य्यग्ग्रीवा-चरणकटिभङ्गी-सुमधुरा
चलच्चिल्ली-वल्लीदलितरतिनाथोर्जितधनुः ।
प्रियप्रेमोल्लासोल्लसितललिता-लालिततनुः
प्रियप्रीत्यै सासीदुदितललितालङ्कृतियुता ॥११॥"

लोभाद्दागत्य कृष्णश्चेत्तस्याः कर्षति कञ्चुकम् ।
स्फुरितोल्लासयाप्यन्त र्वार्य्यते स तु राधया ॥१८४

वाम्यक्रोधौ वहिस्तस्या अन्तरेतु महत् सुखम् ।
एतत् कुट्टमितं नाम कथ्यते भावभूषणम् ॥१८५

"तथाह्युज्ज्वनीलमणावनुभावकथने त्रिसप्ततितमश्लोके श्रीरूपगोस्वामिवाक्यम्—

स्तनाधरादिग्रहणे हृत्प्रीतावपि सम्भ्रमात् ।
वहिः क्रोधो व्यथितवत् प्रोक्तं कुट्टमितं वुधैः ॥१२॥"

वाञ्छासिद्ध्युद्यते कृष्णे करौ तस्य रुणद्धि सा ।
अन्तरानन्दिता राधा बहिर्वाम्यरुषान्विता ॥१८६
व्याथां प्राप्नुवतीवासौ कुरुते शुष्करोदनम् ।
ईषद्धसन्मुखी राधा श्रीकृष्णं भर्त्सयत्यपि ॥१८७

तथाहि गोस्वामिपादोक्तः श्लोकः—

पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
माधवस्य कुरुते करभोरू र्हारि शुष्करुदितञ्च मुखेऽपि ॥१३॥"

एवामेवाखिलाः सन्ति भावालङ्कृतयोऽपराः ।
याभि र्विभूषिता राधा कृष्णस्य हरते मनः ॥१८८
अनन्ताः कृष्णलीला हि शक्यन्ते नैव भाषितुम् ।
नापि वर्णयितुं शक्तः सहस्रवदनः स्वयम् ॥१८६
श्रीवासोऽथ हसन्नूचे शृणु दामोदराधुना ।
मम लक्ष्म्या निरीक्षस्व सम्पदं प्रचुरामिमाम् ॥१६०
वृन्दवनस्य सम्पत्तीः पश्य पुष्पाणि पल्लवान् ।
गैरिकं शिखिपिञ्छानि तथा गुञ्जाफलानि च ॥१६१
वृन्दावनं जगन्नाथो द्रष्टुं प्रस्थितवानिति ।
लक्ष्मीदेवी समाकर्ण्य बभूवास्वस्थमानसा ॥१६२
त्यक्त्वासावियतीमृद्धिं कथं बृन्दावनं गतः ।
इति तस्योपहासाय लक्ष्मीर्मे सज्जिताभवत् ॥१६३
पश्य सन्त्यज्य सम्पत्तिमियतीं तव ठक्कुरः ।
पुष्पवाटीं गतः पुष्पफलपत्रप्रलोभनात् ॥१६४
कुर्य्यादेतादृशं कर्म को विदग्धशिरोमणिः ।
पुरो लक्ष्म्याः समानीय स्थाप्यतां वो निजः प्रभुः ॥१६५
इत्युक्त्वा निखिला लक्ष्मीदेव्यास्ता परिचारिकाः ।
बद्धा कटिषु वासोभिः परिबारां स्तव प्रभोः ॥१६६

लक्ष्म्याः पादतलं नीत्वा शिरोभि र्नमयन्ति तैः ।
तान् वित्तं दण्डयन्त्येताः स्तावयन्ति च कातरम् ॥१९७

ताड़यन्ति च ता दण्डै रथस्योपरि सर्वतः ।
सर्वथा तस्करीयन्ति जगन्नाथस्य सेवकान् ॥१९८

ब्रुवते सेवकाः सर्वे युक्ताञ्जलिपुटास्तदा ।
आनेष्यामो जगन्नाथं श्व एव पुरतस्तव ॥१९९

इत्याकर्ण्य शमप्राप्ता लक्ष्मी र्याता निजालयम् ।
मम लक्ष्म्या हि सम्पत्तिरतीता जनवाक्पथम् ॥२००

गोप्यस्ते दुग्धमावर्त्त्य दधि मथ्नन्ति नित्यशः ।
लक्ष्मीदेवी ममाध्यास्ते रत्नसिंहासनं सदा ॥२०१

नारदप्रकृता वित्थं श्रीवासे कृतनर्मणि ।
श्रुत्वा सर्वे हसन्ति स्म निजदासा महाप्रभोः ॥२०२

प्रभुः श्रीवासमूचेऽथ प्रकृति स्तव नारदी ।
प्रभावैश्वर्य्यमीशस्य साध्वेवं प्रतिभाति ते ॥२०३

दामोदरस्वरूपोऽयं शुद्धव्रजनिवासकः ।
प्लवमानो विशुद्धेन प्रेम्णैश्वर्य्यं न वेत्त्ययम् ॥२०४

स्वरूपः कथयामास श्रीवासावहितः शृणु ।
वृन्दावनस्य सम्पत्ति र्नायाति स्मरणं तव ॥२०५

योऽयं नैसर्गिको वृन्दावनसम्पत्तिसागरः ।
वैकुण्ठे द्वारकायाञ्च तद्बिन्दु नास्ति लेशतः ॥२०६

स स्वयं भगवान् कृष्णः परमः पुरुषोत्तमः ।
आस्ते यत्र धनस्वामी श्रीबृन्दावनधाम तत् ॥२०७

चिन्तामणिमयी भूमि र्महारत्नमयं गृहम् ।
चिन्तामणिगण स्तत्र दासीनां पादभूषणम् ॥२०८

स्वाभाविकं वनं यत्र कल्पबृक्षलतामयम् ।
विना पुष्पफले कोऽपि न याचन्त्यपरं धनम् ॥२०९

वनाद्वनान्तरं भ्राम्यन्त्यनन्ताः कामधेनवः ।
ददत्येताः पयोमात्रं याच्यन्ते न धनान्तरम् ॥२१०

जनानां सहजं वाक्यं यत्र गीतमलौकिकम् ।
सच्छन्दगमणं यत्र नृत्यमेव प्रतीयते ॥२११

पीयूषसदृशं यत्र सर्वत्र सुलभं जलम् ।
यत्र मूर्त्तं चिदानन्दज्योतिरास्वाद्यते सदा ॥२१२

गुणै र्लक्ष्मीं जयन्तीनां लक्ष्मीणां यत्र संहतिः ।
श्रीकृष्णस्य मुरल्येव यत्र प्रियसखीयते ॥२१३

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये द्विषष्टितमः श्लोकः—

श्रियः कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतम् ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दज्योतिः परमपि तदास्वाद्यमपि च ॥१४॥"

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे (२।१।८४)
भक्तिरससामान्यनिरूपणे विभावलहर्य्यां
धृतविल्वमङ्गलश्लोकः—

चिन्तामणिश्चरणभूषणमङ्गनानां
श‍ृङ्गारपुष्पतरवस्तरवः सुराणाम् ।
बृन्दावने व्रजधनं ननु कामधेनु-
वृन्दानि चेति सुखसिन्धु रहो विभूतिः ॥१५॥"।

श्रुत्वैवं श्रीनिवासेन प्रेमाविष्टेन नृत्यता ।
कुर्वता कक्षवाद्यञ्च जहसेऽट्टाट्ट मुद्धतम् ॥२१४

शुद्धप्रेमरसं श्रुत्वा राधिकाया महाप्रभुः ।
रसावेशेन तेनैव नृत्यं कर्त्तुं प्रचक्रमे ॥२१५

रसाविष्टस्तदा नृत्यन् स्वरूपे गायति प्रभुः ।
ब्रूहि ब्रूहीति वक्ति स्म दत्तकर्ण्योऽवधानतः ॥२१६

व्रजस्य रससङ्गीतात्तस्य प्रेमोदसिच्यत ।
अप्लावयत् प्रभुः प्रेम्णा समग्रं पुरुषोत्तमम् ॥२१७
लक्ष्मीदेव्यां यथाकालं प्रयातायां निजालयम् ।
तृतीयः प्रहरो जातो नृत्यतः श्रीमहाप्रभोः ॥२१८
चत्वारः सम्प्रदायास्ते गायन्तः श्रान्तिमाप्नुवन् ।
तथापि द्विगुणां प्रेमावेशो वृद्धिं गतः प्रभोः ॥२१९
प्रेमावेशेन राधायाः प्रभुं तन्मयविग्रहम् ।
नित्यानन्दः स्तुवन्नासीद् दूरस्थ मवलोकयन् ॥२२०
नित्यानन्दप्रभोर्भावावेशं पश्यंश्च तादृशम् ।
समीपे नाययौ तस्य नातिदूरे स्थितोऽप्यसौ ॥२२१
नित्यानन्दं विनाशक्नोत् प्रभुं को वावलम्बितुम् ।
प्रभो र्नाशाम्यदावेशो व्यरमन्नापि कीर्त्तनम् ॥२२२
स्वरूपोऽज्ञापयद् भङ्गया सर्वेषाञ्च श्रमं प्रभुम् ।
भक्तानां क्लान्तिमालक्ष्य वाह्यसंज्ञोऽभवत् प्रभुः ॥२२३
अथ भक्तान् समादाय पुष्पोद्यान मुपागतः ।
तत्र तै र्लब्धविश्रामो मध्याह्नस्नान माचरत् ॥२२४
जगन्नाथप्रसादैश्च बहूपकरणान्वितैः ।
लक्ष्म्याः प्रसाद आयात स्तत्रानेकविधः पुनः ॥२२५
ततो नानाविलासेन भुक्तवान् सकलैः समम् ।
सान्ध्यं स्नानं समाप्यैव स जगन्नाथ मैक्षत ॥२२६
ईक्षमाणो जगन्नाथं कृतवान् नृत्यकीर्त्तने ।
नरेन्द्रसरसि क्रीड़ां चक्रे भक्तैरथ प्रभुः ॥२२७
तत उद्यान मागत्य कृतवान् वन्यभोजनम् ।
इत्थमेव दिनान्यष्टौ तत्र क्रीड़ितवान् प्रभुः ॥२२८
अपरेद्यु र्जगन्नाथो विजयं कर्त्तुमन्तरे ।
पूर्ववद्रथ मारुह्य प्रतस्थे स्वालयं प्रति ॥२२९

यथा पूर्वं प्रभुश्चक्रे निजभक्तगणैः सह ।
सङ्कीर्त्तनञ्च नृत्यञ्च परमानन्दचेतसा ॥२३०
जगन्नाथस्य भूयोऽपि श्रीपाण्डुविजयोऽभवत् ।
तदैकं छिन्नमेवासीत् पट्टडोरकगुच्छकम् ॥२३१
तूलपीठोऽगमत् पाण्डुविजये छिन्नभिन्नताम् ।
तूलाः प्रणेशुरुड्डीय जगन्नाथपदाहताः ॥२३२
रामानन्दसत्यराजौ कुलीनग्रामवासिनौ ।
आदिदेश ससम्मान मेवमेव महाप्रभुः ॥२३३
पट्टडोरप्रदानेन सेवकौ भवतं युवाम् ।
पट्टडोरं विनिर्मायानेष्यथः प्रतिवत्सरम् ॥२३४
इति ब्रुवन् ददौ ताभ्यां छिन्नं तत् पट्टडोरकम् ।
प्रोचे चेदं समालोक्य द्रढिष्ठं तत् करिष्यथः ॥२३५
पट्टडोरमिदं शेषदेवः खल्वधितिष्ठति ।
गृह्णन् दशविधा मूर्त्तीं र्भगवन्तं स सेवते ॥२३६
रामानन्दसत्यराजौ भाग्यवन्तौ वभूवतुः ।
सेवादेशं ततः प्राप्य परमानन्दमाप्नुताम् ॥२३७
प्रत्यब्दं गुण्डिचायां तौ प्रभोर्भक्तजनैः सह ।
पट्टडोरक मादाय ततः सोल्लासमागतौ ॥२३८
अध्यास्त श्रीजगन्नाथो गत्वा सिंहासनं ततः ।
गृहीत्वा निजभक्तांश्च गृहं यातो महाप्रभुः ॥२३९
प्रभुरेवं निजान् भक्तान् रथयात्रा मदर्शयत् ।
श्रीबृन्दावनकेलिञ्च भक्तैस्तैः कृतवान् स्वयम् ॥२४०
श्रीचैतन्यप्रभोर्लीला अनन्ताः पारवर्जिताः ।
सहस्रवदनोऽप्यासां पारं नैवाधिगच्छति ॥२४१
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२४२

इति श्रीचैतन्यचरितामृते मध्यखण्डे होरापञ्चमीयात्रादर्शनं नाम चतुर्दशः परिच्छेदः ।

मध्यलीलायां पञ्चदशः परिच्छेदः

"सार्वभौमगृहे भुञ्जन् स्वनिन्दकममोघकम् ।
अङ्गीकुर्वन् स्फुटां चक्रे गौरः स्वां भक्तिवश्यताम् ॥१॥"

मुहुर्जयतु चैतन्यो नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
सर्वे जयन्तु शृण्वन्तश्चैतन्यचरितामृतम् ।
चैतन्य-चरित-प्राण-धना भक्ता भवन्ति ये ॥२
इत्थं भक्तजनैः सार्द्धं नीलाचलमधिष्ठितः ।
कृतवान्नृत्य-सङ्गीतरङ्गं श्रीमन्महाप्रभुः ॥३
प्रथमावसरेऽकार्षीं जगन्नाथस्य दर्शनम् ।
दण्डवत् प्रणतिं स्तोत्रं नृत्यगीतानि च प्रभुः ॥४
उपलभोगकाले तु प्रस्थितश्च वहिः प्रभुः ।
मिलित्वा हरिदासेन ततः स्वावासमाययौ ॥५
कृतवान् गृहमागत्य नामसङ्कीर्त्तनं प्रभुः ।
अथाद्वैतः समागत्य पूजयामास च प्रभुम् ॥६
पाद्यञ्चाचमनं दत्त्वा तस्मै सुरभिवारिणा ।
सुगन्धिचन्दनेनासौ प्रभो रङ्गान्यलिम्पत ॥७
तुलसीमञ्जरीं शीर्षे दत्त्वा कण्ठे च मालिकाम् ।
पादपद्मे नमस्कुर्वं स्तुष्टावासौ कृताञ्जलिः ॥८
पूजापात्रेऽवशिष्टानि तुलसीः कुसुमानि च ।
प्रभुरादाय सर्वाणि तैराचार्य्यम पूजयत् ॥९
योऽसि सोऽसि नमस्तुभ्य मिति मन्त्रं पठन् प्रभुः ।
मुखवाद्यं ततः कृत्वाचार्य्यं वीक्ष्य जहास च ॥१०
एवमेव मुभावेता वन्योन्यञ्च प्रणेमतुः ।
प्रभुं निमन्त्रयामासाद्वैताचार्य्यः पुनः पुनः ॥११

आश्चर्य्यकथनं श्रीमदाचार्यस्य निमन्त्रणम् ।
दासवृन्दावनः सर्वं वर्णयामास विस्तृतम् ॥१२
नाहं वर्णितवानत्र पौनरुक्त्याभिशङ्कया ।
तदा निमन्त्रयामासुरन्ये भक्ता महाप्रभुम् ॥१३
एकैकाहे गृहे भक्तस्यैकैकस्य महोत्सवः ।
सर्वेऽभुञ्जत ते भक्ता स्तत्रैव प्रभुणा सह ॥१४
केऽप्यानीय प्रसादान्नं केचित् पक्वान्नमालये ।
प्रभुं न्यमन्त्रयन्तैवं तत्रत्या भक्तवैष्णवाः ॥१५
तैः सर्वैश्चतुरो मासान् प्रभुणा सममास्थितैः ।
सोल्लासं विविधा यात्रा जगन्नाथस्य लोकिताः ॥१६
श्रीकृष्णजन्मयात्रायां नन्दोत्सवदिने प्रभुः ।
सर्वै र्भक्तजनैः सार्द्धं गोपवेशं गृहीतवान् ॥१७
स्वस्कन्धेनोद्वहन् दुग्धदधिभारं महाप्रभुः ।
ययौ महोत्सवस्थानं हरिर्हरिरिति ब्रुवन् ॥१८
कानाञि खुण्टिया नन्दवेशं गृह्णन्नुपस्थितः ।
श्रीजगन्नाथ माहाति र्यशोदावेशभागभूत् ॥१९
स्वयं प्रतापरुद्रश्च काशीमिश्रं महाप्रभुः ।
सार्वभौमं तथा प्रैष्यं तुलसीमिश्रमेव च ॥२०
एतान् सर्वान् समादाय कृतवान्नर्त्तनोत्सवम् ।
दधि-दुग्ध-हरिद्राक्तजलैः सर्वान् सिषेच च ॥२१
ऊचेऽद्वैतेन मा कुप्य सत्य मेकं ब्रवीमि ते ।
शक्तोऽसि दण्डघूर्णौ चेद् गोपस्त्वं ज्ञायसे तदा ॥२२
तच्छ्रुत्वा दण्डमादाय घूर्णयामास च प्रभुः ।
भूयो व्योम्नि तमुत्क्षिप्य पतंतश्चान्तराग्रहीत् ॥२३
शीर्षोपरि च पश्चाच्च सम्मुखे पार्श्वयोश्च तम् ।
घूर्णयन्तं पदोर्मध्ये तं दृष्ट्वा जहसुर्जनाः ॥२४

अलातचक्रवद्दण्डं घूर्णयामास तं प्रभुः ।
दृष्ट्वा तत्र जनाः सर्बे बभूवु विंस्मितान्तराः ॥२५
एवमेवा करोन्नित्यानन्दोऽपि लगुड़भ्रमिम् ।
गोपभावं निगूढ़न्तु को विवेद तयोस्तदा ॥२६
प्रैष्यः प्रतापरुद्रेण तुलसीपात्र ईरितः ।
जगन्नाथप्रसादं स वस्त्रमेकमुपानयत् ॥२७
बहुमूल्यञ्च तद्वस्त्रं बबन्ध शिरसि प्रभोः ।
तथा प्रसाधयामास सोऽद्वैतादीन् प्रभोर्गणान् ॥२८
जगन्नाथश्च कानाञि खुण्टियाश्च जनावुभौ ।
निजगेहस्थितं सर्वमावेशाद्ददतु र्धनम् ॥२९
महाप्रभुस्तथा दृष्ट्वा सन्तोषं परमं गतः ।
तौ मातापितरौ ज्ञात्वा प्रणनाम सभक्तिकम् ॥३०
आजगाम निजावासं परमाविष्टमानसः ।
एवं बहुविधा लीलाश्चक्रे गौराङ्गसुन्दरः ॥३१
विजयाख्यदशम्यान्तु लङ्काविजयवासरे ।
प्रभुर्वानरसैन्योऽभूद्भक्तसङ्घसमावृतः ॥३२
वृत्तशाखां प्रभुर्गृह्नावेशेन हनूमतः ।
लङ्काप्राचीरमारूढ़ो बभौ भङ्क्त्वा क्षिपन्निव ॥३३
क्वासि रे रावणेत्युक्त्वा क्रोधाविष्टोऽभवत्तदा ।
सवंशं हन्मि पापिंस्त्वां जगन्माता हृता त्वया ॥३४
इत्यावेशं प्रभोर्दृष्ट्वा तत्र लोकाश्चमत्कृताः ।
सर्वे जय जयेत्यूचु र्वारंवारं तदोच्चकैः ॥३५
एवं ते ददृशू रासयात्रां दीपावलीं तथा ।
उत्थानद्वादशीयात्रां सर्वे भक्तजनाः प्रभोः ॥३६
अथैकस्मिन् दिने नित्यानन्देन सहितः प्रभुः ।
आसीनो निभृतस्थानेऽकरोत् किञ्चिद्विमर्शनम् ॥३७

तां युक्ति मुभयो भ्रात्रो र्न कोऽपि ज्ञातवांस्तदा ।
पश्चाद्भक्ताः फलं दृष्ट्वानुमानेनैव जज्ञिरे ॥३८
ततो महाप्रभुः सर्वान् भक्तानाहूय सन्निधौ ।
गौड़ान् यातेति सर्वेभ्यो बिदायं दत्तवांस्ततः ॥३९
उक्तवांश्च स तान् सर्वान् प्रतिवर्षं समेष्यथ ।
मिलित्वा च मया दृष्ट्वा गुण्डिचां प्रतियास्यथ ॥४०
अथाजिज्ञपदाचार्य्यं बहुमानपुरःसरम् ।
आचण्डालादि सर्वेभ्यः कृष्णभक्तिः प्रदीयताम् ॥४१
तत आज्ञापयन्नित्यानन्दं गौड़ानितो गतः ।
त्वं प्रचारय सर्वत्र प्रेमभक्ति मनर्गलाम् ॥४२
तव साहायकं कर्त्तुं रामदासो गदाधरः ।
इत्याद्याः सङ्गिनः केचिन्नियुज्यन्ते मया पुनः ॥४३
अहन्तु सन्निधानं ते गमिष्याम्यन्तरान्तरा ।
द्रक्ष्याम्यलक्षितः स्थित्वा तव नृत्यं मनोहरम् ॥४४
अथ गाढ़ं समाश्लिष्य प्रभुः श्रीवासपण्डितम् ।
भुजालम्बिततत्कण्ठः प्रोक्तवान् मधुरं वचः ॥४५
कीर्त्तनावसरे नित्यं नर्त्तिष्यामि गृहे तव ।
द्रष्टव्योऽहं त्वयैकेन नापरेण तु केनचित् ॥४६
वस्त्रमेतत् प्रसादञ्च सर्वं मात्रे प्रदेहि मे ।
क्षमयस्वापराधं मे दण्डवत्तां नमाम्यहम् ॥४७
तस्याः सेवां परित्यज्य सन्न्यासं कृतवानहम् ।
नायं धर्मोऽभवत् किन्तु निजधर्म मनाशयम् ॥४८
तस्याः प्रेमवशोह्यस्मि धर्मो मे तन्निषेवणम् ।
अहं वातुलकर्मेदं कृतवांस्तत् परित्यजन् ॥४९
दोषो वातुलपुत्रस्य जनन्या नैव गृह्यते ।
एतावदेव जानामि माता मे नैव रुष्यति ॥५०

किं सन्न्यासेन मे कार्य्यं यतः प्रेमैव मे धनम् ।
तदा मतिभ्रमो मेऽभूत् सन्न्यासं कृतवान् यदा ॥५१

तस्या एवाज्ञया नीलाचलेऽस्मिन्निवसाम्यहम् ।
वीक्षितुं चरणौ तस्या गमिष्याम्यन्तरान्तरा ॥५२

प्रत्यहं तत्र गच्छामि तस्याः पाददिदृक्षया ।
ध्यानस्फूर्त्तिं तु तां बुद्ध्वा माता सत्यं न मन्यते ॥५३

शाल्यन्नं व्यञ्जनं पञ्चसप्तधा निम्बपत्रकम् ।
शाकं भृष्टपटोलञ्च मोचाघण्ट मथैकदा ॥५४

निम्बूमार्द्रकखण्डानि खण्डसारं पयोदधि ।
शालग्रामाय बह्वेवं जननी मे समार्पयत् ॥५५

क्रोड़े प्रसाद माधाय मातैवं व्यलपद्बहु ।
एतच्च व्यञ्जनं सर्वं निमाये र्मम रोचकम् ॥५६

निमाइ र्नास्ति गेहेऽत्र कोन्वेतद् भक्षयत्विति ।
ध्यायन्त्यां मातरीत्थं मामश्रुसम्भृतचक्षुषि ॥५७

तत्र शीघ्रमुपेत्याहं तानि सर्वाण्याभक्षयम् ।
पात्रं रिक्तं विलोक्यासौ दध्या वश्रूणि मार्जती ॥५८

कोऽभुङ्क्त व्यञ्जनान्नानि कथं शून्यं नु भाजनम् ।
मन्येऽयं वालगोपालः सर्वमन्नमभक्षयत् ॥५९

तीव्रसङ्कल्पवेगाद्वा जातो मे मनसो भ्रमः ।
उत कोऽप्यपरो जीवः सर्वमेत्यात्र भुक्तवान् ॥६०

किमुताहं मनोभ्रान्त्या न पात्रे पर्य्यवेशयम् ।
इत्येवं चिन्तयित्वाम्बा पाकभाजन मैक्षत ॥६१

दृष्ट्वा सर्वाणि पात्राणि सम्भृतान्यन्नतेमनैः ।
सन्दिहानाभवत् किञ्चिद् विस्मयाकुलचेतसा ॥६२

तत ईशानमाहूय पुनः स्थान मलेपयत् ।
गोपालाय पुनर्माता तदन्नञ्च न्यवेदयत् ॥६३

एवमेव यदा माता करोत्युत्तमरन्धनम् ।
मां भोजयितु मेवासौ रोदित्युत्कण्ठया भृशम् ॥६४
तस्याः प्रेमैव मामेवं नीत्वा भोजयति ध्रुवम् ।
अन्तः सा सुखमाप्नोति वहिः किन्तु न मन्यते ॥६५
अत्रैव विजयाख्यायां दशम्यामभवत्तथा ।
इति तां परिपृच्छ्यैव त्वं प्रत्यायय मातरम् ॥६६
इत्येवं कथयन्नेव प्रभु र्विह्वलतां गतः ।
प्रस्थापनाय भक्तानां पुन र्धैर्य्यं समाश्रयत् ॥६७
वचनं सरसं प्रोचे ततो राघवपण्डितम् ।
तव प्रेम्णा विशुद्धेन सर्बदास्मि वशंगतः ॥६८
कृष्णसेवनवार्त्तास्य सर्वैराकर्ण्यता मियम् ।
श्रेष्ठा पूततमा सेवा क्रियतेऽनेन सर्वदा ॥६९
अस्तु बस्त्वपरम् नारिकेलस्य श्रूयतां कथा ।
पञ्चभि र्गण्डकैस्तत्र नारिकेलस्य विक्रयः ॥७०
गृह एव शतं वृक्षाः फलानि तत्र लक्षशः ।
तथापि श्रूयते यत्र नारिकेलस्य माधुरी ॥७१
एकैकस्य फलस्यैव मूल्यं दत्त्वा चतुष्पणीम् ।
क्रोशेभ्योऽपि दशभ्योऽयमानाययति यत्नतः ॥७२
प्रत्यहं पञ्चषाण्येष फलान्युत्त्वचयन् पुनः ।
शीतले सलिले तानि संस्थापयति मज्जयन् ॥७३
भोगकाले तु संस्कुर्वन् शङ्खवत्तान्ययं स्वयम् ।
छिद्रीकृत्य मुखं तेषां श्रीकृष्णायार्पयत्यथ ॥७४
श्रीकृष्णो नारिकेलस्य तस्य पीत्वा जलं पुनः ।
विधत्ते जातु तद्रिक्तं कदाचिज्जलसम्भृतम् ॥७५
जलशून्यं फलं दृष्ट्वा पण्डितो हर्षमाप्नुवन् ।
भङ्क्त्वा तत् पूरयत्येष शस्यैः पात्रशतं ततः ॥७६

शस्यं निवेदयत्यस्मिन् वहिर्ध्यानञ्च कुर्वति ।
कृष्णो भुक्त्वा च तच्छस्यं पात्रं रिक्तं करोत्यथ ॥७७
शस्यं भुक्त्वा पुन र्जातु भरते तेन भाजनम् ।
पण्डितो वर्द्धितश्रद्धः प्लवते प्रेमसागरे ॥७८
एकदा हि सुसंस्कृत्य फलानि दश सेवकः ।
देवस्य भोगदानाय मन्दिरद्वार मागतः ॥७९
प्रवेशावसराभावाद्विलम्बं कृतवानसौ ।
पाणिना फलपात्रानि गृहीत्वा द्वारि संस्थितः ॥८०
द्वारस्योपरि भित्तौ स न्यस्य हस्तं पुनः फलम् ।
स्पृष्टवांस्तेन हस्तेन पण्डितेना वलोकितः ॥८१
पण्डितोऽकथयद्द्वारि जना आयान्ति यान्ति च ।
लगन्त्युत्पतिता भित्तौ तेषां चरणरेणवः ॥८२
तस्यां भित्तौ करं न्यस्य पुनः स्पृष्टं त्वया फलम् ।
अपवित्र मिदं कृष्णभोगार्थं नोपयुज्यते ॥८३
इत्युक्त्वैव स उल्लङ्घ्य प्राचीरं फलमक्षिपत् ।
इत्थं पूततमा प्रेमसेवास्य विश्वजित्वरा ॥८४
ततोऽन्यनारिकेलानां संस्कारं कारयन्नसौ ।
सुपवित्रेण भावेन पुन र्भोगं न्यवेदयत् ॥८५
एवं कदल्य आम्राणि लाङ्गलि-पनसानि च ।
श्रुत्वोत्तमानि तिष्ठन्ति ग्रामे यत्र दवीयसि ॥८६
भूरिमूल्यैस्ततस्तानि क्रीत्वानीय च यत्नतः ।
पूतभावेन संस्कृत्य श्रीकृष्णायार्पयत्यसौ ॥८७
एवं शाकं फलं मूलं निखिलं व्यञ्जनं तथा ।
चिपिटञ्च हुडुम्बञ्च मिष्टान्यामिक्षिकाण्यपि ॥८८
पिष्टकं पानकञ्चेत्थं घनक्षीरं तथौदनम् ।
सर्वश्रेष्ठं पवित्रञ्च सर्वं वस्तु करोत्ययम् ॥८९

काशमर्दाम्ललेहादि नानोपकरणं तथा ।
वस्त्रालङ्कारगन्धांश्च सर्वसारान् करोत्ययम् ॥९०
एवमेवातुलं नित्यं कुरुते प्रेमसेवनम् ।
यदालोक्य जनाः सर्वे भवेयुस्तृप्तलोचनाः ॥९१
इत्युक्त्वा राघवं भूय आलिलिङ्ग महाप्रभुः ।
इत्थं सम्मानयामास सर्वान् भक्तान् पृथक् पृथक् ॥९२
ततः सेनं शिवानन्दं प्रोचे सम्मानपूर्वकम् ।
त्वं वासुदेवदत्तस्य कुर्य्याः सर्वां व्यवस्थितिम् ॥९३
अयन्तु परमोदारो यावच्च लभते यदा ।
तदैव व्ययते तावच्छेषं किञ्चिन्न रक्षति ॥९४
कर्त्तव्यः सञ्चयोऽवश्य ममुना गृहमेधिना ।
अन्यथा स्वकुटुम्बानां भरणं नैव सम्भवेत् ॥९५
आयव्ययौ गृहस्यास्य न्यस्तौ सम्यक्तया त्वयि ।
त्वमाधिकारिको भूत्वा कुरु सर्वं समाहितम् ॥९६
गृहीत्वा निखिलान् भक्तान् पथि तान् परिपालयन् ।
प्रतिवर्षमिहागत्य परिद्रक्ष्यसि गुण्डिचाम् ॥९७
अथ सादर मूचेऽसौ कुलीनग्रामवासिनः ।
प्रत्यब्द मेत यात्रायां गृहीत्वा पट्टडोरकम् ॥९८
रचिते गुणराजेन श्रीकृष्णविजयाभिधे ।
ग्रन्थे प्रेममयं वाक्यमेकं यत्तत्र वर्त्तते ॥९९
नन्दस्य नन्दनः कृष्णः प्राणनाथो ममेत्यहम् ।
विक्रीतोऽनेन वाक्येन तद्वंश्यानां करेष्वपि ॥१००
युष्माकं का कथा, युष्मद्ग्रामीणो यस्तु कुक्कुरः ।
सोऽपि मे परमप्रेष्ठः किमुतान्ये जना इति ॥१०१
रामानन्दस्तथा सत्यराजखान स्ततः परम् ।
तौ न्यवेदयतां किञ्चित् प्रभोः श्रीचरणाम्बुजे ॥१०२

गृहस्था विषयासक्ता वयं किं नोऽस्ति साधनम् ।
आदिश श्रीमुखेनेति श्रीपदे नो निवेदनम् ॥१०३
प्रभु राज्ञापयत् कृष्णसेवां वैष्णवसेवनम् ।
सङ्कीर्त्तनञ्च कृष्णस्य नाम्नः कुरुत सर्वदा ॥१०४
पृष्टोऽसौ सत्यराजेन कथं जानामि वैष्णवम् ।
वैष्णवः क इति ब्रूहि तस्य सामान्यलक्षणम् ॥१०५
प्रभुः प्रत्यवदत् कृष्णनाम यस्य मुखात् पुनः ।
श्रूयते सकृदप्येष सर्वश्रेष्ठश्च पूजितः ॥१०६
कुरुते कृष्णनामैकं सर्वपापक्षयं नृणाम् ।
नवधा भक्तयः पूर्णा जायन्ते नाम्न एव हि ॥१०७
नेदं दीक्षा-पुरश्चर्य्या-विधिं कञ्चिदपेक्षते ।
आचण्डालं जनान् सर्वान् जिह्वास्पृष्टं समुद्धरेत् ॥१०८
संसारस्य क्षयस्तस्य फलं स्यादानुषङ्गिकम् ।
मुख्यन्तु चित्तमाकृष्य कृष्णप्रेमोदयः फलम् ॥१०९

"तथाहि पद्यावल्याम् (२९)

आकृष्टिः कृतचेतसां सुमहतामुच्चाटनं चांहसा-
माचण्डालममूकलोकसुलभो वश्यश्च मुक्तिश्रियः ।
नोदीक्षां नच सत्क्रियां नच पुरश्चर्य्यां मनागीक्षते
मन्त्रोऽयं रसनास्पृगेव फलति श्रीकृष्णनामात्मकः ॥२॥"

सकृदप्युद्गतं कृष्णनाम यस्य मुखादतः ।
स एव वैष्णवस्तस्य विधेयः परमादरः ॥११०
अथो मुकुन्ददासश्च तथा श्रीरघुनन्दनः ।
नरहरिश्च खण्डस्य मुख्या एते त्रयोजनाः ॥१११
मुकुन्ददासमूचेऽथ श्रीशचीनन्दनः प्रभुः ।
त्वं पिता तव पुत्रोऽयं किमु श्रीरघुनन्दनः ॥११२

अथवा तस्य पुत्रोऽसि पिता ते रघुनन्दनः ।
निश्चितं ब्रूहि सन्देहो विलयं मम यात्विति ॥११३
प्रत्यवादीन्मुकुदोऽथ पिता मे रघुनन्दनः ।
अहमेवास्मि तत् पुत्र इति मे निश्चिता मतिः ॥११४
सर्वेषां कृष्णभक्तिर्नः सञ्जाता रघुनन्दनात् ।
रघुनन्दन एवातः पितेति मम निश्चयः ॥११५
इत्याकर्ण्य प्रभुहृ ष्टः प्रोचे सत्यं त्वयोदितम् ।
कृष्णभक्ति र्भवेद् यस्मात् स एवैकोगुरुर्भवेत् ॥११६
इति भक्तस्य माहात्म्यं वदन् प्राप सुखं प्रभुः ।
महिमानं हि भक्तस्य वक्तुं पञ्चमुखोऽभवत् ॥११७
ऊचे भक्तानथ प्रेम मुकुन्दस्यावधीयताम् ।
निगूढ़ो निर्मलः प्रेमा शुद्धजाम्बूनदोपमः ॥११८
राजानं वहिरेवायं राजवैद्यो निषेवते ।
अस्यान्तःसम्भृतं प्रेम कोहि विज्ञातु मर्हति ॥११९
तुङ्गाट्टालकमारूढ़ो म्लेच्छभूपतिरेकदा ।
चिकित्साविषयानेनं पृच्छन्नासीत् पुरःस्थितम् ॥१२०
तदैव सेवकः कोऽपि शिखिपिच्छविनिर्मितम् ।
महाव्यजनमानीय धृतवान् राजमूर्द्धनि ॥१२१
पश्यन्नेव मुकुन्दस्तत् पिच्छं प्रेम्नाभ्यभूयत ।
उत्तुङ्गाच्च ततोऽट्टालात् पतितोऽभून्महीतले ॥१२२
मरणं राजवैद्यस्य जात मित्यवगच्छता ।
स्वयं राज्ञावरुह्यातः कारिता तस्य चेतना ॥१२३
पृष्टश्चायं व्यथामङ्गे क्व भवान् प्राप्तवानिति ।
प्रत्यूचेऽयं न चाप्तोहमतिगुर्वीं व्यथामिति ॥१२४
राजापृच्छन्मुकुन्द त्वं कथं पतितवानिति ।
मम रोगोऽस्त्यपस्मार इति प्रत्युक्तवानयम् ॥१२५

महाविचक्षणो राजा विदित्वा सर्वमेव तत् ।
अबुध्यत मुकुन्दञ्च महासिद्धः पुमानिति ॥१२६
श्रीकृष्णं सेवते नित्यं मन्दिरे रघुनन्दनः ।
द्वारे पुष्करिणी, तस्यास्तीरेऽस्ति नीपपादपः ॥१२७
मासान् द्वादश पुष्प्यन्ति पुष्पाणीह निरन्तरम् ।
प्रत्यहं नीयते पुष्पद्वयं कृष्णावतंसताम् ॥१२८
इत्युक्त्वा प्रभुणा प्रोक्तो मुकुन्दो मधुरं वचः ।
धनस्योपार्जनं कर्म त्वदीयमेव केवलम् ॥१२९
श्रीकृष्णसेवनं कर्म कुर्य्याच्च रघुनन्दनः ।
कृष्णसेवां विना तस्य मनो नान्यत्र तिष्ठति ॥१३०
असौ नरहरि र्भक्तैर्मदीयैरेव तिष्ठतु ।
एतत् कर्मत्रयं यूयं त्रयः कुरुत सर्वदा ॥१३१
अथासौ कथयामास दयमानो महाप्रभुः ।
बिद्यावाचष्पतिं सार्वभौमञ्च द्वौ सहोदरौ ॥१३२
कृष्णो दारुजलाकारः प्रकटः साम्प्रतं भुवि ।
मुक्तिं ददाति जीवेभ्यो दर्शनाच्चावगाहनात् ॥१३३
दारुब्रह्मस्वरूपोऽयं साक्षाच् श्रीपुरुषोत्तमः ।
जलब्रह्मैव सा भागीरथी साक्षाद् विराजते ॥१३४
सार्वभौम त्वयाराध्यं दारुब्रह्मेह तिष्ठता ।
वाचस्पते जलब्रह्म तत्त्वया सेव्यतामिति ॥१३५
मुरारिगुप्तमालिङ्ग्य तत्र तस्य महाप्रभुः ।
भक्तिनिष्ठामुवाचैवं भक्ताः शृणुत साम्प्रतम् ॥१३६
अहं पूर्वमिमं भूयोभूय एवमलोभयम् ।
अयि गुप्त व्रजेन्द्रस्य सुतः परमसुन्दरः ॥१३७
स स्वयं भगवान् कृष्णः सर्वांशी सकलाश्रयः ।
विशुद्धानाविलप्रेमा ममग्ररससागरः ॥१३८

सर्वसद्गुणरत्नानामेको रत्नाकरः स्वयम् ।
विदग्धश्चतुरोधीरो रसिकानां शिरोमणिः ॥१३९
माधुरीमयचारित्रः स माधुर्य्यविलासवान् ।
चातुरीपूर्णवैदग्ध्यमयलीलारसाश्रयः ॥१४०
भज तं कृष्णमेव त्वं सदा कृष्णाश्रितो भव ।
न किञ्चिन्मन्यते साधु कृष्णस्योपसनां विना ॥१४१
इत्येवं मद्वचो नित्यं शृण्वतोऽस्य पुनः पुनः ।
मयि गौरवबुद्धयाभून्मनः किञ्चिद्विवर्त्तितम् ॥१४२
तदा मामुक्तवानेष सर्वथा तव किङ्करः ।
स्वतन्त्रो जातु नैवाहं तवैवादेशपालकः ॥१४३
इत्युक्त्वायं गृहं गत्वा रात्रौ चिन्तितवान् वहु ।
रघुनाथपरित्यागचिन्तया विह्वलोऽभवत् ॥१४४
चरणौ रघुनाथस्य कथङ्कारं त्यजाम्यहम् ।
प्रभोऽद्यैव विभावर्य्यां मरणं मे विधीयताम् ॥१४५
इत्येवं रजनीं सर्वां सशोकं विलपन्नयम् ।
तां रात्रिं जाग्रदेवासीदस्वास्थ्योद्विग्नचेतसा ॥१४६
अथ प्रातः समागत्य गृहीत्वा मे पदद्वयम् ।
अयं रोरुद्यमानो मां किञ्चिदित्थं न्यवेदयत् ॥१४७
श्रीपदे रघुनाथस्य विक्रीतं मस्तकं मया ।
न शक्नोमि तदाच्छेत्तुं प्राप्नोमि तु महाव्यथाम् ॥१४८
रघुनाथपदद्वन्द्वं न त्यक्तुं शक्यते मया ।
भज्यते च तवादेशः कोनूपायो विधीयते ॥१४९
अतएव कृपासिन्धो कृपामित्थं विधेहि मे ।
तवाग्रे मरणं मेऽस्तु संशयोमे विलुम्पतु ॥१५०
इति श्रुत्वा मया प्राप्तं मनसा सुमहत् सुखम् ।
भूतलादिममुत्थाप्य कृतमालिङ्गनं मया ॥१५१

साधु साधु कृतं गुप्त सुदृढ़ं भजनं त्वया ।
यन्मयाप्युपदिष्टस्य नैव ते चलितं मनः ॥१५२
युज्यते सेवकस्यैवमेव प्रीतिः प्रभोः पदे ।
प्रभुणा मोच्यमानोऽपि तत्पादो नैव मुच्यते ॥१५३
तवैवं महतीं निष्ठां ज्ञातुमिच्छन्नहं तदा ।
तथा दर्शितवांस्तुभ्यमाग्रहं हि पुनः पुनः ॥१५४
हनूमानसि साक्षात्त्वं श्रीरामस्यैव किङ्करः ।
तस्य श्रीपादपद्मं त्वं कथङ्कारं विमुञ्चसि ॥१५५
सोऽयं मुरारिगुप्तोमे सम्मतो जीवनोपमः ।
अस्याकर्णयतो दैन्यं दीर्य्यते हृदयं मम ॥१५६
अथ गाढ़ं समाश्लिष्य वासुदेवं महाप्रभुः ।
तद्गुणान् कथयामास सहस्रेन मुखैरिव ॥१५७
दत्तो निजगुणान् श्रुत्वा तदा लज्जितमानसः ।
प्रभोः पादयुगं धृत्वा कातर्य्येन न्यवेदयत् ॥१५८
जगतां तारणायैवावतारोऽयं तव प्रभो ।
तदङ्गीकुरु मे किञ्चिदेकमेतन्निवेदनम् ॥१५९
तच्च कर्त्तुं समर्थोऽसि प्रभो त्वं करुणामय ।
भवत्येव विनायासं यदि त्वं कुरुषे मनः ॥१६०
दृष्ट्वा दुःखानि जीवानां हृदयं मे विदीर्य्यते ।
पापान्यखिलजीवानां धेहि त्वं मम मूर्द्धनि ॥१६१
पापान्यादाय जीवानां भुज्यते नरकं मया ।
भव रोगन्तु जीवानां सर्वेषां मोचय प्रभो ॥२६२
इत्याकर्णयतश्चित्तं दुद्राव श्रीमहाप्रभोः ।
सकम्पस्वरभङ्गाश्रु वक्तुमारभत प्रभुः ॥१६३
नेव किञ्चिद् विचित्रं ते प्रह्लादोऽसि यतः स्वयम् ।
त्वयि कृष्णस्य सम्पूर्णः प्रसादो वर्त्तते खलु ॥१६४

कृष्णः करोति तत् सत्यं भक्तस्तं यद्धि याचते ।
नास्त्यन्यत् कृत्य मेवास्य विना भृत्येष्टपूरणम् ॥१६५
ब्रह्माण्डस्थितजीवानां निस्तारो वाञ्छित स्त्वया ।,
सर्वेषां पापभोगेन विनैवोद्धारणं भवेत् ॥१६६
नासमर्थो भवेत् कृष्णो धत्तेऽसौ निखिलं वलम् ।
तानि पापफलानि त्वां कथं नु भोजयत्ययम् ॥१६७
वाञ्छसि त्वं हितं येभ्यस्ते भवन्त्येव वैष्णवाः ।
कृष्णः सर्वाणि पापानि वैष्णवानां विलोपयेत् ॥१६८

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये षष्टितमः श्लोकः—

यस्त्विन्द्रगोपमथवेन्द्रमहो स्वकर्म-
बन्धानुरूपफलभाजन मातनोति ।
कर्माणि निर्दहति किन्तु च भक्तिभाजां
गोविन्द मादिपुरुषं तमहं भजामि ॥३॥"

तवाभिलाषमात्रेण भवेद् ब्रह्माण्डमोचनम् ।
सर्वेषां मोचने न स्याच् श्रीकृष्णस्य परिश्रमः ॥१६९
उदुम्बरे यथैकस्मिन् जायन्ते फलकोटयः ।
ब्रह्माण्डकोटयस्तद्वत् प्लवन्ते विरजाजले ॥१७०
विनश्यति पतित्वा चेत्तेषामेकतमत् फलम् ।
तथाप्युदुम्बरो वृक्षोऽपचयं स्वं न मन्यते ॥१७१
तथैवैकतमत्तेषां ब्रह्माण्डं यदि मुच्यते ।
तथापि मन्यते कृष्णो नैव स्वल्पामपि क्षतिम् ॥१७२
कृष्णस्यानन्त मैश्वर्य्यं वैकुण्ठदिकधाम यत् ।
कारणाब्धि रिति ख्याता परिखा तस्य वर्त्तते ॥१७३
ब्रह्माण्डै रन्वितानन्तै र्माया तत्र विराजते ।
परिखायां यथा भाण्डं प्लवते राजिकाभृतम् ॥१७४

राजिकानां यथैकस्यां नष्टायामपि न क्षतिः ।
अण्डस्यैकस्स नाशेऽपि हानिः कृष्णस्य नोतथा ॥१७५

ब्रह्माण्डै र्निखिलैः सार्द्धं यदि माया विनश्यति ।
तथाप्यपचयं कञ्चित् कृष्णो नैव हिं मन्यते ॥१७६

मृतैका छागली कोटिकामधेनुपतेरिव ।
षड़ैश्वर्य्यपते र्माया श्रीकृष्णस्य करोति किम् ॥१७७

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितम अध्याये दशमश्लोके वेदस्तुतिः—

जहि जय जह्यजामजित दोषगृभीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥४॥"

इत्येवं सर्वभक्तानां वर्णयन् स गुणावलीम् ।
समाश्लिष्य च तान् गाढ़ं गमनायान्वमन्यत ॥१७८

रुरुदु र्निखिला भक्ताः प्रभो र्विच्छेदशङ्कया ।
विषसाद प्रभुश्चैषां भाविविच्छेदकातरः ॥१७९

अवतस्थे प्रभोः पार्श्वे श्रीगदाधरपण्डितः ।
प्रभुर्यमेश्वरोद्याने तं निवासितवांस्ततः ॥१८०

पुरी च जगदानन्दः श्रीदामोदरपण्डितः ।
काशीश्वरश्च गोविन्दो दामोदरस्वरूपकः ॥१८१

इत्येते प्रभुणा सार्द्धं तदा नीलाचलेऽवसन् ।
तैः समं प्रत्यहं प्रात र्जगन्नाथं ददर्श सः ॥१८२

एकदा सार्वभौमोऽसावभ्युपेत्य महाप्रभुम् ।
बद्धाञ्जलिपुटः किञ्चिदेवमेव न्यवेदयत् ॥१८३

प्रस्थिता गौड़देशाय सर्वे सम्प्रति वैष्णवाः ।
निमन्त्रणाय देवस्य सम्प्राप्तोऽवसरो मया ॥१८४

मासं यावदतो भिक्षां कुरु मे वसताविति ।
प्रभुणोक्तं न धर्मोऽयं नार्हाम्याचरितुं तथा ॥१८५
सार्वभौमोऽवदद् भिक्षा क्रियतां दिनविंशतिम् ।
प्रभुः प्रोवाच नापीदं यतीनां धर्मलक्षणम् ॥१८६
प्रार्थितं सार्वभौमेण कुरु पञ्चदशाहकम् ।
प्रभुणोक्तं तवावासे भिक्षैकाहं भवेदिदि ॥१८७
सार्वभौमस्ततः पादौ गृहीत्वा श्रीमहाप्रभोः ।
निर्बन्धेनावदद् भिक्षा दशाहं क्रियतामिति ॥१८८
प्रभुः पञ्च दिनान्येवं क्रमेण लघयंस्ततः ।
पञ्चाहमेव भिक्षायाः स्वीचकार निमन्त्रणम् ॥१८६
प्रभवे सार्वभौमेण ततोऽन्यच्च निवेदितम् ।
वर्त्तन्ते भवता सार्द्धं दश सन्न्यासिनोऽपरे ॥१६०
पुरीगोस्वामिनो भिक्षा पञ्चाहं मेऽस्तु वेश्मनि ।
भवते पूर्वमेवाहं संलापेन न्यवेदयम् ॥१६१
दामोदरस्वरूपो हि वान्धवो मे भवत्यसौ ।
जात्वसौ भवता सार्द्धं जात्वेकाकी च यास्यति ॥१६२
अन्ये सन्न्यासिनो येऽष्टौ द्वौ द्वौ ते दिवसौ पुनः ।
यास्यन्त्यन्वहमेकैके मासः पूर्णोभवेत्ततः ॥१६३
वहवः सममेकत्र प्राप्ताः सन्न्यासिनो यदि ।
तान् सम्मानयितुं नालमपराधी भवाम्यहम् ॥१६४
छायामात्रद्वितीयस्त्वं मागमिष्यसि मद्गृहम् ।
दामोदरस्वरूपो वा सार्द्धमेष्यति जात्विति ॥१६५
प्रभो रिङ्गितमादाय समानन्दितमानसः ।
निमन्त्रणं चकारासौ तस्मिन्नह्नि महाप्रभोः ॥१६६
षष्ठ्या मातेति नाम्ना या भट्टाचार्य्यस्य गेहिणी ।
प्रभोः सेयं महाभक्ता स्नेहेन जननीसमा ॥१६७

भट्टाचार्य्यो गृहं प्राप्य तामेवाज्ञापयत्ततः ।
षष्ठ्या माता च सानन्दं पाक मारभत द्रुतम् ॥१९८
भट्टाचार्य्यस्य वेश्मासीत् सर्वसम्भारसम्भृतम् ।
असावानयदाहृत्य सर्वं शाकफलादिकम् ॥१९९
भट्टाचार्य्यः स्वयं पाककर्म सर्वं समाचरत् ।
आसीच्च पाकमर्मज्ञा षष्ठ्या माता विचक्षणा ॥२००
दक्षिणा पाकशालाया आस्तां द्वे भोगमन्दिरे ।
भोगसेवान्वहं शालग्रामस्याभवदेकतः ॥२०१
महाप्रभोस्तु भिक्षार्थं सुनिर्दिष्टं द्वितीयकम् ।
नूतनीकृत्य भट्टेन निभृतं तद्विनिर्मितम् ॥२०२
प्रभोस्तत्र प्रवेशार्थं द्वारमेकं कृतं वहिः ।
परिवेशयितुं भोज्यं द्वारमन्यन्महानसे ॥२०३
द्वात्रिंशत्फलपर्य्यायकदल्याः पूर्णपत्रके ।
न्यस्तो मानत्रयोन्मानतण्डुलान्नसमुच्चयः ॥२०४
पीतसौगन्ध्ययुक्तेन सर्पिषा सोऽप्यसिच्यत ।
पत्रान्तात् सर्पिषोधारा वहन्ति स्म समन्ततः ॥२०५
केतकीपत्रपात्राणि रम्भावल्कपुटानि च ।
नानाव्यञ्जनपूर्णानि सुविन्यस्तानि पङ्क्तिशः ॥२०६
शाका दशविधा निम्बपत्रसूक्तकयूषकम् ।
कटुमारीचमामिक्षवटास्तक्रवटास्तथा ॥२०७
दुग्धतुम्बी तथा दुग्धकुष्माण्डं बैसवारिकम् ।
मोचाघण्टस्तथा भृष्टमोचाव्यञ्जनसङ्करः ॥२०८
पक्वकुष्माण्डवव्यश्च बहूनि व्यञ्जनानि च ।
फुल्लवव्यश्च मूलानि फलानि विविधानि च ॥२०९
भृष्टवार्त्ताकुखण्डानि नवनिम्बदलैः सह ।
भर्जिताश्चापि कुष्माण्डपटोलमानचक्रिकाः ॥२१०

मुद्गसूपः सुधानिन्दी सूपश्च भृष्टमाषजः ।
वटिका अम्लरस्याश्छ मधुराम्लाश्च पञ्चषाः ॥२११
वटा रम्भामया मिष्टा मुद्गमाषमयास्तथा ।
क्षीरपूरास्तथा नारिकेलपूराश्च पिष्टकाः ॥२१२
काञ्जिकाक्तवटा दुग्धपृथुका दुग्धपिष्टकाः ।
बहवश्चापरे पूपाः शक्यन्ते नैव भाषितुम् ॥२१३
घृताक्तं परमान्नञ्च मृत्तिकाकुण्डसम्भृतम् ।
चाम्पेयकदलीचूतयुक्तं गाढ़ीकृतं पयः ॥२१४
आमिक्षिकान्यसंख्यानि रसाला मथितं दधि ।
यानि यानि च भक्ष्याणि गौड़े ख्यातानि चोत्कले ॥२१५
श्रद्धया तानि सर्वाणि भट्टाचार्य्येण चक्रिरे ।
शुभ्रपीठोपरि श्वेतवसनञ्च समास्तृणोत् ॥२१६
अभितोऽधाच्च भृङ्गारौ शीतामोद्यम्बुसम्भृतौ ।
तुलसीमञ्जरीमन्नव्यञ्जनोपरि स न्यधात् ॥२१७
अमृतगुटिकाः पिष्टान् पानकानि च सर्वशः ।
जगन्नाथप्रसादान् सोऽधत्तानीय पृथक् पृथक् ॥२१८
तदा माध्याह्निकं कृत्यं समाप्य श्रीमहाप्रभुः ।
ज्ञात्वा च तन्मनोभावं तत्रैकाकी समागमत् ॥२१९
पादौ प्रक्षालयामास भट्टाचार्य्यस्तदा प्रभोः ।
प्रविवेश ततो भोक्तुं गृहस्याभ्यन्तरं प्रभुः ॥२२०
अन्नादीन्यवलोक्यैव विस्मयेन समन्वितः ।
पर्य्यपृच्छत् प्रभुर्भट्टचार्य्यं भङ्गया कयाचन ॥२२१
अलौकिकमिदं सर्वमोदनव्यञ्जनादिकम् ।
पहरद्वयमात्रेण रन्धितं समभूत् कथम् ॥२२२
शतेन चुल्लिभिः पाकं कुर्वन्तोऽपि शतं जनाः ।
इयन्ति व्यञ्जनान्याशु शक्नुवन्ति न रन्धितुम् ॥२२३

त्वया निवेदितो भोगः कृष्णायेत्यनुमीयते ।
तुलसीमञ्जरी यस्माद् भोगस्योपरि दृश्यते ॥२२४
भाग्यवांस्त्वं तवोद्योगः सत्यं साफल्यमण्डितः ।
भोगो निवेदितो राधाकृष्णाभ्यामीदृशो यतः ॥२२५
अन्नस्य वर्णसौगन्ध्ये उभे परममोहने ।
स्वयं श्रीराधिकाकृष्णौ भुक्तवन्ताविदं ध्रुवम् ॥२२६
भवतो बहु सौभाग्यं कियन्नु स्तूयते मया ।
भाग्यवानहमप्यस्मि लप्स्ये शेष ममुष्य यत् ॥२२७
कृष्णस्यासनपीठोऽय मुत्थाप्य स्थाप्यतां त्वया ।
प्रसादो दीयतां मह्यं सज्जितो भाजनान्तरे ॥२२८
भट्टाचार्य उवाचाथ प्रभो मा कुरु विस्मयम् ।
भोक्ष्यते येन भोगोऽयं शक्त्या तस्यैव सिध्यति ॥२२९
उद्योगेन न मे नापि गृहिण्या रन्धनेन वा ।
भोगः सिद्धस्तु यस्यैव शक्त्या तत् सोऽवगच्छति ॥२३०
अत्रैवासन आसीनः प्रभो भुङ्क्तां भवानिति ।
प्रभुणोक्तमयं पीठः कृष्णस्य पूज्य एव नः ॥२३१
भट्ट ऊचेऽन्नपीठौ हि प्रसादौ सदृशौ मतौ ।
अन्नं भुञ्जीत को दोषस्तदा पीठोपवेशने ॥२३२
प्रभुः प्रोवाच साधूक्तं शास्त्रादेशोऽयमेव हि ।
भक्तैः स्वाद्योऽखिलो भोगशेषः कृष्णस्य निश्चितम् ॥२३३

"तथाहि श्रीमद्भागवते एकादशस्कन्धे षष्ठाध्याये चतुःषष्ठितमः श्लोकः—

त्वयोपयुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः ।
उच्छिष्टभोजिनो दासास्तव मायां जयेम हि ॥५॥"

तथापि त्वन्न मेतावन्मया भोक्तुं न शक्यते ।
भट्टः प्रोवाच जानामि भुङ्क्ष्व यावच्च युज्यते ॥२३४

नीलाद्रौ भुज्यते तु द्वा-पञ्चाशत्कृत्व एव हि ।
अन्नमेकैकभोगस्य शतशो भारसम्मितम् ॥२३५
राज्ञीषोड़शसाहस्रवेश्मसु द्वारकापुरे ।
अष्टादशकमातॄणां यादवानाञ्च वेश्मसु ॥२३६
कनिष्ठज्येष्ठपितृव्यमातुलानां गृहे व्रजे ।
सखीनां सर्वगोपानां त्रिसन्ध्यं भुक्तवान् भवान् ॥२३७
गोवर्द्धनस्य यज्ञेऽन्नं बुभुजे किल राशिशः ।
तुलया तस्य नैवेदमन्नं ग्रासमितं तव ॥२३८
त्वं तावदीश्वरः साक्षादहं क्षुद्रोऽस्मि पामरः ।
एकग्रासमितां माधुकरी मङ्गीकुरु प्रभो ॥२३९
इत्याकर्ण्य हसन् भोक्तुमुपविष्टः महाप्रभुः ।
जगन्नाथप्रसादांश्च भट्टो हृष्टमना ददौ ॥२४०
तदा भट्टस्य जामाता षष्ठ्या स्तद्दुहितुः पतिः ।
कुलीनो निन्दकः सोऽय ममोघ इतिनामकः ॥२४१
नागन्तुं पारयामास दिदृक्षुरपि भोजनम् ।
यष्टिपाणिर्यतो भट्टाचार्य्यो द्वारमधिष्ठितः ॥२४२
प्रसादं स यदा भट्टो दातुमन्यमना अभूत् ।
अमोघस्तु तदागत्य निनिन्दान्नं विलोकयन् ॥२४३
यावतान्नेन तृप्यन्ति दश द्वादश वा जनाः ।
सन्नयासी पुनरेकाकी तावद् भुङ्क्तेऽवलीलया ॥२४४
इत्याकर्ण्यैव भट्टोऽसौ परावृत्य निरैक्षत ।
तस्यावधान मालोक्यामोघः शीघ्रं पलायत ॥२४५
यष्टिमादाय भट्टस्तं प्रहर्त्तुञ्चान्वधावत ।
पलायित ममोघन्तु ग्रहीतुं न शशाक सः ॥२४६
गालिशापौ ददत्तस्मै भट्टाचार्य्यः समागतः ।
आत्मनिन्दां समाकर्ण्य हसन्नासीन्महाप्रभुः ॥२४७

षष्ठ्या माता शिरोवक्ष आघ्नाना पाणिना तदा ।
वारं वार मवादीच्च षष्ठी मे विधवास्त्विति ॥२४८
उभयो र्दुःखमालोक्य प्रभुः सान्त्वितवानुभौ ।
कृतवान् भोजनं तुष्ट उभयोरिच्छया तयोः ॥२४६
प्रभुमाचाम्य भट्टस्तु दत्तवान् रसवासकम् ।
तुलसीमञ्जरी श्चैलालवङ्गाद्यास्यवासनम् ॥२५०
प्रभोः प्रसाधयामास सर्व्वाङ्गं माल्यचन्दनैः ।
प्रणम्य दण्डवद् भूमौ दैन्येनेदं वचोऽ ब्रवीत् ॥२५१
आनीतोऽसि निजागारं निन्दां श्रावयितुं मया ।
प्रभो ममापराधोऽयं भवता क्षम्यतामिति ॥२५२
प्रभुणोक्तं न सा निन्दा तेन भूतार्थ मीरितम् ।
भवतः कोऽपराधोऽत्र सञ्जातो नैव बुध्यते ॥२५३
इत्याद्युक्त्वा निजावासं प्रातिष्ठत महाप्रभुः ।
भट्टाचार्यश्च तेनैव सार्द्धं तद्वास माययौ ॥२५४
आत्मानं बहुनिन्दत् स पतित्वा प्रभुपादयोः ।
प्रभुस्तं सान्त्वयन् भट्टं प्रैरयत् स्वगृहं प्रति ॥२५५
भट्टाचार्य्यो गृहं प्राप्य षष्ठ्या मात्रा समं तदा ।
जुगुप्समान आत्मानं वचनं किञ्चिद ब्रवीत् ॥२५६
चैतन्यस्वामिनो निन्दा कृता तेन श्रुता मया ।
तद्वधेनैव पापस्य प्रायश्चित्तं भवेन्मम ॥२५७
विसृजाम्यथवा प्राणानात्मनो यदि तद्भवेत् ।
न योग्यं तद्द्वयं यस्माद् द्वौ हि ब्राह्मणविग्रहौ ॥२५८
न द्रक्ष्यामि मुखं तस्य निन्दकस्य कदाचन ।
न ग्रहीष्यामि तन्नाम त्यक्तवानहमस्मि तम् ॥२५६
षष्ठीं ब्रूहि त्यजेत् सा तं पतितः सोऽभवद्यतः ।
यदि स्यात् पतितो भर्त्ता परित्यक्तुं स युज्यते ॥२६०

"तथाहि श्रीमद्भागवते सप्तमस्कन्ध एकादशाध्यायेऽष्टाविंशः श्लोकः—

सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।
अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥६॥"
तस्यां रात्रौ गतोऽमोघः पलाय्य क्वाप्यलीयत ।
प्रभाते तं समाक्रामद् घोरव्याधि र्विसूचिका ॥२६१
म्रियतेऽमोघ इत्येवं श्रुत्वा भट्टेन भाषितम् ।
सहायीभूय दैवं मे कर्त्तव्यं व्यदधान्मम ॥२६२
अपराधः फलत्येव कृतो द्रागीश्वरं प्रति ।
इत्युदीर्य्य पपाठासौ वचने शास्त्रयोर्द्वयोः ॥२६३

"तथाहि महाभारते वनपर्वणि (२४१।१५)—

महता हि प्रयत्नेन हस्त्यश्वरथपत्तिभिः ।
अस्माभि र्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् ॥७॥"

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्थाध्याये षट्चत्वारिंशः श्लोकः—

आयुः श्रियं यशोधर्मं लोकानाशिष एव च ।
हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥८॥"
श्रीगोपीनाथ आचार्य्यो दर्शनार्थं गतः प्रभोः ।
भट्टाचार्य्यस्य वृत्तान्तं तमजिज्ञासत प्रभुः ॥२६४
आचार्य्यः कथयामास कृतं द्वाभ्यामुपोषणम् ।
अमोघ स्त्यजति प्राणान् स विसूचिकया रुजा ॥२६५
इत्याकर्ण्य कृपासिन्धुः प्रभुर्धावन् समागतः ।
अमोघं कथयामास तद्वक्षः पाणिना स्पृशन् ॥२६६
हृदयं ब्राह्मणस्यैतदवदातं स्वभावतः ।
अधिष्ठानाय कृष्णस्य स्थानं योग्यतमं भवेत् ॥२६७
कथं मात्सर्य्यचण्डाल मत्र स्थापितवानसि ।
पवित्रं परमं स्थानं कलुषीकृतवान् कथम् ॥२६८

सार्वभौमस्य सङ्गात्ते कल्मषं क्षयमागतम् ।
जीवोऽवलम्बते कृष्णनाम क्षीणे हि कल्मषे ॥२६६
उत्थीयतां त्वयामोघ गृह्यतां कृष्णनाम च ।
भगवानचिरेणैव करिष्यति कृपां त्वयि ॥२७०
तच्छ्रुत्वा कृष्ण कृष्णेति भाषित्वामोघ उत्थितः ।
प्रेमोन्मादेन मत्तश्च समारभत नर्त्तितुम् ॥२७१
कम्पाश्रुपुलकस्वेदस्तम्भगद्गदसंयुतः ।
तस्य प्रेमोर्मि मालोक्य जहास श्रीमहाप्रभुः ॥२७२
अमोघो विनयेनोचे गृहीत्वा चरणौ प्रभोः ।
क्षम्यतामपराधो मे करुणासागर प्रभो ॥२७३
मुखेनानेन दग्धेन निन्दां ते कृतवानहम् ।
इत्युक्त्वा स्वकपोलौ स चपेटेनाहतानिशम् ॥२७४
गण्डाबाघात माघात मुच्छूनौ कृतवांस्तदा ।
श्रीगीपीनाथ आचार्य्यो धृत्वा हस्तौ न्यवारयत् ॥२७५
तस्य गात्रं परामृश्य समाश्वासितवान् प्रभुः ।
सार्वभौमस्य सम्पर्कात्त्वं मम स्नेहभाजनम् ॥२७६
सार्वभौमस्य गेहे ये दासा दास्यश्च कुक्कुराः ।
तेऽपि मे प्रेमपात्राणि किमुतान्ये स्वका जनाः ॥२७७
अपराधस्तु ते नास्ति कृष्णनामावलम्ब्यताम् ।
इत्युक्त्वा सार्वभौमस्य गृहं यातः प्रभुः स्वयम् ॥२७८
अवलोक्य प्रभुं सार्वभौमो जग्राह तत्पदम् ।
तमाश्लिष्य प्रभुस्तस्मिन्नासने समुपाविशत् ॥२७९
प्रभुणोक्त ममोघोऽसौ शिशुः किं तस्य दूषणम् ।
कथं कृतोपवासोऽसि कथं तस्मै च कुप्यसि ॥२८०
उत्तिष्ठ स्नाहि वीक्षस्व जगन्नाथमुखाम्बुजम् ।
शीघ्र मागम्य भुङ्क्ष्व त्वं तदा भवति मे सुखम् ॥२८१

तावद त्रोपविष्टोऽहं तिष्ठामि त्वदपेक्षया ।
प्रसादं यावदागत्य त्वमश्नासि ममाग्रतः ॥२८२
भट्टाचार्य्यः प्रभोः पादौ गृहीत्वेदमवोचत ।
अमरिष्यदमोघोऽसौ कथं तं त्वमजीवयः ॥२८३
प्रभुणोक्त ममोघस्ते पालनीयो हि वालकः ।
न गृह्णाति पिता दोषं वालस्य यत् स पालकः ॥२८४
सोऽधुना वैष्णवो जातस्तस्यागो नष्टमेवहि ।
प्रसाद मवलम्वस्व त्वं तस्योपरि सम्प्रति ॥२८५
भट्टेणोक्तं प्रभो गच्छ जगन्नाथं निरीक्षितुम् ।
स्नानं कृत्वा सपद्येव तत्रायास्याम्यहं ततः ॥२८६
आदिदेश प्रभु गोपीनाथ तिष्ठेह साम्प्रतम् ।
भट्टे भुक्तप्रसादे च तद्वृत्तं मे वदिष्यसि ॥२८७
इत्युक्त्वा च प्रभौ याते जगन्नाथं विलोकितुम् ।
भट्टः स्नात्वा जगन्नाथं दृष्ट्वा चाशितवांस्ततः ॥२८८
अमोघश्चाभवद् भक्त ऐकान्त्येन महाप्रभोः ।
प्रेम्णा नृत्यन् महाशान्तः कृष्णनामाग्रहीत् सदा ॥२८९
इत्थं लीला विचित्राश्च कृतवान् श्रीशचीसुतः ।
योऽपश्यदश्रृणोद्वापि स विस्मितमना अभूत् ॥२९०
भोजनस्य विलासेऽस्मिन् भट्टवेश्मन्यनुष्ठिते ।
प्राकाशयद् विचित्राणि चरित्राणि महाप्रभुः ॥२९१
इत्थं भोजनचारित्रं सार्वभौमगृहे कृतम् ।
प्रेमेदं सार्वभौमस्य विदितं यदिहोदितम् ॥२९२
षष्ठ्या मातुश्च यत् प्रेम प्रसादो यो महाप्रभोः ।
कृता स्वभक्तसम्वन्धादपराधक्षमा च या ॥२९३
श्रद्धया य इमा लीला आकर्णयति मानवः ।
लभते सोऽचिरादेव चैतन्यचरणाश्रयम् ॥२९४

आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२६५

इति श्रीचैतन्यचरितामृते मध्यखण्डे सार्वभौमगृहे भोजनविलासो नाम पञ्चदशः परिच्छेदः ।

—o—

मध्यलीलायां षोड़शः परिच्छेदः

"गौड़ारामं गौरमेघः सिञ्चन् स्वालोकनामृतैः ।
भवाग्नि-दग्ध-जनता-वीरुधः समजीवयत् ॥१॥"
मुहुर्जयतु गौरेन्दु र्नित्यानन्दोजयत्यसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
श्रीमद्वृन्दावनं यातुमाकाङ्क्षन्तं महाप्रभुम् ।
प्रतापरुद्र आकर्ण्य वैमनस्य मुपागमत् ॥२
सार्वभौमं तथा रामानन्दञ्चाहूय सन्निधौ ।
ताबुभौ प्रश्रयेणासौ कथयामास भूपतिः ॥३
प्रभु र्नीलाचलं त्यक्त्वा यातुमन्यत्र वाञ्छति ।
भवद्भयां क्रियतां यत्नस्तस्यात्रैव निवासने ॥४
तं विना राज्यमेतन्मे प्रतिभाति न शोभनम् ।
आधीयन्तामतो नानोपायाः स्थापयितुं प्रभुम् ॥५
अथासौ सार्वभौमेण रामानन्देन च प्रभुः ।
आलोचयत् प्रयाणाय यदा बृन्दावनं प्रति ॥६
ऊचतुस्तावुभावेव तदा पश्य रथोत्सवम् ।
सम्प्राप्ते कार्त्तिके मासे यथेच्छं यातुमर्हसि ॥७
प्राप्तेऽथ कार्त्तिकेऽब्रूतां तौ च शीतोऽधुना महान् ।
दोलयात्रां निरीक्ष्यैव यास्यसीत्येव सौष्ठवम् ॥८

अद्य श्वो वेति कृत्वा तौ कुर्वन्तौ बहुकौशलम् ।
गमनं नान्वमन्येतां प्रभो विंच्छेदशङ्कया ॥६
न निवारयितुं शक्यः स्वतन्त्रो यद्यपि प्रभुः ।
न तथापि प्रतस्थेऽसौ भक्तानामिच्छया बिना ॥१०
तृतीये वत्सरे प्राप्ते गौड़भक्तजनाः पुनः ।
सर्वे नीलाचलं गन्तुं बभूवुः कृतमानसाः ॥११
समवेतास्ततः सर्वेऽद्वैताचार्य्य मुपागताः ।
आचार्य्यश्च प्रभुं द्रष्टुं जगामोल्लसितान्तरः ॥१२
प्रेमभक्तिप्रचारार्थं गौड़े प्रत्युष्यतामिति ।
यद्यप्याज्ञा प्रभोरासीन्नित्यानन्दप्रभुं प्रति ॥१३
स तथाप्यचलद्द्रष्टुं नित्यानन्दो महाप्रभुम् ।
को हि बोद्धुमलं नित्यानन्दस्य प्रेमचेष्टितम् ॥१४
श्रीवासाचार्य्यरत्नौ च रामो विद्यानिधिश्च ते ।
वासुदेवो मुरारिश्च गोविन्दः सोदरास्त्रयः ॥१५
राघवः पण्डितोऽपि स्वां मञ्जुषां सज्जयंस्तथा ।
पट्टडोरकमादाय कुलीनग्रामवासिनः ॥१६
नरहरिः खण्डवासी तथा श्रीरघुनन्दनः ।
प्रस्थिता निखिला भक्ताः कस्तान् संख्यातुमर्हति ॥१७
घट्टशुल्कं शिवानन्दसेनस्तु निरवाहयत् ।
अनयच्च सुखेनैव सर्वांस्तान् प्रतिपालयन् ॥१८
समाधत्त च कर्माणि वासांश्च सहयात्रिणाम् ।
स एवासीदुड़िप्यायाः सर्ववर्त्मविचक्षणः ॥२६
तस्मिन् वर्षे प्रभुं द्रष्टुं पुरन्ध्रीणां गणो ययौ ।
जगामाच्युतमाता चाद्वैताचार्य्येण सङ्गता ॥३०
श्रीवासपण्डितेनापि समं याता च मालिनी ।
शिवानन्देन सङ्गत्य प्रयाता तस्य गेहिणी ॥२१

चैतन्यदासनामा च शिवानन्दस्य पुत्रकः ।
सोऽप्ययासीत् प्रभुं द्रष्टुं सोल्लासहृदयस्तदा ॥२२
सार्द्धमाचार्य्यरत्नेन ययौ तस्य कुटुम्बिणी ।
तस्यास्तु प्रेमसम्पत्ति र्न वक्तुं शक्यते मया ॥२३
सर्वा वैष्णवगेहिण्यः प्रभवे भैक्ष्यदित्सया ।
तस्य हृद्यानि वस्तूनि जगृहुः स्वस्ववेश्मनः ॥२४
समाधाय शिवानन्दः सर्वं कृत्यञ्च तोषयन् ।
घट्टपालञ्च सर्वेषां वासस्थानान्यकल्पयत् ॥२५
दत्त्वा भक्ष्याणि सर्वेषामकरोत् परिपालनम् ।
स प्रतस्थे प्रभुं द्रष्टुं परमानन्दमानसः ॥२६
श्रीगोपीनाथ मैक्षन्त रेमुणामेत्य तेऽखिलाः ।
आचार्य्यः कृतवांस्तत्र नृत्यसङ्कीर्त्तने मुदा ॥२७
नित्यानन्द मभिज्ञाय तत्रत्या देवसेवकाः ।
अभ्युपेत्य च तं सर्वे सश्रद्धं बहुमेनिरे ॥२८
महान्तो वैष्णवाः सर्वे निन्युस्तत्रैव तां निशाम् ।
द्वादश क्षीरभाण्डानि तदग्रे सेवका दधुः ॥२९
नित्यानन्दः प्रभुः क्षीरं सर्वेभ्यो वण्टयन् ददौ ।
प्राप्य क्षीरप्रसादं ते परमानन्द माययुः ॥३०
माधवेन्द्रपुरीवृत्तं गोपालस्थापनं तथा ।
चन्दनप्रार्थनातथ्यं गोपालेन पुरीं प्रति ॥३१
चोरितं गोपीनाथेन क्षीरं यत्तत् पुरीकृते ।
एतानि श्रुतपूर्वाणि महाप्रभुमुखात् पुरा ॥३२
नित्यानन्दस्तदा तत्र सर्वेभ्योऽकथयत्तथा ।
आनन्दो ववृधे चित्ते सर्वेषां तानि शृण्वताम् ॥३३
एवमेव व्रजन्तस्ते कटके समुपस्थिताः ।
दृष्ट्वा श्रीसाक्षिगोपालं तत्राह्नि तत्र च स्थिताः ॥३४

साक्षिगोपालवृत्तान्तं नित्यानन्देन वर्णितम् ।
आकर्ण्योपचितानन्दा बभूवु र्वैष्णवास्तदा ॥३५

प्रभुणा सह सन्धातुं सर्वे सोत्कण्ठमानसाः ।
अविलम्बितमेवामी श्रीनीलाचलमागताः ॥३६

प्रभुराकर्ण्य तानष्टादशनाली मुपागतान् ।
गोविन्दस्य करेणैव प्रैरयन्मालिकाद्वयम् ॥३७

परिधापिततन्माल्यौ गोविन्देन प्रभू उभौ ।
अद्वैतश्चावधूतश्च सम्प्राप्तौ परमं सुखम् ॥३८

तत्रैवारब्धवन्तौ तौ कृष्णसङ्कीर्त्तनं तदा ।
तत आगतवन्तौ च नृत्यन्तौ परया मुदा ॥३९

भूयोऽपि प्रेरयामास माल्यहस्तान्निजान् गणान् ।
प्रत्युद्यातान् स्वरूपादीन् पुरस्तेषां शचीसुतः ॥४०

ते नरेन्द्रसरः प्राप्य समवेताश्च तैः सह ।
तान्महाप्रभुदत्ताभि र्मालाभिः समभूषयन् ॥४१

तान् गौरहरिराकर्ण्य सिंहद्वार मुपागतान् ।
स्वयं तत्र समागत्य तैः समं समगच्छत ॥४२

जगन्नाथं ददर्शाथ तानादाय महाप्रभुः ।
ततः सर्वान् गृहीत्वा तान्निजावासं गतः पुनः ॥४३

आनीतं वाणीनाथेन काशीमिश्रेण च प्रभुः ।
प्रसादं भोजयामास सर्वांस्तान्निजपाणिना ॥४४

यद् यद् वासगृहं यो यः प्राप्तवान् पूर्ववत्सरे ।
विश्रामं ग्राहयामास प्रेष्यं स्तत्र तं प्रभुः ॥४५

एवं ते चतुरो मासान भक्तास्तत्रावतस्थिरे ।
सङ्कीर्त्तन-विलासं ते विदधुः प्रभुणा समम् ॥४६

पूर्ववद्रथयात्रायामासन्नायामशोधयत् ।
प्रभुरादाय तान् सर्वान् गुण्डिचामन्दिरं पुनः ॥४७

जगन्नाथाय दत्त्वा च कुलीनग्रामवासिनाम् ।
पट्टडोरं ननर्त्तासौ रथाग्रे पूर्ववत् प्रभुः ॥४८
कृत्वा भूयिष्ठनृत्यानि तदुद्यानं पुनर्गतः ।
वापीतीरे स तत्रैव गत्वा विश्राम मग्रहीत् ॥४६
विप्रः कश्चन राढ़ीयो नित्यानन्दस्य किङ्करः ।
महासौभाग्यभागासीत् कृष्णदासाभिधानकः ॥५०
अभ्यषिञ्चत् प्रभुं सोऽयं घटमापूर्य्य वारिणा ।
अभिषेकेण तस्यैवं लेभे तृप्तिं परां प्रभुः ॥५१
प्रसादान् सुबहून् प्राप्तान् बलगण्डिनिवेदितान् ।
मिलित्वा सकलैर्भक्तै र्महाप्रभुरभक्षयत् ॥५२
ईक्षाञ्चक्रे यथापूर्वं रथयात्रां पुनः प्रभुः ।
स होरापञ्चमीयात्रां भक्तैः सार्द्धं ददर्श च ॥५३
तत आचार्य्यगोस्वामी तं निमन्त्रितवान् यदा ।
सवात्या महती वृष्टि र्धारासारैरभूत्तदा ॥५४
श्रीबृन्दावनदासेन वर्णितं तत् सुविस्तृतम् ।
ततो निमन्त्रयामास श्रीवासोऽपि महाप्रभुम् ॥५५
दासीम्मन्या प्रभो र्भक्त्या वात्सल्यान्मातृमानिनी ।
अपचन्मालिनी सर्वं व्यञ्जनं तदभीप्सितम् ॥५६
आसन्नाचार्य्यरत्नाद्या भक्ता मुख्यतमाः प्रभोः ।
न्यमन्त्रयन्त ते सर्वे तं तदैवान्तरान्तरा ॥५७
चातुर्मास्यात्यये नित्यानन्देन रहसि स्थितः ।
किमप्यालोचयामास प्रत्यहं श्रीमहाप्रभुः ॥५८
प्रभुणाचार्य्यगोस्वामी सङ्केतेनैव भाषितः ।
प्रहेलिकावचोऽब्रूत न तत् केनाप्यबुध्यत ॥५६
मुखं तस्य निरीक्ष्यैव हसति स्म शचीसुतः ।
ननर्त्ताद्वैतआचार्य्यो ज्ञात्वा तस्यानुमोदनम् ॥६०

कासावाज्ञास्य याच्ञा वा नैव केनाप्यबुध्यत ।
प्रभुस्तं गाढ़ माश्लिष्य प्रस्थानाय व्यजिज्ञपत् ॥६१
नित्यानन्दं प्रभुः प्रोचे श्रीपाद श्रूयतां त्वया ।
त्वामद्य प्रार्थये नूनं प्रसादः क्रियतां मयि ॥६२
नैव नीलाचलक्षेत्र मागच्छ प्रतिवत्सरम् ।
गौड़मध्युष्य साफल्यं नय त्वं मे मनोरथम् ॥६३
तस्य साधनसामर्थ्यं नान्यस्मिन्दृश्यते मया ।
मयापि दुष्करं कर्म त्वयैकेनैव साध्यते ॥६४
नित्यानन्द उवाचाहं देहः प्राणो भवान्ननु ।
देहप्राणौ न भिद्येते इति प्रामाणिकं स्वतः ॥६५
भवानचिन्त्यशक्त्यैव यथेच्छं कर्त्तु मर्हति ।
यत् कारयति तद्धय्येव करोमि नियमं विना ॥६६
तच्चापि प्रभुरालिङ्ग्य गमनाय व्यजिज्ञपत् ।
स इत्थं निखिलान् भक्तान् विससर्ज महाप्रभुः ॥६७
कुलीनग्रामिणो भक्ताः पूर्ववत्तं न्यवेदयन् ।
आज्ञापय प्रभोऽस्माभिः किं कर्त्तव्यं भवेदिति ॥६८
कुरु वैष्णवसेवा च सङ्कीर्त्तन मितिद्वयम् ।
शीघ्रं प्राप्स्यसि कृष्णस्य पद मित्यवदत् प्रभुः ।६९
तैः पृष्टं वैष्णवः कोनु किं पुनस्तस्य लक्षणम् ।
प्रभुस्तेषां मनो ज्ञात्वा प्रत्यवादीत् स्मिताननः ॥७०
कृष्णनाम मुखे यस्य नैरन्तर्य्येण राजते ।
स एव वैष्णवश्रेष्ठो भज तच्चरणाविति ॥७१
परस्मिन् वत्सरे भूयः कृते प्रश्ने तथैव तैः ।
वैष्णवानाञ्च तां स्तारतम्यं प्रभुरुपादिशत् ॥७२
ईक्षमाणस्य यं कृष्णनाम वक्त्रे स्फुरत्यलम् ।
स एव वैष्णवश्रेष्ठ इति जानीत निश्चितम् ॥७३

वैष्णवो वैष्णवतरः को वैष्णवतमः पुनः ।
इत्येवं क्रमतोऽवादीत् प्रभु वैंष्णवलक्षणम् ॥७४
अथैवं वैष्णवाः सर्वे गौड़ं प्रति प्रतस्थिरे ।
तस्मिन् वर्षे स्थितो विद्यानिधि र्नीलाचले पुनः ॥७५
स्वरूपेण समं तस्य सख्यप्रीति रभूत्ततः ।
अन्योन्यं कृष्णसंलाप एकत्रैव स्थितिस्तयोः ॥७६
मन्त्रेणादीक्षयद्भ्र यः स गदाधरपण्डितम् ।
उत्तरीयाख्यषष्ठ्यान्तु देवयात्रां निरैक्षत ॥७७
परिधत्ते जगन्नाथः समण्डं वसनं तदा ।
पश्यत स्तद् घृणायुक्त मभूद् बिद्यानिधेर्मनः ॥७८
तस्यां रात्रौ जगन्नाथवलरामौ समागतौ ।
आहतां तं चपेटेन हसन्तौ भ्रातराबुभौ ॥७९
आचार्य्यः स्फीतगण्डोऽपि जातः सोल्लासमानसः ।
तद्वृन्दावनदासेन विस्तरेणैव वर्णितम् ॥८०
इत्थं गौड़स्थिता भक्ता आगत्य प्रतिवत्सरम् ।
स्थित्वा च प्रभुणा सार्द्धं चक्रु र्यात्रा-निरीक्षणम् ॥८१
विशेषा अभवन् ये च यस्मिन् यस्मिंश्च वत्सरे ।
अग्रतः कथयिष्यामि तान् विशेषान् सविस्तरम् ॥८२
एवं चत्वारि वर्षाणि व्यतीतानि महाप्रभोः ।
द्वे वर्षे दक्षिणं गत्वा ततः प्रत्यागतस्य च ॥८३
पुनर्वर्षद्वयं बृन्दावनं गन्तुमभीप्सतः ।
रामानन्दस्य निर्बन्धात् प्रभुर्गन्तुन्तु नाशकत् ॥८४
पञ्चमे वत्सरे भूयो गौड़भक्ताः समागताः ।
रथं दृष्ट्वा तु नातिष्ठन् गौड़ं प्रतिगताः पुनः ॥८५
एकदा सार्वभौमञ्च रामानन्द मथ प्रभुः ।
आश्लिष्य मधुरां वाच मिमां वक्तुं प्रचक्रमे ॥८६

उत्कण्ठा मम भूयिष्ठा गन्तुं वृन्दावनं प्रति ।
वर्षद्वयं न यातोऽहं निर्बन्धातिशयेन वाम् ॥८७
अवश्य मधुना यामि भवतं सम्मतौ युवाम् ।
अन्तरेण युवा मन्या गतिर्मे नैव वर्त्तते ॥८८
विद्येते गौड़े देशे च मम द्वौ परमाश्रयौ ।
जननी जाह्नवी चैव दयामय्यावुभे अपि ॥८६
यामि गौड़पथेनैव ताः सर्वांश्च विलोकयन् ।
तद् युवा मनुमन्येथां सुप्रसन्नेन चेतसा ॥६०
प्रभोर्वाणीं समाकर्ण्य चक्रतुस्तौ विमर्शनम् ।
न हठव्यवहारोऽयं कर्त्तव्यः प्रभुणा सह ॥६१
ऊचतुर्द्वावियं प्रावृट् प्राप्ता गन्तुं न शक्यते ।
विजयाख्यदशम्यान्तु गन्तव्यं भवता खलु ॥६२
यापयित्वाथ ता वर्षाः प्रभुः सानन्दचेतसा ।
दशम्यां विजयाख्यायां प्रस्थानं कृतवांस्ततः ॥६३
जगन्नाथप्रसादान्न-शुष्कचन्दन-डोरिकाः ।
यावत्यः प्राप्तपूर्वाश्च प्रभुस्ताः सममग्रहीत् ॥६४
याचित्वाज्ञां जगन्नाथं प्रभाते प्रस्थितं प्रभुम् ।
उड़िष्यावासिनो भक्ता अनुगच्छन्त आबभुः ॥६५
परावर्त्यातियत्नेन भक्तांस्तानोड्रवासिनः ।
भवानीपुर मागच्छन्निजभक्तजनैः प्रभुः ॥६६
पश्चाद्दोलाधिरूढ़ोऽसौ रामानन्दः समागतः ।
प्रसादान् प्रेरयामास वाणीनाथो बहूनथ ॥६७
प्रसादं भक्षयित्वाथ तत्रैव स्थितवान् प्रभुः ।
प्रातः प्रतिष्ठमानश्च भुवनेश्वर मागतः ॥६८
ततः कटकमागत्य स गोपालं निरैक्षत ।
स्वप्नेश्वरेण विप्रेण प्रभुस्तत्र निमन्त्रितः ॥६६

श्रीरामानन्दरायेण गणेष्वामन्त्रितेषु च ।
वहिरुद्यान मागत्य प्रभुर्वासमकल्पयत् ॥१००
व्यश्राम्यद् वकुलस्याधः कृतभिक्षो महाप्रभुः ।
रायः प्रतापरुद्रस्य समीपे प्रस्थित स्तदा ॥१०१
आकर्ण्यानन्दितो राजा शीघ्रं तत्र समागतः ।
प्रभुं तत्र समालोक्य दण्डवन्न्यपतद् भुवि ॥१०२
उत्थाय प्रणतो भूयोभूयः प्रणय-विह्वलः ।
गलदश्रु हृष्टरोमा स्तुतवान् स महाप्रभुम् ॥१०३
भक्तिं तस्य च संलक्ष्य प्रभुस्तुष्टमना अभूत् ।
समाशिश्लेष राजानमुत्थाय श्रीमहाप्रभुः ॥१०४
पुनः स्तुत्वा च राजासौ प्रणनाम पुनः प्रभुम् ।
बभूव स्नातसर्वाङ्गः स प्रभोः करुणाश्रुभिः ॥१०५
रामानन्देन राजाथ सान्त्वयित्वोपवेशितः ।
कायेन मनसा वाचा दयाञ्चक्रे प्रभुश्च तम् ॥१०६
गौरधामा चकारैवं करुणां तत्र राजनि ।
प्रतापरुद्र-सन्त्रातेत्यभिधाभूत् प्रभोर्यतः ॥१०७
राज्ञः पात्रगणाः सर्वे प्रभुं तत्र ववन्दिरे ।
राज्ञेऽथ गमनानुज्ञां दत्तवान् श्रीशचीसुतः ॥१०८
वहिरागत्य राजापि पत्रमेक मलेखयत् ।
राज्ये कर्माधिकारिभ्यः सर्वेभ्यः प्रैरयच्च तत् ॥१०९
स्व-स्व-ग्रामेषु कर्त्तव्यं वासगेहं नवं नवम् ।
भ्रियन्तां पञ्च वा सप्त नव्यगेहानि वस्तुभिः ॥११०
स्वयञ्च प्रभुमादाय स नेयस्तत्र तत्र च ।
तत्सेवार्थं दिवारात्रं स्थेयं वेत्रकरै रिति ॥१११
महापात्रद्वयं मर्दराजञ्च हरिचन्दनम् ।
क्रियन्तां सर्वकर्माणीत्यादिदेश नृपः पुनः ॥११२

नव्यां तरणिमानीय स्थाप्यतां सा नदीतटे ।
प्रभुः स्नात्वा यया तत्र नदीपारं गमिष्यति ॥११३
रोप्यतांस्तम्भ एकोऽत्र तीर्थं कार्य्यं महत् पुनः ।
नित्यं स्नास्यामि तत्रैव दिष्ट्या तत्र म्रिये यथा ॥११४
नवीनोत्तम आवासश्चतुर्द्वारो विधीयताम् ।
रामानन्द प्रयाहि त्वं श्रीमहाप्रभुसन्निधौ ॥११५
प्रभुः प्रस्थास्यते सायमिति श्रुत्वा च भूपतिः ।
राज्ञीरारोपयामास पटावासे गजोपरि ॥११६
प्रभो र्यात्रापथप्रान्ते ते गजाः पङ्क्तिशः स्थिताः ।
सायं प्रस्थातु मारेभे प्रभुरात्मगणैः सह ॥११७
चित्रोत्पलां नदीं प्राप्य तत्तीर्थे स्नातवान् प्रभुः ।
महिष्यः सकला दृष्ट्वा तं प्रणेमुः सभक्तिकम् ॥११८
प्रभोः सन्दर्शनात् सर्वाः प्रेममय्योऽभवन् हि ताः ।
वदन्त्यः कृष्ण कृष्णेति गलदश्रुविलोचनाः ॥११९
श्रूयते न तथा कोऽपि कृपालुर्भुवनत्रये ।
कृष्णप्रेमा प्रजायेत यं दूरादपि पश्यताम् ॥१२०
प्रभु र्नाव मथारुह्य नदीपारं गतस्ततः ।
ज्योत्स्नावत्यां व्रजन् रात्रौ चतुर्द्वारं समासदत् ॥१२१
तां रात्रिं तत्र नीत्वा च प्रातः स्नाते महाप्रभौ ।
श्रीजगन्नाथदेवस्य महाप्रसाद आगतः ॥१२२
नृपते राज्ञया प्रैष्यः प्राहिणोत् प्रतिवासरम् ।
जगन्नाथप्रसादांस्तान् भूयिष्ठान् बहुभिर्जनैः ॥१२३
प्रभुरात्मगणैः सार्द्धं प्रसादं भक्षयंस्ततः ।
उत्थाय गन्तुमारेभे हरि र्हरि रिति ब्रुवन् ॥१२४
रामानन्दस्तथा मर्दराजश्च हरिचन्दनः ।
एते त्रयोजनाः सार्द्धं सेवमानाः प्रतस्थिरे ॥१२५

दामोदरस्वरूपश्च पुरीस्वामी तथैव च।
मुकुन्दो जगदानन्दः श्रीवक्रेश्वरपण्डितः ॥१२६
काशीश्वरश्च गोविन्दो हरिदासाख्यठक्कुरः।
श्रीगोपीनाथ आचार्य्यः श्रीदामोदरपण्डितः ॥१२७
तथा रामाइ-नन्दाई भक्ताश्च वहवोऽपरे।
गणयेत् कोनु तान् सर्वानुक्ता मुख्यतमा इमे ॥१२८
अगच्छत् प्रभुणा सार्द्धं पण्डितोऽपि गदाधरः।
मा त्याक्षीः क्षेत्रसन्नयासमित्युक्तः प्रभुणाथ सः ॥१२६
निषिद्धः पण्डितः प्रोचे स नीलाद्रि र्यतोभवान्।
एष मे क्षेत्रसन्न्यासः प्रयात्वद्य रसातलम् ॥१३०
प्रभुणोक्तं कुरुष्वेह गोपीनाथस्य सेवनम्।
उवाच पण्डितः सेवाकोटि स्त्वत्पाददर्शनम् ॥१३१
तेनोक्तं मत्कृते सेवात्यागाद्दोषः स्पृशेद्धि माम्।
अत्र स्थित्वैव सेवस्व सन्तोषो मे भवेत्ततः ॥१३२
पण्डितः कथयामास सर्वान् दोषान् भजाम्यहम्।
त्वया सार्द्धं न यास्यामि गमिष्याम्येकलस्ततः ॥१३३
त्वत्कृते नैव यास्यामि द्रष्टुं यास्यामि मातरम्।
प्रतिज्ञा-सेवन-त्यागाद्दोषभागहमेव हि ॥१३४
इति पण्डितगोस्वामी कथयित्वा पृथग् ययौ।
प्रभुः कटक मागत्य तमानाययदन्तिके ॥१३५
पण्डितस्य तु चैतन्य-प्रेमा बुद्धे रगोचरः।
प्रतिज्ञां कृष्णसेवाञ्च तृणवत्त्यक्तवानसौ ॥१३६
तस्यैवाचरणेनैव मन्तः सन्तुष्टवान् प्रभुः।
गृहीत्वा तत्करौ प्रेमरोषेणेद मवोचत ॥१३७
प्रतिज्ञा-सेवन-त्याग उद्देश्यो योऽभवत्तव।
स सिद्धोऽभूद् यतस्त्यक्त्वा दूरदेशं त्वमागतः ॥१३८

तिष्ठासि मया सार्द्धं मात्मनः सुखवाञ्छया ।
तव धर्मद्वयं याति मम दुःखन्तु जायते ॥१३६
आकाङ्क्षसि सुखं मे चेद्गच्छ नीलाचलं तदा ।
यद्यन्यत् किञ्चन ब्रूषे तदा मे शपथ स्त्वयि ॥१४०
इत्युक्त्वा नावमारूढ़े सपदि श्रीमहाप्रभौ ।
पण्डितो मोहमापन्नस्तत्रैव पतितोऽभवत् ॥१४१
प्रभुराज्ञापयत् सार्बभौमं नेतुञ्च पण्डितम् ।
उवाच भट्ट उत्तिष्ठ लीलैवं हि महाप्रभोः ॥१४२
जानासि त्वं यथा कृष्णः प्रतिज्ञां स्वामपि त्यजन् ।
निजभक्तकृपाधीनस्तां भीष्मस्य ररक्ष सः ॥१४३

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे नवमाध्याये सप्तत्रिंशः

श्लोकः—

स्वनिगम मपहाय मत्प्रतिज्ञा-
मृतमधिकर्त्तुमवप्लुतो रथस्थः ।
धृत-रथ-चरणोऽभ्ययाचलद्गु-
र्हरिरिव हन्तु मिभं गतोत्तरीयः ॥२॥"

तथैव तव विच्छेदं सहमानो महाप्रभुः ।
प्रतिज्ञा मतियत्नेन प्रतिपालितवांस्तव ॥१४४
इत्येवं वचनैर्भट्टः सान्त्वयामास पण्डितम् ।
आजग्मतु रुभावेव शोकव्याकुलचेतसौ ॥१४५
भक्ता धर्म्म्याणि कर्म्माणि त्यजन्त्येव प्रभोः कृते ।
भक्तानां धर्महानिस्तु प्रभुणा नैव सह्यते ॥१४६
इमं प्रेमविवर्त्तं य आकर्णयति मानवः ।
लभते सोऽचिरादेव चैतन्यस्य पदाम्बुजम् ॥१४७
यौ द्वौ राज्ञो महापात्रौ प्रस्थितौ प्रभुणा सह ।
आदिशत् प्रतियानाय प्रभुर्राजपुरागतः ॥१४८

आदिष्टोऽपि प्रयाणाय रायोऽयात् प्रभुणा समम् ।
चक्रे कृष्णकथां रामानन्देन स दिवानिशम् ॥१४९

राज्ञो भृत्यजनाः सर्वे प्रतिग्रामं तदाज्ञया ।
प्रभुं नव्यगृहे नानावस्तुभिश्च सिषेविरे ॥१५०

एवमेव व्रजन् पद्धयां रेमुणां प्रभुरागतः ।
ततः स प्रतियानाय रामानन्दं व्यजिज्ञपत् ॥१५१

रायोऽभूत् पतितो भूमौ तत्क्षणात्त्यक्तचेतनः ।
चकार क्रन्दनं रायमुत्सङ्गे निदधत् प्रभुः ॥१५२

राय-प्रस्थापनोदन्तो बदितुं नैव युज्यते ।
नाहं कर्त्तुं समर्थोऽस्मि तत्सम्प्रेषणवर्णनम् ॥१५३

इदानीमोड्रदेशस्य सीमानं प्रभु रासवान् ।
राज्याधिकृतसामन्तः प्रभुणा तत्र सङ्गतः ॥१५४

सेवमानो दिनानि द्वि-चतुराणि तदा प्रभुम् ।
अग्रतो गमनायैवं विवृतिं स न्यवेदयत् ॥१५५

मद्यपो यवनो राजा शास्ति राज्यमितोऽग्रतः ।
तस्माद्भयेन शक्नोति न कश्चिच्चलितुं पथा ॥१५६

तेनाधिक्रियते सर्वमितः पिच्छलदावधि ।
नदीं तर्त्तुं न शक्नोति तद्भयेनापि कश्चन ॥१५७

दिनानि कतिचित्तिष्ठ सन्धि तेन करोम्यहम् ।
ततस्त्वां नाव मारोप्य सुखं प्रस्थापयाम्यतः ॥१५८

तस्मिन् कालेऽथ तस्यैव यवनेशस्य कश्चन ।
धृतवेशान्तरः प्राप्तस्तदोड्रकटकं चरः ॥१५९

सोऽवलोक्य प्रभोस्तत्र चरित्रं विस्मयावहम् ।
यवनेशं ततो हिन्दुचरो गत्वैवमब्रवीत् ॥१६०

कश्चित्तत्र जगन्नाथात् सन्न्यासी समुपस्थितः ।
वर्त्तन्ते बहवस्तेन सार्द्धं सिद्धाश्च पूरुषाः ॥१६१

कृष्णसङ्कीर्त्तनं सर्वे ते कुर्वन्ति निरन्तरम् ।
सर्वे हसन्ति गायन्ति नृत्यन्ति च रुदन्ति च ॥१६२
तं द्रष्टुं लक्षशो लोकास्तत्रागच्छन्ति सर्वतः ।
दृष्ट्वा तं न पुनर्गन्तुं शक्नुवन्ति निजालयम् ॥१६३
तत्र ते च जनाः सर्वे दृश्यन्ते वातुला इव ।
कृष्णेत्युक्त्वैव नृत्यन्ति ते क्रन्दन्ति लुठन्ति च ॥१६४
वाचाख्यातुं न शक्योऽसौ दृष्ट एवावबुध्यते ।
स्वप्रभाववशात् सोऽयं भगवानिति मन्यते ॥१६५
इत्युक्त्वा गीतवांस्तत्र हरेकृष्णेत्यसौ चरः ।
हसन् क्रन्दंश्च नृत्यंश्च जगौ वातुलवत् पुनः ॥१६६
इत्यसौ यवनः श्रुत्वा पराबृत्तमना अभूत् ।
प्राहिणोच्च स्वविश्वासं तस्मा उत्कलवासिने ॥१६७
सोऽयं विश्वास आगत्य प्रभोः पादाववन्दत ।
कृष्ण कृष्णेत्यवादीच्च प्रेम्णा विह्वलमानसः ॥१६८
सोऽब्रवीद्धैर्यमाश्रित्य नमन्नोड्राधिकारिणम् ।
प्रभुर्म्लेच्छाधिकारी मां प्रैरयत्तव सन्निधिम् ॥१६९
यद्याज्ञप्तो भवेन्म्लेच्छाधिकारी भवताधुना ।
तदात्रागत्य दृष्ट्वा च प्रभुं स प्रतियास्यति ॥१७०
महत्योत्कण्ठया तेन विनयश्च प्रदर्शितः ।
अयं सन्धि स्त्वया सार्द्धं युद्धाशङ्का न विद्यते ॥१७१
इत्याकर्ण्य महापात्रः प्रोवाचैवं सविस्मयम् ।
यवनस्य सुरापस्य क एवं कृतवान्मनः ॥१७२
प्रतापेन प्रभोस्तस्य तन्मनः परिवर्त्तितम् ।
दृष्ट्वा श्रुत्वा च यं विश्वमेत दुद्धारमागतम् ॥१७३
इति ब्रुवाण औड्रोऽसौ विश्वासं प्रोक्तवांस्तदा ।
दिष्ट्या सोऽयं समागत्य कुरुतां प्रभुदर्शनम् ॥१७४

किन्तु प्रत्ययमाधतुं निरस्त्रः सन्नसाविह ।
पञ्चभिः सप्तभिर्वाथ सममायातु किङ्करैः ॥१७५

इत्याकर्ण्य स विश्वासः सर्वं तस्मै व्यवेदयत् ।
गृहीत्वा हिन्दुवेशं स म्लेच्छ स्तत्र समागतः ॥१७६

दूरादेव प्रभुं दृष्ट्वा स पतन्नवनीतले ।
साश्रुः पुलकिताङ्गश्च दण्डवत् प्रणनाम तम् ॥१७७

ससम्मानं समानीतो महापात्रेण तेन सः ।
कृष्णनामोच्चरन्नासीत् युक्तपाणिः प्रभोः पुरः ॥१७८

नीचम्लेच्छकुले कस्मात् कारणा दस्मि जातवान् ।
कथं हिन्दुकुले धाता हन्त मां नैव सृष्टवान् ॥१७९

हिन्दु र्यद्यभविष्यं तत् प्राप्स्यं ते पदसन्निधिम् ।
विफलो मम देहोऽयं प्राणा गच्छन्तु सम्प्रति ॥१८०

इति म्लेच्छोक्ति माकर्ण्य महापात्रो महाप्रभोः ।
धृत्वा पादौ समाविष्टमानसः कृतवान् स्तुतिम् ॥१८१

श्रीनामश्रवणाद् यस्य चण्डालोऽपि शुचिर्भवेत् ।
तस्य ते दर्शनं पुण्यमयं जीवोऽपि लब्धवान् ॥१८२

गति रेषा यदेतस्य कोऽयं तत्रास्ति विस्मयः ।
सन्दर्शनप्रभावेण तवैवेति मतिर्मम ॥१८३

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे त्रयस्त्रिंशाध्याथे षष्ठः श्लोकः—

यन्नामधेयश्रवणानुकीर्त्तनाद्
यत्प्रह्वणाद् यत्स्मरणादपि क्वचित् ।
श्वादोऽपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्नु दर्शनात् ॥३॥"

अथ तं करुणा-पूर्ण-दृष्ट्या श्रीमन्महाप्रभुः ।
आश्वासयन् सदा कृष्णहरिं ब्रूहीत्यवोचत ॥१८४

ततोऽसावुक्तवानङ्गीकृतवान् यदि मां भवान् ।
आज्ञा मे दीयता मेका तामहं करवाणि ते ॥१८५
हिंसनं बहु गो-विप्र-वैष्णवानां कृतं मया ।
तेभ्यस्तेभ्यश्च पापेभ्यो मुक्ति में भवता दिति ॥१८६
ततो मुकुन्ददत्तेन प्रोक्तं शृणु महाशय ।
गङ्गातीरं प्रभोर्यातुं मनो जागर्त्ति साम्प्रतम् ॥१८७
तत्र तस्य प्रयाणाय साहाय्यं कुरु सर्वथा ।
एषाज्ञा महती तस्य महत्युपकृतिश्च ते ॥१८८
अथासौ यवनः पादौ वन्दमानो महाप्रभोः ।
नत्वा सर्वांश्च तत्रत्यान् हृष्टः सन् गन्तु मुद्यतः ॥१८९
आलिलिङ्ग महापात्रस्तद्वक्षः स्वेन वक्षसा ।
दत्त्वा तस्मै बहु द्रव्यं कृतवांस्तेन मित्रताम् ॥१९०
ततः प्रातस्तरीर्बह्वीः सज्जयन् म्लेच्छभूपतिः ।
प्रेरयामास विश्वासं प्रभोराकारणाय तम् ॥१९१
अथा गच्छन्महापात्रः स महाप्रभुणा सह ।
तदा म्लेच्छ उपागत्य ववन्दे चरणौ प्रभोः ॥१९२
आसीदेकातमा नौका नवीनान्तर्गृहान्विता ।
तामध्यारोपयामास सगणं स महाप्रभुम् ॥१९३
आदिदेश महापात्रं गमनाय प्रभुर्यदा ।
तदा क्रन्दन्महापात्रः स्थित्वा तीरे तमैक्षत ॥१९४
जलदस्युभयान्म्लेच्छो जगाम प्रभुणा समम् ।
गृहीत्वा दशभि नौभि र्निजसैन्यान्यनेकशः ॥१९५
अतारयदसौ मन्त्रेश्वराख्यं भीषणं नदम् ।
ययौ च प्रभुणा सार्द्धं म्लेच्छः पिच्छलदावधि ॥१९६
यवने प्रभुणाज्ञप्ते ततोग्रामान्निवृत्तये ।
तस्य चावर्णनीयानि बभूवु श्चेष्टितान्यहो ॥१९७

इमाः श्रीकृष्णचैतन्यकृता लीला अलौकिकीः।
शृण्वतो जन्म देहश्च धन्यतामधिगच्छतः ॥१९८
नावमारुह्य तामेव पानिहाटि मुपागतः।
प्रभुस्तत्र कृपाशाठ्या सज्जयामास नाविकम् ॥१९९
जनाः कोलाहलं चक्रुः प्रभुरागतवानिति।
जलस्थलानि पूर्णानि तदा जनतया भवन् ॥२००
आगच्छत् प्रभुमादाय तदा राघवपण्डितः।
जनसङ्कुलमार्गेण ययौ कृच्छ्रान्महाप्रभुः ॥२०१
एकमेव दिनं तत्र न्युष्य प्रातर्महाप्रभुः।
ययौ कुमारहट्टं स श्रीनिवासोऽवसद् यतः ॥२०२
तद्गृहात् प्रथमं गत्वा शिवानन्दनिकेतनम्।
निलयं वासूदेवस्य ययौ पश्चात् स ईश्वरः ॥२०३
ततो वाचस्पते र्गेहे स्थित्वा तावन्महाप्रभुः।
जनसङ्घट्टमाशङ्क्य कुलियाग्राम मागतः ॥२०४
तत्र माधवदासस्य गृहे तस्थौ शचीसुतः।
लेभिरे दर्शनं तस्य जनानां लक्षकोटयः ॥२०५
दिवसांस्तत्र सप्तासौ स्थित्वा निस्तारयन् जनान्।
ततः शान्तिपुरं प्राप्याचार्य्यगेहं गतः प्रभुः ॥२०६
अवातिष्ठत तत्र द्वि-चतुरान् दिवसानसौ।
शचीं मातर मानाय्य दुःखं तस्या अखण्डयत् ॥२०७
रामकेलिं ततो ग्रामं यथा प्रस्थितवान् प्रभुः।
यथा वा नाटशालायाः पुनः प्रत्यागतोऽभवत् ॥२०८
पुनः शान्तिपुरे वासं दशाहानि चकार च।
अवर्णयत्तथा वृन्दावनदासः सविस्तरम् ॥२०९
अतएव मया नात्र क्रियते विस्तरः पुनः।
विपुलं वर्द्धते ग्रन्थः पुनरुक्ति र्भवत्यपि ॥२१०

अन्तरा समगच्छेतां यथा रूपसनातनौ ।
यथा चासीत् प्रभोः पन्था नृसिंहानन्दकल्पितः ॥२११
तास्तालीला मयाप्यत्र सूत्रवद् वर्णिताः पुरा ।
अतएव न लिख्यन्ते पुनस्ताश्च मयाधुना ॥२१२
अथागच्छत् पुनः शान्तिपुरं यावन्महाप्रभुः ।
तावत्तेन समं दासरघुनाथश्च सङ्गतः ॥२१३
आस्तां हिरण्यदासो गोवर्द्धनश्चेति सोदरौ ।
मुद्राद्वादशलक्षेशौ सप्तग्रामनिवासिनौ ॥२१४
उभावेव महैश्वर्यौ ब्राह्मण्यौ दानशौण्डकौ ।
सद्वंश्यौ च सदाचारौ धार्मिकानां पुरःसरौ ॥२१५
उपजीव्यौ च विप्राणां नवद्वीप-निवासिनाम् ।
धन-भू-ग्राम-दानेन सदा साहाय्यकारिणौ ॥२१६
नीलाम्बरचक्रवर्त्ती द्वयोराराधितस्तयोः ।
तस्यापि व्यवहारोऽभूद् भ्रातृवत्तावुभौ प्रति ॥२१७
अतः पूर्वमसेवेतां तौ च मिश्रपुरन्दरम् ।
तस्मात् साध्वभ्यजानीतां भ्रातरौ तौ महाप्रभुम् ॥२१८
रघुनाथाख्यदासोऽसौ पुत्रो गोवर्द्धनस्य हि ।
आवाल्यात्तस्य वैराग्यं विषयेभ्योऽभवत्ततः ॥२१९
प्रभौ शान्तिपुरं प्राप्ते सन्न्यासं कृतवत्यथ ।
रघुनाथः समागत्य प्रभुणा मिलितोऽभवत् ॥२२०
प्रेमाविष्टे ततस्तस्मिन् पतिते पादयोः प्रभोः ।
करुणापारवश्येन प्रभुः पद्भ्यां तमस्पृशत् ॥२२१
जनको रघुनाथस्य सदाचार्य्यमसेवत ।
अतएव प्रसन्नोऽभूदद्वैतस्तस्य नन्दने ॥२२२
आचार्य्यस्य प्रसादेन प्रभूच्छिष्टं स चाप्नुवन् ।
पञ्च वा सप्त वाहानि प्रभोः पादौ निरैक्षत ॥२२३

प्रस्थिते च तमापृच्छ्य प्रभौ नीलाचलं प्रति ।
गत्वा निजालयं सोऽपि प्रेमोन्मत्तोऽभवत्तदा ॥२२४
सोऽपि नीलाचलं यातुं भूयोभूयः पलायत ।
पिता तं पथ आनीय वन्धनेऽस्थापयत् पुनः ॥२२५
तं तदा पर्य्यवैक्षन्त पञ्च सैन्या दिवानिशम् ।
एको विप्रश्च चत्वारो भृत्या स्तेन समं स्थिताः ॥२२६
दशभिश्च जनै रेतैः सदासौ परिरक्षितः ।
अतो नीलाचलं गन्तुमशक्तो दुःखितोऽभवत् ॥२२७
श्रुत्वा शान्तिपुरं प्राप्त मधुनैव महाप्रभुम् ।
पितुरन्तिक मागत्य रघुनाथो न्यवेदयत् ॥२२८
मामाज्ञापय गच्छानि प्रभोः पादौ निरीक्षितुम् ।
अन्यथा नावतिष्ठेते शरीरं जीवनञ्च मे ॥२२६
इत्याकर्ण्य पिता तस्य शीघ्र मेहीति तं ब्रुवन् ।
बहुभिः किङ्करै र्नानाद्रव्याणि प्रैरयत् समम् ॥२३०
तिष्ठन् शान्तिपुरे सप्त दिनानि प्रभुणा सह ।
स्वाभिप्रायमिमं रात्रिन्दिवं तस्मै न्यवेदयत् ॥२३१
मुक्तिं लप्स्ये कथं हन्त रक्षकाणां करादहम् ।
कथङ्कारञ्च यास्यामि नीलाद्रिं प्रभुणा सह ॥२३२
सर्वज्ञः प्रभु गोराङ्गस्तस्य जानन्नभीप्सितम् ।
आश्वासवचनं प्रोचे शिक्षारूपेण तं तदा ॥२३३
कृतस्थैर्य्यो गृहं याहि मा मैवं भव वातुलः ।
भवसिन्धोः परं पारं क्रमशो लभते जनः ॥२३४
नैव मार्कटवैराग्यं कुरु दर्शयितुं जनान् ।
भुङ्क्ष्व भोगान् यथायोग्याननासक्तेन चेतसा ॥२३५
वहि लौकिक माचारं कुर्वन्त नैष्ठिको भव ।
अचिरादेव कृष्णस्त्वा मुद्धरिष्यति निश्चितम् ॥२३६

मयि वृन्दावनं दृष्ट्वा नीलाद्रिं प्रत्युपागते ।
किमपिच्छलमाश्रित्य मत्पार्श्वं त्वमुपेष्यसि ॥२३७
तदानीं तच्छलं कृष्णस्त्वयि विस्फोरयिष्यति ।
श्रीकृष्णस्य कृपा यत्र कस्तं रोद्धु मलं भवेत् ॥२३८
इत्युक्त्वा तं प्रयाणाय विससर्ज महाप्रभुः ।
आचचार प्रभोः शिक्षां सोऽपि गेहमुपाश्रितः ॥२३९
वाह्यं वैराग्यमुन्मादं निखिलं स परित्यजन् ।
अनासक्तो यथार्हाणि सर्बकर्माण्यसाधयत् ॥२४०
पितरौ तस्य तद्दृष्ट्वा महासन्तोष माप्नुताम् ।
तस्य संरोधने यत्नः सर्वेषां शिथिलोऽभवत् ॥२४१
इतश्च प्रभु रद्वैत-नित्यानन्दादिकान्निजान् ।
अन्यांश्च निखिलान् भक्तानेकत्र स्थापयंस्तदा ॥२४२
सर्वान् गाढ़ं समाश्लिष्य वक्तुमेवं प्रचक्रमे ।
आज्ञापयन्तु सर्वे मां यामि नीलाचलं पुनः ॥२४३
मिलनं मम सञ्जातं युष्माभिः सकलैरिह ।
अस्मिंस्तु वत्सरे कोऽपि नीलाद्रिं नैव गच्छतु ॥२४४
बृन्दावनं गमिष्यामि ततोऽवश्यमहं पुनः ।
प्रत्यायास्यामि निर्विघ्न माज्ञा मे दीयतामिति ॥२४५
गृहीत्वा चरणौ मातु र्विनयं कृतवान् बहुम् ।
गन्तुं बृन्दावनं मातु राज्ञां जग्राह च प्रभुः ॥२४६
ततस्ताञ्च नवद्वीपं प्रेरयामास मातरम् ।
भक्तानादाय नीलाद्रिं ततः प्रस्थितवान् प्रभुः ॥२४७
तैस्तैर्भक्तजनैः सर्वैः सेव्यमानः पथि प्रभुः ।
आजगाम सुखेनैव नीलाद्रिं श्रीशचीसुतः ॥२४८
आगत्यैव जगन्नाथ मीक्षाञ्चक्रे महाप्रभुः ।
प्राप्ते तस्मिंस्ततस्तत्र महान् कोलाहलोऽभवत् ॥२४९

आगतान् सकलान् भक्तान् समानन्दित-मानसान् ।
आशिश्लेष प्रभुः प्रेम्णा तांस्तांस्तत्र पृथक् पृथक् ॥२५०
काशीमिश्रस्तथा रामानन्दप्रद्युम्नमिश्रकौ ।
सार्वभौमस्तथा वाणीनाथशिख्यादयः पुनः ॥२५१
आगत्य मिलिता भक्ताः पण्डितश्च गदाधरः ।
सर्वेषां पुरतो वक्तु मिदमारभत प्रभुः ॥२५२
अवलोक्य जनन्या मे गङ्गायाश्च पदाम्बुजम् ।
मया बृन्दावनं गौड़पथेनैव प्रयास्यते ॥२५३
इति कृत्वा मनो गौड़विषयं गतवानहम् ।
अभवंस्तत्र मे भक्ताः सहस्रं सहयायिनः ॥२५४
आगताः कौतुकं द्रष्टुं लक्षशस्तत्र मानवाः ।
जनसंघट्टिते गन्तुं पथि नाहमशक्नवम् ॥२५५
यत्र स्थितोऽभवं तत्र प्राकाराश्च गृहाणि च ।
पूर्णान्यासन् जनारण्यं विनापश्यं न किञ्चन ॥२५६
रामकेलि मथ ग्राममतिकृच्छ्राद वाप्नवम् ।
तत्र मत्सन्निधिं प्राप्तौ नाम रूपसनातनौ ॥२५७
भ्रातरौ द्वौ च भक्ताग्रयौ श्रीकृष्णस्य पदाश्रितौ ।
व्यवहारे महामात्यौ महापात्रौ च भूपतेः ॥२५८
विद्या-भक्ति-धियां शक्त्या परमं निपुणावपि ।
तौ नीचैस्तर मात्मान ममन्येतां तृणादपि ॥२५९
दृष्ट्वा श्रुत्वा च तद्दैन्यं पाषाणोऽपि विदीर्य्यते ।
तुष्टान्तःकरणोऽथाहमब्रवं तावुभाविदम् ॥२६०
मन्येते हीन मात्मानं भवन्तावुत्तमावपि ।
अचिरेणैव कृष्णस्तद् युवां निस्तारयिष्यति ॥२६१
इति ब्रुवन् यदाहं तौ गमनाय विसृष्टवान् ।
सनातनोऽपठद् गच्छंस्तदैवेमां प्रहेलिकाम् ॥२६२

साद्धं येनावतिष्ठन्ते जनानां लक्षकोटयः ।
नैषा रीतिर्भवेत्तस्य बृन्दारण्यं हि गच्छतः ॥२६३
तदानीं श्रुतमेवैतन्नावधानं कृतं मया ।
प्रातरेवागतो ग्रामो नाटशालाभिधस्ततः ॥२६४
तत्र स्वचेतसा रात्रौ पर्य्यालोचितवानहम् ।
कां नु सनातनोऽवादीत्तदानीं मे प्रहेलिकाम् ॥२६५
सुष्ठूक्तं तेन यत् साद्धं मयेयन्तो जनाः स्थिताः ।
मां वक्ष्यन्ति जना दृष्ट्वा जन एष पृथग्विधः ॥२६६
दुर्लभं दुर्गमं बृन्दावनं तच्चातिनिर्जनम् ।
गमिष्याम्यह मेकाकी सहैको वा गमिष्यति ॥२६७
माधवेन्द्रपुरीस्वामी तत्रैकाकी गतः पुरा ।
अहं मायाविनो जालं वितन्वन् यामि तत्र तु ॥२६८
क्व वृन्दावन मेकाकी गमिष्यामि पलायितः ।
सैन्यैः सार्द्धन्तु गच्छामि वत ढक्कां निनादयन् ॥२६९
आत्मानं धिग्धिगित्युक्त्वा चाञ्चल्यं गतवानहम् ।
परावृत्य ततो गङ्गातीरं पुनरवासवान् ॥२७०
स्वस्वगेहानि तान् भक्तान् प्रापय्याहं समागतः ।
आगताः पञ्चषा एव भक्ताः साद्धं मया पुनः ॥२७१
वृन्दारण्यं मयेदानीं निर्विघ्नं गम्यते कथम् ।
प्रसन्ना मिलिता यूयं युक्तिं मे दिशताधुना ॥२७२
मया गदाधरं त्यक्त्वा यातं तेन स दुःखितः ।
तस्माद् बृन्दावनं गन्तुं नैव शक्तोऽभवं तदा ॥२७३
इत्याकर्ण्य प्रभोः पादौ गृहीत्वासौ गदाधरः ।
प्रेमाविष्टमनाः प्रोचे विनयेन महाप्रभुम् ॥२७४
यत्र त्वं वर्त्तसे नूनं बृन्दारण्यं तदेव हि ।
गङ्गा च यमुना तत्र सर्वतीर्थानि तत्र च ॥२७५

तथापि लोकशिक्षार्थं वृन्दारण्यं गमिष्यसि ।
करिष्यसि तदेव त्वं यद्‌गृह्णाति मनस्तव ॥२७६
प्रत्यासन्ना इमा वर्षाः पुरो मासचतुष्टयम् ।
उष्यतां चतुरोमासानिमान्नीलाचले त्वया ॥२७७
आचरिष्यसि पश्चात्तद् यदाकाङ्क्षति ते मनः ।
यासि तिष्ठसि वात्मेच्छावशात् कस्त्वां निबारयेत् ॥२७८
इति श्रुत्वा वदन् सर्वे भक्ताः पादान्तिके प्रभोः ।
सर्वेषा मेव मिच्छैव पण्डितेन निवेदिता ॥२७९
ततस्तांश्चतुरो मासांस्तस्थौ सर्वेच्छया प्रभुः ।
इति प्रतापरुद्रोऽसावाकर्ण्यानन्दितोऽभवत् ॥२८०
ततो निमन्त्रयामास तस्मिन्नह्नि गदाधरः ।
गृहीता प्रभुणा भिक्षा तत्र भक्तजनैः सह ॥२८१
भिक्षायां पण्डितस्नेहः प्रभोरास्वादनं तथा ।
नैव वर्णयितुं शक्यं नरशक्त्या द्वयं त्विदम् ॥२८२
एवं श्रीगौरलीलानां पारो वान्तो न विद्यते ।
अशक्तो विस्तराद् वक्तुं संक्षेपेण ब्रवीमि ताः ॥२८३
सहस्रवदनोऽनन्तः स्वयमेव वदन्नपि ।
तस्यैकाह्हिकलीलाया नैवान्तं गन्तु मर्हति ॥२८४
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२८५

इति श्रीचैतन्यचरितामृते मध्यखण्डे पुनर्गौड़गमनविलासो नाम षोड़शः परिच्छेदः ।

—o—

मध्यलीलायां सप्तदशः परिच्छेदः

"गच्छन् वृन्दावनं गौरो व्याघ्रेभैणखगान् वने ।
प्रेमोन्मत्तान् सहोन्नृत्यान् विदधे कृष्णजल्पिनः ॥१॥"
भूयो जयतु गौरेन्दु नित्यानन्दो जयत्वथ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
शरत्कालेऽथ सम्प्राप्ते प्रभुर्गन्तुमना रहः ।
रामानन्द-स्वरूपाभ्यां युक्तिं कर्त्तुं प्रचक्रमे ॥२
युवां द्वावेव कुर्य्यातं यदि साहायकं मम ।
श्रीमद्वृन्दावनं गत्वा तत् पश्येय महं तदा ॥३
रात्रावुत्थाय बन्येन पथैकाकी पलायितः ।
गमिष्यामि तदा सार्द्धं न ग्रहीष्यामि कञ्चन ॥४
कोऽप्युत्थाय मया सार्द्धं गन्तुं चेदनुधावति ।
युवाभ्यां स निषेद्धव्यो नानुगन्तुं यथार्हति ॥५
तुष्टाभ्यां दीयतामाज्ञा दुःखं न क्रियतां हृदि ।
युष्मत्-सौख्येन मे सौख्यं भविता गच्छतः पथि ॥६
अथ तौ प्रोचतुस्त्वं हि स्वतन्त्रो भगवानसि ।
नैव त्वं परतन्त्रोऽसि यथेच्छसि करिष्यसि ॥७
श्रूयता मावयोरेव द्वयोस्त्वेकं निवेदनम् ।
युष्मत्-सौख्येन मे सौख्यमित्युक्तं भवता स्वयम् ॥८
द्वयोरेवावयीस्तर्हि भविष्यति महत् सुखम् ।
दयसे चेद्दयासिन्धो गृह्णन्नेकं निवेदनम् ॥९
उत्तमो ब्राह्मणः कश्चित्त्वयावश्यं सहैष्यति ।
वहन् पात्रं मटन् भिक्षां स ते दास्यति भिक्षितम् ॥१०
भोज्यान्नो ब्राह्मणो नास्ति गच्छतस्ते वनाध्वना ।
आज्ञापय त्वया साकं विप्रः कोऽपि प्रतिष्ठताम् ॥११

प्रभुः प्रोवाच न ग्राह्यो मयै कोऽपि स्वसङ्गिनाम् ।
गृहीते यत एकस्मिन् दुःखितोऽन्यो भविष्यति ॥१२
स भवेन्नूतनः सङ्गी सुस्निग्धं यस्य मानसम् ।
मया चेल्लभ्यते तादृक् स एवैको ग्रहीष्यते ॥१३
स्वरूपः प्रोक्तवान् भट्टाचार्य्योऽयं बलभद्रकः ।
महापण्डित आर्य्यश्च साधुः स्निग्धमनास्त्वयि ॥१४
आदावेव त्वया सार्द्धं गौड़देशात् समागतः ।
अटितुं सर्वतीर्थानि सोऽय मिच्छति सर्वतः ॥१५
वर्त्ततेऽनेन साकञ्च ब्राह्मणः कोऽपि किङ्करः ।
स त्वां सेविष्यते भिक्षामटिष्यत्यपि ते पथि ॥१६
त्वया चेत् सोऽपि गृह्येत सर्वेषां नः सुखं भवेत् ।
नच दुखं भवेत् किञ्चिद् गच्छतस्ते वनाध्वना ॥१७
वहन् यास्यति विप्रोऽसौ तव वस्त्राम्बुभाजने ।
भट्टाचार्य्योऽप्यटन् भिक्षां तुभ्यं भैक्ष्यञ्च दास्यति ॥१८
इति तद्वच आकर्ण्य स्वीचकार महाप्रभुः ।
भट्टाचार्य्यञ्च जग्राह बलभद्रं सहात्मना ॥१९
जगन्नाथस्य लब्धाज्ञां पूर्वस्यां रजनौ प्रभुः ।
उत्थायापररात्रे च ततो लुक्कायितो ययौ ॥२०
प्रातरेव प्रभुं भक्ता अपश्यन्तः समन्ततः ।
अन्विष्यन्तश्च सम्भ्रान्तचेतसः परिबभ्रमुः ॥२१
अथ गोस्वामिना सर्वे स्वरूपेण निवारिताः ।
अभिप्रायं प्रभोर्ज्ञात्वा निवृत्ता अवतस्थिरे ॥२२
अथ ख्यातपथं त्यक्त्वापपथेन व्रजन् प्रभुः ।
कटकं दक्षिणे भागे स्थापयंश्चाविशद् वनम् ॥२३
यान्तं निर्जनकान्तारे गृह्णन्तं कृष्णनाम च ।
प्रभुं दृष्ट्वा गजव्याघ्रास्तत्पथं परित त्यजुः ॥२४

यूथशोऽवस्थितान् व्याघ्रान् गजान् गण्डांश्च शूकरान् ।
अन्तराबेशमग्नेन चेतसा प्रस्थितः प्रभुः ॥२५
भट्टाचार्यस्तथालोक्य प्राप्तवान् सुमहद्भयम् ।
प्रतापेन प्रभोस्ते तु पार्श्वतश्चावतस्थिरे ॥२६
एकदैको महान् व्याघ्रः शयानोऽवस्थितः पथि ।
अभवच्चरणस्पृष्ट आवेशाद् गच्छतः प्रभोः ॥२७
कृष्णेति प्रभुणा प्रोक्ते शयनादुत्थितोऽप्यसौ ।
आरेभे नर्त्तितुं व्याघ्रः कृष्ण कृष्णेत्युदीरयन् ॥२८
अन्येद्युः कानने नद्यां स्नानं कुर्वति च प्रभौ ।
उदन्यन्मदमत्तानां हस्तिनां यूथ मापतत् ॥२९
गजास्ते पुरतः प्राप्ताः कृत्यान्याचरतः प्रभोः ।
कृष्णं ब्रूतेत्युदीर्य्यासौ तद्गात्रेष्वक्षिपज्जलम् ॥३०
येषां गात्रेषु संलग्नाः क्षिप्तास्ते जलविन्दवः ।
उक्त्वा तैः कृष्ण कृष्णेति प्रेम्णा नृत्तञ्च धावितम् ॥३१
कैश्चिन्निपतितं भूमौ कैश्चिद्वा वृंहणं कृतम् ।
मनोऽभूद्विस्मयाविष्टं भट्टाचार्य्यस्य पश्यतः ॥३२
कुर्वतः कीर्त्तनं प्रोच्चै र्व्रजतश्च पथा प्रभोः ।
श्रुत्वा सुमधुरं कण्ठध्वनिं मृग्यस्तमाययुः ॥३३
शृण्वत्यस्तं ध्वनिं जग्मुस्तास्तत् सव्यापसव्यतः ।
पपाठैवं प्रभुः श्लोकं तासामङ्गानि संस्पृशन् ॥३४

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकविंशाध्याय
एकादशः श्लोकः—

धन्याः स्म मूढ़मतयोऽपि हरिण्य एता
या नन्दनन्दन मुपात्तविचित्रवेशम् ।
आकर्ण्य वेणुरणितं सहकृष्णसाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ॥२॥"

अस्मिन्नवसरे व्याघ्राः सम्प्राप्ताः पञ्च सप्त वा ।
मृगीभि र्मिलितास्ते तु प्रचेलुः प्रभुणा समम् ॥३५
स्मरन् बृन्दावनं तत्र तथा दृष्ट्वा महाप्रभुः ।
श्लोकं वाचितवान् बृन्दावनस्य गुणवर्णनम् ॥३६

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रयोदशाध्याये पञ्च-
पञ्चाशत्तमः श्लोकः—

यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः ।
मित्राणीवाजितावासद्रुतरुट्तर्षणादिके ॥३॥"

उच्यतां कृष्ण कृष्णेति ब्रुवत्येव महाप्रभौ ।
कृष्णेत्युक्त्वा मृगव्याघ्र मारेभे नर्त्तितुं मुदा ॥३७
ननृतू रुरुदुश्चामी मृगा व्याघ्रैः समं तथा ।
बलभद्रोभट्टाचार्य आश्चर्य्यं रङ्गमैक्षत ॥३८
आलिलिङ्गुः पुनर्व्याघ्रा हरिणाश्च परस्परम् ।
आस्यमास्येन संयोज्य चुचुम्बुश्चेतरेतरम् ॥३९
हसितुं प्रभुरारेभे सम्पश्यन् कौतुकं तथा ।
ततः सर्वान् विहायैतान् प्रतस्थे चाग्रतः पथा ॥४०
मयूरप्रमुखाः सर्वे प्रभुं दृष्ट्वा विहङ्गमाः ।
कृष्णेत्युक्त्वा समं जग्मु र्मत्ता श्चक्रुश्च नर्त्तनम् ॥४१
हरिं ब्रूतेति कुर्वाणे ध्वनिमुच्चैर्महाप्रभौ ।
लता बृक्षाश्च तं श्रुत्वा ध्वनिं प्रापुः प्रफुल्लताम् ॥४२
झारिखण्ड-वने ये ये तस्थुः स्थावरजङ्गमाः ।
कृष्णनामप्रदानेन तान्मत्तान् विदधे प्रभुः ॥४३
यस्य ग्रामस्य मार्गेण ययौ तस्थौ च यत्र सः ।
अजायत हरौ भक्ति स्तत्तद्ग्रामनिवासिनाम् ॥४४
तस्य श्रीमन्मुखाम्भोजादशृणोत् कृष्णनाम यः ।
अन्येऽशृण्वन्मुखात्तस्य तेषामप्यपरे जनाः ॥४५

सहासक्रन्दनं नृत्ता उक्त्वा कृष्ण हरीति ते ।
पारम्पर्य्येण सञ्जाता भक्तास्तद्देशवासिनः ॥४६
अपि चेल्लोकसंघट्ट माशङ्क्य श्रीमहाप्रभुः ।
निगूहन्नात्मनः प्रेम नैव प्राकाशयद् वहिः ॥४७
सर्वो देशस्तथाप्यस्य दर्शनस्य प्रभावतः ।
श्रवणस्य च सामर्थ्यात् समवर्त्तत वैष्णवः ॥४८
गौड़ान् वङ्गां स्तथा राढान् देशान् गत्वोत् कलादिकान् ।
जनान्निस्तारयामास पर्य्यटन्नात्मना प्रभुः ॥४६
झारिखण्डं समागत्य मथुरागमनच्छलात् ।
तत्रत्यानतिपाषण्डान् भिल्लप्रायान्नराधमान् ॥५०
सर्वानुद्धारयामास स दत्त्वा प्रेम-नामनी ।
चैतन्यस्य निगूढ़ां तां लीलां को बोद्धु मर्हति ॥५१
अभूद् बृन्दावनभ्रान्तिः काननं पश्यतः प्रभोः ।
गोवर्द्धनोऽय मेवेति स मेने वीक्ष्य पर्वतम् ॥५२
ईक्षाञ्चक्रे नदीं यां स यमुनांताममन्यत ।
प्रेमावेशाज्जगौ नृत्यंस्तत्र क्रन्दन् पपात च ॥५३
भट्टाचार्य्यः पथा गच्छन् शाकमूलफलानि च ।
यान्याप्नोद् यत्र सर्वाणि ततस्तानि समाददे ॥५४
यत्र ग्रामे प्रभुस्तस्थौ तत्र ये ब्राह्मणाः स्थिताः ।
प्रभु मामन्त्रयाञ्चक्रुस्ते विप्राः पञ्च सप्त वा ॥ ५५
ददौ कोऽप्यन्नमानीय भट्टाचार्यसमीपतः ।
दधि दुग्धं ददौ कश्चिद् घृतं खण्डञ्च कश्चन ॥५६
कोऽपि विप्रो न यत्रासीत्तत्र शूद्रा महाजनाः ।
भट्टाचार्यमुपागम्य सर्वे चक्रु र्निमन्त्रणम् ॥५७
व्यञ्जनानि च वन्यानि भट्टाचार्य्योऽपचत्ततः ।
व्यञ्जनै र्वनजातैस्तैः प्रभुर्हृष्टमना अभूत् ॥५८

दिनैर्द्विचतुरै र्भोज्यं यदानीतं सहात्मना ।
बहुधा वन्यशाकांश्च व्यञ्जनं फलमूलजम् ॥५६
मानवावासशून्ये च तथा शून्ये च कानने ।
भट्टाचार्यः पपाचासौ तदन्नं पूर्वमाहृतम् ॥६०
व्यञ्जनैश्च प्रभुर्वन्यैः सन्तोषं परमं ययौ ।
विजनेषु यदा तस्थौ तदा प्राप महत् सुखम् ॥६१
भट्टाचार्यः सिषेवे तं स्नेहवानिव किङ्करः ।
वहिर्वासोऽम्बुपात्रञ्च तस्य विप्रोऽवहत् पुनः ॥६२
त्रिःस्नानेन प्रभुस्ततो निर्झरस्योष्णवारिणा ।
तापेनाग्नेश्च सन्ध्ये द्वे ज्वलतः प्रचुरेन्धनैः ॥६३
निरन्तरं प्रभुः प्रेमावेशेन निभृतं व्रजन् ।
अनुभूय सुखान्येवं बचः किञ्चिदवोचत ॥३४
भट्टाचार्य शृणु त्वं भो भ्रान्तो देशानहं बहून् ।
लेशोऽपि वनमार्गीयसुखस्यास्ति न कुत्रचित् ॥६५
मयि कृष्णः कृपालुः सन् भूयिष्ठां कृतवान् कृपाम् ।
आनीयारण्यमार्गेण स मामित्थ मनन्दयत् ॥६६
पुरा बृन्दावनं यास्यन् मनसैव मचिन्तयम् ।
जननीं जाह्नवीञ्चातोऽवश्यं द्रक्ष्याम्यहं सकृत् ॥६७
तत्र सम्मिलितोऽवश्यं पुनर्भक्तजनैरहम् ।
सममादाय तान् वृन्दावनं नेष्यामि निश्चितम् ॥६८
इत्येवं चिन्तयित्वैव गौड़देशमहं गतः ।
अम्बां गङ्गाञ्च भक्तांश्च लब्धा तत्राभवं सुखी ॥६९
ततो भक्तान् गृहीत्वाहं सानन्दं प्रस्थितो यदा ।
तदाभूवन् जना लक्षं कोटिर्वा सङ्गता मया ॥७०
सनातनमुखेनैव श्रीकृष्णो मां प्रबोधयन् ।
तत्र विघ्नं समुत्पाद्य वनमार्गेण मानयत् ॥७१

करुणासागरः कृष्णो दीनहीनकृपामयः ।
न जायते सुखं किञ्चित् कृष्णस्यानुग्रहं विना ॥७२
भट्टाचार्य्यमथाश्लिष्य तमुवाच महाप्रभुः ।
प्रसादेन तवैवाह मेतावत् सुखमाप्तवान् ॥७४
प्रत्यूचे सोऽपि कृष्णोऽसि त्वमेव करुणामयः ।
अधमोऽहन्तु जीवोऽस्मि मयि त्वं कृतवान् कृपाम् ॥७४
कोऽहं तुच्छोऽस्मि गृह्णन्मां तथापि त्वमिहागतः ।
कृपया मम हस्ताच्च भिक्षान्नं त्वं गृहीतवान् ॥७५
कृतवानधमं काकं गरुत्मन्तमिव प्रभो ।
ईश्वरस्त्वं स्वतन्त्रोऽसि त्वमेव भगवान् स्वयम् ॥७६
"तथाहि श्रीमद्भागवते भावार्थदीपिकायां प्रथमस्कन्धे
प्रथमाध्याये षष्ठे श्लोके श्रीधरस्वामिवाक्यम्—
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत् कृपा तमहं वन्दे परमानन्दमाधवम् ॥४॥"
इत्येवं परितुष्टाव बलभद्रो महाप्रभुम् ।
सेवमानश्च तं प्रेम्णा तन्मनः समतोषयत् ॥७७
एवं नानासुखैरेव व्रजन् काशीं समागतः ।
अवागाहत मध्याह्ने स प्राप्तो मणिकर्णिकाम् ॥७८
तदा तपनमिश्रस्य गङ्गास्नानं प्रकुर्वतः ।
प्रभुसन्दर्शनाज्जातं ज्ञानं किञ्चित् सविस्मयम् ॥७९
प्रभुर्जग्राह सन्न्यासमिति स श्रुतवान् पुरा ।
तदानीं सोऽयमेवेति निश्चित्योल्लसितोऽभवत् ॥८०
अथोपेत्य प्रभोः पादौ गृहीत्वाश्रु मुमोच सः ।
तं महाप्रभु रुत्थाप्य समाशिश्लेष वक्षसा ॥८१
ततो विश्वेश्वरं द्रष्टुं प्रभुमादाय सोऽगमत् ।
विन्दुमाधवपादाब्जमथोपेत्य ददर्श च ॥८२

ततोऽसौ प्रभुमानीय स्वगृहं हृष्टमानसः ।
परिचर्य्यां प्रभोः कृत्वानृत्यद् वस्त्रं समुत्क्षिपन् ॥८३
प्रभोः पादोदकं पीत्वा स्ववंश्यैः सहितो द्विजः ।
कृतवान् बहुमानेन भट्टाचार्यस्य पूजनम् ॥८४
निमन्त्र्याथ प्रभुं गेहे भिक्षान्नं प्रददावसौ ।
वलभद्रस्य भोज्यान्नं तेनैवासावपीपचत् ॥८५
अथ भिक्षां गृहीत्वा च शयनं कुर्वति प्रभौ ।
मिश्रपुत्रो रघुर्नाम्ना तत्पादौ समवाहयत् ॥८६
प्रभुभुक्तावशेषान्ने वंश्यैर्मिश्रेण भक्षिते ।
प्रभुः प्राप्त इति श्रुत्वा तत्रागाच्चन्द्रशेखरः ॥८७
मिश्रस्यासौ सखा पूर्वंदासश्चासीन्महाप्रभोः ।
काशी मध्युषितो जात्या वैद्यो लेखनवृत्तिकः ॥८८
असावागत्य चक्रन्द पतित्वा प्रभुपादयोः ।
कृपया तं समुत्थाप्य समालिङ्गन्महाप्रभुः ॥८९
तं चन्द्रशेखरः प्रोचे महत्या कृपया प्रभो ।
स्वयमागत्य भृत्याय दत्तवानसि दर्शनम् ॥९०
स्वप्रारब्धवशात् काश्यां वसन् कर्णेन किञ्चन ।
माया ब्रह्मेति शब्दाभ्यां विना नैव शृणोम्यहम् ॥९१
विना षड्दर्शनव्याख्यां कथा नास्तीह काचन ।
कृपया श्रावयत्येष मिश्रः कृष्णकथां तु माम् ॥९२
चिन्तयाव उभावावां तव पादौ निरन्तरम् ।
ईश्वरस्त्वं हि सर्वज्ञो दत्तवानसि दर्शनम् ॥९३
अथाह्यानि कियन्त्यत्र स्थित्वा वृन्दावनं प्रभुः ।
यास्यत्येवेति तद्भृत्यौ तौ द्वौ शुश्रुवतुस्ततः ॥९४
मिश्रेनोक्तं प्रभो यावत् काश्यामत्रावतिष्ठसे ।
मामृते तावदन्यस्य न गृह्णीया निमन्त्रणम् ॥९५

इत्येवं भृत्ययुग्मस्य वशीभूतो महाप्रभुः ।
अकामोऽपि दशाहानि काशीमध्यवसत् पुनः ॥९६
कश्चिद् विप्रो महाराष्ट्रदेशीयः प्रभु मागतः ।
तत्प्रेमरूप मालोक्य प्रापदत्यन्तविस्मयम् ॥९७
विप्रेणामन्त्र्यमाणोऽपि नैव स्वीकृतवान् प्रभुः ।
अब्रवीच्चाद्य मे जात मन्यत्रास्ति निमन्त्रणम् ॥९८
इति प्रत्यहमेवासौ तञ्च विप्रं निरस्यत ।
भीत्या सन्न्यासिनां सङ्गान्न चामंस्त निमन्त्रणम् ॥९९
प्रकाशानन्दनामा श्रीपादः स्वंसदमावसन् ।
पाठयामास वेदान्तान् बहून् शिष्यानुपागतान् ॥१००
आलोक्य ब्राह्मणः कश्चित् प्रभोराचार मेकदा ।
प्रकाशानन्द मभ्येत्य तच्चरित्राण्यवर्णयत् ॥१०१
आगतः कोऽपि सन्न्यासी जगन्नाथपुरादिह ।
महिमानं प्रभावञ्च तस्यालं नास्मि भाषितुम् ॥१०२
प्रकाण्डो विग्रहस्तस्य वर्णः शुद्धसुवर्णवत् ।
आजानुलम्बितौ वाहू नेत्रे चाम्बुरुहे इव ॥१०३
सल्लक्षणानि यावन्ति सन्ति श्रूयन्त ईश्वरे ।
तावन्त्येव समग्राणि दृश्यन्तेऽत्राद्भुतानि तु ॥१०४
अयं नारायणः साक्षाद् दृष्ट एव प्रतीयते ।
पश्यत्येनं य एवासौ कुरुते कृष्णकीर्त्तनम् ॥१०५
महाभागवतं लक्ष्म यद् यद् भागवते श्रुतम् ।
दृश्यते प्रकटं सर्वं तत्तदेवेह सर्वथा ॥१०६
तस्य गायति जिह्वा श्रीकृष्णनाम निरन्तरम् ।
नेत्राभ्यां वहते गङ्गाधारावच्चाश्रु सन्ततम् ॥१०७
हसत्येष क्षणादेव नृत्यन् गायंश्च रोदिति ।
ततः करोति हुङ्कारं सिंहगर्ज्जनवत् क्षणम् ॥१०८

कृष्णचैतन्य इत्यस्य नाम विश्वशुभङ्करम् ।
नाम रूपं गुणाश्चास्य सर्वं निरुपमं भुवि ॥१०६
एनं दृष्ट्वैव जानीयादेतस्याचार मैश्वरम् ।
श्रृण्वन्नलौकिकीं वाचं प्रत्ययं कः करोत्विति ॥११०
प्रकाशानन्द आकर्ण्य सोत्प्रासमहसद्बहु ।
विप्रञ्चोपहसन्नेवमभिधातुं प्रचक्रमे ॥१११
श्रुतवानस्मि यद् गौड़े सन्नयासी भावविह्वलः ।
शिष्यः केशवभारत्या अस्ति लोकप्रतारकः ॥११२
चैतन्याख्योऽयमादाय भावप्रवणकान् जनान् ।
देशे देशे प्रतिग्रामं नृत्यन् गायन्नटाढ्यते ॥११३
ईश्वरोऽयमिति ब्रूते स तं य एव पश्यति ।
मोहविद्येदृशी तस्य यः पश्यति स मुह्यति ॥११४
सार्वभौमभट्टाचार्यः पण्डितोऽपि महत्तमः ।
लब्धा चैतन्यसंसर्गमुन्मत्तोऽभूदिति श्रुतम् ॥११५
नाममात्रेण सन्न्यासी स महानैन्द्रजालिकः ।
तस्य भावुकता काशीपुरे विक्रेष्यते नतु ॥११६
वेदान्तश्रवणं कुर्य्या न गच्छेस्तस्य सन्निधिम् ।
उच्छृङ्खलजनैः सङ्गो हन्ति लोकद्वयं खलु ॥११७
इति श्रृण्वन्नसौ विप्रः प्रचुरं दुःखमाप्तवान् ।
अगच्छत्तत उत्थाय कृष्ण कृष्ण इति ब्रुवन् ॥११८
प्रभुसन्दर्शनेनायं विशुद्धीभूतमानसः ।
व्यवृणोत् सर्ववृत्तान्तं दुःखितः पुरतः प्रभोः ॥११९
श्रुत्वा महाप्रभावीषत्स्मितं कुर्वत्यवस्थिते ।
अपृच्छत् पुनरेवासौ ब्राह्मणः श्रीमहाप्रभुम् ॥१२०
यदाहं पुरतस्तस्य तव नाम गृहीतवान् ।
सोऽपि ते नाम जानाति स्वयमेव तदुक्तवान् ॥१२१

वदितुं तव दोषान् स तव नाम समुच्चरन् ।
कृत्वा चैतन्य चैतन्य इति त्रिः समुदैरयत् ॥१२२
वारत्रयेऽपि तस्यास्यात् कृष्णनाम तु नागतम् ।
सावज्ञं नाम गृह्णन्तं तं शृण्वन्नस्मि दुःखितः ॥१२३
किञ्चास्य कारणं देव कृपया मे प्रकाशय ।
भवन्तं पश्यतो जिह्वा ब्रूते कृष्ण हरीति मे ॥१२४
कथितं प्रभुणा मायावादी कृष्णेऽपराध्यति ।
ब्रह्म चैतन्य आत्मेति ब्रवीत्येष निरन्तरम् ॥१२५
अतएव न निर्याति कृष्णनाम तदाननात् ।
कृष्णनाम तथा कृष्णस्वरूपञ्च द्वयं समम् ॥१२६
नाम देहः स्वरूपञ्च त्रयमेकविधं भवेत् ।
चिदानन्दस्वरूपं तद् भिद्यते न परस्परम् ॥१२७
नहि कृष्णात् पृथग् देहदेहिनौ नामनामिनौ ।
जीवधर्मो भवेन्नामदेहस्वारूप्यभेदधीः ॥१२८

"तथाहि हरिभक्तिविलासस्यैकादशविलासे ऊनसप्तत्यधिकद्विशताङ्कधृत-विष्णुधर्मोत्तरवचनम्—

नाम चिन्तामणिः कृष्णश्चैतन्यरसविग्रहः ।
पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः ॥५॥"

नामदेहविलासाश्च कृष्णस्य न भवन्त्यतः ।
प्राकृतै रिन्द्रियैर्ग्राह्याः, स्वप्रकाशा भवन्ति ते ॥१२९
श्रीकृष्णस्य गुणा लीलासमूहास्तस्य नाम च ।
सर्वे समाश्चिदान्दास्तत्स्वरूपा भवन्ति हि ॥१३०

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे द्वितीयलहर्य्याम् षड़शीतितमः श्लोकः—

अतः श्रीकृष्णनामादि न भवेद् ग्राह्यमिन्द्रियैः ।
सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः ॥६॥"

ब्रह्मानन्दाद्भवेल्लीलारसः पूर्णतरो यतः ।
ब्रह्मज्ञांस्तत आकर्षन् कुर्य्यादात्मवशानसौ ॥१३१

"तथाहि श्रीमद्भागवते द्वादशस्कन्धे द्वादशाध्याये द्वापञ्चाशत्तमः श्लोकः—

स्वसुख-निभृतचेतास्तद्व्युदस्तान्यभावो
ऽप्यजित-रुचिर-लीलाकृष्टसारस्तदीयम् ।
व्यतनुत कृपया य स्तत्त्वदीपं पूराणं
तमखिलवृजिनघ्नं व्याससूनुं नमामि ॥७॥"

ब्रह्मानन्दाद् यतः कृष्णगुणः पूर्णतरो भवेत् ।
आकर्षत्यत एवात्मारामाणामप्यसौ मनः ॥१३२

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे सप्तमाध्याये दशमः श्लोकः—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥८॥"

आस्तां तावदिदं सर्वं संसर्गात् कृष्णपादयोः ।
तुलसीसौरभं ह्यात्मारामाणान्तु मनो हरेत् ॥१३३

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चदशाध्याये त्रयश्चत्वारिंशः श्लोकः—

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्क-मिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभ मक्षरजुषामपि चित्ततन्वोः ॥९॥"

अतस्तेषां मुखात् कृष्णनाम नायाति कर्हिचित् ।
यतस्ते सकला मायावादिनोऽतिवहिर्मुखाः ॥१३४

काशीं प्राप्तोऽस्मि विक्रेतु महं भावुकतामिमाम् ।
क्रेतर्य्यसत्यविक्रीतां तां नेष्यामि निजालयम् ॥१३५

गुरुभारा मयानीता सा कथं प्रतिनेष्यते ।
स्वल्पशो मूल्यमादायात्रैव क्रिक्रेष्यते मया ॥१३६

इत्येतावद् वदन् विप्रं कुर्वाणश्च तमात्मसात् ।
प्रतस्थे प्रातरुत्थाय गौराङ्गो मथुरां प्रति ॥१३७
तानेव त्रीन् जनान् सार्द्धं गच्छतोऽसौ न्यवारयत् ।
ततस्तान् प्रेरयामास दूरात्तेषां गृहान् प्रति ॥१३८
विरहेण प्रभोस्ते च त्रय एकत्र सङ्गताः ।
आनन्देन समासीना जगुस्तस्य गुणावलीम् ॥१३९
प्रयागं प्रभुरागत्म त्रिवेण्यां स्नान माचरत् ।
ततो माधव मालोक्य जगौ तत्र सनर्त्तनम् ॥१४०
दृष्ट्वैव यमुनां तत्र स प्रेम्णात्मानमक्षिपत् ।
तमुत्थाप्य च जग्राह भट्टाचार्य्यः ससम्भ्रमम् ॥१४१
एवमेव प्रयागे सोऽवस्थितो दिवसत्रयम् ।
अतारयज्जनान् कृष्णनामप्रेमप्रदानतः ॥१४२
ततोऽसौ मथुरां गच्छन् पथि यत्र स्थितोऽभवत् ।
कृष्णनामार्पयंस्तत्र प्रेम्णा चानर्त्तयज्जनान् ॥१४३
दाक्षिणात्यं पुरा गत्वा यथा लोकानतारयत् ।
तथा पश्चिमदेशेऽसौ वैष्णवान् कृतवान् जनान् ॥१४४
अपश्यद् यत्र यत्रैव यमुनां स व्रजन् पथि ।
तत्रैब स्वतनुं क्षिप्ताऽपतत् प्रेम्णा विचेतनः ॥१४५
मथुरामागतोऽस्मीति मथुरां स विलोकयन् ।
प्रेमावेशवशात्तत्र दण्डवत् पतितोऽभवत् ॥१४६
आसाद्य मथुरां स्नात्वा तीर्थे विश्रामनामके ।
जन्मस्थानं तथा दृष्ट्वा केशवं प्रणनाम सः ॥१४७
प्रेम्णानृत्यदगायच्च हुङ्कारं कृतवान् मुहुः ।
प्रेमावेशं प्रभोर्दृष्ट्वा जनाः सर्वे च विस्मिताः ॥१४८
कश्चिद् विप्रः प्रभोः पादौ गृहीत्वा न्यपतद् भुवि ।
ततोऽसौ प्रभुणा सार्द्धं प्रेमाविष्टो ननर्त्त च ॥१४९

नृत्यन्तौ तावुभौ प्रेम्णा श्लिष्यन्तौ च परस्परम् ।
हरे कृष्णेति सानन्दं सवाहूत्क्षेपमूचतुः ॥१५०
जनैर्हरिहरीत्युक्त्वा महाकोलाहले कृते ।
अभूषयत् प्रभोः कण्ठं स्रजा केशवसेवकः ॥१५१
जना ऊचुः प्रभुं दृष्ट्वा विस्मयाविष्टचेतसः ।
इदं रूपमिदं प्रेम न स्यातां जातु लौकिके ॥१५२
लोका यस्येक्षणात् प्रेम्णा मत्ताः कुर्वन्ति नर्त्तनम् ।
गायन्तः कृष्णनामाथ हसन्ति च रुदन्ति च ॥१५३
श्रीकृष्णस्यावतारोऽयं सर्वथैवेति निश्चितम् ।
समुद्धाराय लोकाना मागतो मथुरामिति ॥१५४
तत स्तं ब्राह्मणं नीत्वा निभृतस्थानमाश्रितः ।
किञ्चिदेवं प्रसङ्गेन पर्य्यपृच्छन्महाप्रभुः ॥१५५
त्व मार्य्यः सरलो बृद्धब्राह्मणोऽसि कुतः पुनः ।
अहो एतादृशीं प्रेमसम्पदं प्राप्तवानसि ॥१५६
विप्रेणोक्तं पुरीस्वामी माधवेन्द्र इहैकदा ।
बम्भ्रम्यमाण आयातो मथुरानगरीमिमाम् ॥१५७
श्रीपादासौ ममागारे स्थितो मय्यनुकम्पया ।
शिष्यं कृत्वा च मां भिक्षामगृह्णान्मे करादपि ॥१५८
अथ प्रकटितं तेन श्रीमद् गोपालसेवनम् ।
गिरौ गोवर्द्धने नाम तदद्यापि प्रवर्त्तते ॥१५९
इत्याकर्ण्य प्रभुस्तस्य कृतवान् पादवन्दनम् ।
ब्राह्मणस्तु भयं प्राप्य पपात प्रभुपादयोः ॥१६०
प्रभुणोक्तं गुरुस्त्वं मे शिष्यकल्पोऽस्म्यहं तव ।
गुरुणा जातु शिष्याय नमस्कारो न युज्यते ॥१६१
इति श्रुत्वा भयाद्विप्रः प्रभुमूचे सविस्मयम् ।
सन्न्यासी सन् कथं वाचमीदृशीं त्वं ब्रवीषि मे ॥१६२

प्रेमाणं ते तु संलक्ष्य मनसानुमितं मया ।
त्वं पुरीमाधवेन्द्रेण सम्बद्ध इव बुध्यसे ॥१६३
कृष्णप्रेमास्ति तत्रैव सम्बन्धस्तेन यस्य हि ।
तं विना प्रेम्ण एतस्य गन्धः क्वापि न वर्त्तते ॥१६४
अथ तं ब्राह्मणं भट्टाचार्य्यः सम्बन्ध मुक्तवान् ।
श्रुत्वा नर्त्तितु मारेभे विप्रः सानन्दमानसः ॥१६५
अथासौ प्रभु मादाय नीतवान् स्व-निकेतनम् ।
प्रभोर्नानाविधां सेवां कृतवांश्च निजेच्छया ॥१६६
भट्टाचार्येण भिक्षार्थं तं पाचयितुमुद्यतम् ।
दृष्ट्वा महाप्रभुर्विप्रमुपेत्यैवं वचोऽब्रवीत् ॥१६७
तव हस्तात् पुरीस्वामी यतो भिक्षां गृहीतवान् ।
ततस्त्वं देहि मे भिक्षामिति शिक्षेयमस्ति मे ॥१६८

"तथाहि श्रीमद्भगवद्गीतायां तृतीयाध्याय एकविंशः श्लोकः—

यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥१०॥"

यद्यप्यसौ सनौडीयजातीयो ब्राह्मणोऽभवत् ।
सनौडीयगृहे जातु सन्न्यासी नच भक्षयेत् ॥१६९
तथापि वैष्णवाचारं तस्य दृष्ट्वा पुरीप्रभुः ।
कृत्वा शिष्यञ्च तं भिक्षां तस्मादेव गृहीतवान् ॥१७०
यद्यपि प्रार्थयामास विप्रं भिक्षां प्रभुः स्वयम् ।
दैन्यग्रस्तमनाः सोऽयं तथापि प्रभुमब्रवीत् ॥१७१
तुभ्यं दास्याम्यहं भिक्षामिति सौभाग्यमेव मे ।
ईश्वरस्त्वं न चास्त्येव वैधमाचरणं तव ॥१७२
किन्तु त्वां दुर्मुखा लोका निन्दिष्यन्त्येव निश्चितम् ।
दुष्टानां बचनं तेषां न सोढुं पारयाम्यहम् ॥१७३

कथितं प्रभुणा वेदाः स्मृतयो मुनयश्च ये ।
न सन्त्येकमतास्ते तु धर्माश्चापि पृथक् पृथक् ॥१७४
साधूनां व्यवहारो हि धर्मस्थापनहेतवे ।
पुरीस्वामिन आचारो धर्मसारो मतोहि मे ॥१७५

"तथाह्येकादशीतत्त्वे धृतं व्यासवचनम्—

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥११॥"

ब्राह्मणेनाथ भिक्षान्नं भोजिते श्रीमहाप्रभौ ।
मधुपुर्य्यां जनाः सर्वे प्रभुं द्रष्टु मुपाययुः १७६
जनेष्वगणितेष्वेवं तत्रायातेषु लक्षशः ।
महाप्रभु र्वहिर्यातो ददौ तेभ्यः स्वदर्शनम् ॥१७७
हरिहरिं वदेत्युक्त्वा भुजावुत्क्षिपति प्रभौ ।
ननृतुः प्रेममत्तास्ते जनाः कृत्वा हरिध्वनिम् ॥१७८
चतुर्विंशतितीर्थेषु यमुनाया महाप्रभुम् ।
कृतस्नानञ्च विप्रोऽसौ तीर्थस्थानान्यदर्शयत् ॥१७९
स्वयम्भुवञ्च विश्रामं तथा भूतेश्वरं प्रभुः ।
दीर्घविष्णुं महाविद्यां गोकर्णादिक मैक्षत ॥१८०
महाप्रभुर्यदारण्यं निरीक्षितुमना अभूत् ।
तदैव ब्राह्मणः सोऽपि तं निनायात्मना सह ॥१८१
मधु-तालवने यातः कुमुदं वहुलावनम् ।
तत्र तत्र प्रभुः सस्नौ प्रेमावेशवशादसौ ॥१८२
समजाः पथि धेनूना मवलोक्य महाप्रभुम् ।
परितो वेष्टयामासुः सहुङ्कारं समागताः ॥१८३

धेनूर्दृष्ट्वा प्रभुः स्तब्धोऽभवत् प्रेमतरङ्गितः ।
वात्सल्येन प्रभोरङ्गं लिलिहु र्धेनवश्च ताः ॥१८४

स्वस्थश्चकार धेनूनामङ्गकण्डूयनं प्रभुः ।
ता जग्मुः प्रभुणा सार्द्धं मुमुचुस्तं न धेनवः ॥१८५

अतिकृच्छ्रेण गोपालै रवरुद्धासु धेनुषु ।
प्रभोः कण्ठध्वनिं श्रुत्वा मृगीयूथ मुपाययौ ॥१८६

मृगा मृग्यश्च तस्यास्यं दृष्ट्वाङ्गं लिलिहु र्मुहुः ।
निर्भयाश्च समं तेन जग्मुस्तेनैव वर्त्मना ॥१८७

शुक-कोकिल-भृङ्गाश्च दृष्ट्वा तं पञ्चमं जगुः ।
ननृतुः शिखियूथानि पुरतः श्रीमहाप्रभोः ॥१८८

लताश्च तरवो बृन्दावनस्यालोक्य तं प्रभुम् ।
मध्वश्रुवर्षणं चक्रुः प्रोद्भिन्न-पुलकाङ्कुराः ॥१८९

फल-पुष्प-समृद्धाश्च शाखाः पेतुः प्रभोः पदे ।
दृष्ट्वा बन्धुं यथा बन्धुरुपैति सोपढौकनम् ॥१९०

श्रीमद्बृन्दावनस्था ये स्थावरा ये च जङ्गमाः ।
ननन्दुस्ते प्रभुं दृष्ट्वा बन्धुमालोक्य बन्धुवत् ॥१९१

तेषामास्वादयन् प्रेम भावावेशान्महाप्रभुः ।
तैः सर्बै रकरोत् क्रीड़ां तेषामेव वशंगतः ॥१९२

आलिलिङ्ग प्रभुः सर्वानेव वल्लीमहीरुहान् ।
ध्यानेन कुसुमादीनि कृष्णाय च समार्पयत् ॥१९३

प्रेम्णाश्रु-कम्प-रोमाञ्च-व्याकुलाङ्गोऽवदत् प्रभुः ।
ब्रूहि कृष्णेति कृष्णेति ब्रूहीत्युच्चैः स्वयं मुहुः ॥१९४

समं कृष्णध्वनिं चक्रुः सर्वे स्थावरजङ्गमाः ।
प्रभो र्गम्भीरशब्दस्य प्रतिध्वनि मिवोत्थितम् ॥१९५

मृगस्य कण्ठमाश्लिष्य रुदत्येव महाप्रभौ ।
सोऽपि रोमाञ्चिताङ्गोऽभूदश्रुव्याकुललोचनः ॥१९६

अथ दृष्टिं गतौ वृक्षशाखायां शारिकाशुकौ ।
दृष्ट्वा तौ किमपि श्रोतुमभ्यकाङ्क्षन्महाप्रभुः ॥१९७
तावुड्डीय प्रभोर्हस्ते पतितौ शारिकाशुकौ ।
शुकः कृष्णगुणश्लोकं पपाठ श्रावयन् प्रभुम् ॥१९८

"तथाहि गोविन्दलीलामृते त्रयोदशसर्गे ऊनत्रिंशः श्लोकः—

सौन्दर्य्यं ललनालिधैर्य्यदलनं लीला रमास्तम्भिनी
वीर्य्यं कन्दुकिताद्रिवर्य्यममलाः पारेपरार्द्धं गुणाः ।
शीलं सर्वजनानुरञ्जन महो यस्यायमम्मत्प्रभु-
र्विश्वं विश्वजनीनकीर्त्तिरवतात् कृष्णो जगन्मोहनः ॥१२॥"

अथ कृष्णगुणव्याख्यां समाकर्ण्य शुकाननात् ।
राधिकागुणरत्नानि वर्णयामास शारिका ॥१९९

"तथाहि गोविन्दलीलामृते त्रयोदशसर्गे त्रिंशः श्लोकः—

श्रीराधिकाया प्रियता सुरूपता सुशीलता नर्त्तनगानचातुरी ।
गुणालिसम्पत् कविता च राजते जगन्मनोमोहनचित्तमोहिनी ॥१३॥"

पुनरेव शुकेनोक्तं कृष्णो मदनमोहनः ।
इति व्याख्यातुकामेन श्लोकोऽप्येकश्च वाचितः ॥२००

"तथाहि गोविन्दलीलामृते ग्रन्थकारोक्तः श्लोकः—

वंशीधारी जगन्नारीचित्तहारी च शारिके ।
विहारी गोपनारीभि र्जीयान्मदनमोहनः ॥१४॥"

शारिकाथ तथाकर्ण्योपहसन्त्येव मब्रवीत् ।
शृण्वतस्तत् प्रभोश्चित्तमभूत् सोल्लासविस्मयम् ॥२०१

"तथाहि तत्रैव—

राधासङ्गे यदा भाति तदा मदनमोहनः ।
अन्यथा विश्वमोहोऽपि स्वयं मदनमोहितः ॥१५॥"

अथोत्पत्य गतौ वृक्षशाखां तौ शारिकाशुकौ ।
प्रभुर्नृत्यं मयुराणामपश्यत् सकुतूहलम् ॥२०२

शिखिनां कण्ठमालोक्य कृष्णकान्तिं स्मरन् प्रभुः ।
प्रेमावेशाभिभूतः सन्नपतद्धरणीतले ॥२०३
सोऽयं ब्राह्मण आलोक्य तथा सम्मूर्च्छितं प्रभुम् ।
सन्तर्पयितु मारेभे भट्टाचार्य्यसहायकः ॥२०४
ससम्भ्रमं समादाय वहिर्वासो महाप्रभोः ।
तदङ्गं वारिणासिञ्चद् वस्त्रवातेन वीजयन् ॥२०५
तस्मिन्नुदीरयत्युच्चैः कृष्णेति श्रवणे प्रभोः ।
ततोऽसौ लब्धचैतन्यो व्यलुठत् पृथिवीतले ॥२०६
कण्टकै र्दुर्गमेऽरण्ये प्रभुं विक्षतविग्रहम् ।
स्वाङ्कमारोपयन् भट्टाचार्य्यः स्वस्थं चकार तम् ॥२०७
प्रेमोद्वेलमनाः कृष्णावेशेनाभून्महाप्रभुः ।
उत्थाय नर्त्तनं कुर्वन् ब्रूहि ब्रूहीत्यवोचत ॥२०८
भट्टाचार्यः स विप्रश्च जगतुः कृष्णनाम तौ ।
नृत्यं कुर्वन्नगच्छच्च पथा तेन महाप्रभुः ॥२०९
प्रेमावेशं प्रभोर्दृष्ट्वा ब्राह्मणो विस्मितोऽभवत् ।
भट्टाचार्य्यः प्रभो रक्षोपायानेव व्यचिन्तयत् ॥२१०
आसीन्नीलाचले यावान् प्रेमावेशोऽस्य चेतसि ।
वृन्दावनपथे त्वासंस्तावतां शतशोगुणाः ॥२११
मथुरां पश्यतः प्रेमा सहस्रगुणितोऽभवत् ।
तस्याटतो वनं लक्षगुणः प्रेमा व्यवर्द्धत ॥२१२
देशान्तरेऽप्यभूद् यस्य नाम्नैव प्रेम चोत्तटम् ।
साक्षाद्वृन्दावने तस्मिन्नधुना व्यचरत् प्रभुः ॥२१३
प्रभू रात्रिन्दिवं प्रेमोत्कलिकाकुलमानसः ।
स्नानभिक्षादिकं सर्वमभ्यासान्निरवाहयत् ॥२१४
एवमेव स बभ्राम वनानि द्वादश प्रभुः ।
अशक्यवर्णनं सर्व मेकत्र लिखितं मया ॥२१५

यावान् प्रेमविकारोऽस्याभवद् बृन्दावने तदा ।
कोट्या ग्रन्थैरनन्तोऽपि लिखेद् विस्तरतो यदि ॥२१६
लिखितुं नैव शक्नोति तथाप्यस्य कणामपि ।
अतो दिग्दर्शनन्यायादुक्त मुद्देशतो मया ॥२१७
श्रीमच्चैतन्यलीलाब्धि-पात्रेण प्लावितं जगत् ।
यस्यास्ते यावती शक्तिस्तावत्या सन्तरत्यसौ ॥२१८
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२१६

इति श्रीचैतन्यचरितामृते मध्यखण्डे बृन्दावनदर्शनं नाम सप्तदशः परिच्छेदः ।

—०—

मध्यलीलायामष्टादशः परिच्छेदः

"वृन्दावने स्थिरचरान्नन्दयन् स्वावलोकनैः ।
आत्मानञ्च तदालोकाद् गौराङ्गः परितोऽभ्रमत् ॥१॥"

भूयो जयतु गौरेन्दु र्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्त्वथ ॥१
प्रभुरेवं यदा नृत्यन्नारिटग्राम मागतः ।
तदैव प्रतिलेभेऽसौ सहसा वाह्यचेतनाम् ॥२
जनान् पप्रच्छ तत्रत्यान् राधाकुण्डस्य संस्थितिम् ।
नाशक्नोत् कोऽपि तद्वक्तुं स विप्रोऽपि विवेद न ॥३
तीर्थं लुप्तमिति ज्ञात्वा सर्वज्ञो भगवान् प्रभुः ।
सस्नौ स्वल्पजलेनैव धान्यक्षेत्रद्वयान्तरे ॥४
ग्रामीणास्ते तथा वीक्ष्याभवन् विस्मितचेतसः ।
राधाकुण्डञ्च तुष्टाव तत्र प्रेम्णा महाप्रभुः ॥५

सर्वगोपीषु कृष्णस्य राधा प्रियतमा यथा ।
राधाकुण्डं तथा प्रेष्ठं तत् प्रियायाः सरोवरम् ॥६

"तथाहि पद्मपुराण आदिलीलायां चतुर्थाध्याय ऊन-
चत्वारिंशः श्लोकः—

यथा राधा प्रिया विष्णो स्तस्याः कुण्डं प्रियं तथा ।
सर्वगोपीषु सैवैका विष्णो रत्यन्तवल्लभा ॥२॥"

यस्मिन् कुण्डे सदा कृष्णः सह राधिकया जले ।
जलकेलिं तथा रासलीलाञ्च कुरुते तटे ॥७

तस्मिन् कुण्डे हि यः स्नानं सकृदप्यनुतिष्ठति ।
राधाया इव तस्मै श्रीकृष्णः प्रेमार्पयत्यसौ ॥८

राधा-मधुरिमेवास्य भाति कुण्डस्य माधुरी ।
महिमा चास्य कुण्डस्य राधाया महिमा यथा ॥९

"तथाहि गोविन्दलीलामृते सप्तमसर्गे द्व्यधिक-
शततमः श्लोकः—

श्रीराधेव हरे स्तदीयसरसी प्रेष्ठाद्भुतैः स्वैर्गुणै-
र्यस्यां श्रीयुतमाधवेन्दुरनिशं प्रीत्या तया क्रीड़ति ।
प्रेमास्मिन् वत राधिकेव लभते यस्यां सकृत् स्नानकृत्
तस्या वै महिमा तथा मधुरिमा केनास्तु वर्ण्यः क्षितौ ॥३॥"

तामित्थमेव तुष्टाव प्रेमाविष्टो महाप्रभुः ।
नृत्यं चक्रे च तत्तीरे कुण्डलीलामनुस्मरन् ॥१०

तिलकं रचयित्वासौ कुण्डमृत्तिकया प्रभुः ।
तां मृदं सह जग्राह भट्टाचार्यः करेण च ॥११

ततः सरोवरं गत्वा सुमनोनामकं प्रभुः ।
तत्र गोवर्द्धनं दृष्ट्वा बभूव प्रेमविह्वलः ॥१२

गोवर्द्धनगिरिं वीक्ष्य दण्डवत् प्रणनाम सः ।
अथालिङ्ग्य शिलामेकामुन्मदिष्णु र्बभूव च ॥१३

ततो गोवर्द्धनग्रामं प्रेममत्तः समागतः।
हरिदेवं निरीक्ष्यासौ प्राणमत्तं महाप्रभुः ॥१४
मथुराकमलस्यासौ दले वसति पश्चिमे।
सोऽयं नारायणस्यादिप्रकाशो हरिदेवकः ॥१५
पुरतस्तस्य नृत्यन्तं प्रेमोन्मत्तं महाप्रभुम्।
श्रुत्वाश्चर्य्यमयं लोका वीक्षितुं तमुपाययुः ॥१६
प्रभोः प्रेम च रूपञ्च दृष्ट्वा लोकाश्चमत्कृताः।
तस्य सत्कार मकरोद्धरिदेबस्य सेवकः ॥१७
ब्रह्मकुण्डे कृते तत्र भट्टाचार्य्येण रन्धने।
तत्र कुण्डे कृतस्नानः प्रभुर्भिक्षां गृहीतवान् ॥१८
तस्यामेव विभावर्य्यां हरिदेवस्य मन्दिरे।
तिष्ठन् विचारयामास मनसैवं महाप्रभुः ॥१९
नैवाहमधिरोहामि जातु गोवर्द्धनं गिरिम्।
श्रीमद्गोपालदेवस्य दर्शनन्तु कथं लभे ॥२०
इत्येवं मनसा ध्यात्वा प्रभुं तूष्णीमवस्थितम्।
ज्ञात्वा गोपालदेवेन कृतमेकं सुकौशलम् ॥२१

"तथाहि ग्रन्थकारस्य वाक्यम्—

अनारुरुक्षवे शैलं स्वस्मै भक्ताभिमानिने।
अवरुह्य गिरेः कृष्णो गौराय स्वमदर्शयत् ॥४॥"
अन्नकूटाभिधे ग्रामे श्रीगोपालो ह्यवस्थितः।
अध्यतिष्ठंश्च तं ग्रामं जात्या राजपुता जनाः ॥२२
एकदा कश्चिदागत्य ग्रामीणं कञ्चिद ब्रवीत्।
हठात्ते ग्राममुच्छेत्तुं तौरुष्काः सन्ति सज्जिताः ॥२३
अद्य रात्रौ पलायस्व नैकोऽप्यत्रावतिष्ठताम्।
देवं गृह्णन् पलायस्व श्वः समेष्यन्ति यावनाः ॥२४

इति श्रुत्वैव तद् ग्रामवास्तव्यैश्चिन्तितं भृशम् ।
नीत्वादौ गाठुलिग्रामं गोपालः स्थापितस्ततः ॥२५

निभृते ब्राह्मणागारे देवोऽसौ सेवितोऽभवत् ।
ग्रामोऽसौ शून्यतां यातो जनाः सर्वे पलायिताः ॥२६

इत्थं म्लेच्छभयाद्भूयो भूयो देवः पलायत ।
त्यक्त्वा स्वं मन्दिरं कुञ्जे ग्रामे वान्यत्र च स्थितः ॥२७

अथ मानसगङ्गायां प्रातः स्नात्वा महाप्रभुः ।
प्रस्थान मकरोत् कर्त्तुं गोवर्द्धनपरिक्रमाम् ॥२८

प्रेमावेशाभिभूतात्मा वीक्ष्य गोवर्द्धनं गिरिम् ।
प्रभुर्नर्तितुमारेभे श्लोकमेतञ्च वाचयन् ॥२९

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकविंशाध्याये -ऽष्टादशः श्लोकः—

हन्तायमद्रिरबला हरिदासवर्य्यो
यद्रामकृष्णचरणस्पर्शप्रमोदात् ।
मानं तनोति सहगोगणयोस्तयोर्यत्
पानीयसुयवसकन्दरकन्दमूलैः ॥५॥"

स्नातं गोविन्दकुण्डादितीर्थेषु प्रभुणा ततः ।
गाठुलिग्राम मध्यास्ते गोपाल इति च श्रुतम् ॥३०

तञ्च ग्रामं प्रभुर्गत्वा श्रीगोपालं विलोक्य च ।
जगौ सङ्कीर्त्तनं तत्र प्रेमाविष्टो ननर्त्त च ॥३१

गोपालस्य तु सौन्दर्य्यं वीक्ष्यावेशं गतः प्रभुः ।
ननर्त्तेमं पठन् श्लोकं दिनमन्तं निनाय च ॥३२

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभाव-लहर्य्यां षड् विंशः श्लोकः—

वामस्तामरसाक्षस्य भुजदण्डः स पातु वः ।
क्रीड़ाकन्दुकतां येन नीतो गोवर्द्धनो गिरिः ॥६॥"

एवं ददर्श गोपालं प्रभुस्तत्र दिनत्रयम् ।
चतुर्थेऽहनि गोपालः प्रतस्थे मन्दिरं प्रति ॥३३
तेन सार्द्धं प्रभौ याते नृत्यं गीतञ्च कुर्वति ।
जना हरि हरीत्युक्त्वा चक्रुः कोलाहलं मुदा ॥३४
प्रविष्टे मन्दिरं देवे प्रभुस्तस्थौ गिरेरधः ।
गोपालः पूरयामास निखिलं वाञ्छितं प्रभोः ॥३५
एवमेव हि गोपालः स्वभावकरुणो भवेत् ।
भक्तः कश्चन चेद्देवं श्रीगोपालं दिदृक्षते ॥३६
किन्तु गोवर्द्धनं नैवारोहत्युत्कण्ठितोऽपि सन् ।
अवरोहति गोपालः केनापि च्छद्मना स्वयम् ॥३७
तिष्ठन्तं जातु कुञ्जे तं जातु ग्रामान्तरेऽपि वा ।
भक्तोऽसौ तत्र गत्वैव श्रीगोपालं निरीक्षते ॥३८
नैव पर्वतमारूढ़ौ तौ द्वौ रूपसनातनौ ।
ताभ्यामप्येवमेवासौ गोपालः स्वमदर्शयत् ॥३९
दूरं गन्तु मशक्तोऽपि जरसा रूप एकदा ।
श्रीमद् गोपालदेवस्य सौन्दर्य्यमदिदृक्षत ॥४०
म्लेच्छाद् भयेन गोपालो मथुरानगरीं गतः ।
मासमेकं तदा तस्थौ विट्ठलेश्वरवेश्मनि ॥४१
ततः श्रीरूपगोस्वामी सकलैः स्वगणैः सह ।
मासमेकं ददर्शामुं मथुरायामवस्थितः ॥४२
दासः श्रीरघुनाथश्च भट्टगोपाल एव च ।
भट्टश्रीरघुनाथोऽथ गोस्वामी लोकनाथकः ॥४३
तथा भूगर्भगोस्वामिजीवगोस्वामिनावुभौ ।
ततो गोविन्दगोस्वामी यादवाचार्यसङ्गतः ॥४४
श्रीमानुद्धवदासश्च माधवश्चेति युग्मकम् ।
श्रीमान् गोपालदासश्च दासोनारायणस्तथा ॥४५

कृष्णदासश्च वाणी च गोविन्दभक्तः पुनः ।
पुण्डरीकाक्ष ईशानो हरिदासोलघुश्च ते ॥४६
इति मुख्यानिमान् भक्तान् गृहीत्वासौ सहात्मना ।
प्रचुरानन्दरङ्गेण देवं गोपाल मैक्षत ॥४७
मासमेकन्तु गोपाले स्थित्वा स्वं मन्दिरं गते ।
अथ श्रीरूपगोस्वामी श्रीवृन्दावनमाययौ ॥४८
गोपालस्य कृपाव्याख्या प्रसङ्गेन कृता मया ।
महाप्रभु रथागच्छद् भ्रमितुं काम्यकं वनम् ॥४६
पूर्वमेव मया प्रोक्ता रीति र्या गमने प्रभोः ।
सर्वं बृन्दावनं यावत् पर्य्यभ्राम्यत्तयैव सः ॥५०
लीलाक्षेत्राणि वीक्ष्यासौ ततो नन्दीश्वरं गतः ।
दृष्ट्वा नन्दीश्वरं देवं बभूव प्रेमविह्वलः ॥५१
पावनादिषु कुण्डेषु सर्वेषु स्नातवान् प्रभुः ।
ततः पर्वत मारुह्य तत्रापृच्छज्जनानिदम् ॥५२
पर्वतस्योपरि देवमूर्त्तिः किं काचिदस्ति भोः ।
जनाः प्रत्यूचुरस्त्येव देवमूर्त्ति र्गुहान्तरे ॥५३
वर्त्तेते पार्श्वयोर्मातापितरौ पुष्टविग्रहौ ।
त्रिभङ्गसुन्दरस्त्वेको भाति तावन्तरा शिशुः ॥५४
इति तद्वाक्य माकर्ण्य प्रभुः सानन्दमानसः ।
गुहा मुद्घाटयंस्तत्र तन्मूर्त्तित्रय मैक्षत ॥५५
श्रीव्रजेन्द्र-व्रजेश्वर्य्योः कृत्वा श्रीपादवन्दनम् ।
प्रेमावेशेन कृष्णस्य सर्वाङ्गान्यस्पृशत् प्रभुः ॥५६
प्रेमाविष्टो दिनं सर्वं तत्र नृत्यन् स गीतवान् ।
तत एव व्रजन् गौरः खादिरं वन माययौ ॥५७
तत्र लीलास्थलं वीक्ष्य शेषशायिस्थलं गतः ।
लक्ष्मीं निरीक्ष्य गोस्वामी श्लोक मेत मवाचयत् ॥५८

तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याय ऊन-
विंशः श्लोकः—

यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवी मटसि तद् व्यथते न किंस्वित्
कूर्पादिभि र्भ्रमति धी र्भवदायुषां नः ॥७॥"

खेलातीर्थं ततो दृष्ट्वा भाण्डीरं वनमागतः ।
उत्तीर्य्य यमुनापारं प्रभुर्भद्रवनं ययौ ॥५६
ततः श्रीवन मालोक्य यातो लौहवनं पुनः ।
ततो महावनं गत्वा जन्मस्थानं निरैक्षत ॥६०
यमलार्जुनभङ्गादिलीलाक्षेत्राणि पश्यतः ।
प्रेमावेशात् प्रभोश्चित्तं पारिप्लवमभूद्वशम् ॥६१
श्रीमद् गोकुल मालोक्य मथुरानगरं गतः ।
जन्मक्षेत्रं निरीक्ष्यासौ तस्थौ तद्विप्रसद्मनि ॥६२
जनानां तत्र संघट्टं दृष्ट्वासौ मथुरां त्यजन् ।
गत्वैकान्तरहोऽक्रूरतीर्थं मध्यवसत् प्रभुः ॥६३
अन्येद्यु र्द्रष्टुमागत्य श्रीमद्वृन्दावनं प्रभुः ।
कालियस्य ह्रदे स्नानं कृत्वा प्रस्कन्दनं गतः ॥६४
द्वादशादित्यतीर्थाच्च केशितीर्थमुपाययौ ।
रासस्थलीं समालोक्य प्रेम्णासौ मूर्च्छितोऽभवत् ॥६५
भूयः संज्ञां प्रतिप्राप्तो व्यलुठत् पृथिवीतले ।
हसन्नृत्यन् रुदंश्चासौ पतंस्तारस्वरं जगौ ॥६६
इत्थमेव स रङ्गेण दिनं तच्चापि यापयन् ।
आयातः सायमक्रूरतीर्थं भिक्षान्नमग्रहीत् ॥६७
प्रातर्वृन्दावनस्यासौ स्नात्वा चीराख्यघट्टके ।
तिन्तिड़ीतल मायातो विश्रामं तत्र लब्धवान् ॥६८

साक्षी श्रीकृष्णलीलायाः पादपोऽसौ पुरातनः ।
वेदि-बन्धस्तले तस्य विराजत्यतिचिक्कणः ॥६९

यमुना-सन्निधौ तत्र वहच्छीतसमीरणे ।
स बृन्दावनसौन्दर्य्यं यामुनं वारि चैक्षत ॥७०

तिन्तिड़ीतल आसीनः कृत्वा सङ्कीर्त्तनं प्रभुः ।
मध्याह्ने तदनु प्राप्ते बुभुजेऽक्रूर मागतः ॥७१

जनेष्यक्रूरतीर्थस्यायातेषु तं दिदृक्षुषु ।
नाशक्नोत् कीर्त्तनं गातुं सच्छन्दं जनताकुलः ॥७२

अतो बृन्दावनं गत्वा रहस्युपविशन् प्रभुः ।
नामसङ्कीर्त्तनं चक्रे यावन्मध्याह्न मागतम् ॥७३

तृतीय-प्रहरे लोका लेभिरे तस्य दर्शनम् ।
नामसङ्कीर्त्तनं सर्वां स्तांस्तदासावुपादिशत् ॥७४

तदानीं वैष्णवो नाम्ना कृष्णदासः समागतः ।
यमुनापारवास्तव्यो जात्या राजपुतो गृही ॥७५

केशितीर्थे कृतस्नानः स गच्छन् कालियह्रदम् ।
अम्लिकातल आसीनं सहसा दृष्टवान् प्रभुम् ॥७६

प्रभोः प्रेम च रूपञ्च विलोक्यासौ विमोहितः ।
दण्डवत् पतितो भूमौ प्रणनाम प्रभुं तदा ॥७७

प्रभुः पप्रच्छ कस्त्वं भो स्तव कुत्र गृहा इति ।
प्रत्यूचे कृष्णदासेन गृहस्थः पामरोऽस्म्यहम् ॥७८

अहं राजपुतो जात्या पारे सन्ति गृहा मम ।
इच्छामि वैष्णवस्याहं किङ्करो भवितुं चिरात् ॥७९

पुनरेको मया स्वप्नो निशायां यो विलोकितः ।
सर्वथा तस्य याथार्थ्यं सम्प्राप्तं त्वामुपेयूषा ॥८०

प्रभुस्तं गाढ़माश्लिष्यन्ननु जग्राह तत्क्षणात् ।
असौ हरिहरी त्युक्त्वा प्रेम्णा मत्तो ननर्त्त च ॥८१

मध्याह्नेऽक्रूरतीर्थं स प्रभुणा सार्द्धमागतः ।
प्रभोरुच्छिष्टपात्रान्नप्रसादं स च लब्धवान् ॥८२
अन्वगच्छत् प्रभुं प्रातर्वहंस्तस्याम्बुभाजनम् ।
स गृह-स्त्री-सुतां स्त्यक्त्वातिष्ठच्च प्रभुणा समम् ॥८३
कृष्णो वृन्दावने प्राप्तः पुनः प्रकटतामिति ।
उपचक्रमिरे सर्वे जना वक्तुमितस्ततः ॥८४
मथुरावासिनो लोका वहवः प्रातरेकदा ।
कृतकोलाहला वृन्दावनात्तत्र समागताः ॥८५
अवलोक्य प्रभुं ते च पादौ तस्य ववन्दिरे ।
प्रभुणोक्तं कुतो यूयमिदानीमागता इति ॥८६
जनाः प्रत्यवदन् कृष्णः प्रकटः कालियह्रदे ।
कालियस्य ज्वलद्रत्नफणे शीर्षे स नृत्यति ॥८७
प्रत्यक्षं दृष्टवन्त स्तं जना नास्त्यत्र संशयः ।
इत्याकर्ण्य प्रभुः प्रोचे सर्वं सत्यं भवेदिति ॥८८
एवमेव त्रिरात्रं ते जनास्तत्र समागताः ।
कृष्णस्य दर्शनं लब्ध मिति सर्वे बभाषिरे ॥८९
श्रीकृष्णो दृश्यतेऽस्माभिरिति वाक्यं प्रभोः पुरः ।
ब्रुवतस्तान् जनान् सत्यं वाचयामास भारती ॥९०
सत्यं सन्ददृशुः कृष्णं पश्यन्तः प्रभुमेव ते ।
असत्ये बभ्रमुः सत्यं त्यक्त्वा सत्यं स्वया धिया ॥९१
अथ न्यवेदयद्भट्टाचार्य्यः श्रीपादयोः प्रभोः ।
मामाज्ञापय गच्छन्तं करिष्ये कृष्णदर्शनम् ॥९२
अथाहत्य चपेटेन तमुवाच महाप्रभुः ।
मूर्खो भवसि मूर्खाणां वचसा पण्डितोऽपि सन् ॥९३
कथं सन्दर्शनं कृष्णो ददात्वस्मिन् कलौ युगे ।
एवं कोलाहलं मूर्खाः कुर्वन्त्यात्मभ्रमादिमे ॥९४

मा भूस्त्वं वातुलस्तावदवतिष्ठस्व वेश्मनि ।
कृष्णं द्रक्ष्यसि तत्र त्वं गत्वा श्वो रजनाविति ॥६५
अथ भद्रजनः कोऽपि प्रातः प्रभुमुपागतः ।
स पृष्टः प्रभुणा कृष्णं किं दृष्ट्वागतवानसि ॥६६
तेनोक्तं नावमारूढः कैवर्त्तो निशि कश्चन ।
दीपं प्रज्वालयन्मत्स्यान् हन्त्यस्मिन् कालियह्रदे ॥६७
दूरात्तमीक्षमाणानां जनानां जायते भ्रमः ।
नर्त्तनं कुरुते कृष्णः कालियस्य तनाविति ॥६८
तरण्यां कालियभ्रान्ति र्दीपे रत्नभ्रमोऽभवत् ।
कैवर्त्ते तत्र मूर्खाणां कृष्णभ्रान्तिरजायत ॥६९
कृष्णो बृन्दावनं प्राप्तोऽधुनेति सत्यमेव तत् ।
दृष्टवन्तो जनाः कृष्णमिति मिथ्या भवेन्न तु ॥१००
ते तु कं कृष्णमीक्षन्ते मन्यन्ते कञ्च ते भ्रमात् ।
स्थानौ हि पुरुषज्ञानं विपरीतं भवेद् यथा ॥१०१
प्रभुः पप्रच्छ दृष्टः क्व श्रीकृष्णस्तै र्जनैरिति ।
स ऊचे त्वं हि सन्न्यासी चर-नारायणोऽसि यत् ॥१०२
श्रीकृष्णस्यावतारोऽसि जातो बृन्दावनेऽधुना ।
त्वामालोक्य जनाः सर्वे निस्तारं प्राप्नुवन्निति ॥१०३
प्रभुः प्रत्युक्तवान् विष्णुर्विष्णु मैवं पुनर्वद ।
कदाचिदधमे जीवे विष्णुज्ञानं विधेहि न ॥१०४
सन्न्यासी चित्कणो जीवो भवेत् किरणलेशवत् ।
श्रीकृष्णस्तु षड़ैश्वर्य्यपूर्णः सूर्यसमो भवेत् ॥१०५
जीवश्चेश्वरतत्त्वञ्च न स्यातां जातु तौ समौ ।
प्रज्वलज्ज्वलनस्तोमततस्फुलिङ्गकणौ यथा ॥१०६

"तथाहि भगवत्-सन्दर्भे—

ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः ।
स्वाविद्यासंवृतो जीवः संक्लेश-निकराकरः ॥८॥"

उच्यते येन मूढ़ेन समौ जीवेश्वराविति ।
सोऽयं भवति पाषण्डी कृतान्तेन स दण्ड्यते ॥१०७

"तथाहि हरिभक्तिविलासस्य प्रथमविलासे एकसप्तति-
तमः श्लोकः—

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव वीक्षेत स पाषण्डी भवेद् ध्रुवम् ॥६॥"

जनाः प्रोचु र्न जातु त्वां जीवं मन्यामहे वयम् ।
श्रीकृष्णस्यानुरूपे हि प्रकृतिश्चाकृतिश्च ते ॥१०८
आकृत्या प्रतिभासि त्वं श्रीव्रजेन्द्रस्य नन्दनः ।
अम्बरेणेव पीतेन रोचिषा ते वृता तनुः ॥१०६
वस्त्रबद्धापि कस्तूरी न कदाचिन्निगुह्यते ।
ईश्वरीयप्रभावस्ते नैव संवृति मर्हति ॥११०
वुद्धेर्गोचरतां नैति प्रकृतिस्ते ह्यलौकिकी ।
उन्मादयति निरीक्ष्य त्वां कृष्णप्रेम्णाखिलं जगत् ॥१११
स्त्री वा वालोऽथ बृद्धो वा चण्डालो यवनोऽपि वा ।
य एव सकृदप्येवं लभते तव दर्शनम् ॥११२
कृष्णनाम स गृह्णाति तथोन्मत्तश्च नृत्यति ।
स आचार्य्यो भवन् विश्वं समुद्धारयति ध्रुवम् ॥११३
आस्तां ते दर्शनं तावत्तवनाम शृणोति यः ।
कृष्णप्रेम्णा स मत्तः संस्तारयेद्भुवनत्रयम् ॥११४
श्वपचोऽपि समाकर्ण्य नाम ते पावनो भवेत् ।
नैवेयं शक्यते वक्तुं तव शक्तिरलौकिकी ॥११५

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे त्रयस्त्रिंशाध्याये
षष्ठः श्लोकः—

यन्नामधेयश्रवणानुकीर्त्तनाद्
यत्प्रह्वणाद् यत्स्मरणादपि क्वचित् ।
श्वादोऽपि सद्यः सवनाय कल्पते
कुतः पुनस्ते भगवन्नु दर्शनात् ॥१०॥"

एवं ते महिमानो हि तव ताटस्थ्यलक्षणम् ।
स्वारूप्यलक्षणेनासि त्वं व्रजेन्द्रस्य नन्दनः ॥११६
इत्थं तेष्वपि लोकेषु प्रसादं विदधे प्रभुः ।
प्रेम-नामप्रमत्तास्ते ययुः स्वं स्वं निकेतनम् ॥११७
एवमक्रूरतीर्थे सोऽहानि कानिचिदावसन् ।
नाम प्रेम च कृष्णस्य दत्त्वा लोकानतारयत् ॥११८
पुरीमाधवशिष्योऽसौ ब्राह्मणो मथुरापुरे ।
गत्वा प्रत्यालयं तत्स्थै र्निमन्त्रणमकारयत् ॥११६
मथुरावासिनो ये ये ब्राह्मणाः सज्जनाश्च ते ।
आगत्यामन्त्रयामासु र्भट्टाचार्य्यस्य सन्निधौ ॥१२०
दशभि र्वाथ विंशत्यैकदा लोकै र्निमन्त्रितः ।
जग्राहैकतमस्यैव भट्टाचार्य्यो निमन्त्रणम् ॥१२१
अलब्धावसरा लोका प्रभोरामन्त्रणाय ये ।
तद्ग्राहयितुकामास्ते ब्राह्मणं तमसाधयन् ॥१२२
कान्यकुब्जा दाक्षिणात्या ब्राह्मणा ये च वैदिकाः ।
प्रभुं निमन्त्रयामासुस्ते सदैन्य मुपागताः ॥१२३
प्रभातेऽक्रूरतीर्थे ते गत्वा कृत्वा च रन्धनम् ।
प्रभवे प्राददु र्भिक्षां शालग्रामनिवेदिताम् ॥१२४
एकस्मिन्दिवसेऽक्रूरतीर्थघट्टोपरि प्रभुः ।
गृहीतासन एवेदं चिन्तयामास चेतसा ॥१२५
अस्मिन्नेव स्थितस्तीर्थेऽक्रूरो वैकुण्ठ मैक्षत ।
अत्रै वैक्षन्त गोलोकं सर्वे च व्रजवासिनः ॥१२६

इति ध्यात्वा प्रभुस्तस्मिन् सलिले देह मुत्क्षिपन् ।
अवतस्थे निमग्नः सन् जलस्याभ्यन्तरे चिरम् ॥१२७

कृष्णदासे तथा दृष्ट्वा क्रन्दत्युच्चैः स्वरेण च ।
प्रभुमुत्थापयामास भट्टाचार्यस्त्वरान्वितः ॥१२८

भट्टाचार्यस्ततस्तञ्च ब्राह्मणं निभृतं नयन् ।
इत्थमालोचयामास युक्तियुक्तं परस्परम् ॥१२९

यदद्याहं स्थितोऽत्रैव तदुत्थापितवान् प्रभुम् ।
मज्जेद् वृन्दावने क्वापि प्रभुश्चेत् कस्तमुद्धरेत् ॥१३०

सर्वदा जनसंघट्टो व्यस्तता च निमन्त्रणे ।
प्रभो र्निरन्तरावेशो न सुष्ठु प्रतिभाति मे ॥१३१

यदि वृन्दावनात् क्वापि प्रभुरन्यत्र ह्रियते ।
भविष्यति तदा भद्रं कया युक्त्या तु तद्भवेत् ॥१३२

विप्रेणोक्तं प्रयागं चेन्नेष्यामः श्रीमहाप्रभुम् ।
गङ्गातीरपथेनैव यान्तो लप्स्यामहे सुखम् ॥१३३

सोरोक्षेत्रं पुरो गत्वा जाह्नवी मवगाह्य च ।
प्रभुमादाय यास्यामो वयं तेनैव वर्त्मना ॥१३४

माघमासः समासन्नो गच्छामो यदि साम्प्रतम् ।
प्रयागे माकरस्नानं प्राप्नुमस्तत् कियच्चिरम् ॥१३५

एतन्ममात्मनो दुःखं किञ्चिदावेदयामि ते ।
प्रयागं नय माकर्य्यां संक्रान्त्यामिति सूचयन् ॥१३६

गङ्गातीरपथे भावि सुखं विज्ञापय प्रभुम् ।
भट्टाचार्यस्तदोपेत्य प्रभुमित्थं न्यवेदयत् ॥१३७

जनाना मिह संघट्टं न सोढुं शक्तिरस्ति मे ।
अहम्पूर्विकयैतेषामुत्पातस्ते निमन्त्रणे ॥१३८

प्रातरेव समागत्य त्वां नेक्षन्ते जना यदा ।
त्वाम प्राप्य तदैवैते मस्तकं चर्वयन्ति मे ॥१३९

गङ्गातीरपथेनातो यामि चेत्तल्लभे सुखम् ।
गङ्गायां माकरस्नानं भवेन्मे गच्छतोऽधुना ॥१४०
उद्विजन्ते मम प्राणा न सोढुं शक्यते मया ।
तथैव शिरसा धार्य्यं यथाज्ञापयति प्रभुः ॥१४१
अथ बृन्दावनं त्यक्तुमनाकाङ्क्षन्नपि प्रभुः ।
भक्तेच्छापूरणायैव प्रोक्तवान् मधुरं वचः ॥१४२
मां वृन्दावन मानीय तत्त्वं दर्शितवानसि ।
ऋणमेतन्न शक्नोमि जातु शोधयितुं पुनः ॥१४३
अतो यथाभिलाषस्ते तथैव विदधाम्यहम् ।
तत्रैवाहं प्रयास्यामि यत्र मां नेतुमिच्छसि ॥१४४
अथ प्रातः समुत्थाय कृतस्नानो महाप्रभुः ।
बृन्दावनं त्यजामीति प्रेमाविष्टमना अभूत् ॥१४५
नासीद् वाह्यविकारोऽस्य प्रेमाविष्टन्तु मानसम् ।
तत् पश्यन्नवदद् भट्टाचार्य्यो गच्छ महावनम् ॥१४६
इत्युक्त्वा नावमारुह्य प्रभुं तत्रोपवेश्य च ।
तमुत्तार्य्य च पारेऽसौ भट्टाचार्यः सहानयत् ॥१४७
प्रेमिकः कृष्णदासोऽसौ तथासौ ब्राह्मणः पुनः ।
गङ्गापथेन यात्रायामभिज्ञौ तौ बभूवतुः ॥१४८
प्रभुर्गच्छन् गतिश्रान्तिं सर्वेषा मवलोकयन् ।
पथि वृक्षतले सर्वानादाय क्वाप्युपाविशत् ॥१४९
तं वृक्षं निकषा धेनूश्चरन्तीर्भुयसीः प्रभुः ।
अवलोक्य बभूवातिसमुल्लसितमानसः ॥१५०
सहसा कोऽपि गोपालस्तदा वेणु मवादयत् ।
शृण्वतस्तन्महान् प्रेमावेश आसीन्महाप्रभोः ॥१५१
ततः संलुप्तसंज्ञस्य पतितस्य प्रभोरभूत् ।
वदनं निःस्रवत्-फेणं रुद्धश्वासा च नासिका ॥१५२

अस्मिन्नवसरे म्लेच्छास्तत्राश्वारोहिणो दश ।
समुपेत्यैव पाठाना अश्वपृष्ठादवातरन् ॥१५३
तदवस्थं प्रभुं दृष्ट्वा मनसा ते व्यतर्कयन् ।
अस्य सन्न्यासिनो नून मासीद् भूयिष्ठकाञ्चनम् ॥१५४
धूस्तूरं भोजयित्वैनं पञ्च पाटच्चरा इमे ।
अपहृत्य धनं सर्वं हत्वा चापातयन्निति ॥१५५
ततः पञ्च जनान् बद्ध्वा पाठानेषूद्यतेषु च ।
छेत्तुं खड़्गेन गौड़ीयाः सर्व एव चकम्पिरे ॥१५६
अत्यन्तं निर्भयः कृष्णदासो राजपुतोऽभवत् ।
ब्राह्मणः सोऽपि निर्भीको द्रढ़िष्ठो वचनेन च ॥१५७
विप्रः प्रोवाच पाठान, म्लेच्छराजाय ते शपे ।
एहि त्वं निकषाध्यक्षं नयामि त्वां हि साम्प्रतम् ॥१५८
गुरुर्ममैष सन्न्यासी माथुरो ब्राह्मणोऽप्यहम् ।
पुरः पश्चाच्च सम्राजो वर्त्तन्ते मे शतं जनाः ॥१५९
अयं रोगेण सन्न्यासी मूर्च्छितो भवति क्वचित् ।
इदानीमेव चैतन्यं लप्स्यते संविदायुतः ॥१६०
बद्ध्वास्मान् स्थापयित्मा च सन्निधावुपविश्यताम् ।
इमं पृष्ट्वाखिलं ज्ञात्वा वधोऽस्माकं विधीयताम् ॥१६१
पाठानः प्रोक्तवान् विप्रं पश्चिमावासिनौ युवाम् ।
प्रवञ्चकास्तु गौड़ीयाः प्रकम्पन्त इमे त्रयः ॥१६२
कृष्णदासस्तमूचेऽथ ग्रामेऽस्मिन्नस्ति मे गृहम् ।
तौरुष्काणां शतं द्वे चाग्नेयास्त्राणां शते इह ॥१६३
यदि तानाह्वयाम्युच्चैस्ते तदायान्ति तत्क्षणात् ।
युष्मान् सर्वान्निहत्यामी हरन्त्यश्वादिकान् बलात् ॥१६४
वञ्चका नैव गौड़ीया यूयमेव प्रवञ्चकाः ।
चोरयित्वा धनं तीर्थवासिनो यज्जिघांसथ ॥१६५

इत्याकर्ण्यैव पाठानाः प्रापुः सङ्कोच मन्तरे ।
काले तत्रैव चैतन्यं पुनः प्राप महाप्रभुः ॥१६६
उत्तस्थौ च सहुङ्कारं हरिर्हरिरिति ब्रुवन् ।
प्रेमावेशान्ननर्त्तासाबूर्द्ध्वं वाहु र्महाप्रभुः ॥१६७
प्रेमावेशेन चित्कारः प्रभुणा च कृतो यदा ।
स शेलः प्रतिभातिस्म पाठानानां तदा हृदि ॥१६८
ततो म्लेच्छा भयं प्राप्य मुमुचुः पञ्च तान् जनान् ।
प्रभु र्निजगणानां तद् दृष्टवान्नैव बन्धनम् ॥१६९
भट्टाचार्य्यस्तदोपेत्य प्रभुं गृह्णन्न्यषादयत् ।
प्रभु र्म्लेच्छगणं दृष्ट्वा प्राप्तवान् वाह्यचेतनाम् ॥१७०
ततो म्लेच्छास्तमभ्येत्य प्रभोः पादौ ववन्दिरे ।
कथयामासु रस्याग्रे पञ्चैते हि प्रवञ्चकाः ॥१७१
समवेता इमे पञ्च धूस्तूरं त्वा मभोजयन् ।
सोन्मादञ्च विधाय त्वाममुष्णंश्च धनानि ते ॥१७२
प्रभुः प्रत्युक्तवान्नैते वञ्चकाः सङ्गिनस्तु मे ।
मम सन्नयासिनो भिक्षोर्धनं नास्त्येव किञ्चन ॥१७३
अपस्माररुजा जातु भवाम्यहमचेतनः ।
एते सानुग्रहं पञ्चजना मां पालयन्ति तु ॥१७४
तेषु म्लेच्छेष्वभूदेकतमो गाम्भीर्य्यवानति ।
वसानः कृष्णवासांसि पीर इत्युदितो जनैः ॥१७५
अवलोक्य प्रभुं सोऽपि बभूवार्द्रमनास्तदा ।
स ब्रह्म स्थापयामास निर्विशेषं स्वशास्त्रतः ॥१७६
अद्वयब्रह्मवादो हि तेन संस्थापितो यदा ।
युक्त्या तस्यैव शास्त्राणां प्रभुणा खण्डितस्तदा ॥१७७
ततो यद् यदुवाचासौ प्रभुस्तत्तद खण्डयत् ।
निरुत्तराननः सोऽथ महतीं स्तब्धतामगात् ॥१७८

प्रभुः प्रोवाच शास्त्रैस्ते संस्थाप्य निर्विशेषकम् ।
अन्ते तत् खण्डयित्वा च स्थापितं सविशेषकम् ॥१७६
एक एवेश्वरोऽस्तीति शास्त्राण्यन्ते ब्रुवन्ति ते ।
ऐश्वर्यैं र्निखिलैः पूर्णः सोऽयं श्यामकलेवरः ॥१८०
पूर्णब्रह्मस्वरूपोऽसौ सच्चिदानन्दविग्रहः ।
सर्वात्मा नित्यसर्वज्ञः सर्वेषामादिरेव सः ॥१८१
सृष्टिस्थितिविनाशाश्च भवन्ति तत एव हि ।
जगतां स्थूलसूक्ष्माणां स एवैकः समाश्रयः ॥१८२
सर्वश्रेष्ठश्च सर्वेषां पूज्यः कारणकारणम् ।
तत्र भक्त्यैव जीवानां भवेत् संसारतारणम् ॥१८३
तस्य सेवां विना जीवः संसारान्नैव मुच्यते ।
सारोहि पुरुषार्थानां प्रीतिस्तस्य पदाम्बुजे ॥१८४
आनन्दा ये च मोक्षाद्या स्ते तस्याः कण एवहि ।
पूर्णानन्दस्य सम्प्राप्तिस्तस्य श्रीपादसेबनम् ॥२८५
कर्मज्ञानञ्च योगञ्च स्थापयित्वाग्रतस्ततः ।
खण्डयित्वा च तत् सर्वं स्थापितञ्चेशसेवनम् ॥१८६
पण्डितास्तव शास्त्राणां न शास्त्रज्ञानिनोऽभवन् ।
यत् पूर्वापरयो र्विध्योरपरो बलबत्तरः ॥१८७
बिचारं निजशास्त्राणां कृत्वा त्वं पश्य सम्प्रति ।
चरमे किं विनिर्णीय लिखितं किं प्रकाशते ॥१८८
म्लेच्छेनोक्तं यथात्थ त्वं तथा सत्यं भवेद् ध्रुवम् ।
शास्त्रेषु लिखितं कोऽपि न बोद्धुं भवति क्षमः ॥१८९
ईशस्य निर्विशेषत्वं सर्वै र्व्याख्यायते जनैः ।
साकारो भगवान् सेव्य इति ज्ञानं न कस्यचित् ॥१९०
स तावद् भगवानीशस्त्व मेव स्वयमीश्वरः ।
अयोग्यः पामरश्चाहं करुणां कुरु मे प्रभो ॥१९१

सुचिरं म्लेच्छशास्त्राणि बहुधाधीतवानपि ।
नाहं शक्नोमि निश्चेतुं साध्य-साधन-वस्तुनी ॥१९२
त्वामालोकयतो जिह्वा कृष्णनाम ब्रवीति मे ।
अभिमानश्च नष्टो मेऽत्यन्तं ज्ञानीति जानतः ॥१९३
कृपया ब्रूहि मे साध्यं साधनञ्च क्रमात् प्रभो ।
इत्युक्त्वैव पपातासौ पादयोः श्रीमहाप्रभोः ॥१९४
अथोचे प्रभु रुत्तिष्ठ गृह्णतः कृष्णनाम ते ।
कोटिजन्मकृतं पापं विनष्टं पूतवानसि ॥१९५
ब्रूहि कृष्णेति कृष्णेति ब्रूहीत्यादिशति प्रभौ ।
प्रेमावेशोहि सर्वेषां कृष्णेति ब्रुवतामभूत् ॥१९६
तस्याथ कृतवान्नाम रामदास इति प्रभुः ।
अपरः कोऽपि पाठानो विजुलीखाननामकः ॥१९७
कुमारो म्लेच्छराजस्य बभूवाल्पवयाः स च ।
पाठाना रामदासाद्या अभवंस्तस्य किङ्कराः ॥१९८
कृष्णे त्युक्त्वापतत् सोऽपि तदानीं प्रभुपादयोः ।
प्रभुः स्वचरणौ तस्य शिरसि न्यदधात्ततः ॥१९९
दयमानोऽथ तान् सर्वान् प्रस्थानं कृतवान् प्रभुः ।
ते सर्वे किल पाठाना जाता वैरागिणस्ततः ॥२००
लब्धवन्तश्च पाठानवैष्णवा इति नाम ते ।
प्रभोः कीर्त्तिं प्रगायन्तः समन्तात् परिबभ्रमुः ॥२०१
स तावद् विजुलीखानो महाभागवतोऽभवत् ।
तस्य सर्वेषु तीर्थेषु महत्त्वं परमं बभौ ॥२०२
इत्थं श्रीकृष्णचैतन्यो विलासान् कृतवान् प्रभुः ।
पश्चिमं देशमागत्य यवनान् धन्यतां नयन् ॥२०३
सोरोक्षेत्रमथागत्य जाह्नवी मवगाह्य च ।
गङ्गातीरपथेनासौ प्रयागं प्रति यातवान् ॥२०४

स विप्रः कृष्णदासश्च गृहं प्रति निवृत्तये ।
आज्ञप्तौ प्रभुणा बद्धाञ्जली एवं तमूचतुः ॥२०५
आप्रयागमुभावावां गमिष्यावस्त्वया सह ।
तव श्रीपादसंसर्गं कुत्र लप्स्यावहे पुनः ॥२०६
म्लेच्छदेशेऽत्र चेत् कोऽपि क्वचित् कुर्य्यादुपद्रवम् ।
वाचं वक्तुं न जानाति भट्टाचार्य्यो बुधोऽपि सन् ॥२०७
इति तद्वाक्य माकर्ण्य स्मितं चक्रे महाप्रभुः ।
ततस्तमनुगच्छन्तौ जग्मतुस्तावुभावपि ॥२०८
ये ये जनाः पथा यान्तं ददृशुः श्रीमहाप्रभुम् ।
उच्चैः सङ्कीर्त्तनं ते ते प्रेम्णा मत्ता अकुर्वत ॥२०९
तैः सार्द्धमपरे लोका अपरैश्चान्य एव ये ।
कृतास्ते वैष्णवा एवं-देशान् ग्रामांश्च सर्वतः ॥२१०
दाक्षिणात्यं प्रभुर्गच्छन् शक्तिं प्राकाशयद् यथा ।
तथा पश्चिमदेशं सोऽप्लावयत् प्रेमवन्यया ॥२११
एवमेव पथा गच्छन् प्रयागं प्रभुरागतः ।
त्रिवेण्यां स दशाहानि माकरस्नान माचरत् ॥२१२
श्रीबृन्दावनयात्रायामनन्तं चरितं प्रभोः ।
सहस्रवदनोऽप्यस्य सीमां नाप्नोति कर्हिचित् ॥२१३
तत् सर्वं क्षुद्रजीवः सन् कोऽस्ति वर्णयितुं क्षमः ।
ततो दिग्दर्शनन्यायात्तत् सूत्रं रचितं मया ॥२१४
अलौकिक्यः प्रभोर्लीला अलौकिक्यश्च रीतयः ।
न प्रतीता भवेयुस्ता भाग्यहीनैः श्रुता अपि ॥२१५
आद्यन्तावधि जानीहि प्रभोर्लीलामलौकिकीम् ।
श्रद्धया कर्णयेमाञ्च सत्यामेनाञ्च मानय ॥२१६
योहि तर्कं करोत्यत्र मूर्खराजः स एव हि ।
स वज्रं पातयेन्नूनमात्मनैव स्वमूर्द्धनि ॥२१७

चैतन्यचरितं ह्येतदमृताम्बुनिधिः खलु ।
मुदा संप्लाव्यते विश्वं यस्यैकेनापि विन्दुना ॥२१८
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२१९

इति श्रीचैतन्यचरितामृते मध्यखण्डे बृन्दावनदर्शनविलासो नामाष्टादशः परिच्छेदः ।

—०—

मध्यलीलायामूनविंशः परिच्छेदः

"वृन्दावनीयां रसकेलिवार्त्तां कालेन लुप्तां निजशक्तिमुत्कः ।
सञ्चार्य्य रूपे व्यतनोत् पुनः स प्रभु र्विधौ प्रागिव लोकसृष्टेः ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्यसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
रामकेल्यभिधे ग्रामे तदा रूपसनातनौ ।
मिलित्वा प्रभुणा सार्द्धं जग्मतुर्निजमालयम् ॥२
उपायं विषयांस्त्यक्तुं तावुद्भाव्य सहोदरौ ।
ब्राह्मणौ द्वाववृण्वातां दत्त्वा ताभ्यां धनं बहु ॥३
ताभ्यां चैतन्यपादाब्ज मचिराल्लब्धु मिच्छया ।
कारितौ कृष्णमन्त्रेन तौ पुरश्चरणद्वयम् ॥४
ततः श्रीरूपगोस्वामी नावमापूरयन्निजाम् ।
आनिनाय प्रभूतानि धनानि स्वं निकेतनम् ॥५
द्विजेभ्यो वैष्णवेभ्यश्च तेषामर्द्धं समर्पयन् ।
प्रददौ तच्चतुर्थांशं कुटुम्बभरणाय सः ॥६
तेन शेषश्चतुर्थोऽंशो दण्डबन्धनमुक्तये ।
साधुसाधुषु विप्रेषु न्यासः संस्थापितः पुनः ॥७

गौड़े दशसहस्राणि मुद्रा याः कृतसञ्चयाः ।
सनातनो वणिग्गेहन्यस्तास्ता व्ययते स्म च ॥८
श्रीरूपः श्रुतवान्नीलगिरिं प्राप्तं प्रभुं यदा ।
यास्यन्तञ्च पुनर्वन्यैर्मार्गैं वृन्दावनं ततः ॥९
तदासौ प्रेरयामास दूतौ द्वौ नीलपर्वतम् ।
प्रभौ प्रस्थातु मारब्धे श्रीमद्वृन्दावनं प्रति ॥१०
युवाभ्यां त्वरयोपेत्य सा वार्त्ता मे निवेद्यताम् ।
श्रुत्वा तदनुरूपं मे करणीयं भवेदिति ॥११
श्रीसनातनगोस्वामी मनसा ध्यातवानिह ।
मयि प्रीणाति राजेति सुदृढ़ं मम बन्धनम् ॥१२
कथञ्चिन्म्लेच्छभूपोऽसौ मह्यं चेज्जातु कुप्यति ।
परित्राणं तदा मे स्यादिति निश्चितवानसौ ॥१३
अस्वास्थ्यच्छलमाश्रित्य स्ववेश्मन्येव स स्थितः ।
राजद्वार मपीयाय राजकर्मापरित्यजन् ॥१४
अपरे लुब्धकायस्था राजकर्माण्यकुर्वत ।
स तु व्यचिन्तयच्छास्त्राण्यधिष्ठाय निजालयम् ॥१५
विंशत्या त्रिंशता वासौ भट्टाचार्य्यैः सुपण्डितैः ।
सदस्युपविशन् भागवतमासीद्विचारयन् ॥१६
अन्येद्यु गौड़राजोऽसौ जनेनैकेन संयुतः ।
सहसाभ्याजगामाथ तस्य गोस्वामिनः सभाम् ॥१७
दृष्ट्वा तं म्लेच्छभूपालं समुत्थाय ससम्भ्रमम् ।
उपवेशितवन्तस्तमासने सर्व एव ते ॥१८
भूपेनोक्तं समीपं ते वैद्यं प्रेषितवानहम् ।
वैद्येनोक्तं तव व्याधिर्नास्ति त्वं स्वास्थ्यवानिति ॥१९
यानि कान्यपि कर्माणि त्वत्सहायानि तानि मे ।
त्वं तु तानि परित्यज्य स्वगृहे स्थितवानसि ॥२०

यावदासीच्च कृत्यं मे त्वया सर्वं विनाशितम् ।
हृदये किं तवास्तीति ब्रूहि मे सन्निधाविति ॥२१
ऊचे सनाततः कृत्यं मया नैव भविष्यति ।
अपरं कञ्चिदालम्ब्य तत् समाधीयतामिति ॥२२
अथ राजा परिक्रुध्यन् पुनरेव मवोचत ।
क्रियते तस्कराचारो ज्यायसा श्यालकेन ते ॥२३
ध्वंसिता 'चाकला' सर्वा निघ्नता जीवतः पशून् ।
इतस्त्वं सर्वकर्माणि मम नाशितवानिति ॥२४
उक्तं सनातनेन त्वं गौड़ेशोऽसि स्वयं प्रभुः ।
यो यः करोति यं दोषं तस्मै तत् फलमर्पय ॥२५
इत्याकर्ण्य स गौड़ेश उत्थाय स्वगृहं गतः ।
तत्पलायनमाशङ्क्य तं बबन्ध सनातनम् ॥२६
ततो भूयोऽपि गौड़ेश ओड्रान् जेतुं समुद्यतः ।
गत्वा सनातनं प्रोचे गच्छ त्वञ्च मया सह ॥२७
प्रत्युक्तं तेन देवानामपकर्त्तुं गमिष्यसि ।
त्वया सार्द्धमतो यातुं मम शक्ति र्न विद्यते ॥२८
अथासौ बन्धनागारे तं निक्षिप्य नृपोऽगमत् ।
इतो नीलाचलाद्वृन्दावनाय प्रस्थितः प्रभुः ॥२९
ततो दूतौ च तौ रूपं निकषा समुपस्थितौ ।
प्रभुः प्रस्थितवान् वृन्दावनायेत्यूचतुश्च तम् ॥३०
श्रुत्वा रूपेण विज्ञप्तो लेखद्वारा सनातनः ।
प्रस्थितः प्रभुचैतन्यस्वामी बृन्दावनं प्रति ॥३१
आवां द्वौ तमुपस्थातुं प्रस्थितौ च सहोदरौ ।
यथा कथमपि त्वन्तु समागच्छ द्रुतं ततः ॥३२
मुद्रा दशसहस्राणि सन्ति तत्र वणिग्गृहे ।
दत्त्वा तानि त्वया कृत्वा शीघ्र मात्मविमोचनम् ॥३३

कथमप्याशु तद्वृन्दावनमागम्यतामिति ।
भ्रातरौ तौ लिखित्वैवं यातौ वृन्दावनं प्रति ॥३४
मल्लिकोऽनुपमो योऽसौ नाम्ना श्रीवल्लभोऽभवत् ।
रूपगोस्वामिनो भ्रातानुजः परमवैष्णवः ॥३५
तमादाय समं रूपं प्रयागे समुपस्थितम् ।
आकर्ण्य परमानन्दं लेभे तत्र महाप्रभुः ॥३६
श्रीविन्दुमाधवं द्रष्टुं प्रस्थिते श्रीमहाप्रभौ ।
जना लक्षश आयातास्तत्सङ्गममभीप्सवः ॥३७
चक्रन्दु र्जहसुः केचिज्जगुः केचित् सनर्त्तनम् ।
वदन्तः कृष्ण कृष्णेति केचिद्विलुलुठु र्भुवि ॥३८
यं निमज्जयितुं नालं जाह्नवीयमुने उभे ।
प्रभुणा मज्जितः सोऽयं प्रयागः प्रेमवन्यया ॥३९
दृष्ट्वा तं जनसंघट्टं भ्रातरौ निर्जने स्थितौ ।
प्रभो रजायतावेशः श्रीमन्माधवदर्शनात् ॥४०
प्रेमावेशान्ननर्त्तासौ प्रभुः कुर्वन् हरिध्वनिम् ।
ब्रूत हरिहरीत्यूचे वाहुयुग्मं समुत्क्षिपन् ॥४१
महिमानं प्रभोर्दृष्ट्वा जनाः सर्वे चमत्कृताः ।
प्रयागे या प्रभो र्लीला सा वक्तुं नैव शक्यते ॥४२
दाक्षिणात्येन विप्रेण येनासीत् संस्तवः प्रभोः ।
विप्रोऽसौ प्रभु मामन्त्र्य नीतवान्निज मालयम् ॥४३
ततो विप्रालयं गत्वा समासीने रहः प्रभौ ।
श्रीरूपोवल्लभश्चोभौ तत्रेत्य तमुपस्थितौ ॥४४
तृणगुच्छद्वयं दन्तैर्गृह्णन्तौ तावुभावपि ।
पेततु र्दण्डवद् भूमौ दूराद्दृष्ट्वा महाप्रभुम् ॥४५
पठन्तौ विविधान् श्लोकानुत्थितौ पतितौ पुनः ।
प्रेमावेशवशावास्ता मुभौ दृष्ट्वा महाप्रभुम् ॥४६

प्रभुः श्रीरूपमालोक्य सुप्रसन्नेन चेतसा ।
उत्तिष्ठोत्तिष्ठ रूप त्व मेह्येहीत्य ब्रवीद् वचः ॥४७
शक्या वर्णयितुं कृष्णकृपा नैव कथञ्चन ।
प्रसह्याहृतवत्येषा युष्मान् विषयकूपतः ॥४८

"तथाहि हरिभक्तिविलासस्य दशमविलासे एकनवति-तमः श्लोकः—

न मे भक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततोग्राह्यं स च पूज्यो यथाह्यहम् ॥२॥"
इति श्लोकं पठित्वैव तावालिङ्ग्य महाप्रभुः ।
निदधे चरणौ सानुग्रहं मूर्द्ध्नि तयो र्द्वयोः ॥४९
प्रभोर्लब्धानुकम्पौ तौ कृताञ्जलिपुटावुभौ ।
विनयावनतौ दीना वित्थं तुष्टुवतुः प्रभुम् ॥५०

"तथाहि रूपगोस्वामिवाक्यम्—

नमो महावदान्याय कृष्णप्रेमप्रदाय च ।
कृष्णाय कृष्णचैतन्यनाम्ने गौरत्विषे नमः ॥३॥"

"तथाहि गोबिन्दलीलामृते प्रथमसर्गे द्वितीयश्लोके ग्रन्थकारवाक्यम्—

योऽज्ञानमत्तं भुवनं दयालुरुल्लाघयन्नप्यकरोत् प्रमत्तम् ।
स्वप्रेमसम्पत् सुधयाद्भुतं तं श्रीकृष्णचैतन्यमहं प्रपद्ये ॥४॥"

ततो महाप्रभुस्तौ द्वौ सन्निधावुपवेशयन् ।
सनातनस्य बृत्तान्तः कथ्यता मिति पृष्टवान् ॥५१
रूपः प्रत्युक्तवान् सोऽयं वन्दी राजगृहेऽधुना ।
यदि त्वमुद्धरे रेनं तदोद्धारं लभेत सः ॥५२
प्रभुणोक्तं विमुक्तोऽसौ वर्त्ततेऽद्य सनातनः ।
सङ्गमोऽस्याचिरादेव मया साकं भविष्यति ॥५३

अथ मध्याह्नभिक्षार्थ माह्वयद्ब्राह्मणः प्रभुम् ।
रूपगोस्वामी तत्रैव तस्मिन्नहनि संस्थितः ॥५४
उभौ निमन्त्रितौ भट्टाचार्य्येणैतौ सहोदरौ ।
प्रभोरुच्छिष्टपात्रान्नप्रसादं प्राप्नुतां तदा ॥५५
वासगेहं प्रभोरासीत्त्रिवेण्या उपरिस्थले ।
भ्रातरौ चक्रतु स्तौ च वसतिं प्रभुसन्निधौ ॥५६
आउलि ग्राममध्यास्त भट्टः श्रीवल्लभस्तदा ।
श्रीमहाप्रभु रायात इति श्रुत्वा स आगतः ॥५७
दण्डवत् प्रणमन्तं तमाशिश्लेष महाप्रभुः ।
कियच्चिर मभूत् कृष्णकथान्योन्यं तयोर्द्वयोः ॥५८
कृष्णाख्यानप्रसङ्गेन प्रेमोद्वेलमभूत् प्रभोः ।
दृष्ट्वा भट्टस्य सङ्कोचं स तन्निह्नोतु मैहत ॥५९
अन्तः प्रेम-समुच्छ्वासः संवरीतुं न शक्यते ।
इति पश्यन्नभूद्भट्टवल्लभो विस्मयाकुलः ॥६०
तत आमन्त्रितो भट्टवल्लभेन महाप्रभुः ।
तेन सङ्गमयामास तावुभौ च सहोदरौ ॥६१
अथ तौ भ्रातरौ दूरात् पतितौ भूतले पुनः ।
दण्ठवत् प्रणतौ भट्टमतिदीनेन चेतसा ॥६२
ऊभौ दूरं पलायेतां दृष्ट्वा भट्टमुपागतम् ।
ब्रुवन्तौ पामरावावां नैव स्पृश्यावहाविति ॥६३
भट्टोऽभूद्विस्मयाविष्टो हृष्टश्चाभूत् प्रभोर्मनः ।
ततो भट्टं प्रभुः प्रोचे सर्वं परिचयं तयोः ॥६४
अतिहीनाविमौ जात्या भवान्नैव स्पृशत्विमौ ।
यतः कौलीन्यवान् विद्वान् याज्ञिको वैदिको भवान् ॥६५
आकर्ण्यते मया शश्वत् कृष्णनामानयोर्मुखात् ।
भट्टेनोक्तं प्रभो किञ्चिदिङ्गितं ज्ञायते मया ॥६६

अनयोराननने कृष्णनाम नृत्यति सर्वदा ।
इमौ द्वौ नाधमौ स्यातां किन्तु सर्वोत्तमाविति ॥६७

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे त्रयस्त्रिंशाध्याये सप्तमः श्लोकः—

अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम्।
तेपु स्तपस्ते जुहुवुः सस्नुरार्य्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥५॥"

इति श्रुत्वा प्रभु स्तस्य वचनानि बहुस्तुवन् ।
प्रेमावेशादिमं श्लोकं पठितुञ्चोपचक्रमे ॥६८

"तथाहि हरिभक्तिसुधोदये तृतीयसर्गे द्वादशः श्लोकः—

शुचिः सद्भक्तिदीप्ताग्नि-दग्ध-दुर्जातिकल्मषः ।
श्वपाकोऽपि बुधैःश्लाघ्यो न वेदज्ञोऽपि नास्तिकः ॥६॥"

"तथाहि तत्रैव—

भगवद्भक्तिहीनस्य जातिः शास्त्रं जपस्तपः ।
अप्राणस्येव देहस्य मण्डनं लोकरञ्जनम् ॥७॥"

प्रेमावेशं स्वभावञ्च प्रभावातिशयं प्रभोः ।
तथा परमसौन्दर्य्यं दृष्ट्वा भट्टो विसिस्मिये ॥६९

नावमारोप्य भट्टोऽथ स्वगणै रन्वितं प्रभुम् ।
भिक्षां दातुमनाः शीघ्रं गच्छन्नासीन्निजालयम् ॥७०

चिक्कणश्यामलं पश्यन् यमुनासलिलं प्रभुः ।
नावा गच्छन्नभूत् कृष्णप्रेमावेशेन विह्वलः ॥७१

सहुङ्कारं स चिक्षेप स्वतनुं यमुनाजले ।
तथालोक्य प्रभुं सर्वे हृत्कम्पं ते प्रपेदिरे ॥७२

ससम्भ्रमं गृहीत्वा तैः प्रभुरुत्थापितः पुनः ।
बहु नर्त्तितु मारेभे तरण्या उपरि प्रभुः ॥७३

पारिप्लाव्य गता नौका भारेण महता प्रभोः ।
उच्छलद्वारिभिः पूर्णा मज्जितुञ्चोपचक्रमे ॥७४

भट्टस्याग्रे प्रभु धैर्य-समाक्रान्त-मना अपि ।
संवरीतुं न शक्तोऽभूत् प्रेमदुर्वारमुद्भटम् ॥७५
विचार्य्य देशपात्राणि धैर्य्यं प्राप्ते महाप्रभौ ।
आउलिग्रामतीर्थं सा तरणी समुपागता ॥७६
आमध्याह्नं स्थितो भट्टः शङ्कमानोऽन्तिके प्रभोः ।
ततस्तं सममादाय निजागारं समानयत् ॥७७
अथ दिव्यासनं तस्मै ददौ सानन्दचेतसा ।
स्वयं प्रक्षालयामास भट्टः पादौ महाप्रभोः ॥७८
तज्जलं सहवंशीयै गृहीत्वा मस्तकेन सः ।
कौपीनञ्च वहिर्वासः प्रभुणावासयन्नवम् ॥७९
कृत्वा तस्य महापूजां गन्धपुष्पादिवस्तुभिः ।
अकारयत् ससम्मानं भट्टाचार्य्येण रन्धनम् ॥८०
भिक्षान्नं भोजयित्वासौ प्रभुं सस्नेहयत्नतः ।
रूपगोस्वामिनं सार्द्धं सोदरेणाप्यभोजयत् ॥८१
रूपाय प्रभुशेषान्ने भट्टाचार्य्येण दापिते ।
अवशिष्टं प्रसादान्नं कृष्णदासश्च लब्धवान् ॥८२
अशाययत् प्रभुं तस्मै मुखवासन मर्पयन् ।
भट्टः संवाहयामास स्वयं श्रीचरणौ प्रभोः ॥८३
भोजनस्य कृते सोऽयं प्रेरितः प्रभुणा ततः ।
भक्षयित्वा पुनः पादौ समुपेतो महाप्रभोः ॥८४
तदैव रघुपत्याख्य उपाध्यायः समाययौ ।
स महावैष्णवः साधु स्तिरोहित्यश्च पण्डितः ॥८५
आगत्यासौ ववन्दे श्रीपादौ श्रीमन्महाप्रभोः ।
तमुवाच प्रभुस्तावत् कृष्णे ते मतिरस्त्विति ॥८६
आकर्णयन्नुपाध्यायोऽभवत् सानन्दमानसः ।
श्रीकृष्णं वर्णयेति श्रीप्रभुणासौ प्रचोदितः ॥८७

तेन स्वरचिते कृष्णलीलाश्लोकेऽथ वाचिते ।
प्रेमावेशो महानासीच्छ्रृण्वतस्तं महाप्रभोः ॥८८

"तथाहि पद्यावल्यां श्रीनन्दप्रणामे प्रथमाङ्कधृतरघुपत्यु-
पाध्याय-श्लोकः—

श्रुतिमपरे स्मृतिमपरे भारतमन्ये भजन्तु भवभीताः ।
अहमिह नन्दं वन्दे यस्यालिन्दे परं ब्रह्म ॥८॥"

ततो नमश्चकारोपाध्यायो रघुपतिः प्रभुम् ।
अग्रे ब्रूहीति विज्ञप्तस्तेन सोऽकथयत् पुनः ॥८६

"तथाहि पद्यावल्याम् एकनवतितमाङ्कधृतरघुपत्युपाध्याय-
श्लोकः—

कं प्रति कथयितुमीशे कोवा प्रतीति मायातु ।
गोपति-तनया-कुञ्जे गोपवधूटीविटं ब्रह्म ॥६॥"

इत्याकर्ण्य महाप्रेमावेशाधीनोऽभवत् प्रभुः ।
श्रीरघुपत्युपाध्यायो भूयस्तं प्रणनाम च ॥६०
ब्रूहीति प्रभुणोक्तोऽसौ कृष्णलीलामवाचयत् ।
प्रेमावेशात् प्रभो र्देहमनसी अवसेदतुः ॥६१
तथा प्रेमाणमालोच्योपाध्यायो विस्मयाकुलः ।
नायं नरस्तु कृष्णोऽयमित्यसौ निरधारयत् ॥६२
प्रभुणोक्त मुपाध्याय कं श्रेष्ठं मन्यते भवान् ।
श्याममेव परं रूपमित्युपाध्याय उक्तवान् ॥६३
निवासः श्यामभक्तानां श्रेष्ठः को मन्यते त्वया ।
पुरी मधुपुरी हीति तमुपाध्याय उक्तवान् ॥६४
बाल्य-पौगण्ड-कैशोरवयसां श्रेष्ठमेव किम् ।
वयः कैशोरकं ध्येयमिति प्रत्यवदत् स तम् ॥६५
रसानां मन्यसे श्रेष्ठं कमिति प्रभुणोदितः ।
प्रत्यवादीत् स इत्थं यदाद्य एव परोरसः ॥६६

प्रभुः प्रोचे परं तत्त्वं त्वं मां शिक्षितवानसि ।
इत्युक्त्वैव वचः श्लोकमपठच्च सगद्गदम् ॥९७

"तथाहि पद्यावल्यां त्रयःसप्ततितमाङ्कधृतो माधवेन्द्र-पुरीकृतः श्लोकः—

श्याममेव परं रूपं पुरी मधुपुरी वरा ।
वयः कैशोरकं ध्येयमाद्य एव परो रसः ॥१०॥"

तमाश्लिष्यत् प्रभुर्गाढ़ं प्रेमावेशवशस्ततः ।
प्रेम्णा सोऽपि महामत्त उपाध्यायो ननर्त्त च ॥९८
तद्दृष्ट्वा वल्लभो भट्टो विस्मयं परमं गतः ।
स्वपुत्रद्वयमानीय पतितः पादयोः प्रभोः ॥९९
आजग्मुश्च प्रभुं द्रष्टुं जनास्तद्ग्रामवासिनः ।
बभूवुः कृष्णभक्ताश्च सर्वे ते दर्शनात् प्रभोः ॥१००
निमन्त्रयितुमायातास्तत्रत्या ये द्विजाः प्रभुम् ।
एवं वल्लभभट्टेन तत्क्षणात्ते निवारिताः ॥१०१
अपतद् यमुनामध्ये प्रेमोन्मादादयं प्रभुः ।
प्रयागं प्रापयिष्यामि नात्रैनं वासयाम्यहम् ॥१०२
यः काङ्क्षति प्रयागं स गत्वामन्त्रयतामिमम् ।
इत्युक्त्वा प्रभुमादाय प्रस्थानमकरोदसौ ॥१०३
गङ्गापथेन नौकायामुपवेश्य महाप्रभुम् ।
भट्टः प्रयागमायातः सममादाय तं तदा ॥१०४
दशाश्वमेधमागत्य जनता-शङ्कया प्रभुः ।
शक्तिं सञ्चारयन् रूपगोस्वामिन मशिक्षयत् ॥१०५
कृष्णभक्तस्य भक्तेश्च रसानां तत्त्व मन्ततः ।
श्रीभागवतसिद्धान्तं प्रभुः सर्व मुपादिशत् ॥१०६
रामानन्दाच्च यावन्तः सिद्धान्ताः प्रभुणा श्रुताः ।
तावन्तः कृपया तेन रूपे सञ्चारितास्तदा ॥१०७

रूपस्य हृदये शक्तिं निजां सञ्चारयन् प्रभुः ।
बोधयन् सर्वतत्त्वानि तमभिज्ञं चकार च ॥१०८

यः शिवानन्दसेनस्य कर्णपूराभिधः सुतः ।
श्रीरूपमिलनं ग्रन्थे स लिलेख सविस्तरम् ॥१०९

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके नवमाङ्के चतुरधिक-
शततमः श्लोकः—

कालेन बृन्दावनकेलिवार्त्ता लुप्तेति तां ख्यापयितुं विशिष्य ।
कृपाभृतेनाभिषिषेच देवस्तत्रैव रूपञ्च सनातनञ्च ॥११॥"

"तथाहि तत्रैव नवमाङ्के सप्ततितमः श्लोकः—

यः प्रागेव प्रियतमगुणै र्गाढ़बद्धोऽपि मुक्तो
गेहाध्यासाद्रस इव परो मूर्त्त एवाप्यमूर्त्तः ।
प्रेमालापै र्दृढ़तर-परिष्वङ्ग-रङ्गैः प्रयागे
तं श्रीरूपं सममनुपमेनानुजग्राह देवः ॥१२॥"

"तथाहि तत्रैव नवमाङ्के पञ्चसप्ततितमश्लोके शक्तिसञ्चारे
प्रतापरुद्रं प्रति सार्वभौमवाक्यम्—

प्रियस्वरूपे दयितस्वरूपे प्रेम-स्वरूपे सहजाभिरूपे ।
निजानुरूपे प्रभुरेकरूपे ततान रूपे स्वविलासरूपे ॥१३॥"

इत्येवं कर्ण्यपूरेण लिखितञ्चान्तरान्तरा ।
यथा देवो दयाञ्चक्रे श्रीरूप-श्रीसनातनौ ॥११०

प्रभो र्निखिलभक्तानां महताञ्च लघीयसाम् ।
श्रीसनातनरूपौ हि करुणागौरवास्पदे ॥१११

यदि बृन्दावनं दृष्ट्वा कोऽपि देशं गतोऽभवत् ।
तं पप्रच्छुः प्रभोः सर्वे तत्रत्या भक्तपार्षदाः ॥११२

ब्रूहि तत्रावतिष्ठेते कथं रूपसनातनौ ।
वैराग्यञ्च तयोः कीदृक् कीदृशं भोजनं तयोः ॥११३

श्रीकृष्णभजनं कीदृक् कुरुतः प्रहराष्टकम् ।
इत्याकर्ण्याब्रवीत् सोऽपि भक्तस्तौ बहुधास्तुवन् ॥११४
वृन्दावनस्थवृक्षाणामेकैकस्य तले हि तौ ।
नयतो रात्रिमेकैकां शयानावनिकेतनौ ॥११५
स्थूलभिक्षां द्विजागारे कृत्वा माधुकरीं क्वचित् ।
चणकान् शुष्कपौलीश्च भुञ्जाते भोगवर्जितौ ॥११६
छिन्नकन्थौ वहिर्वासो वसानौ कुण्डिकाकरौ ।
श्रीकृष्णकथया कृष्णनाम्ना सोल्लासनर्त्तनौ ॥११७
भजेते प्रहरानष्टौ श्रीकृष्णं नामकीर्त्तनैः ।
प्रेम्णा च चतुरो दण्डान् शयाते किन्तु नाहनि ॥११८
कदाचिल्लिखतो भक्तिरसशास्त्राण्यनेकधा ।
चैतन्यस्य कथां जातु शृणुतो ध्यायतश्च तम् ॥११९
इत्येवं वचनं श्रुत्वा महद्भिर्लभ्यते सुखम् ।
चैतन्यस्य कृपा यत्र तत्र कोन्वस्ति विस्मयः ॥१२०
चैतन्यस्य कृपां रूपो मङ्गलाचरणे स्वयम् ।
स रसामृतसिन्ध्वाख्यग्रन्थस्यालिखदादिमे ॥१२१

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे भक्तिसामान्य-
लहर्य्यां द्वितीयः श्लोकः—

हृदि यस्य प्रेरणया प्रवर्त्तितोऽहं वराकरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥१४॥"

एवमेव दशाहानि प्रयागे समवस्थितः ।
श्रीरूपं शिक्षयामास शक्तिं सञ्चारयन् प्रभुः ॥१२२
कथितं प्रभुणा रूप शृणु भक्तिरसस्य हि ।
लक्षणं सूत्रमात्रं तद् यन्न वर्ण्यं सविस्तरम् ॥१२३
पारावारविहीनः सोऽगाधो भक्तिरसाम्बुधिः ।
विन्दुमेक महं तस्य त्वामास्वादयितुं ब्रुवे ॥१२४

ब्रह्माण्डव्यापिनो जीवा अनन्ताः सन्ति सर्वतः ।
चतुरशीतिलक्षेषु परिभ्राम्यन्ति योनिषु ॥१२५

केशाग्रशतभागस्य शतभागेन यः समः ।
अतिसूक्ष्मो हि जीवोऽसौ तत्स्वरूपं विचारय ॥१२६

"तथाहि श्रुतिव्याख्याधृतः श्लोकः—

केशाग्रशतभागस्य शतांशसदृशात्मकः ।
जीवः सूक्ष्मस्वरूपोऽयं संख्यातीतो हि चित्कणः ॥१५॥"

"तथाहि श्वेताश्वतरमन्त्रानुसारी श्लोकः—

वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेय इति चाह पराश्रुतिः ॥१६॥"

"तथाहि श्रीमद्भागवत एकादशस्कन्धे षोड़शाध्याय एकादशश्लोकः—

सूक्ष्माणामप्यहं जीवः ॥१७॥"

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याये षड़्विंशः श्लोकः—

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता
स्तर्हिं न शास्यतेति नियमो ध्रुव नेतरथा ।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्
सममनुजानतां यदमतं मतदुष्टतया ॥१८॥"

पुनस्ते च द्विधा भिन्नाः स्थावरा जङ्गमा इति ।
जङ्गमाः खलु तिर्य्यञ्चो जलस्थलचराश्च ते ॥१२७

जङ्गमानां पुनस्तेषामल्पिष्ठा मानवाः परम् ।
तेषां म्लेच्छाः पुलिन्दाश्च बौद्धाश्च शवरादयः ॥१२८

अर्द्धन्तु वेदनिष्ठानां वेदान् मानयते वहिः ।
धर्मानगणयद् वेदविरुद्धं विदधात्यघम् ॥१२९

भूयिष्ठाः कर्मनिष्ठास्तु धर्मानाचरतां नृणाम् ।
कोटेश्च कर्मनिष्ठानामेको ज्ञानी प्रशस्यते ॥१३०

ज्ञानिनां कोटिसंख्यानां मुक्त एकतमो भवेत् ।
कोटिसंख्येषु मुक्तेषु कृष्णभक्तोऽस्ति दुर्लभः ॥१३१

कृष्णभक्तो हि निष्कामस्ततः शान्तो भवेदयम् ।
अशान्ता निखिला भुक्ति-मुक्ति-सिद्ध्यभिकाङ्क्षिणः ॥१३२

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे चतुर्दशाध्याये तृतीयः श्लोकः—।

मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥१६॥"

ब्रह्माण्डानि परिभ्राम्यन् जीवः कश्चन भाग्यवान् ।
लब्ध्वा भक्तिलतावीजं गुरुकृष्णानुकम्पया ॥१३३

ततो मालाकरो भूत्वा वीजमारोप्य तच्च सः ।
श्रवणकीर्त्तनाम्भोभि रभिषिञ्चति सर्वदा ॥१३४

लतासौ वर्द्धमाना तु भित्त्वा ब्रह्माण्डमेति च ।
विरजो ब्रह्मलोकं सा भित्त्वा व्योम परं गता ॥१३५

तदूर्द्ध्वं याति गोलोकं श्रीमद्वृन्दावनं ततः ।
तत आरोहति श्रीमत्कृष्णाङ्घ्रिकल्पपादपम् ॥१३६

तत्रैवं लब्धविस्तारा धत्ते प्रेमफलानि सा ।
श्रवणकीर्त्तनाद्यद्भि रिमां सिञ्चति मालिकः ॥१३७

ते वैष्णवापराधाश्चेदुत्तिष्ठेयु र्मदोत्कटाः ।
छिन्द्यु र्वोन्मूलयेयुस्तां शुष्येयुस्तद्दलान्यपि ॥१३८

अतस्तस्या वृतिं कुर्य्यात्तथा यत्नेन मालिकः ।
यथापराध-मत्तेभो नाविर्भवितुमर्हति ॥१३९

यदि स्यादुपशाखाना मुद्गमो लतया सह ।
या भुक्तिमुक्तिबाञ्छाद्या असंख्येया गणाः पुनः ॥१४०

निषिद्धाचार-कौटिल्य-जीवहिंसादयस्तथा ।
तत्र लब्धप्रतिष्ठास्ता उपशाखाः समन्ततः ॥१४१

जलसेकाद्युपायेन वर्द्धमानासु तासु च ।
मूलशाखा न शक्नोति वर्द्धितुं स्तब्धतां गता ॥१४२
यदि प्रथममेवोपशाखा श्छिन्द्यात् प्रयत्नतः ।
मूलशाखा गता बृद्धिं याति वृन्दावनं तदा ॥१४३
प्रेमफलानि पक्कानि पतन्त्यास्वाद्य मालिकः ।
तां लतामवलम्ब्यैव लभते कल्पपादपम् ॥१४४
तत्रासौ कल्पवृक्षं तं यन्ततः सेवते सदा ।
सुखं प्रेमफलानाञ्च रसमास्वादयत्यसौ ॥१४५
परमः पुरुषार्थोऽय मुच्यते परमं फलम् ।
चत्वारः पुरुषार्थास्ते तृणायन्ते यदग्रतः ॥१४६

"तथाहि ललितमाधवे पञ्चमाङ्के द्वितीयः श्लोकः—

ऋद्धा सिद्धिव्रजविजयिता सत्यधर्मा समाधि-
र्ब्रह्मानन्दो गुरुरपि चमत्कारयत्येव तावत् ।
यावत् प्रेम्णां मधुरिपु-वशीकार-सिद्धौषधीनां
गन्धोऽप्यन्तःकरणसरणीपान्थतां न प्रयाति ॥२०॥"

शुद्धाया एव भक्तेर्हि प्रेमोत्पत्तिर्भवेद् यथा ।
विशुद्धायास्ततो भक्ते र्मया लक्षण मुच्यते ॥१४७
अन्येच्छामन्यपूजाञ्च सन्त्यज्य ज्ञानकर्मणी ।
इन्द्रियैरानुकूल्येन सर्वैं कृष्णानुशीलनम् ॥१४८
शुद्धभक्तिरियं तावदस्याः प्रेम सम्भुद्भवेत् ।
इदं भागवते पञ्चरात्रे चोक्तं हि लक्षणम् ॥१४९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वबिभागे भक्तिसामान्यलहर्य्यामेका-
दशाङ्कधृत-नारदपञ्चरात्रम्—

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेश-सेवनं भक्तिरुच्यते ॥२१॥"

"तथाहि श्रीमद्भागवते तृतीयस्कन्ध ऊनत्रिंशाध्याये श्लोकद्वयम्—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥२२॥"

"तथाहि तत्रैव एकादशश्लोके देवहूतिं प्रति कपिलदेववाक्यम्—

सालोक्य-सार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥२३॥"

"तथाहि तत्रैव द्वादशः श्लोकः—

स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ।
येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥२४॥"
भुक्तिमुक्त्यादिवाञ्छा चेद्धृदयेषूपजायते ।
प्रेमा नोत्पद्यते जातु साधनं कुर्वतामपि ॥१५०

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे द्वितीयलहर्य्यां षोड़शः श्लोकः—

भुक्तिमुक्तिस्पृहा यावत् पिशाची हृदि वर्त्तते ।
तावद्भक्तिसुखस्यात्र कथमभ्युदयो भवेत् ॥२५॥"
भक्तेः साधनरूपाया रतिरुद्भवतिक्रमात् ।
सा पुनः सान्द्रतां प्राप्ता प्रेमनाम्नाभिधीयते ॥१५१
प्रेमवृद्धौ क्रमात् स्नेहो मानः प्रणय आख्यया ।
रागानुरागभावाश्च महाभावश्च सम्मताः ॥१५२
यथा रसोगुड़ः खण्डो वीजादिक्षोश्च शर्करा ।
क्रमात् सिता च मत्स्यण्डी ततः श्रेष्ठः सितोपलः ॥१५३
कृष्णभक्तिरसा एते स्थायिभावाख्यया मताः ।
विभावाश्चानुभावाश्च तैः सार्द्धं यदि सङ्गताः ॥१५४
पुनर्मिलन्ति भावैश्च सात्त्विक-व्यभिचारिभिः ।
भवेयुरमृतास्वादाः कृष्णभक्तिरसास्तदा ॥१५५

हवि-र्मरीच-कर्पूरै र्यदा सम्मिलिता सिता।
पीयूष-मधुरास्वादा रसालेत्यभिधीयते ॥१५६
सा रतिः पञ्चधा भिन्ना तद्भक्तानां पृथक्तया।
शान्तरति स्तथा दास्यरतिः सख्यरतिः पुनः ॥१५७
वात्सल्यरति-माधुर्यरती इत्येव नामतः।
कृष्णभक्तिरसाः पञ्चविधाः स्यू रतिभेदतः ॥१५८
शान्तो दास्यश्च सख्यश्च वात्ल्यो मधुरस्तथा।
इति पञ्चरसाः श्रेष्ठाः कृष्णभक्तिरसेष्वपि ॥१५९

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे स्थायिभावलहर्य्यां त्रिषष्टितमः श्लोकः—

हास्योऽद्भुतस्तथा वीरः करुणो रौद्र इत्यपि।
भयानकश्च वीभत्स इति गौणाश्च सप्तधा ॥२६॥"
हास्योऽद्भुतश्च वीरश्च करुणो रौद्रभीषणौ।
वीभत्सश्चेति गौणाः स्यू रसा भक्तेषु पञ्चसु ॥१६०
स्थायिनस्ते रसाः पञ्च सन्ति भक्तेषु सन्ततम्।
आगन्तुकास्तु सप्तैते गौणाः स्युः प्राप्य कारणम् ॥१६१
शान्तास्ते नव योगेन्द्रा भक्ताश्च सनकादयः।
दास्यभक्ताश्च सर्वत्र संख्यातीता हि सेवकाः ॥१६२
श्रीदामाद्याश्च ते सख्यभक्ता भीमार्जुनौ च तौ।
माता पिता च वात्सल्यभक्ता गुरुजनाश्च ते ॥१६३
माधुर्य्यरसभक्तानां मुख्या गोप्यः पुनर्व्रजे।
महिषीणां गणा लक्ष्मीगणाश्च गणनातिगाः ॥१६४
सैव कृष्णरतिस्तावद्भवति द्विविधा पुनः।
ऐश्वर्य्यज्ञानमिश्रेति केवलेति च नामतः ॥१६५
ऐश्वर्य्यज्ञानहीना तु गोकुले केवला रतिः।
ऐश्वर्य्यज्ञानमुख्या हि बैकुण्ठाद्ये पुरीद्वये ॥१६६

ऐश्वर्य्यज्ञानमुख्यत्वात् प्रीतिः सङ्कुचिता भवेत् ।
केवला रीति रैश्वर्य्यं पश्यन्त्यपि न मन्यते ॥१६७

ऐश्वर्य्योद्दीपनं क्वापि रसयोः शान्तदास्ययोः ।
वात्सल्य-सख्य ऐश्वर्य्यसङ्कोचो मधुरे तथा ॥१६८

कृष्णोऽवन्दत पादाब्जं देवकीवसुदेवयोः ।
प्रापतुर्भय मैश्वर्य्यज्ञानाच्चेतसि तावुभौ ॥१६९

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुश्चत्वारिंशाध्याये पञ्चत्रिंशः श्लोकः—

देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ।
कृतसंवन्दनौ पुत्रौ सस्वजाते न शङ्कितौ ॥२७॥"

कृष्णस्यैश्वर्य्यमालोक्य प्राप्तवान् भय मर्जुनः ।
सख्यात् पूर्वकृतं धार्ष्ट्यं विनयेनात्क्षमापयत् ॥१७०

"तथाहि श्रीमद्भगवद्गीतायामेकादशाध्याय एकचत्वारिंश-द्वाचत्वारिंशौ श्लोकौ—

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥
यच्चापहासार्थमसत्कृतोऽसि विहार-शय्यासन-भोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम् ॥२८॥"

यदा कृष्णः परीहासं कृतवान् रुक्मिणीं प्रति ।
परित्यक्ष्यति कृष्णो मामिति मत्वा बिभाय सा ॥१७१

"तथाहि श्रीमद्भागवते दशमस्कन्धे षष्टितमाध्याये त्रयोविंशः श्लोकः—

तस्याः सुदुःख-भव-शोक-विनष्ट-वुद्धे-
र्हस्तात् श्लथद्वलयतो व्यजनं पपात ।
देहश्च विक्लव-धियः सहसैव मुह्यन्
रम्भेव वातविहता प्रविकीर्य्य केशान् ॥२९॥"

ऐश्वर्य्यं न विदुः शुद्धप्रेमभक्ता हि केवलाः ।
मन्येरन्नात्मसम्बन्ध मैश्वर्य्ये लक्षितेऽपि ते ॥१७२

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये पञ्चत्रिंशः श्लोकः—

त्रय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतैः ।
उपगीयमान-माहात्म्यं हरिं सामन्यतात्मजम् ॥३०॥"

"तथाहि तत्रैव नवमाध्याये द्वादशः श्लोकः—

तं मत्वात्मज मव्यक्तं मर्त्त्यलिङ्गमधोक्षजम् ।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥३१॥"

"तथाहि तत्रैवाष्टादशाध्याये चतुर्दशः श्लोकः—

उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनश्च प्रलम्बो रोहिणीसुतम् ॥३२॥"

"तथाहि तत्रैव त्रिंशाध्याये द्वात्रिंशत्संख्यकाद्याः श्लोकाः—

हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥
ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ।
न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥
एवमुक्तः प्रियामाह स्कन्ध मारुह्यतामिति ।
ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत ॥३३॥"

"तथाहि तत्रैव एकत्रिंशाध्याये षोड़शः श्लोकः—

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥३४॥"

शान्ते स्वरूपबुद्ध्यैव भवेत् कृष्णैकनिष्ठता ।
शमो मन्निष्ठता बुद्धेरिति श्रीमुखगीतिका ॥१७३

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे शान्तभक्तिरसलहर्य्या मेकविंशः श्लोकः—

शमो मन्निष्ठता बुद्धे रिति श्रीभगवद्वचः ।
तन्निष्ठा दुर्घटा बुद्धेरेतां शान्तरतिं विना ॥३५॥"

"तथाहि श्रीमद्भागवते एकादशस्कन्धे ऊनविंशाधाये त्रयस्त्रिंशः श्लोकः—

शमो मन्निष्ठता बुद्धे र्दम इन्द्रियसंयमः ।
तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥३६॥"
कृष्णादन्यतृषात्यागस्तस्य कर्मैव मन्यते ।
शान्तः श्रीकृष्णभक्तस्तदेकधैवावगम्यते ॥१७४

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे सप्तदशाध्याये त्रयोविंशः श्लोकः—

नारायणपराः सर्वे न कुतश्चन विभ्यति ।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थ-दर्शिनः ॥३७॥"
स्वर्गं मोक्षञ्च कृष्णस्य भक्तो मन्येत नारकम् ।
कृष्णनिष्ठा-तृषात्यागौ शान्तस्य द्वाविमौ गुणौ ॥१७५
एतावुभौ गुणौ सर्वान् भक्तानेवाधितिष्ठतः ।
आकाशस्य गुणः शब्दो यथा भूतगणे स्थितः ॥१७६
शान्तस्य प्रकृतिः कृष्णे ममतागन्धवर्जिता ।
परब्रह्म परात्मेति ज्ञाने तस्य प्रवीणता ॥१७७
स्वरूपज्ञानमेवास्ति रसे शान्ते हि केवलम् ।
दास्यभक्ते प्रभोः पूर्णैश्वर्य्यबोधोऽधिकोभवेत् ॥१७८
भवेतामीश्वरज्ञाने भूरिगौरवसम्भ्रमौ ।
सेवित्वैव सदा दासः श्रीकृष्णं सुखयत्यलम् ॥१७९
शान्तस्यासौ गुणो दास्ये तेन स्याद्भूरिसेवनम् ।
अतो दास्यरसस्यैवं भवतो द्विविधौ गुणौ ॥१८०
सख्ये शान्तगुणो दास्यसेवा चेतिगुणद्वयम् ।
सख्यं विश्रमयं दास्यसेवासम्भ्रमगौरवम् ॥१८१
स्कन्धमारोहति स्कन्धमारोपयति खेलया ।
युध्यते सेवते कृष्णं तेन सेवयते निजम् ॥१८२
विश्रम्भप्रमुखं सख्यमगौरव मसम्भ्रमम् ।
अतएवास्य सख्यस्य गुणानां लक्षणत्रयम् ॥१८३

श्रीकृष्णे ममताधिक्यं ज्ञान मात्मसमं तथा ।
अतः श्रीभगवान् सख्यरसस्यास्य वशोभवेत् ॥१८४
वात्सल्ये तिष्ठतः शान्तगुणोऽथ दास्यसेवनम् ।
तत्तच्च सेवनं नाम्नाख्यायते पालनं त्विह ॥१८५
सख्यगुणावसङ्कोचस्तथा गौरवहीनता ।
ताड़नं ममताधिक्याद् भर्त्सनातर्जनादिकम् ॥१८६
स्वस्मिन् पालकताबोधः कृष्णे पाल्यत्वधीस्तथा ।
गुणै रसचतुष्कस्य वात्सल्यं स्यात् सुधोपमम् ॥१८७
तस्मिन्नेवामृतानन्दे भक्ता मज्जन्ति च स्वयम् ।
तेनैश्वर्य्यविदः प्राहुः कृष्णं भक्तवशात्मकम् ॥१८८

"तथाहि हरिभक्तिविलासस्य षोड़शविलासे नवनवति-
तमाङ्कधृतपद्मपुराणवचनम्—

इतीदृक् स्वलीलाभिरानन्दकुण्डे
स्वघोषं निमज्जन्तमाख्यापयन्तम् ।
तदीयेशितज्ञैश्च भक्तै र्जितत्वं
पुनः प्रेमतस्त्वां शतावृत्ति वन्दे ॥३८॥"

कृष्णे निष्ठा च सेवा च परमा मधुरे रसे ।
असङ्कोचश्च सख्यस्य लालनं ममताधिकम् ॥१८९
निजाङ्गैः कान्तभावेन सर्वथा सेवनं पुनः ।
अतः पञ्चगुणा एते वर्त्तन्ते मधुरे रसे ॥१९०
आकाशादेर्गुणा सन्ति यथा भूते परे परे ।
एकश्च द्वौ त्रयश्चैवं क्रमात् पञ्चगुणाः क्षितौ ॥१९१
एवमेव हि माधुर्य्ये सर्वे भावाः समाहृताः ।
अतोऽत्र स्वादबाहुल्याच्चमत्कारो विशिष्यते ॥१९२
इह भक्तिरसस्यैतत् कृतं दिग्दर्शनं मया ।
हृदयेनास्य विस्तारः सर्वथा चिन्त्यतां त्वया ॥१९३

एवं चिन्तयतः कृष्णो भक्तस्यान्तः स्फुरत्यलम् ।
कृष्णस्य कृपयाऽज्ञोऽपि याति पारं रसाम्बुधेः ॥१९४
इत्येवं कथयित्वा तं समाश्लिष्यन्महाप्रभुः ।
अथ वाराणसीं यातुं कृतवान्मानसं ततः ॥१९५
प्रभौ च प्रातरुत्थाय प्रस्थानाय कृतोद्यमे ।
इत्थं निवेदयामास श्रीरूपः प्रभुपादयोः ॥१९६
मामाज्ञापय गच्छामि पादावनुसरंस्तव ।
नहि विच्छेदकल्लोलान् सोढुं शक्ष्यामि ते पुनः ॥१९७
प्रभुणोक्तं ममादेशः पालनीयोऽधुना तव ।
आयातोऽसि समीपे त्वमितो बृन्दावनं व्रज ॥१९८
ततो बृन्दावनाद् गौड़देशान्तर्गतवर्त्मना ।
त्वं नीलाचलमायातो मिलिष्यसि मया समम् ॥१९९
इत्युक्त्वा च तमाश्लिष्यारूढ़े नावं महाप्रभौ ।
श्रीरूपो मोहमापन्न स्तत्रैव पतितोऽभवत् ॥२००
ब्राह्मणो दाक्षिणात्योऽसौ तं निनाय गृहं ततः ।
अथ वृन्दावनं तौ द्वौ प्रातिष्ठेतां सहोदरौ ॥२०१
इतो गच्छन् पथा वाराणसीं प्राप्तो महाप्रभुः ।
वहिर्यातः पुरात्तेन मिलितश्चन्द्रशेखरः ॥२०२
रात्रौ स्वप्ने ददर्शासौ प्रभुं गेहसमागतम् ।
आगत्य प्रातरेवातोऽवतस्थे नगराद्वहिः ॥२०३
सहसा स प्रभुं दृष्ट्वा न्यपतत्तस्य पादयोः ।
तं निनायात्मनो गेहं ततः सानन्दचेतसा ॥२०४
श्रुत्वा तपनमिश्रोऽथ प्रभुणा समगच्छत ।
इष्टगोष्ठीं समाधाय न्यमन्त्रयत स प्रभुम् ॥२०५
ततः स्वगृह मानीय भिक्षान्नं तमभोजयत् ।
भट्टाचार्य्योऽभवच्चन्द्रशेखरेण निमन्त्रितः ॥२०६

मिश्रोऽथ कृतभिक्षस्य गृह्णन् पादौ महाप्रभोः ।
ऊचे तं प्रार्थये भिक्षामेकां देह्यनुकम्पया ॥२०७

अस्मिन् काशीपुरे यावत् स्थितिस्ते भवति प्रभो ।
मम गेहं विनान्यत्र क्वापि भिक्षां न कुर्विति ॥२०८

पञ्च वा सप्त वाहनि स्थिति में भविता पुनः ।
भिक्षां नैव करिष्यामि क्वापि सन्न्यासिभिः सह ॥२०९

इति जानन् प्रभु स्तस्य स्वीचकार निमन्त्रणम् ।
कल्पयामास चावासं चन्द्रशेखरवेश्मनि ॥२१०

आगत्याथ महाराष्ट्रब्राह्मणस्तेन सङ्गतः ।
स्नेहेन करुणा तस्मिन् प्रभुणापि प्रकाशिता ॥२११

शिष्टशिष्टा जनाः श्रुत्वा तत्रायातं महाप्रभुम् ।
विलोकयितु माजग्मुर्ब्राह्मणाः क्षत्रियाश्च ते ॥२१२

श्रीरूपे कृतवानासीद् यावतीः करुणाः प्रभुः ।
समासेन मयात्रोक्ता तत्कथानन्तविस्तरा ॥२१३

यो जनः श्रद्धया युक्तः शृणोत्येव कथामिमाम् ।
लभते प्रेमभक्तिं स श्रीमच्चैतन्यपादयोः ॥२१४

य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२१५

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीरूपानुग्रहो नामोन-
विंशः परिच्छेदः ।

—०—

मध्यलीलायां विंशः परिच्छेदः

"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यमहाप्रभुम् ।
नीचोऽपि यत्प्रसादात् स्याद् भक्तिशास्त्रप्रवर्त्तकः ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्यलम् ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
यदासीद् बन्धनागारे रुद्धो गौड़े सनातनः ।
रूपगोस्वामिनः पत्री सा तदा तमुपागता ॥२
स तां पत्रीं समासाद्य पठन् सानन्दमानसः ।
उपेत्य यवनं कारारक्षिणं प्रोक्तवान् रहः ॥३
त्वं मूर्त्तिमान् प्रभावोऽसि महासौभाग्यभूषितः ।
ग्रन्थे कोराणशास्त्रादौ निपुणं ज्ञानमस्ति ते ॥४
यः कश्चिन्मोचयेद्बन्दीमेकामपि निजैर्धनैः ।
भगवानपि संसारात्तं विमोचयति ध्रुवम् ॥५
उपकाराः प्रभूतास्ते मयापि विहिताः पुरा ।
कुरु प्रत्युपकारं मे साम्प्रतं मां विमोचयन् ॥६
मुद्राः पञ्चसहस्राणि स्वीकुर्वन्नधुना भवान् ।
उभयं धर्ममर्थञ्च युगपल्लभता मिति ॥७
यवनस्तद्वचः श्रुत्वा प्रोचे शृणु महाशय ।
भवन्तं मोचयन् किन्तु बिभेमि नृपतेरिति ॥८
श्रुत्वा सनातनेनोक्तं मा कार्षीं नृपते र्भयम् ।
स गतो दक्षिणं देशं यदि प्रत्यागतो भवेत् ॥९
तं ब्रूया उपगङ्गं स गतवान् वाह्यकर्मणे ।
गङ्गामालोक्य तत्रैव न्यक्षिपद्देहमञ्जसा ॥१०
विचिन्वन्नपि भूयिष्ठं नाप्तोऽहं तस्य लक्षणम् ।
निगडेन समं मग्नः क्वासौ नीतोऽम्बुवेगतः ॥११

नाहं स्थास्यामि देशेऽस्मिन्न किञ्चिद्भय मस्ति ते।
इतो मक्कां गमिष्यामि दरवेशो भवन्निति ॥१२
एवमुक्तमपि म्लेच्छमप्रसन्नं विलोकयन्।
सप्त मुद्रासहस्राणि तदग्रेऽसावपुञ्जयत् ॥१३
विलोक्य तावतीर्मुद्रा म्लेच्छो लोभवशं गतः।
निकृत्य शृङ्खलं रात्रौ पारेगङ्गं निनाय तम् ॥१४
गड़िद्वारपथं त्यक्त्वा ततो गन्तु मशक्नुवन्।
दिवारात्रं व्रजन् सोऽथ प्राप्तवान् पातड़ागिरिम् ॥१५
भौमिकं तत्र वास्तव्यं कञ्चिद् गत्वा सनातनः।
प्रह्वो न्यवेदयत् पारेगिरं प्रापय मामिति ॥१६
कररेखाविदेकस्तु तत्रासीद्भौमिकालये।
सोऽवदद्भौमिकं कर्णे ज्ञातं किञ्चिन्मया शृणु ॥१७
अष्टौ सौवर्णदीनारा वर्त्तन्तेऽस्य समीपतः।
इति श्रुत्वा मुदा प्रोक्तो भौमिकेन सनातनः ॥१८
रात्रौ पर्वतपारं त्वां नेष्यामि स्वजनै रहम्।
अधुना रन्धनं कृत्वा भवता भुज्यतामिति ॥१९
भौमिकेनैवमुक्त्वा च तस्मै भोज्ये समर्पिते।
सनातनो नदीं गत्वा तत्र सस्नौ यथाविधि ॥२०
दिनद्वय मुपोष्याद्य पक्त्वा चान्नमभक्षयत्।
मनसातर्कयच्चैवं राजमन्त्री सनातनः ॥२१
भौमिकोऽयं कथं न्वेवं बहुमन्यत मामिति।
सहयात्रिण मीशानं ततोऽपृच्छत् सनातनः ॥२२
मन्येऽहं द्रविनं किञ्चिदस्ति ते सन्निधाविति।
प्रत्युवाच तमीशानो दीनाराः सप्त सन्ति मे ॥२३
इति तद्वचनं श्रुत्वा भर्त्सयत्तं सनातनः।
सममादाय मृत्युं त्वं कस्मादानीतवानिति ॥२४

ततस्तान् सप्तदीनारान् गृहीत्वा स्वकरेण सः ।
गत्वा च भौमिकस्याग्रे स्थापयंस्तांस्तम ब्रवीत् ॥२५
एते सौवर्णदीनाराः सप्तैवासन् मया सह ।
आददान इमान् धर्मं दृष्ट्वा पारं विधेहि मे ॥२६
राजवन्दी गड़्द्वारं यातुं नार्हामि साम्प्रतम् ।
नयातो मां गिरेः पारं तव पुण्यं भवेदिति ॥२७
सहासं भौमिकेनोक्त मादौ ज्ञातं मयाखिलम् ।
सन्त्यष्टौ तव दीनारा भृत्यस्य वसनाञ्चले ॥२८
अद्य रात्रौ निहत्य त्वामग्रहीष्यमिमानहम् ।
तत् प्रकाश्य त्वया साधु कृतं मुक्तोऽस्मि कल्मषात् ॥२९
अहं तुष्टोऽस्मि ते जातु दीनारान्नाहमाददे ।
पुण्यलाभाय पारं त्वां गिरेर्नेष्याम्यसंशयम् ॥३०
गोस्वामी प्रोक्तवान् कोऽपि मां हत्वेमान् ग्रहीष्यति ।
अतस्त्वं रक्ष मे प्राणानङ्गीकुर्वन्निमानिति ॥३१
ततो गोस्वामिना सार्द्धं प्रहितास्तेन रक्षिणः ।
चत्वारस्तं गिरेः पारं तयैव निशयानयन् ॥३२
गोस्वामी च गतः पारमीशानं पृष्टवान् पुनः ।
वेदाहं द्रव्यशेषोऽस्ति कश्चित्तो सन्निधाविति ॥३३
ईशानः प्राह दीनार एक एवावशिष्यते ।
तं प्रत्युवाच दीनारं गृह्णन् देशं व्रजेति सः ॥३४
प्रतिप्रस्थाप्य तं यात एकाक्येव सनातनः ।
करे कुण्डी तनौ छिन्नकन्था चेत्यभयोऽभवत् ॥३५
गोस्वाम्यथ व्रजन्नेवं हाजिपुर मुपागतः ।
तत्रासौ सायमुद्यानाभ्यन्तरे समुपाविशत् ॥३६
तस्मिन् हाजिपुरे त्वासीद् वसन् श्रीकान्तनामकः ।
भगिनीपतिरस्यासौ राजकर्माणि सोऽकरोत् ॥३७

मुद्रालक्षत्रयं राजा प्रैरयत्तस्य सन्निधौ ।
प्राहिणोन्म्लेच्छसम्राजे मूल्यक्रीतान् स घोटकान् ॥३८
तुङ्गगेहोपरि स्थित्वा स गोस्वामिन मैक्षत ।
गृहीत्वैकं जनं नक्तं गोस्वामिन मुपागमत् ॥३९
इष्टगोष्ठी मुभौ तत्र चक्रतु र्मिलितौ च तौ ।
गोस्वामी प्रोक्तवान सर्वं बृत्तान्तं बन्धमोक्षयोः ॥४०
तेनोक्तः सोऽवतिष्ठस्व त्वमत्रैव दिनत्रयम् ।
विमुञ्च मलिनं वासो गृह्णन् भद्रपरिच्छदम् ॥४१
गोस्वामी तमुवाचात्र न तिष्ठेयमियच्चिरम् ।
प्रस्थितोऽस्म्यधुना पारं गङ्गाया नय मामिति ॥४२
तस्मै सादरयत्नेन दत्त्वैकं भोटकम्बलम् ।
पारेगङ्गं निनायासौ गौस्वामी प्रस्थित स्ततः ॥४३
व्रजन् कियच्चिरं वाराणसीं प्राप्तः सनातनः ।
तत्रायातं प्रभुं श्रुत्वा बभूवानन्दितान्तरः ॥४४
तमासीनं वहिर्द्वारि चन्द्रशेखरबेश्मनः ।
ज्ञात्वा महाप्रभुश्चन्द्रशेखरन्त्वेवम ब्रवीत् ॥४५
कोऽप्यास्ते वैष्णवो द्वारे स त्वयाहूयतामिति ।
अदृष्ट्वा वैष्णवं कञ्चिद् गृहद्वार मधिष्ठितम् ॥४६
वैष्णवो द्वारि नास्तीति प्रभवे स न्यवेदयत् ।
कोऽप्यास्ते किन्नु तत्रेति तं पप्रच्छ महाप्रभुः ॥४७
स ऊचे म्लेच्छसन्नयासी कोऽपि द्वार्य्यत्र वर्त्तते ।
तमानयेति तद्वाक्यात् स तं गत्वेदमब्रवीत् ॥४८
आयाहि म्लेच्छसन्न्यासिंस्त्वामाह्वयति मे प्रभुः ।
इति श्रुत्वा प्रविष्टोऽभूदानन्देन सनातनः ॥४९
तं दृष्ट्वा प्राङ्गणप्राप्तं प्रधावन्नागतः प्रभुः ।
ततस्तं गाढ़ मालिङ्गय प्रेमावेशवशोऽभवत् ॥५०

श्रीमहाप्रभुसंस्पर्शात् प्रेमाविष्टः सनातनः ।
सगद्गद मुवाचाथ मा मां मा स्पृश मामिति ॥५१
अन्योन्यं कण्ठमाश्लिष्य रुदन्तौ भूरि तावुभौ ।
दृष्ट्वा विस्मय मापन्नो नितरां चन्द्रशेखरः ॥५२
ततो महाप्रभुः पाणौ धृत्वा तं प्रविशन् गृहम् ।
आत्मानं निकषा पीठे तमुपावेशयत् पुनः ॥५३
परामृशन्त मङ्गानि श्रीहस्तेन महाप्रभुम् ।
हे प्रभो स्पृश मां मेति ब्रवीति स्म सनातनः ॥५४
प्रभुणोक्तं स्पृशामि त्वां कर्त्तुमात्मपवित्रताम् ।
शक्तो भक्तिवलेनासि ब्रह्माण्डस्यापि शुद्धये ॥५५

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे त्रयोदशाध्यायेऽष्टमः श्लोकः—

भवद्विधा भागवतास्तीर्थीभूताः स्वयं प्रभो ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥२॥"

"तथाहि हरिभक्तिविलासस्य दशमविलासे एकनवतितमाङ्कधृतभगवद्वाक्यम्—

न मे भक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथाह्यहम् ॥३॥

"तथाहि श्रीमद्भागवते सप्तमस्कन्धे नवमाध्याये नवमः श्लोकः—

विप्राद्द्विषड् गुणयुतादरविन्दनाभ-
पादारविन्दविमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनेहितार्थ-
प्राणं पुनाति स कुलं नतु भूरिमानः ॥४॥"

पश्यामि त्वां स्पृशामि त्वां गायामि त्वद्गुणानहम् ।
सर्वेन्द्रियफलान्याप्त इति शास्त्रै र्निरूपितम् ॥५६

"तथाहि हरिभक्तिसुधोदये त्रयोदशाध्याये द्वितीयः श्लोकः—

अक्ष्णोः फलं त्वादृशदर्शनं हि तन्वाः फलं त्वादृशदेहसङ्गः ।
जिह्वाफलं त्वादृशकीर्त्तनं हि सुदुर्लभा भागवता हि लोके ॥५॥"

इत्युक्त्वा प्रभुणा भूयः प्रोक्तं शृणु सनातन ।
महाकारुणिकः कृष्णः पतितानाञ्च पावनः ॥५७
त्वां महारौरवादद्य स एवोद्धृतवान् स्वयम् ।
करुणासागरः कृष्णोऽपारो गाम्भीर्य्यवानिति ॥५८
प्रभो सनातनः प्रोचे कृष्णं न खलु वेद्म्यहम् ।
मन्ये हेतुं ममोद्धारे तवैव करुणामिति ॥५९
ततोऽसौ प्रभुणा पृष्टः कथं मुक्तिरभूदिति ।
श्रावयामास साद्यन्तां सर्वां वार्त्तां सनातनः ॥६०
प्रभुरूचे प्रयागे ते भ्रातरौ सङ्गतौ मया ।
रूपानुपमनामानावुभौ वृन्दावनं गतौ ॥६१
ततस्तपनमिश्रं तं तथा तं चन्द्रशेखरम् ।
उपतस्थे प्रभोराज्ञावशात्तत्र सनातनः ॥६२
अथ न्यमन्त्रयन्मिश्रतपनस्तं सनातनम् ।
प्रभुणा कथितं क्षौरं कर्त्तुं गच्छ सनातन ॥६३
इत्युक्त्वादिशदाहूय प्रभुस्तं चन्द्रशेखरम् ।
त्वया गत्वेममादाय वेशोऽयं मोच्यतामिति ॥६४
कारयन्नथ तं भद्रं गङ्गास्नान मकारयत् ।
नूतनं वसनं तस्मै प्रददौ चन्द्रशेखरः ॥६५
सनातनस्तु तद्वस्त्रं नैव स्वीकृतवानिति ।
आकर्ण्य प्रभुरानन्दोत्फुल्लान्तःकरणोऽभवत् ॥६६
मध्याह्नकाल आयाते भिक्षां कर्त्तुं समुत्थितः ।
प्रभु स्तपनमिश्रस्यानयद् गेहं सनातनम् ॥६७

पादौ प्रक्षाल्य भिक्षार्थमासीनः प्रभु रासने ।
ऊचे सनातनायापि भिक्षान्नं दीयतामिति ॥६८
मिश्रः प्रत्यवदत् किञ्चित् कृत्यं तस्यावशिष्यते ।
कुरु भिक्षां प्रसादस्ते पश्चात्तस्मै प्रदास्यते ॥६९
ततो गृहीतभिक्षे च विश्रामं कुर्वति प्रभौ ।
मिश्रः सनातनायादात् प्रभोः शेषान्नभाजनम् ॥७०
दीयमानञ्च मिश्रेण नवं वस्त्रं सनातनः ।
अगृहीत्वा चकारैवं तस्मा एकं निवेदनम् ॥७१
ऐकान्त्येनैव मह्यं चेद्वस्त्रं दातुमना भवान् ।
भवद्व्यवहृतं वस्त्रं देहि मह्यं पुरातनम् ॥७२
अथ मिश्रो ददौ तस्मै वस्त्र मेकं पुरातनम् ।
तेन तेनैव कोपीन-वहिर्वासोयुगं कृतम् ॥७३
महाराष्ट्रीयविप्रेणामेलयत्तं प्रभु र्यदा ।
चकारात्यन्तिकं विप्रस्तदा तस्य निमन्त्रणम् ॥७४
हे सनातन यावत्त्वं काश्यामत्रावतिष्ठसे ।
तावदेव ममागारे भिक्षान्नं त्वं ग्रहीष्यसि ॥७५
ततः सनातनेनोक्तं कार्य्या माधुकरी मया ।
गृह्येत कथमेकत्र भिक्षा विप्रस्य ते गृहे ॥७६
सनातनस्य वैराग्यात् प्रभु हृष्टमना अपि ।
भूयो भूयो निरैक्षिष्ट तं भोटकम्बलं प्रति ॥७७
ज्ञात्वा सनातनो नायं भाति सुष्ठु प्रभोरिति ।
तं भोटकम्वलं त्यक्तु मुपायं बह्वचिन्तयत् ॥७८
चिन्तयन्नेव मध्याह्ने गङ्गां स्नानार्थ मागतः ।
गौड़ीयं स्तिमितां कन्थां शोषयन्तं ददर्श सः ॥७९
तञ्चोक्तवानये भ्रातरुपकारं विधेहि मे ।
कम्बलं मे गृहीत्वेमं तव कन्थां प्रदेहि मे ॥८०

तेनोक्तं त्वं प्रमाणज्ञोऽप्युपहासं करोषि मे ।
महार्घं कम्वलं दत्त्वा कथं कन्थां ग्रहीष्यसि ॥८१

ऊचे सनातनो नायं हासः सत्यं ब्रवीमि ते ।
गृहीत्वा कम्वलं कन्था तव मे दीयतामिति ॥८२

एवमुक्त्वा स जग्राह कन्थां दत्त्वा स्वकम्वलम् ।
स्कन्धमारोप्य तां कन्थामाययौ च प्रभोः पुरः ॥८३

स पृष्टः प्रभुणा भोटकम्वलोऽसौ क्व ते गतः ।
सनातनस्ततः सर्वं प्रभवे तन्न्यवेदयत् ॥८४

प्रभुस्तं प्रोक्तवानेवं निश्चयं कृतवानहम् ।
नाशितस्तव कृष्णेन निखिलो विषयामयः ॥८५

कथं ते विषयस्पर्शरोगशेषं स रक्षतु ।
रोगं विनाश्य सद्वैद्यो रोगशेषं न रक्षति ॥८६

वहंस्त्रैमुद्रिकं भोटं भिक्षां माधुकरीं ग्रसन् ।
धर्मेण हीयसे लोकैः सर्वैस्त्वञ्चोपहस्यसे ॥८७

ऊचे सनातनो येन हतो दुर्विषयामयः ।
विषयामयशेषश्च गतो मेऽद्य तदिच्छया ॥८८

प्रभुणा सुप्रसन्नेन तस्मिन् या करुणा कृता ।
तयैवेत्थं परिप्रश्ने तस्य शक्ति रजायत ॥८९

रामानन्दं प्रति प्रश्नः प्रभुणा हि कृतः पुरा ।
उत्तरं तस्य शक्त्यैव रायः प्रत्यवदद् यथा ॥९०

तथैवाद्य प्रभोः शक्त्या पृष्टवांस्तं सनातनः ।
स्वयं महाप्रभुस्तस्मै सम्यक् तत्त्वं न्यरूपयत् ॥९१

"तथाहि ग्रन्थकारस्य वाक्यम्—

कृष्णस्वरूप-माधुर्य्यैश्वर्य्यभक्तिरसाश्रयम् ।
तत्त्वं सनातनायेशः कृपयोपदिदेश सः ॥६॥"

ततः सनातनो गृह्णन् श्रीपादौ श्रीमहाप्रभोः ।
तृणानि दद्भिरादाय तं दैन्येन न्यवेदयत् ॥६२
जात्या नीचोऽस्मि नीचैश्च सङ्गतः पतिताधमः ।
गर्ह्य-विषय-कूपान्तः पतित्वा गतजीवनः ॥६३
नैव जानाम्यहं किञ्चिदात्मनोऽपि हिताहितम् ।
ग्राम्ये कर्मणि दक्षोऽस्मि मन्ये सत्यं तदेव च ॥६४
तथापि यदि मां देव कृपयोद्धृतवानसि ।
साम्प्रतं मम कर्त्तव्यं ब्रूहि स्वकृपया प्रभो ॥६५
कोऽहमस्मि कथं तापत्रयं ज्वरयते च माम् ।
तच्चापि नावगच्छामि सम्भवेद् येन मे हितम् ॥६६
साध्य-साधनयोस्तत्त्वं प्रष्टुं जानाम्यहं नच ।
कृपया सर्वतत्त्वानि स्वयमेव प्रकाशय ॥६७
सदैन्यवचनं तस्याकर्ण्यानन्दितमानसः ।
तञ्चालिङ्ग्य समारेभे वदितुं श्रीमहाप्रभुः ॥ (इति अधिकः पाठः)
प्रभुः प्रोवाच पूर्णास्ति कृष्णस्य करुणा त्वयि ।
सर्वतत्त्वानि वेत्सि त्वं नास्ति तापत्रयञ्च ते ॥६८
तत्त्वभावेषु विज्ञोऽसि कृष्णशक्तिसमाश्रितः ।
मन्ये पृच्छसि दार्ढ्याय साधूनां प्रकृति र्हि सा ॥६९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां सप्त-
चत्वारिंशः श्लोकः—

सद्धर्मस्यावबोधाय येषां निर्बन्धिनी मतिः ।
अचिरादेव सर्वार्थः सिध्यत्येषामभीप्सितः ॥७॥"

भक्तिप्रवर्त्तनायासि त्वमेव योग्यभाजनम् ।
क्रमशः सर्वतत्त्वानि शृण्वहं कथयामि ते ॥१००
नित्यदासो हि कृष्णस्य भवेज्जीवः स्वरूपतः ।
तटस्था शक्तिरस्यायं भेदाभेदप्रकाशितः ॥१०१

सूर्य्यांशाः किरणाः सर्वे वह्निज्वालाचया यथा ।
स्वाभाविक्यो भवन्त्येव तिस्रः कृष्णस्य शक्तयः ॥१०२

"तथाहि विष्णुपुराणे प्रथमांशे ऊनविंशाध्याये पञ्चाशः श्लोकः—

एकदेशस्थितस्याग्ने ज्योंत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥८॥"

"तथाहि तत्रैव तृतीयाध्याये द्वितीयः श्लोकः—

शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
भवन्ति तपतां श्रेष्ठपावकस्य यथोष्णता ॥६॥"

चिच्छक्ति जींवशक्तिश्च मायाशक्तिरिति त्रिधा ।
परिणामं गताः स्वाभाविक्यः कृष्णस्य शक्तयः ॥१०३

"तथाहि तत्रैव षष्ठांशे सप्तमाध्याये षष्टितमः श्लोकः—

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा ।
अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥१०॥"

"तथाहि तत्रैव द्विषष्टितम-त्रिषष्टितमौ श्लोकौ—

या या क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ।
संसारतापानखिलानवाप्नोत्यत्र सन्ततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ।
सर्वभूतेषु भूपाल तारतम्येन वर्त्तते ॥११॥"

"तथाहि श्रीमद्भगवद्गीतायां सप्तमाध्याये पञ्चमः श्लोकः—

अपरेय मितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महावाहो ययेदं धार्य्यते जगत् ॥१२॥"

कृष्णं विस्मृत्य जीवोऽसौ तित्यमेव वहिर्मुखः ।
अतः संसारदुःखानि माया तस्मै प्रयच्छति ॥१०४

तमारोपयति स्वर्गं नरके मज्जयत्यपि ।
दण्डणीयजनान् राजा नद्यां मज्जयते यथा ॥१०५

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये सप्तत्रिंशः श्लोकः—

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्य्ययोऽस्मृतिः।
तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥१३॥"

स्याच्चेत् कृष्णोन्मुखः कोऽपि साधुशास्त्रानुकम्पया।
स मायामुत्तरन् याति सापि तं परिमुञ्चति ॥१०६

"तथाहि श्रीमद्भागवद्गीतायां सप्तमाध्याये चतुर्दशः श्लोकः—

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥१४॥"

न मायामुग्धजीवानां स्यातां कृष्णमतिस्मृती।
कृष्णो वेदपुराणानि कृपया तेषु निर्ममे ॥१०७
शास्त्रगुर्वात्मरूपेण स्वात्मानं तेन बोधिताः।
प्रभुस्त्राता च मे कृष्ण इति जीवा विदुस्ततः ॥१०८
वेदा ब्रुवन्ति सम्बन्ध मभिधेयं प्रयोजनम्।
कृष्णप्राप्ति र्हि सम्बन्धो भक्तिलाभस्य साधनम् ॥१०९
अभिधेयश्च नाम्ना तद् भक्तिः प्रेमा प्रयोजनम्।
पुरुषार्थशिरोरत्नं प्रेमैवेदं महाधनम् ॥११०
कृष्णस्य माधुरीसेवाप्राप्तये स निरन्तरम्।
कृष्णस्य कुरुते सेवा मास्वादयति तद्रसम् ॥१११
दृष्टान्तोऽत्र यथा गेहे दरिद्रस्यैव कस्यचित्।
सर्वज्ञः कश्चिदागत्य तद्दुःखादेव पृच्छति ॥११२
दुःखी त्वं कथमेवासि तवास्ते पैतृकं धनम्।
जनकस्ते मृतोऽन्यत्र त्वामिदं नाब्रवीदतः ॥११३
सर्वज्ञेन यथा प्रोक्तं धनमुद्दिश्य केवलम्।
तथा वेदपुराणानि जीवान् कृष्णं प्रशासति ॥११४
सर्वज्ञस्य यथा वाचा धनं तत्रानुबध्यते।
अत्र सम्बध्यते कृष्णो वेदपौराणिकोक्तिभिः ॥११५

पितुर्मे धनमस्तीति ज्ञात्वैव तन्नलभ्यते ।
उपायस्तस्य लाभार्थः सर्वज्ञे नैव कथ्यते ॥११६

धन मत्रास्ति भागे तु दक्षिणे चेत् खनिष्यसि ।
वरटा उत्पतिष्यन्ति धनं किञ्चिन्न लप्स्यसे ॥११७

पश्चिमे खन्यमाने तु यक्षः कश्चन वर्त्तते ।
करिष्यत्यन्तरायं स न हस्तं धनमेष्यति ॥११८

खनिष्यस्युत्तरांशं चेत् कृष्णसर्पोऽस्ति तत्र तु ।
न प्राप्स्यसि धनं युष्मान् सर्वानेष ग्रसिष्यति ॥११९

पूर्वस्यां स्तोक मुत्खन्यमानायामेव तन्मृदि ।
निखिलं धनभाण्डं तत्तव हस्ते पतिष्यति ॥१२०

शास्त्रमाह तथा कर्म ज्ञानं योगञ्च सन्त्यजन् ।
भजेद् भक्त्यैकया कृष्णं तयैवासौ वशीभवेत् ॥१२१

"तथाहि श्रीमद्भागवत एकादशस्कन्धे चतुर्दशाध्याये विंशः श्लोकः—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥१५॥"

"तथाहि तत्रैवैकविंशः श्लोकः—

भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥१६॥"

कृष्णप्राप्ते रुपायोऽतो भक्तिरेकैव केवला ।
अभिधेयाख्यया सैव शास्त्रैः सर्वैः प्रगीयते ॥१२२

धनं प्राप्य लभेतैव सुखभोगफलं यथा ।
सुखभोगात्ततो दुःखं स्वयमेव पलायते ॥१२३

तथा भक्तिफलादेव कृष्णे प्रेमोपजायते ।
प्रेम्णा कृष्णरसास्वादात् संसारोऽपि विनश्यति ॥१२४

नैव स्यातां फले प्रेम्णो दैन्यनाश-भवक्षयौ ।
प्रेमानन्दस्य सम्भोगो मुख्यमेव प्रयोजनम् ॥१२५

वेदा वदन्ति सम्बन्ध मभिधेयं प्रयोजनम् ।
कृष्ण-तद्भक्ति-तत्प्रेम नाम वित्तत्रयं महत् ॥१२६
कृष्णो हि मुख्यसम्बन्ध इति वेदादिसम्मतम् ।
तस्य ज्ञानानुषङ्गेन मायाबन्धो विमुच्यते ॥१२७

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे व्यभिचारिलहर्य्यां त्रयः-
सप्ततितमाङ्कधृत-पाद्मवैशाखमाहात्म्यम्—
व्यामोहाय चराचरस्य जगतस्ते ते पुराणागमा-
स्तां तामेव हि देवतां परमिकां जल्पन्तु कल्पावधि ।
सिद्धान्ते पुनरेक एव भगवान् विष्णुः समस्तागम-
व्यापारेषु विवेचनव्यतिकरं नीतेषु निश्चीयते ॥१७॥"

अन्वयव्यतिरेकाभ्यां वृत्त्या गौण्या च मुख्यया ।
प्रतिज्ञा सर्ववेदानां कृष्ण मेवाह केवलम् ॥१२८

"तथाहि श्रीमद्भागवत एकादशस्कन्ध एकविंशाध्याये चत्वारिंशः श्लोकः—
किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ।
इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥१८॥"

"तथाहि तत्रैवैकचत्वारिंशः श्लोकः—
मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् ।
एतावान् सर्ववेदार्थः शब्द मास्थाय मां भिदाम् ।
मायामात्र मनूद्यान्ते प्रतिषिध्य प्रसीदति ॥१६॥"

अनन्तानि स्वरूपाणि कृष्णस्यासीमवैभवम् ।
चिच्छक्ति र्जीवशक्तिश्च मायाशक्ति स्तथापरा ॥१२६
शक्तिकार्य्याणि वैकुण्ठब्रह्माण्डानि भवन्ति हि ।
स्वरूपशक्ति-तत्कार्य्यगणानां कृष्ण आश्रयः ॥१३०

"तथाहि श्रीमद्भागवतस्य दशमस्कन्धे प्रथमश्लोके श्रीधरस्वामिवचनम्—
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तम् ॥२०॥"

विचारः श्रूयतां कृष्णस्वरूपस्य सनातन ।
अद्वयं ज्ञानतत्त्वं हि व्रजेन्द्रनन्दनो व्रजे ॥१३१
सर्वादिः स हि सर्वांशी श्रीकिशोरशिरोमणिः ।
चिदानन्दतनुः सर्वाश्रयः सर्वेश्वरश्च सः ॥१३२

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये प्रथमः श्लोकः—
ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादि र्गोविन्दः सर्वकारणकारणम् ॥२१॥"

स स्वयं भगवान् कृष्णो गोविन्दापरनामकः ।
सर्वैश्वर्य्यभृतो यस्य गोलोको नित्यधाम तत् ॥१३३

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे तृतीयाध्यायेऽष्टाविंशः श्लोकः—
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे ॥२२॥"

ज्ञानं योगस्तथाभक्ति रित्येतैः साधनैस्त्रिभिः ।
प्रकाशस्त्रिविधस्तस्य ब्रह्मात्मा भगवानिति ॥१३४

"तथाहि तत्रैव द्वितीयाध्याये एकादशः श्लोकः—
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञान मद्वयम् ।
ब्रह्मे ति परमात्मेति भगवानिति शब्द्यते ॥२३॥"

ब्रह्म ह्यङ्गप्रभा तस्य निर्विशेषं प्रकाशते ।
यथा ज्योतिर्मयो भाति चर्म्मचक्षुष्मतां रविः ॥१३५

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये षट्त्रिंशः श्लोकः—
यस्य प्रभा प्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम् ।
तद्ब्रह्म निष्कल मनन्तमशेषभूतं
गोविन्द मादिपुरुषं तमहं भजामि ॥२४॥"

परमात्मापि यः सोऽयं कृष्णस्यांशो भवेत् पुनः ।
सर्वेषामात्मनामात्मा कृष्णः सर्वशिरोमणिः ॥१३६

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये
द्वापञ्चाशः श्लोकः—

कृष्णमेनमवेहि त्वमात्मान मखिलात्मनाम् ।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥२५॥

"तथाहि श्रीमद्भगवद्गीतायां दशमाध्याये द्वाचत्वारिंशः
श्लोकः—

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्न मेकांशेन स्थितो जगत् ॥२६॥"

भक्त्या भगवतो रूपं सम्पूर्ण मुपलभ्यते ।
तस्यानन्तस्वरूपत्वमेकस्मिन्नेव विग्रहे ॥१३७

स्वयंरूपस्तदेकात्मरूपावेशौ च नामतः ।
आदावेव त्रिभी रूपैर्भगवान् स विराजते ॥१३८

स्वयंरूपः स्वयंसिद्धप्रकाशः स्फुरति द्विधा ।
एकः कृष्णः स्वयंरूपो व्रजे गोपकलेवरः ॥१३९

प्राभव-वैभवाभ्याञ्च रूपाभ्यां भासते द्विधा ।
एकमेव वपू रासे बहुरूपं यथा भवेत् ॥१४०

महिषीणां विवाहेऽसौ बह्वी मूर्त्ती र्दधौ पुनः ।
तत्प्राभवविलासोऽयमिति शास्त्रैः समर्थ्यते ॥१४१

कायव्यूहो न चैवायं सोभर्य्यादिमुनेरिव ।
नारदस्याभविष्यन्न विस्मयो हि तथा सति ॥१४२

"तथाहि श्रीमद्भागवते दशमस्कन्ध ऊनसप्ततितमाध्याये
द्वितीयः श्लोकः—

चित्रं वतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥२७॥"

सा तनू राकृतिः सापि यदि भाति पृथक्तया ।
तद्भावावेशभेदेन भासते नाम वैभवम् ॥१४३

तस्यानन्तप्रकाशस्य मूर्त्तिभेदो न विद्यते ।
वर्णाकारास्त्रभेदेन नामभेदो हि जायते ॥१४४

"तथाहि श्रीमद्भागवते दशमस्कन्धे चत्वारिंशाध्याये सप्तमः श्लोकः—

अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते ।
यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्त्येकमूर्त्तिकम् ॥२८॥"

स वैभवप्रकाशेन वलरामोऽभवत् पुनः ।
वर्णमात्रेण भिन्नोऽयं सर्वमन्यच्च कृष्णवत् ॥१४५
स वैभवप्रकाशाच्च देवकीतनयो यथा ।
जातु द्विभुजरूपोऽथ जात्वभूच्च चतुर्भुजः ॥१४६
विलासः प्राभवो नाम यदासौ द्विभुजोऽभवत् ।
वैभवाख्यः प्रकाशः स्यात् सति तस्मिंश्चतुर्भुजे ॥१४७
स्वयंरूपे भवेद् गोपवेशो गोपाभिमानिता ।
वासुदेवे क्षात्रवेशः क्षत्रियम्मन्यता तथा ॥१४८
सौन्दर्य्यैश्वर्य्य-माधुर्य्य-वैदग्ध्यानां विलासिता ।
उल्लसत्येव भूयिष्ठं श्रीव्रजेश्वरनन्दने ॥१४९
क्षुब्धोऽभूद् वासुदेवोऽसौ वीक्ष्य गोविन्दमाधुरीम् ।
तामास्वादयितुं सम्यग् लोभवैवश्यमाययौ ॥१५०

"तथाहि ललितमाधवे चतुर्थाङ्के ऊनविंशः श्लोकः—

उद्गीर्णाद्भुत-माधुरी-परिमलस्याभीरलीलस्य मे
द्वैतं हन्त समीक्षयन्मुहुरसौ चित्रीयते चारणः ।
चेतः केलिकुतूहलोत्तरलितं सत्यं सखे, मामकं
यस्य प्रेक्ष्य स्वरूपतां व्रजवधूसारूप्य मन्विच्छति ॥२९॥"

गन्धर्वान् नृत्यतः पश्यन्मथुरायां यथा पुनः ।
द्वारकायाञ्च चित्राणि दृष्ट्वा लुब्धोबभूव सः ॥१५१

"तथाहि ललितमाधवेऽष्टमाङ्के द्वात्रिंशः श्लोकः—

अपरिकलितपूर्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः ।
अय महमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभस मुपभोक्तुं कामये राधिकेव ॥३०॥"

तद्वपुः पृथगाभासं किञ्चिच्च पृथगाकृति ।
भावावेशाकृते र्भेदात्तदेकात्मक मुच्यते ॥१५२
तदेकात्मकरूपस्य विलास-स्वांशकौ द्विधा ।
विलास-स्वांशयोर्भेदात्तद्भेदो विविधो भवेत् ॥१५३
प्राभवे वैभवे भेदाद्विलासोऽपि द्विधा भवेद् ।
विलासभेदात्तस्यापि प्रकाराः स्युरनन्तकाः ॥१५४
विलासाः प्राभवा वासुदेवः सङ्कर्षणस्तथा ।
प्रद्युम्नश्चानिरुद्धश्च मुख्याश्चत्वार एव ते ॥१५५
गोपरूपो व्रजे रामः क्षत्ररूपः पुरीद्वये ।
वर्ण-वेशभिदा तेन विलासो नाम कथ्यते ॥१५६
वैभवस्य प्रकाशाच्च विलासात् प्राभवस्य च ।
मूर्त्त्यैक्योऽपि बलो भावभेदाभ्यामेव भासते ॥१५७
आद्या एते चतुर्व्यूहा न केऽपि सन्ति तादृशाः ।
एतेऽनन्तचतुर्व्यूहगणप्राकट्यहेतवः ॥१५८
कृष्णस्यैव हि चत्वारो विलासाः प्राभवा इमे ।
द्वारका-मथुरापुर्य्यो रेते नित्य-निवासिनः ॥१५६
चतुर्विंशतिरुद्भूता मूर्त्तयस्तच्चतुष्टयात् ।
भिन्नास्त्रा भिन्ननामानो विलासा वैभवा इमे ॥१६०
पुनः कृष्णश्चतुर्व्यूहरूपं गृह्णाति पूर्ववत् ।
श्रीनारायणरूपेण परव्योमावसत्यसौ ॥१६१
भूय एव चतुर्व्यूहास्तस्मादेव प्रकाशिताः ।
त आवरणरूपेन वसन्ति तत्समन्ततः ॥१६२

चतुर्णाञ्च पुनस्तेषां विभिन्ना मूर्त्तयस्त्रिशः ।
विलासस्फुर्त्तयस्तेषां नामतः केशवादयः ॥१६३
भिन्ना नाम्नैव ते सर्वे पृथक् चक्रादिधारिणः ।
केशवो वासुदेवस्य श्रीनारायणमाधवौ ॥१६४
सङ्कर्षणस्य गोविन्दो विष्णुश्च मधुसूदनः ।
अपरोह्येष गोविन्दो नायं व्रजेन्द्रनन्दनः ॥१६५
वामनः श्रीधरश्चैव प्रद्युम्नस्य त्रिविक्रमः ।
दामोदरो हृषीकेशः पद्मनाभोऽनिरुद्धतः ॥१६६
द्वादशानां हि मासानामिमे देवाः प्रकीर्त्तिताः ।
केशवो मार्गशीर्षेऽथ पौषे नारायणः पुनः ॥१६७
माघे च माधवो देवो गोविन्दो मासि फाल्गुने ।
चैत्रमासे तथा विष्णु वैंशाखे मधुसूदनः ॥१६८
ज्यैष्ठे त्रिविक्रमोदेव आषाढ़े मासि वामनः ।
श्रावणे श्रीधरो भाद्रे हृषीकेशश्च देवता ॥१६९
आश्विने पद्मनाभश्च दामोदरश्च कार्त्तिके ।
राधादामोदरः सोऽयं श्रीव्रजेश्वरनन्दनः ॥१७०
तस्य द्वादश नामानि मन्त्रास्तिलकधारणे ।
तत्तत्स्थानं स्पृशेन्नाम्ना तथैवाचमने पुनः ॥१७१
एषामेव चतुर्णान्तु विलासा अष्ट कीर्त्तिताः ।
वच्मि नामानि सर्वेषामेषां शृणु सनातन ॥१७२
श्रीपुरुषोत्तमः कृष्णो नृसिंहोऽथ जनार्दनः ।
अच्युताधोक्षजोपेन्द्रा हरिश्चेत्यष्ट नामतः ॥१७३
विलासौ वासुदेवस्याधोक्षजपुरुषोत्तमौ ।
सङ्कर्षणविलासौ द्वावुपेन्द्रश्च तथाच्युतः ॥१७४
प्रद्युम्नस्य विलासौ द्वौ श्रीनृसिंहजनार्दनौ ।
विलासावनिरुद्धस्य तौ द्वौ कृष्णहरी इति ॥१७५

तत्प्राभवविलासाग्र्याश्चत्वारिंशदिमे मताः ।
अस्त्रधारणभेदेन नामान्येषां पृथक् पृथक् ॥१७६
एषु येषां भवेद्भेदस्तत्तदाकारवेशयोः ।
ते त एव विभिन्नाश्च विलासा वैभवा मताः ॥१७७
त्रिविक्रमो नृसिंहश्च पद्मनाभश्च वामनः ।
हरिकृष्णादयः सर्वे आकृत्यैव विलक्षणाः ॥१७८
कृष्णस्य वासुदेवाद्या विलासाः प्राभवाः खलु ।
चतुर्णामपि तेषाञ्च विलासा विंशतिः पुनः ॥१७९
वैकुण्ठे परमव्योमधामन्येते पृथक् पृथक् ।
त्रिशः क्रमेण तिष्ठन्ति पूर्वादिष्वष्टदिक्षु ते ॥१८०
सर्वेषां नित्यधामैतत् परमव्योम यद्यपि ।
ब्रह्माण्डेषु क्वचित् केचिन्निवसन्ति तथापि ते ॥१८१
अस्ति नारायणो नित्यं परमव्योमधामनि ।
उपर्य्यस्य परव्योम्नः कृष्णलोकविभूतयः ॥१८२
एकस्य कृष्णलोकस्य प्रकारा स्त्रिविधाः पुनः ।
गोकुलं मथुरा द्वारावतीत्याख्यासमन्विताः ॥१८३
तिष्ठेत् सन्निहितो नित्यं मथुरायां हि केशवः ।
जगन्नाथो वसेन्नीलाचले श्रीपुरुषोत्तमः ॥१८४
प्रयागे माधव स्तिष्ठेन्मन्दारे मधुसूदनः ।
आनन्दे वासुदेवश्च पद्मनाभो जनार्दनः ॥१८५
बिष्णुकाञ्च्यां वसेद्विष्णु र्हरिर्मायापुरे तथा ।
सन्त्येवं मूर्त्तयो बह्व्यो ब्रह्माण्डाभ्यन्तरस्थिताः ॥१८६
अधिब्रह्माण्ड मित्थं हि सर्वं एते प्रकाशिताः ।
विलासा यस्य खण्डेषु नवसु द्वीपसप्तके ॥१८७
प्रकाशस्तस्य सर्वत्र भक्तान् सुखयितुं परम् ।
जगत्यधर्मनाशाय धर्मं स्थापयितुं तथा ॥१८८

गण्यन्ते मध्य एतेषा मवतारा हि केचन ।
त्रिविक्रमश्च विष्णुश्च नृसिंहो वामनो यथा ॥१८९
अस्त्रधारणभेदो हि नामभेदस्य कारणम् ।
चक्रादीनां धृतेर्भेदचिह्नं शृणु सनातन ॥१९०
दक्षिणाधः करात् यावद्वामपाणि मधःस्थितम् ।
गणयेत् क्रमशश्चक्रादिकास्त्राणां हि धारणम् ॥१९१
याश्चतुर्विंशतिं मूर्त्तीः प्राह सिद्धान्तसंहिता ।
ब्रुवेऽहं तन्मतेनादौ चक्राद्यस्त्रविधारनम् ॥१९२
वासुदेवो गदा-शङ्ख-चक्र-पद्मधरो भवेत् ।
सङ्कर्षणो गदा-शङ्ख-पद्म-चक्रकरः स्मृतः ॥१९३
प्रद्युम्नः शङ्ख-चक्रास्त्र-गदा-पद्मधरो मतः ।
अनिरुद्धो भवेच्चक्र-गदा-शङ्खाब्जधारकः ॥१९४
वासुदेवादयो व्योम्नि परे स्वस्वास्त्रधारिणः ।
तथान्येऽपि मयोच्यन्ते क्रमात्ते स्वास्त्रपाणयः ॥१९५
केशवः पद्म-शङ्खारि-गदापाणि रिहोच्यते ।
शङ्ख-पद्म-गदा-चक्रधरो नारायणोभवेत् ॥१९६
माधवश्च गदा-चक्र-शङ्ख-पद्मकरः स्मृतः ।
श्रीगोविन्दस्तथा चक्र-गदाब्ज-शङ्खधारकः ॥१९७
विष्णुमूर्त्तिं गदा-पद्म-चक्र-शङ्खान् बिभर्त्त्यसौ ।
उच्यते शङ्ख-चक्राब्ज-गदाभृन्मधुसूदनः ॥१९८
भवेत् पद्म-गदा-चक्र-शङ्खधारी त्रिविक्रमः ।
शङ्ख-चक्र-गदा-पद्म-पाणिः श्रीवामनो मतः ॥१९९
पद्म-चक्र-गदा-शङ्खधरः श्रीधर उच्यते ।
हृषीकेशो गदा-शङ्ख-पद्म-चक्रधरो भवेत् ॥२००
पद्मनाभो भवेच्छङ्ख-पद्म-चक्र-गदाकरः ।
पद्म-शङ्ख-गदा-चक्रधरो दामोदरः स्मृतः ॥२०१

चक्र-पद्म-पाञ्चजन्य-गदाभृत् पुरुषोत्तमः ।
अच्युतश्च गदा-पद्म-शङ्खचक्रधरो मतः ॥२०२
चक्र-पद्म-गदा-शङ्खा नृसिंहेन करै धृताः ।
गदाधरकराः शङ्ख-पद्म-चक्र-गदान्विताः ॥२०३
शङ्ख-चक्र-गदा-पद्मकरः श्रीहरिरुच्यते ।
कृष्णः शङ्ख-गदा-चक्र-पद्मभूषित-पाणिकः ॥२०४
अधोक्षजो गदा-पद्म-शङ्ख-चक्रधरो भवेत् ।
उपेन्द्रस्य कराः शङ्ख-गदाब्ज-चक्रशोभिताः ॥२०५
हयशीर्षपञ्चरात्रे कथ्यन्ते षोड़श त्विमे ।
उच्यते सम्मतं तस्याधुना चक्रादिधारणम् ॥२०६
पद्म-शङ्ख-गदा-चक्रधरः केशव उच्यते ।
भवेच्चक्र-गदा-पद्म-शङ्खपाणिस्तु माधवः ॥२०७
भेदान्नारायणस्यैवं स नानास्त्रभिदान्वितः ।
एवमित्यादयो भेदाः सर्वेषामस्त्रधारिणाम् ॥२०८
स स्वयंभगवाँल्लीलापुरुषोत्तम इत्युभे ।
नामनी धृतवानेष श्रीव्रजेश्वरनन्दनः ॥२०९
पुर्य्यां आवरणं नाम कीर्त्तितं सर्वतः पुरीम् ।
नवभिर्व्यूहरूपैश्च भासन्ते नव मूर्त्तयः ॥२१०

"तथाहि लघुभागवतामृते पूर्वखण्डे पादविभूतिकथने

सात्वततन्त्रम्—

चत्वारो वासुदेवाद्या नारायणनृसिंहकौ ।
हयग्रीवो वराहश्च ब्रह्मा चेति नवोदिताः ॥३१॥"

तत्प्रकाशविलासस्य कृतैषा विवृतिर्मया ।
श्रूयता मधुना तस्य स्वांशभेदः सनातन ॥२११
सङ्कर्षणादि-मत्स्यादी तस्य भेदावुभौ मतौ ।
एके पुरुषावतारा अन्ये लीलावतारकाः ॥२१२

गुणावतारकाश्चान्ये मन्वन्तरावतारकाः ।
युगावतारकाश्चान्ये शक्त्यावेशावतारकाः ॥२१३
श्रीविग्रहस्य धर्मो हि बाल्यपौगण्डयोर्युगम् ।
व्रजेन्द्रनन्दनेनैवं रूपैर्लीला विधीयते ॥२१४
अनन्ता अवतारा हि कृष्णस्य गणनातिगाः ।
कृतं दिग्दर्शनं शाखाचन्द्रन्यायेन तन्मया ॥२१५

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे तृतीयाध्याये षड् विंशः श्लोकः—

अवताराह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ।
यथाविदासिनः कूल्याः सरसः स्युः सहस्रशः ॥३२"

कृष्णः प्रथम मेवासौ स्यात् पूरुषावतारकः ।
ततस्त्रैविध्यमाप्नोति सोऽयमेव तु पूरुषः ॥२१६

"तथाहि श्रीलघुभागवतामृते पूर्व्वखण्डे सात्वततन्त्रवचनम्—

विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ।
एकन्तु महतः स्रष्टृ द्वितीयन्त्वण्डसंस्थितम् ॥
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते ॥३३॥"

कृष्णस्यानन्तशक्तीनां तिस्रो मुख्या हि शक्तयः ।
इच्छाशक्तिः क्रियाशक्ति र्ज्ञानशक्तिश्च नामतः ॥२१७
इच्छाशक्तिमयः कृष्णः सर्वकर्त्ता स्वयेच्छया ।
ज्ञानशक्तिमयो वासुदेवश्चित्ताधिनायकः ॥२१८
नैव कापि भवेत् सृष्टि रिच्छा-ज्ञान-क्रिया विना ।
मिलिताः शक्तयस्तिस्रः प्रपञ्चं रचयन्ति ताः ॥२१९
क्रियाशक्तिप्रधानो हि देवः सङ्कर्षणो भवेत् ।
प्राकृताप्राकृतं सर्वं बलरामः सृजत्यतः ॥२२०
अहङ्कार मधिष्ठाय स कृष्णस्येच्छया पुनः ।
श्रीमद्गोलोक-वैकुण्ठौ चिच्छक्त्या सृजति प्रभुः ॥२२१

तच्चिच्छक्तेः विलासास्ते नित्याश्चाकृत्रिमा अपि ।
प्रकाशो जायते तेषां श्रीमत्सङ्कर्षणेच्छया ॥२२२

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये द्वितीयः श्लोकः—

सहस्रपत्रं कमलं गोकुलाख्यं महत्पदम् ।
तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम् ॥३४॥"

ब्रह्माण्डानां गणं सर्वं माययैव सृजत्यसौ ।
ब्रह्माण्डकारणं नैव जड़ं भवितुमर्हति ॥२२३
ईश्वरस्य विना शक्तिं जड़ात् सृष्टिर्न सम्भवेत् ।
तत्र सङ्कर्षणः शक्ति मादधात्येव सृष्टये ॥२२४
ईश्वरस्य तु शक्त्यैव प्रकृति र्हि सृजत्यदः ।
अनलस्य यथा शक्त्या लोहं दाहक्षमं भवेत् ॥२२५

"तथाहि श्रीमद्भागवते दशमस्कन्धे षट्चत्वारिंशाध्याये द्वाविंशः श्लोकः—

एतौ हि विश्वस्य च वीजयोनी रामो मुकुन्दः पुरुषः प्रधानम् ।
अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥३५॥"

प्रपञ्चेऽवतरत्यत्र या मूर्त्तिः सृष्टिहेतवे ।
गृह्णीयादवताराख्यामैश्वरी मूर्त्तिरेव सा ॥२२६
मायातीते परव्योम्नि ते सर्वेऽवस्थिता अपि ।
अवतीर्य्यावताराख्यां लभन्ते भुवनत्रये ॥२२७
मायायां दृष्टिमाधातुमसौ सङ्कर्षणः प्रभुः ।
आदौ पूरुषरूपेणावतीर्णोऽभवदीश्वरः ॥२२८

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे तृतीयाध्याये प्रथमः श्लोकः—

जगृहे पौरुषं रूपं भगवान्महदादिभिः ।
सम्भूतं षोड़शकलमादौ लोकसिसृक्षया ॥३६॥"

"तथाहि तत्रैव द्वितीयस्कन्धे षष्ठाध्याये चतुस्त्रिंशः श्लोकः—

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ॥३७॥"

पुरुषो विरजामध्ये शयानोऽसौ विराजते ।
स कारणाब्धिशायीति नाम्ना विश्वस्य कारणम् ॥२२६
पारे तत्कारणाम्भोधे र्नित्यं मायावतिष्ठते ।
न तस्या विरजापारे परव्योम्नि गतिर्भवेत् ॥२३०

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे नवमाध्याये दशमः श्लोकः—

प्रवर्त्तते यत्र रजस्तमस्तयोः
सत्त्वञ्च मिश्रं नच कालविक्रमः ।
न यत्र माया किमुतापरे हरे-
रनुव्रता यत्र सुरासुरार्चिताः ॥३८॥"

द्वे वृत्ती खलु मायाया माया प्रधान मित्युभे ।
निमित्तं जगतो मायोपादानं प्रकृतिः पुनः ॥२३१
पुरुषः सोऽवधानेन मायां प्रति निरीक्षते ।
क्षोभितायां पुनस्तस्यामाधत्ते वीर्यमग्रतः ॥२३२
प्रकृतिं स्पृशति स्वाङ्गविशेषाभासरूपतः ।
जीवरूपं ततो वीजं समर्पयति तत्र सः ॥२३३

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे ऊनत्रिंशाध्यायेऽष्टादशः श्लोकः—

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।
आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम् ॥३९॥"

"तथाहि तत्रैव पञ्चमाध्याये षड़्विंशः श्लोकः—

कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ।
पुरुषेणात्मभूतेन वीर्य्यमाधत्त वीर्य्यवान् ॥४०॥"

महत्तत्त्वादहङ्कार स्त्रिविधो जायते ततः ।
देवतेन्द्रियभूतानि जायन्ते च ततः क्रमात् ॥२३४
ब्रह्माण्डानां गणः सृष्टः सर्वतत्त्वैश्च संहतैः ।
ब्रह्माण्डानामनन्तानां संख्यां कर्त्तुं न शक्यते ॥२३५

पुरुषोऽसौ महत्स्रष्टा महाविष्णवभिधानकः ।
ब्रह्माण्डाणा मनन्तानां रोमकूपेऽस्य संस्थितिः ॥२३६
यथा गवाक्षमार्गेण रजांस्यायान्ति यान्ति च ।
ब्रह्माण्डानि वहिर्यान्ति पुरुषश्वसितैस्तथा ॥२३७
पुनरभ्यन्तरं यान्ति श्वासैस्तस्य महात्मनः ।
तस्यैवानन्तमैश्वर्य्यं मायापारेऽवतिष्ठते ॥२३८

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये चतुष्पञ्चाशः श्लोकः—
यस्यैकनिश्वसितकाल मथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः ।
विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्द मादिपुरुषं तमहं भजामि ॥४१॥"

ब्रह्माण्डानामनन्तानामन्तर्य्यामी भवेदयम् ।
कारणाम्भोधिशायी च तथा सर्वजगत्प्रभुः ॥२३९
प्रथमस्य मया तत्त्वमाख्यातं पुरुषस्य हि ।
महिमानं द्वितीयस्य श्रूयता मधुना त्वया ॥२४०
सृष्ट्वासौ पुरुषोऽनन्तब्रह्माण्डकोटिमादितः ।
विवेशैकैकमण्डञ्च बहुमूर्त्तिः स्वयं भवन् ॥२४१
प्रविष्टस्तत्र सोऽद्राक्षीत् सर्वतस्तमसावृतम् ।
अवकाश मवस्थातुमपश्यंश्च व्यचिन्तयत् ॥२४२
ब्रह्माण्डार्द्धं प्रपूर्य्याथ निजाङ्गस्वेदवारिभिः ।
अशेत शेषशय्यायां तत्रैव तेषु वारिषु ॥२४३
नाभिपद्मात्ततस्तस्य पद्ममेकं समुद्गतम् ।
तस्मिन्नेवाभवत् पद्मे ब्रह्मणो जननं तदा ॥२४४
पद्मनालेऽभवंस्तत्र भुवनानि चतुर्दश ।
तत्र ब्रह्मा स्वयं भूत्वा सर्वां सृष्टिं करोति सः ॥२४५

विष्णुरूपं गृहीत्वासौ जगत् सर्वञ्च रक्षति ।
गुणातीतस्य तद्विष्णो र्गुणैः स्पर्शो न जायते ॥२४६

रुद्ररूपं समादाय जगत् संहरति प्रभुः ।
सृष्टिपालनसंहारा भवन्त्येते यदिच्छया ॥२४७

तस्य गुणावतारा हि ब्रह्म-विष्णु-शिवा इति ।
सृष्टिस्थितिलयेष्वेव त्रय एतेऽधिकारिणः ॥२४८

यं गर्भोदकशायीति हिरण्यगर्भ इत्यपि ।
अन्तर्य्यामीति साहस्रशीर्षेति गायति श्रुतिः ॥२४९

ब्रह्माण्डेश्वर एवायं द्वितीयः पुरुषो मतः ।
मायाया आश्रयोऽप्येष मायापार मधिष्ठितः ॥२५०

तृतीयः पुरुषो विष्णु र्गुणावतार उच्यते ।
अवतारद्वयीमध्ये स एकः परिगण्यते ॥२५१

अन्तर्य्यामीति विख्यातः स विराड्-व्यष्टिजीवयोः ।
अयं क्षीरोदशायी च सर्वेषां पालकः प्रभुः ॥२५२

ये पुरुषावतारास्ते मयात्रैव निरूपिताः ।
शृणु लीलावताराणां तत्त्वमत्र सनातन ॥२५३

तस्य लीलावताराणां गणना नैव युज्यते ।
अतो दिग्दर्शनन्यायात् प्राधान्येनैवमुच्यते ॥२५४

मत्स्यः कूर्मो रघुश्रेष्ठो नरसिंहश्च वामनः ।
वराहाद्याश्च कथ्यन्ते कस्तान् गणयितुं क्षमः ॥२५५

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वितीयाध्याये चतुस्त्रिंशः

श्लोकः—

मत्स्याश्व-कच्छप-नृसिंह-वराह-हंस-
राजन्य-विप्र-विबुधेषु कृतावतारः ।
त्वं पासि न स्त्रिभुवनञ्च तथाधुनेश
भारं भुवो हर यदूत्तम वन्दनं ते ॥४२॥"

कृतं लीलावताराणामिह दिग्दर्शनं मया ।
ब्रुवे गुणावताराणां विवृतिं शृणु सम्प्रति ॥२५६
ब्रह्म-विष्णु-शिवा एते गुणावतारकास्त्रयः ।
सृष्ट्यादिकर्म कुर्वन्ति स्वीकुर्वन्तो गुणत्रयम् ॥२५७
कोऽपि जीवोत्तमः पुण्यं भक्तिमिश्रं चरेद् यदि ।
रजोगुणेन तच्चित्तं कृष्ण उद्भासयं स्तदा ॥२५८
गर्भोदशायिना तत्र शक्तिं सञ्चारयन् स्वयम् ।
गृहीत्वा ब्रह्मणो रूपं व्यष्टिसृष्टिं करोत्यसौ ॥२५९

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये पञ्चाशत्तमः श्लोकः—

भास्वान् यथाश्मशकलेषु निजेषु तेजः
स्वीयं कियत् प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एव जगदण्डविधानकर्त्ता
गोविन्द मादिपुरुषं तमहं भजामि ॥४३॥"

यदि योग्यतमो जीवः क्वापि कल्पे न लभ्यते ।
स्वांशेनैव भवेद् ब्रह्मा तदैव स्वयमीश्वरः ॥२६०

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टषष्ठितमाध्याये
षड् विंशः श्लोकः—

यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालै-
र्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ।
ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः
श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥४४॥"

निजांशकलया कृष्णः स्वीकुर्वाणस्तमोगुणम् ।
मायामादाय संहर्त्तुं रुद्ररूपं दधात्यसौ ॥२६१
भिन्नाभिन्नं दधानोऽपि रूपं मायाबिकारतः ।
अभिन्नोऽपीश्वरा द्रुद्रो भिन्न एव स्वरूपतः ॥२६२

दुग्धमेवाम्लसंयोगाद्दध्ने सम्पद्यते यथा ।
अभिन्नमपि तद्दुग्धान्नतद्दुग्धं भवेत् पुनः ॥२६३

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये पञ्चचत्वारिंशत्तमः श्लोकः—

क्षीरं यथा दधि विकार-विशेष-योगात्
सञ्जायते नतु ततः पृथगस्ति हेतोः ।
यः शम्भुतामपि तथा समुपैति कार्य्याद्
गोविन्द मादिपुरुषं तमहं भजामि ॥४५॥"

शिवस्तमोगुणावेशान्मायाशक्तियुतोऽभवत् ।
मायातीतो गुणातीतः श्रीकृष्णः परमेश्वरः ॥२६४

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टाशीतितमाध्याये द्वितीयः श्लोकः—

शिवः शक्तियुतः शश्वत्त्रिलिङ्गो गुणसंवृतः ।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥४६॥"

"तथाहि तत्रैव चतुर्थः श्लोकः—

हरि र्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः ।
स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥४७॥"

विष्णुरूपोऽवतारोऽयं पालनार्थं निजांशतः ।
मायापारं गतं सत्त्वगुण मेवावलम्वते ॥२६५
स्वरूपैश्वर्य्यसम्पूर्णः प्रायः कृष्णसमो हि सः ।
कृष्णोऽंशी सोऽंश इत्येवं श्रुतिभिः परिगीयते ॥२६६

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये द्वापञ्चाशत्तमः श्लोकः—

दीपार्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतु-समान-धर्मा ।
यस्तादृगेव हि च विष्णुतया विभाति
गोविन्द मादिपुरुषं तमहं भजामि ॥४८॥"

आदेशपालकौ ब्रह्मशिवौ भक्तावतारकौ ।
विश्वं पालयितुं विष्णुः कृष्णरूपाकृतिर्भवेत् ॥२६७

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे षष्ठाध्याये त्रिंशः श्लोकः—

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥४६॥"

मन्वन्तरावताराणां शृणु तत्त्वं सनातन ।
अशक्या गणना तेषां शृणु तत्कारणं पुनः ॥२६८
एकाहे ब्रह्मणो मन्वन्तराणि स्यु श्चतुर्दश ।
ईश्वरः कुरुते तत्रावतारांश्च चतुर्दश ॥२६६
तेषां तन्मासि; विंशत्यधिका स्याच्च चतुःशती ।
ब्राह्मेऽब्दे पञ्चसाहस्रं चत्वारिंशत उत्तरम् ॥२७०
मन्वन्तरावताराः स्यु र्ब्रह्मायुषि शताब्दमे ।
चत्वारिंशत्सहस्रातिरिक्तं ते लक्षपञ्चकम् ॥२७१
एवं संख्याप्यनन्तेषु ब्रह्माण्डेषु परीक्ष्यताम् ।
एकः श्वासो महाविष्णो र्ब्रह्मायुः पुनरुच्यते ॥२७२
निश्वासस्य महाविष्णोः परिच्छेदो न विद्यते ।
मन्वन्तरावताराणां संख्यासीमा निरूप्यताम् ॥२७३
यज्ञः स्वायम्भुवे मन्वन्तरे स्वारोचिषे विभुः ।
उत्तमे सत्यसेनश्च तामसे हरिनामकः ॥२७४
वैकुण्ठो रैवते चाक्षुषेऽजितश्चाथ वामनः ।
वैवस्वतेऽथ सावर्णे सार्वभौमस्तथर्षभः ॥२७५
दक्षेऽथ ब्रह्मसावर्णे विष्वक्सेनोऽथ धर्मके ।
धर्मसेतुः सुधामा च रौद्रे योगेश्वरः पुनः ॥२७६
दैवेऽथैन्द्रे बृहद्भानुर्नाम मन्वन्तरेषु च ।
चतुर्दशावतारास्ते कथिता नामतोऽधुना ॥२७७

ततो युगावताराणां शृणु तत्त्वं सनातन ।
चतुर्युगं क्रमात् सत्यं त्रेता च द्वापरः कलिः ॥२७८

शुक्लो रक्तस्तथा कृष्णः पीतो वर्णो यथाक्रमम् ।
युगधर्मांश्चरेत् कृष्णो वर्णांस्तांश्चतुरो दधत् ॥२७६

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टमाध्याये त्रयोदशः श्लोकः—

आसन् वर्णास्त्रयोह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥५०॥"

सत्ये शुक्लवपुर्ध्यानधर्ममाचारयत्यसौ ।
कृपया यो निजाभीष्टं कर्दमाय वरं ददौ ॥२८०

कृष्णध्यानञ्च कुर्वन्ति जना ज्ञानाधिकारिणः ।
त्रेतायां यज्ञधर्मं स कारयेद्रक्तविग्रहः ॥२८१

कृष्णपादार्चनं धर्मं द्वापरे स प्रचारयन् ।
कृष्णमूर्त्तिं र्जनान् कृष्णपूजानिष्ठान् करोति सः ॥२८२

"तथाहि श्रीमद्भागवते एकादशस्कस्धे पञ्चमाध्याये पञ्चविंशः श्लोकः—

द्वापरे भगवान् श्यामः पीतवासा निजायुधः ।
श्रीवत्सादिभिरङ्कैश्च लक्षणै रुपलक्षितः ॥५१॥"

"तथाहि तत्रैवाष्टाविंशः श्लोकः—

नमस्ते वासुदेवाय नमः सङ्कर्षणाय च ।
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥५२॥"

इति मन्त्रेण कृष्णार्चा क्रियते द्वापरे जनैः ।
नाम-सङ्कीर्त्तनं धर्मः कृष्णस्येह कलौ युगे ॥२८३

पीतवर्णां तनुं बिभ्रत् कृष्णनाम प्रचारयन् ।
प्रेमभक्तिं ददात्येष भुवि भक्तजनैः सह ॥२८४

व्रजेन्द्रनन्दनेनैवं जना धर्मे प्रवर्त्तिताः ।
प्रेम्णा नृत्यन्ति गायन्ति कुर्वन्तो नामकीर्त्तनम् ॥२८५

"तथाहि श्रीमद्भागवते एकादशस्कन्धे पञ्चमाध्याय ऊनत्रिंशः श्लोकः—

कृष्णवर्णं त्विषा कृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः ॥५३॥"

युगेषु त्रिषु चान्येषु यत् फलं लभ्यते जनैः ।
तत् फलं कृष्णनाम्नैव प्राप्यतेऽत्र कलौ युगे ॥२८६

"तथाहि तत्रैव द्वादशस्कन्धे तृतीयाध्याये त्रयश्चत्वारिंशचतुश्चत्वारिंशौ श्लोकौ—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात् ॥५४॥"

"तथाहि विष्णुपुराणे षष्ठांशे द्वितीयाध्याये सप्तदशः श्लोकः—

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्त्य केशवम् ॥५५॥"

"तथाहि श्रीमद्भागवत एकादशस्कन्धे पञ्चमाध्याये त्रयस्त्रिंशः श्लोकः—

कलिं सभाजयन्त्यार्य्या गुणज्ञाः सारभागिनः ।
यत्र सङ्कीर्त्तनेनैव सर्वस्वार्थोऽपि लभ्यते ॥५६॥"

मया गुणावताराणां गणो यः कथितः पुरा ।
असंख्येयः स संख्यातुं नैव केनापि शक्यते ॥२८७
चतुर्युगावतारानामेष्वैव गणना भवेत् ।
इत्येवाकर्णयन् भङ्गया तं पप्रच्छ सनातनः ॥२८८

बुद्धौ वृहस्पतेस्तुल्यो राजमन्त्री सनातनः ।
निःसङ्कोचमना एवमपृच्छत् कृपया प्रभोः ॥२८६
अतीव क्षुद्रजीवोऽस्मि नीचोऽहं नीचदेहभाक् ।
केनाह मवगच्छामि कोऽवतारः कलाविति ॥२६०
प्रभुणोक्तं यथा शास्त्राज् ज्ञायन्तेऽन्येऽवतारकाः ।
कलावत्रावतारोऽपि शास्त्रादेवावगम्यते ॥२६१
सर्वज्ञस्य मुनेर्वाक्यं तच्छास्त्रं हि प्रमाणकम् ।
अस्माकं किल जीवानां ज्ञानं भवति शास्त्रतः ॥२६२
अवतारोऽहमस्मीति नावतारो वदत्यपि ।
तल्लक्षणविचारेण तं सर्वे मुनयो विदुः ॥२६३

"तथाहि श्रीमद्भागवते दशमस्कन्धे दशमाध्याये त्रिंशः

श्लोकः—

यस्यावतारा ज्ञायन्ते शरीरिष्वशरीरिणः ।
तैस्तैरतुल्यातिशयैर्वीर्य्यैं र्देहिंष्वसङ्गतैः ॥५७॥"

स्वरूपलक्षण ञ्चैक मन्यत्ताटस्थ्यलक्षणम् ।
उभाभ्यां लक्षणाभ्यां तन्मुनिभि र्वस्तु बुध्यते ॥२६४
आकृतेः प्रकृतेस्तत्त्वज्ञानं स्वारूप्यलक्षणम् ।
यत्तु कार्य्येण तज्ज्ञानं तत् स्यात्तटस्थ्यलक्षणम् ॥२६५
व्यासो भागवतारम्भे मङ्गलाचार मादधत् ।
एतल्लक्षणयुग्मेन परमेशं न्यरूपयत् ॥२६६

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे प्रथमाध्याये प्रथमः

श्लोकः—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ।
तेजो-वारि-मृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥५८॥"

श्लोकेऽस्मिन् परशब्देन कृष्ण एव निरूपितः ।
उक्तञ्च सत्यशब्देन तस्य स्वारूप्यलक्षणम् ॥२९७
विश्वसृष्ट्यादिकं वेदाध्यापनं ब्रह्मणे तथा ।
अर्थज्ञत्वं स्वया शक्त्या मायापसारणं पुनः ॥२९८
सर्वान्येतानि कर्माणि तस्य ताटस्थ्यलक्षणम् ।
एवमन्यावताराणां तत्त्वानि मुनयो विदुः ॥२९९
ईशोऽवतारकाले तु जगद्गोचरतां व्रजेत् ।
एतल्लक्षणयुग्मेन कोऽपि वेद तमीश्वरम् ॥३००
ततः सनातनेनोक्तं यस्मिन्नीश्वरलक्षणम् ।
यस्य पीतं वपुः कार्य्यं प्रेमदानञ्च कीर्त्तनम् ॥३०१
भवेत् कृष्णावतारोऽसौ कलिकालेऽत्र निश्चितम् ।
तमेव ब्रूहि सुव्यक्तं संशयो मम यात्विति ॥३०२
श्रुत्वोक्तं प्रभुणा मुञ्च वाक्चातुर्य्यं सनातन ।
शक्त्यावेशावताराणां विवृतिं शृणु साम्प्रतम् ॥३०३
अशक्यगणनाः कृष्णशक्त्यावेशावतारकाः ।
तद्दिग्दर्शनवन्मुख्यमुख्यानत्र ब्रवीमि ते ॥३०४
गौणमुख्यतया शक्त्यावेशोऽपि दृश्यते द्विधा ।
साक्षाच्छक्त्यावताराश्च तथाभासविभूतयः ॥३०५
पृथुः परशुरामश्च नारदः सनकादयः ।
जीवरूपस्तथा ब्रह्मावेशावतार- नामकाः ॥३०६
शेषो वैकुण्ठवास्तव्योऽनन्तो धरणिधारकः ।
मुख्यावेशावतारा हि त एतेऽनन्तविस्तराः ॥३०७
नारदे भक्तिशक्तिर्हि ज्ञानशक्तिः सनादिषु
सृष्टिशक्तिस्तथा ब्रह्मण्यनन्ते भूमिधारिणी ॥३०८
शेषे स्वसेवनी शक्तिः पृथौ शक्तिश्च पालनी ।
वीर्य्यसञ्चारिणी दुष्टनाशिनी चेति भार्गवे ॥३०९

"तथाहि लघुभागवतामृते पूर्वखण्डे आवेशप्रकरणे, चतुर्थः श्लोकः—

ज्ञान-शक्त्यादिकलया यत्राविष्टो जनार्दनः ।
तयावेशा निगद्यन्ते जीवा एव महत्तमाः ॥५९॥"

आवेशाच्छक्तिभावस्य व्याप्तः कृष्णोऽखिलं जगत् ।
श्रीगीतैकादशाध्याये यथोक्तास्तद्विभूतयः ॥३१०

"तथाहि श्रीमद्भगवद्गीतायां दशमाध्याये एकचत्वारिंश-द्वाचत्वारिंश-श्लोकौ—

यद् यद् विभूतिमत् सत्त्वं श्रीमदूर्जित मेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम् ॥६०॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥६१॥"

शक्त्यावेशावताराश्च तावदुक्ता इमे मया ।
विचारं शृणु चेदानीं बाल्यपौगण्डधर्मयोः ॥३११
किशोरशेखरो धर्मी श्रीव्रजेश्वरनन्दनः ।
यदासौ प्रकटां लीला मनुष्ठातुमना भवेत् ॥३१२
मातरं पितरं भक्तानादौ प्रकटयं स्तदा ।
पश्चाज्जन्मादिका लीलाः क्रमेनैव प्रकाशयेत् ॥३१३

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां सप्त-विंशः श्लोकः—

वयसो विविधत्वेऽपि सर्वभक्तिरसाश्रयः ।
धर्मी किशोर एवात्र नित्यलीलाविलासवान् ॥६२॥"

सर्वाः प्रतिक्षणं लीलाः पूतनाहननादिकाः ।
अनुक्रमेण ता नित्या आस्ते प्रकटयन्नसौ ॥३१४
ब्रह्माण्डानामनन्तानां गणना नैव सम्भवेत् ।
ब्रह्माण्डे क्वापि तेषां हि क्वापि लीला प्रकव्यते ॥३१५

इत्थं ता निखिला लीला गङ्गाधारा इवासते ।
नित्यं प्रकटयत्येता व्रजेन्द्रनन्दनः स्वयम् ॥३१६
वाल्य-पौगण्ड-कैशोरप्राप्त्यैवासौ यथाक्रमम् ।
नित्यं करोति कैशोरलीला रासादिकाः पुन ॥३१७
लीला कृष्णस्य नित्येति सर्वशास्त्रै रुदाहृतम् ।
लीला नित्याः कथं नु स्युरिति बोद्धुं न शक्यते ॥३१८
वच्मि प्रदर्श्य दृष्टान्तं ततः सर्वे जना विदुः ।
नित्यत्वं कृष्णलीलानां ज्योतिश्चक्रप्रमाणतः ॥३१९
रविरावर्त्तते ज्योतिश्चक्रेनैव दिवानिशम् ।
सप्तद्वीपाम्बुधीन् सर्वान् क्रमेनैव विलङ्घयन् ॥३२०
रात्रिन्दिवं समग्रं स्यात् षष्टिदण्डप्रमाणकम् ।
पलानां त्रिसहस्री सा षट्शताभ्यधिका मता ॥३२१
सूर्य्योदयात् क्रमात् षष्टेर्दण्डानामुदयो भवेत् ।
एवं तैरष्टभिर्दण्डैरेकः प्रहर उच्यते ॥३२२
प्रथमादिचतुर्थस्य तस्यान्तेऽस्तं भवेत् पुनः ।
चतुष्प्रहररात्रान्ते पुनः सूर्य्योदयो भवेत् ॥३२३
चतुर्दशसु कृष्णस्य लीला मन्वन्तरेष्वपि ।
ब्रह्माण्डमण्डलं व्याप्य तथैवावर्त्तते क्रमात् ॥३२४
सपादेन शतेनाब्दैः कृष्णः प्रकटतां व्रजेत् ।
तथा व्रजपुरे तत्र विलासान् कृतवान् स्वयम् ॥३२५
आवर्त्तन्ते च तल्लीलाचक्रान्युल्मुकचक्रवत् ।
सर्वा लीलाः समग्रेषु ब्रह्माण्डेषु क्रमोदिताः ॥३२६
जन्म बाल्यञ्च पौगण्डं कैशोरञ्च चकासति ।
पूतनाहननाद्याश्च मौषलान्ता लसन्ति च ॥३२७
ब्रह्माण्डे क्वापि कृष्णस्य कापि लीलावतिष्ठते ।
निगमैश्च पुराणैश्च लीला नित्योच्यते ततः ॥३२८

गोलोके गोकुलं धाम विभु कृष्णसमं हि तत् ।
ते ब्रह्माण्डगणाः कृष्णेच्छया तत्रैव सन्ति च ॥३२९
अतो नित्यविहारोऽत्र गोलोके तस्य सम्भवेत् ।
क्रमात् प्रकटतां याति तद्ब्रह्माण्डगणेष्वपि ॥३३०
सर्वैश्वर्य्यमयः कृष्णो भाति पूर्णतमो व्रजे ।
परव्योम्नि पुरीयुग्मे पूर्णः पूर्णतरस्तथा ॥३३१

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां सप्तदशाधिक-शततमः श्लोकः—

हरिः पूर्णतमः पूर्णतरः पूर्ण इति त्रिधा ।
श्रेष्ठमध्यादिभिः शब्दैर्नाट्ये यः परिकीर्त्तितः ॥६३॥"

"तथाहि तत्रैव अष्टादश-ऊनविंशधिकशततमौ श्लोकौ—

प्रकाशिताखिलगुणः स्मृतः पूर्णतमो बुधैः ।
असर्वव्यञ्जकः पूर्णतरः पूर्णोऽल्पदर्शनः ॥६४॥
कृष्णस्य पूर्णतमता व्यक्ताभूद् गोकुलान्तरे ।
पूर्णता पूर्णतरता द्वारकामथुरादिषु ॥६५॥"
सोऽयं कृष्णो व्रजे पूर्णतमः श्रीभगवान् स्वयम् ।
अन्यत्रैकस्वरूपोऽपि पूर्णः पूर्णतरो भवेत् ॥३३२
कृतः कृष्णस्वरूपस्य विचारोऽत्र समासतः ।
अनन्तोऽपि न शक्नोति गदितुं तं सविस्तरम् ॥३३३
नान्तोऽस्ति तत्स्वरूपस्य कः संख्यातुं क्षमो भवेत् ।
कृतं दिग्दर्शनं शाखाचन्द्रन्यायेन तन्मया ॥३३४
आकर्णयत्यधीते वा य एवेदं स भाग्यवान् ।
तत्त्वं कृष्णस्वरूपस्य जानात्येव मनागपि ॥३३५
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥३३६

इति श्रीचैतन्यचरितामृते मध्यखण्डे श्रीभगवत्स्वरूपभेदविचारो नाम विंशः परिच्छेदः ।

मध्यलीलायामेकविंशः परिच्छेदः

"अगत्येकगतिं नत्वा हीनार्थाधिकसाधकम् ।
श्रीचैतन्यं लिखाम्यस्य माधुर्य्यैश्वर्य्यशीकरम् ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्यसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
सर्वेषां तत्स्वरूपाणां परव्योम्न्येव संस्थितिः ।
तद्वैकुण्ठान्यसंख्यानि तत्र सन्ति पृथक् पृथक् ॥२
योजनानि शतादीनि कोट्यन्तानि सुविस्तृतम् ।
एकैकं तत्र वैकुण्ठमिति शास्त्रेषु वर्णितम् ॥३
वैकुण्ठानि समस्तानि चिदानन्दमयानि तु ।
तेषु सन्ति षड़ैश्वर्य्यपूर्णाः सर्वे हि पार्षदाः ॥४
एकांशेऽनन्तवैकुण्ठगणो यस्य विराजते ।
कोऽस्ति तस्य परव्योम्नो विस्तारगणने क्षमः ॥५
तानि वैकुण्ठधामानि यस्यैव दलपङ्क्तयः ।
कर्णिका गण्यते कृष्णलोकः सर्वोपरिस्थितः ॥६
एवं तत्रावताराश्च षड़ैश्वर्य्यसमन्विताः ।
ब्रह्मेशौ नाप्नुतः सीमां तुच्छजीवस्य का कथा ॥७

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये एकविंशः श्लोकः—

को वेत्ति भूमन् भगवन् परात्मन्
योगेश्वरोती र्भवत स्त्रिलोक्याम् ।
क्वाहो कथं वा कति वा कदेति
विस्तारयन् क्रीड़सि योगमायाम् ॥२॥"

एवं दिव्या अनन्ताश्च सन्ति कृष्णस्य सद्गुणाः ।
येषामन्तं न गच्छन्ति ब्रह्मेशसनकादयः ॥८

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये सप्तमः श्लोकः—

गुणात्मनस्तेऽपि गुणान् विमातुं
हितावतीर्णस्य क ईशिरेऽस्य ।
कालेन यैर्वा विमिताः सुकल्पै-
र्भू-पांशवः खे मिहिका द्युभासः ॥३॥"

सन्तु ब्रह्मादयोऽनन्तः सहस्रवदनोऽप्यसौ ।
गायन्नपि सदा तस्य नैव याति गुणावधिम् ॥६

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे सप्तमाध्याये चत्वारिंशः श्लोकः—

नान्तं विदाम्यहममी मुनयोऽग्रजास्ते
मायाबलस्य पुरुषस्य कुतोऽवरा ये ।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम् ॥४॥"

तथा सोऽप्यस्तु कृष्णोऽपि सर्वज्ञानां शिरोमणिः ।
स्वगुणानां न लब्ध्वान्तं सतृष्णो वर्त्तते स्वयम् ॥१०

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याये त्रयस्त्रिंशः श्लोकः—

द्युपतय एव ते न ययुरन्तमनन्ततया
त्वमपि यदन्तराण्डनिचया ननु सावरणाः ।
ख इव रजांसि वान्ति वयसा सह यच्छ्रुतय-
स्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ॥५॥"

तेऽपि सन्तु तथा कृष्णोऽवतारोऽभूद् यदा ब्रजे ।
तच्चारित्र्यविचारस्तु मनसामप्यगोचरः ॥११

स ससर्ज क्षणेनैव प्राकृताप्राकृतानि च ।
सस्वनाथानि वैकुण्ठ-ब्रह्माण्डादीन्यशेषतः ॥१२

इत्थमाश्चर्य्यबृत्तान्तो नान्यत्र श्रूयते क्वचित् ।
यमाकर्णयतश्चित्तं भजत्युद्दामतां पराम् ॥१३

कृष्णो वत्सैरसंख्यातैरित्येषा शुकभारती ।
न जाने कति गोपाला आसन् कृष्णेन सङ्गताः ॥१४

एकैके यावतो वत्सान् गोपालाश्चारयन्ति यान् ।
कोट्यर्वुदादिपद्मान्ता संख्या भवति तावताम् ॥१५

याः शृङ्गमुरलीवेत्रवस्त्रभूषणरज्जवः ।
वर्त्तन्ते गोपवालानां तासां संख्या न सम्भवेत् ॥१६

वैकुण्ठपतयः सर्वे संवृत्ताश्च चतुर्भुजाः ।
ब्रह्माण्डानामशेषाणां ब्रह्मभि स्ते स्तुताः पृथक् ॥१७

एकस्मादेव कृष्णस्य देहात् सर्वे प्रकाशिताः ।
तत्क्षणादेव ते तत्र देहे याता विलीनताम् ॥१८

इति पश्यन्नसौ ब्रह्मा विमूढ़ो विस्मयं गतः ।
कृष्णं भूरि स्तुवन् पश्चान्निश्चिकायैवमेव सः ॥१९

कृष्णस्य वैभवं सर्वमहं वेद्मीति वक्ति यः ।
सोऽयं वेत्तु तथा मन्येऽहन्तु कायेन चेतसा ॥२०

प्रभो तवायं योऽनन्तो वैभवामृतसागरः ।
न तस्य विन्दुरेकोऽपि मम वाक्चित्तगोचरः ॥२१

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये षट्त्रिंशः श्लोकः—

जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो ।
मनसो वपुषो वाचो वैभवं तव गोचरः ॥६॥"

कृष्णस्य महिमानन्तः को ज्ञाता तस्य वर्त्तते ।
आश्चर्य्या विभुता वृन्दावनभूमेरपि प्रभोः ॥२२

शास्त्रानां षोड़शक्रोशमितं वृन्दावनं मतम् ।
एकांशे तस्य वैकुण्ठब्रह्माण्डाणां गणः स्थितः ॥२३

कृष्णस्यापारमैश्वर्य्यं संख्यातुं नैव शक्यते ।
कृतं दिग्दर्शनं शाखाचन्द्रन्यायेन तन्मया ॥२४

तस्य ब्रुबत ऐश्वर्य्यमैश्वर्य्याम्बुधिरस्फुरत् ।
मग्नेन्द्रियमनास्तत्र भेजे विह्वलतां प्रभुः ॥२५

इमं भागवत-श्लोक मेकं स्वय मवाचयत्।
व्याचष्ट च सुखेनार्थं तद्रसास्वादनाय सः ॥२६

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे द्वितीयाध्याये एकविंशः श्लोकः—

स्वयन्त्वसाम्यातिशय स्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः।
वलिं हरद्भिश्चिरलोकपालैः किरीटकोटीड़ितपादपीठः ॥७॥"

ईश्वरः परमः कृष्णः स एव भगवान् स्वयम्।
ततो महत्तरः कोऽपि तत्तुल्यो वास्ति नापरः ॥२७

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये प्रथमः श्लोकः—

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादि रादि र्गोविन्दः सर्वकारणकारणम् ॥८॥"

ब्रह्मा विष्णुर्हरश्चैते सृष्ट्यादीनामधीश्वराः।
कृष्णस्य त्रय आदेशपालकाः कृष्ण ईश्वरः ॥२८

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे षष्ठाध्याये त्रिंशः श्लोकः—

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥९॥"

सामान्यानां त्र्यधीशाना मेषामर्थं ब्रुवे शृणु।
ते पूरुषावतारा हि जगतो हेतवस्त्रयः ॥२९
पद्मनाभो महाविष्णुः क्षीरोदाधिपतिस्तथा।
सर्वेषां स्थूलसूक्ष्माणामन्तर्यामिण एव ते ॥३०
त्रयः सर्वाश्रया एते जगतामीश्वरा अपि।
कृष्णस्याधीश्वरस्यैव कथ्यन्तेऽंशाः कलाः पुनः ॥३१

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये चतुष्पञ्चाशत्तमः श्लोकः—

यस्यैकनिश्वसितकाल मथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः।
विष्णुर्महान् स इह यस्य कलाविशेषो
गोविन्द मादिपुरुषं तमहं भजामि ॥१०॥"

अयमर्थो भवेद्वाह्यो गूढ़ोऽर्थः श्रूयतामतः ।
कृष्णस्य त्रय आवासा विख्याताः शास्त्रसम्मताः ॥३२
अन्तःपुरं हि गोलोकः श्रीबृन्दावननामकः ।
अत्र नित्यस्थितिस्तस्य पितरौ बन्धव स्तथा ॥३३
मधुरैश्वर्य्यमाधुर्य्यकृपाकोषगृहाणि च ।
भुजिष्या योगमाया च लीला रासादयोऽत्र च ॥३४

"तथाहि गोस्वामिपादोक्तः श्लोकः—
करुणानिकुरम्बकोमले मधुरैश्वर्य्यविशेषशालिनि ।
जयति व्रजराजनन्दने नहि चिन्ताकणिकाभ्युदेति नः ॥११"

तस्याधस्तात् परव्योम विष्णुलोकाभिधानकम् ।
आद्यनन्तस्वरूपस्य धाम नारायणस्य तत् ॥३५
कृष्णस्य मध्यमावासः षड़ैश्वर्य्यविभूषितः ।
यत्रानन्तस्वरूपेण स्वयं विहरति प्रभुः ॥३६
वैकुण्ठानि ह्यनन्तानि वर्त्तन्ते यत्र पार्षदैः ।
तत्प्रकोष्ठाः षड़ैश्वर्य्यैः सम्भृताः सन्ति सर्वदा ॥३७

"तथाहि ब्रह्मसंहितायां पञ्चमाध्याये त्रिचत्वारिंशः श्लोकः—
गोलोकनाम्नि निजधाम्नि तले च तस्य
देवी-महेश-हरिधामसु तेषु तेषु ।
ते ते प्रभावनिचया विहिताश्च येन
गोविन्द मादिपुरुषं तमहं भजामि ॥१२॥"

"तथाहि लघुभागवतामृते पूर्वखण्डे सप्ताशीतितमाङ्कधृत-
पाद्मोत्तरखण्डम्—
प्रधानपरमव्योम्नोरन्तरे विरजा नदी ।
वेदाङ्गस्वेदजनितैस्तोयैः प्रस्नाविता शुभा ॥१३॥
तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम् ।
अमृतं शाश्वतं नित्य मनन्तं परमं पदम् ॥१४॥"

तदधो विरजापारे तस्यावासो वहिःस्थितः ।
ब्रह्माण्डानि ह्यनन्तानि यत्र कद्या अनन्तकाः ॥३८
देवीधामेति नामास्य जीवास्तत्र वसन्ति च ।
यं रक्षति जगल्लक्ष्मी र्माया दासी च वर्त्तते ॥३९
तिष्ठत्यधीश्वरः कृष्ण एतेषु त्रिषु धामसु ।
गोलोकोऽतः परव्योम प्रकृतेः पर उच्यते ॥४०
विभूति-धाम चिच्छक्ते स्त्रिपादैश्वर्य्यसंज्ञितम् ।
एकपादिति नामान्या विभूतिर्मायिकी पुनः ॥४१

"तथाहि लघुभागवतामृते पूर्वखण्डे चतुर्थाङ्कधृतपाद्मोत्तर-
खण्डम्—

त्रिपाद् विभूतेर्धामत्वात्त्रिपाद्भूतं हि तत्पदम् ।
विभूतिर्मायिकी सर्वा प्रोक्ता पादात्मिका यतः ॥१५॥"

विभूतिः खलु कृष्णस्य त्रिपाद् वाचामगोचरः ।
विभूतेरेकपादोऽस्या विस्तारं शृणु सम्प्रति ॥४२
ब्रह्माण्डाना मनन्तानां ब्रह्म रुद्रादयोऽखिलाः ।
ते चिरलोकपालाख्या गण्यन्ते शास्त्रकोविदैः ॥४३
एकदा द्वारकापुर्य्यां कृष्णसन्दर्शनेच्छया ।
ब्रह्माणमागतं द्वारी श्रीकृष्णाय न्यवेदयत् ॥४४
कृष्णस्तं कतमो ब्रह्मा किमाख्यश्चेति पृष्टवान् ।
प्रत्यागत्य पुनर्द्वारी ब्रह्माणं पृष्टवांस्तथा ॥४५
तच्छ्रुत्वा विस्मितो ब्रह्मा दौवारिकमवोचत ।
ब्रूहि गत्वा चतुर्वक्त्रः सनकस्य पितेति तम् ॥४६
विज्ञाप्य द्वारपालेन कृष्णं ब्रह्माप्यनीयत ।
दण्डवत् प्राणमद् ब्रह्मा कृष्णस्य चरणाम्बुजे ॥४७
तं सम्पूज्य ससम्मानं कृष्णेनासावपृच्छयत ।
अद्य कस्य कृते ब्रह्मन्निहायातो भवानिति ॥४८

ब्रह्मा तमब्रवीत् पश्चात्तु विज्ञाप्यते मया ।
जातो मे हृदि सन्देहः साम्प्रतं स निरस्यताम् ॥४६
केनाशयेन पृष्टोऽस्मि ब्रह्माहं कतमो न्विति ।
मामन्तरेण को ब्रह्मा परोऽस्ति भुवनत्रये ॥५०
इत्याकर्ण्य हसन् कृष्णोऽभवद्ध्यानपरायणः ।
तत्क्षणादेव सम्प्राप्तोऽसंख्येयो ब्रह्मणां गणः ॥५१
विंशतिः शतसाहस्रायुतलक्षार्बुदानि वा ।
तेषां मुखानि केषाञ्चिदशक्यगणनानि च ॥५२
लक्षकोटिमुखा रुद्रास्तदा तत्र समागताः ।
प्राप्तो लक्षेण कोट्या वा नेत्रैरिन्द्रगणस्तथा ॥५३
तान् विलोक्य चतुर्वक्त्रो ब्रह्मा सम्मोह-विह्वलः ।
अतिष्ठद् गजतामध्ये पतितः शशको यथा ॥५४
कृष्णस्य पादपीठाग्रे ब्रह्माणस्ते समागताः ।
प्रणेमुर्दण्डवत् पीठसंलग्नमुकुटव्रजाः ॥५५
कृष्णस्याचिन्त्यशक्तिं तां व्यक्तां कर्त्तुं क्षमेत कः ।
ब्रह्माणो यति तत्येव मूर्त्तयोऽस्यैकविग्रहे ॥५६
पाद-पीठ-किरीटाग्रसंघट्टादुत्थितो ध्वनिः ।
मन्ये चक्रुः किरीटानि पादपीठस्तुतिं प्रभोः ॥५७
ब्रह्मरुद्रादयः सर्वे तं युक्ताञ्जलयोऽस्तुवन् ।
प्रभो प्रदर्श्य ते पादौ महती नः कृपा कृता ॥५८
दासान् गणयता दिष्ट्या समाहूता वयं त्वया ।
का तवाज्ञास्ति शीर्षेण वहन्तः करवाम ताम् ॥५९
तच्छ्रुत्वा कृष्ण ऊचे तान् युष्मानैच्छम् निरीक्षितुम् ।
सर्वान् युगपदेकत्र तत आहूतवानहम् ॥६०
सुखं वोऽस्तु न कच्चिद्वो दैत्या दैत्यभयानि वा ।
ते प्रत्यूचुः प्रसादात्ते सर्वत्रैव जयोऽस्ति नः ॥६१

सम्प्रत्येव पृथिव्यां त्वमवतीर्णः स्वयं प्रभो ।
सम्भाव्यं पृथिवीभारं सम्यङ् नाशितवानसि ॥६२
विभूते द्वारकादीनामेतदेव प्रमाणकम् ।
सर्वेऽजानत कृष्णो मे ब्रह्माण्डेऽस्तितरामिति ॥६३
कृष्णस्य द्वारकायाश्च वैभवानुभवोऽभवत् ।
अन्योन्यं न निरैक्षन्त युगपन्मेलकेऽपि ते ॥६४
अथ ब्रह्मगणं कृष्णः प्रस्थानाय व्यजिज्ञपत् ।
प्रणम्य दण्डवत् सर्व्वे स्वं स्वं धाम प्रतस्थिरे ॥६५
तथा चतुर्मुखो ब्रह्मा विलोक्यैव चमत्कृतः ।
नमश्चकार कृष्णस्य पादयुग्ममुपेयिवान् ॥६६
ब्रह्मणोक्तं मया पूर्वं यादृगेव विनिश्चितम् ।
तस्योदाहरणं तावदद्य प्रत्यक्षमीक्षितम् ॥६७
"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये
षट्त्रिंशः श्लोकः—
जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो ।
मनसो वपुषो वाचो वैभवं तव गोचरम् ॥१६॥"
कृष्णेनोक्तमिदं क्षुद्रं पञ्चाशत्कोटियोजनम् ।
ब्रह्माण्डं तव तेन त्वं क्षुद्रोऽसि चतुरानन ॥६८
किञ्चित् कोटिशतं व्याप्तं कोटिलक्षञ्च किञ्चन ।
नियुतकोटिमन्यच्च योजनानि च कोटिशः ॥६९
ब्रह्माण्डस्यानुरूपौ तद्ब्रह्मणो मुखविग्रहौ ।
पालयाम्येवमेवाहं ब्रह्माण्डानां गणं समम् ॥७०
विभूतेरेकपादस्य परिमाणं न विद्यते ।
विभूतेस्तु त्रिपादोऽस्या मानं कर्त्तुं क्षमेत कः ॥७१
"तथाहि लघुभागवतामृते पूर्वखण्डेऽष्टाविंशाङ्कधृत-
पाद्मोत्तरखण्डम्—

तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम् ।
अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥१७॥"
अथ प्रास्थापयत् कृष्णो ब्रह्माणं स्वालयं प्रति ।
तद्विभूतिस्वरूपाणि न ज्ञेयानि कथञ्चन ॥७२
अधीश इति शब्दस्य गूढ़ोऽर्थोऽन्योऽपि वर्त्तते ।
त्रिशब्देन त्रयो लोकाः कृष्णस्येत्यभिधीयते ॥७३
गोकुलं नाम गोलोको मथुरा द्वारका च ते ।
इति लोकत्रये नित्यं स्वतः कृष्णोऽवतिष्ठते ॥७४
पूर्णैश्वर्य्यभृतश्चान्तरङ्गं धामत्रयं भवेत् ।
स स्वयं भगवान् कृष्ण स्तत्त्रयाणामधीश्वरः ॥७५
ब्रह्माण्डानां पुरा प्रोक्ता लोकपालाश्चिरन्तनाः ।
वैकुण्ठावरणाः शश्वल्लोकपालाभिधानकाः ॥७६
सर्वेषां नमतां तेषां कृष्णपादासनाग्रतः ।
मुकुटानि स्पृशन्त्येव पीठं मणिमयं प्रभोः ॥७७
संलग्नयोर्झनत्कारो मणिपीठकिरीटयोः ।
मन्यते मुकुटैः पीठस्तुतिपाठध्वनि ध्रुवम् ॥७८
चिच्छक्त्या निजया कृष्णो नित्यमेव विराजते ।
षड़ैश्वर्य्याभिधाना हि चिच्छक्तेः किल सम्पदः ॥७९
तया स्वाराज्यलक्ष्म्यासौ पूर्णकामः कृतः सदा ।
अतएवोच्यते वेदैः स स्वयं भगवानिति ॥८०
कृष्णस्यापारमैश्वर्य्यामृतसार-महोदधिम् ।
न वगाहितुमीशे तद्बिन्दुमेकं स्पृशाम्यहम् ॥८१
इति ब्रुवत ऐश्वर्य्यं हृदि कृष्णोऽस्फुरत् प्रभोः ।
माधुर्य्ये मग्न-चित्तोऽसौ श्लोकमेकमवाचयत् ॥८२
"तथाहि श्रीमद्भागवते तृतीयस्कन्धे द्वितोयाध्याये
द्वादशः श्लोकः—

यन्मर्त्त्यलीलौपयिकं स्वयोग-
मायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥१८॥"

यथारागः—

लीलोत्तमा भगवतो भुवि मानवीया
गृह्णाति मानववपुः स निजस्वरूपम् ।
वंशीकरो नवकिशोरकगोपवेशो
लीलायते नटवरोऽभिनयानुरूपम् ॥८३

कृष्णस्य रूपमपरूप महं ब्रवीमि
तच्छ्रूयतामयि सनातन सावधानम् ।
एकैव यस्य कणिका निखिलां त्रिलोकी-
मामज्जयन्त्यखिलजीवकुलानि कर्षेत् ॥८४

या शुद्धसत्त्वमयचिन्मययोगमाया
तस्या बलं जगति दर्शयितुं जनेभ्यः ।
भक्तैकगुप्तधनमेव हि रूपरत्नं
कृष्णेन तत् प्रकटितं निजनित्यधाम्नः ॥८५

दृष्ट्वैव तत् स्वयमहो निजरूपमेतत्
सोऽभूच्चमत्कृतमनाः परिभोक्तुकामः ।
सौभाग्यमेव हि निजं सुषमागुणाढ्यं
तेनैव राजतितमाञ्च तदात्मधाम ॥८६

तद्भूषणान्यपि विभूषयते तदङ्गं
तच्च त्रिभङ्गललितं नटदूर्म्मिल-भ्रु ।
विध्यत्यसौ सुदृढ़-तिर्य्यगपाङ्गवाणैः
श्रीराधिकादिहृदयान्यपि सावलीलम् ॥८७

ब्रह्माण्डादिषु ये स्वरूपनिचया ये वा परव्योमनि
सर्वेषां हृदयं प्रसह्य स पुनर्मुष्णाति तेषामपि ।
या वेदैश्च पतिव्रताजनशिरोरत्नाख्यया कीर्त्तिता
लक्ष्मीणां दृढ़मानसानि स हठात् कर्षत्यमूषामपि ॥८८
गोपीनां स मनोरथानधिवसन् कन्दर्पसम्मोहनो
नाम्ना मन्मथमन्मथ स्त्रिभुवने लोकैः समाख्यायते ।
कन्दर्पोऽपि नवः स्वयं हरति यः कन्दर्पदर्पं सुखं
गोपीभिः परिवेष्ठितो युवतिभी रासेन स क्रीड़ति ॥८६
मुक्तास्रग्-वकपङ्क्ति-शोभिततनुः पिच्छेन्द्रचापं दधद्
यः पीताम्बर-विद्युता च विलसन् कृष्णो नवीनाम्बुदः ।
विश्व-क्षेत्रग-जीव-शस्यनिवहान् सिञ्चन्मुहु र्नीरसां-
स्तानुज्जीवयितुं निजं स कृपया लीलामृतं वर्षति ॥९०
कृष्णस्य भगवत्तायाः सारो माधुर्य्यमेवहि ।
प्रचारं कृतवांस्तस्य स स्वयं व्रजमण्डले ॥९१
श्रीमद्भागवते तत्र तत्र वैयासकिः शुकः ।
व्यवृणोद्बोधनायैवं श्रुत्वा भक्तैश्च नृत्यते ॥९२
प्रभुः श्रीकरपद्मे न करे गृह्णन् सनातनम् ।
व्याख्यान् कृष्णरसं प्रेमावेशात्तं श्लोकमब्रवीत् ॥९३
गोपीभाग्यं तथा कृष्णगुणा यत्रैव वर्णिताः ।
मथुरापुरवास्तव्यैर्भावावेशवशाज्जनैः ॥९४

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुश्चत्वारिंशाध्याये
त्रयोदशः श्लोकः—

गोप्यस्तपः किमचरन् यदमुष्य रूपं
लावण्यसार मसमोर्द्ध्व मनन्यसिद्धम् ।
दृग्भिः पिवन्त्यनुसवाभिनवं दुराप-
मेकान्तधाम यशसः श्रिय ईश्वरस्य ॥१६॥"

यथारागः—

तारुण्यामृत-सागरो हरिरयं लावण्यसारोर्मिलो
भावाम्भोभ्रमि-सङ्कुलो मुरलिका-कोकीरुतैराकुलः ।
नारीहृत्तृणपत्रघासनिचया दैवात् पतन्त्यत्र चे-
दात्मन्येव तदा स मज्जयति तान्नोन्मज्जयत्यण्वपि ॥६५

गोप्यस्तपः कि मचरन् सखि कृष्णरूप-
माधुर्य्यपूर मनिशं नयनैः पिवन्त्यः ।
ताः स्वीयजन्म-तनु-जीवन-मानसानि
सम्मन्वते वहु सुदैवकृतानि लब्ध्वा ॥६६

तत्रैवास्त्यसमोद्ध्वगो मधुरिमा कृष्णे न चान्यत्र स-
तत्स्वारूप्य-गतेषु नैव परमव्योमावतारेष्वपि ।
जात्वेतादृशमाधुरीं न लभते नारायणोऽपि स्वयं
लक्ष्मीस्तत्र पतिव्रतागणशिरःपूज्या स्वयं साक्षिणी ॥६७

सेयं पतिप्रियतमापि पतिव्रतापि
कृष्णस्य तां मधुरतां प्रति लुब्धचित्ता ।
उग्राण्यतप्यत तपांसि विहाय काम-
भोगान् व्रतं गुरुतरं सुचिरं चरन्ती ॥६८

माधुर्यसारस्तु स एव नापरः
स माधुरीमुख्यगुणाकरः स्वयम् ।
अन्यत्र तेनैव समर्पिता गुणाः
प्रकाशिताः सन्ति समन्ततो वहिः ॥६६

या तस्य गोपीजन-भावदर्पणे
नवायतेऽनुक्षणमेव माधुरी ।
तौ द्वावहंपूर्विकयाऽपराङ्मुखा-
वृद्धिं निजां वर्द्धयतो नवां नवाम् ॥१००

कर्म-ज्ञान-तपो-जपार्चनविधि-ध्यानैश्च योगै र्विधि-
भक्त्या चातिसुदुर्लभा भगवतः कृष्णस्य सा माधुरी।
प्रेम्णा रागपथेन यस्तु भजते कृष्णं पुनः केवलं
तन्माधुर्य्यमसौ सुखेन लभते श्रद्धान्वितो मानवः ॥१०१

इत्थं व्रजे मधुरिमेश्वरतागुणानां
श्रीकृष्ण एव निलयो निखिलस्य सोऽशी।
तेनार्पितैः स्वभगवत्त्व-विभूतियोगै-
रन्यो भवेद्धि भगवांश्च विभूतिमांश्च ॥१०२

श्रीर्ह्रीर्यशोविमलधीः करुणा च धैर्य्यं
सर्वं प्रतिष्ठितमिदं नियमेन कृष्णे।
नान्योऽस्ति तेन सदृशो मृदुलो वदान्यः
सौशील्यवां स्त्रिभुवनैकहितव्रतश्च ॥१०३

गोप्यो व्रजे कृष्णमालोकयन्त्यो
विघ्नान्निमेषैः कृतांस्तर्कयन्त्यः।
निन्दां विधेश्चक्रुरित्यर्थपद्यं
व्याख्यान् प्रभुः स्वादयामास भावम् ॥१०४

"तथाहि श्रीमद्भागवते नवमस्कन्धे चतुर्विंशाध्याये पञ्चत्रिंशः श्लोकः—

यस्याननं मकरकुण्डल-चारुकर्ण-
भ्राजत्-कपोलसुभगं सविलासहासम्।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो
नार्य्यो नराश्च मुदिताः कुपिता निमेश्च ॥२०॥"

"तथाहि तत्रैव दशमस्कन्धे एकत्रिंशाध्याये पञ्चदशः श्लोकः—

अटति यद्भवानह्नि काननं त्रुटि र्युगायते त्वामपश्यताम्।
कुटिल-कुन्तलं श्रीमुखञ्च ते जड़ उदीक्षतां पद्मकृद्दृशाम् ॥२१॥"

श्रीकृष्णः कामगायत्रीमन्त्ररूपः स्वयं भवेत्।
उद्भासयन्ति तं सार्द्धचतुर्विंशति रत्नराः ॥१०५

कृष्णमुद्दीपयन्तस्तेऽम्बरचन्द्रमसोऽनिशम् ।
भुवनत्रितयं काममयं कुर्वन्ति हेलया ॥१०६
कृष्णस्याननचन्द्रमाः सखि वसंस्तद्देहसिंहासने
राज्यं शास्ति विलक्षणञ्च कुरुते चान्द्रं समाजं भुवि ।
द्वौ गण्डौ च सुचिक्कणौ मणिमयादर्शं जयन्तौ विधू
अर्द्धेन्दावलिके च चन्दनमयो विन्दुः समग्रः शशी ॥१०७
वंशीसङ्गीततानैः करनखशशिनो नृत्यन्ति वेणूपरि
शिञ्जन्मञ्जीरगानैः पदनखरविधुव्रातो नरीनृत्यते ।
चक्षुर्लीलाब्जयुग्मं नटयति सततं राजा विलासी स्वयं
भ्रूचाप-घ्राणवाणैः श्रुतिगुणमिलितै र्नारीमनो विध्यति ॥१०८
इन्दोरस्यातिचित्रो नटनविधिरहो इन्दुहट्टं प्रसार्य्य
सोऽयं मूल्यं विनैव प्रवितरति सदा स्वीयपीयूषधाराम् ।
हासज्योत्स्नामृतैर्वाधरपुटसुधया काश्चनाप्याययन् वा
सर्वानेवं स लोकान् जगति विजयते तर्पयन् कृष्णचन्द्रः ॥१०९
यत्रास्ते सचिवायमान मरुणं दीर्घं विशालं स्मरो-
न्मादाघूर्णित मक्षियुग्म मसमा शोभा च लीलागृहम् ।
प्रेमास्त्रञ्च रसायनं सुखमयं कृष्णाननं तत् कथं
पीयेताक्षियुगेन दृष्टमपि यत् पुण्यैः सुपुञ्जीकृतैः ॥११०

इत्थं जनः कथमपीक्षणयोर्द्वयेन
तच्चास्यमस्य परिपातु मशक्नुवानः ।
क्षुब्धो हृदि द्विगुणवर्द्धितलोभतृष्णो
दुःखेन निन्दति विधिं बहुधैवमेव ॥१११

विधिर्जड़ो नीरसवृत्तपोधनो न वेद सृष्टेरुपयुक्तरूपताम् ।
कोटिं न लक्षं न दृशां ददावसौ द्वयं निमेषाहतमेव केवलम् ॥११२
कृत्वा विधिः कृष्णमुखेक्षिणामपि द्वे एव नेत्रे अविचारकोऽभवत् ।
गृह्णन्मदुक्तिं नयनानि कोटिशः कुर्वन् पुनः स्यात् सहि योग्यसृष्टिकृत् ॥११३

कृष्णस्याङ्गं मधुरिम-रसाम्भोनिधि स्तत्र तस्य
श्रीमद्वक्त्रं सुमधुरतरं भाति राकासुधांशुः ।
तस्मिंस्तस्य स्मितमधुरताकौमुदीतित्रयेऽस्मिन्
मग्नः श्लोकं प्रभुरुदगिरत् स्वादयन् पाणिभङ्ग्या ॥११४

"तथाहि श्रीकृष्ण-कर्णामृते द्वानवतितमः श्लोकः—
मधुरं मधुरं वपुरस्य विभो र्मधुरं मधुरं वदनं मधुरम् ।
मधुगन्धि मृदुस्मित मेतदहो मधुरं मधुरं मधुरं मधुरम् ॥२२॥"

यथा रागः—

कृष्णस्य माधुर्य्यसुधामहाम्बुधिं सर्वं पिपासाम्यधुना सनातन ।
दुर्दैव-वैद्यो मम सान्निपातिके ज्वरे न तद्बिन्दुमपि प्रयच्छति ॥११५
कृष्णस्य लावण्यमयं कलेवरं विभर्त्ति सर्वामपि माधुरीधुरम् ।
तत्रैव तस्यानन-पूर्णचन्द्रमा माधुर्य्यराशे रपि माधुरीभरः ॥११६
तत्रापि तस्य स्मितचन्द्रिकाघनो माधुर्य्यपुञ्जान्मधुरोत्तमोत्तमः ।
एकोऽपि तस्यैव कणो जगत्त्रयं व्याप्नोति पूरैर्युगपद्दिशो दश ॥११७

तस्य स्मितांशु-हिमवालुकयाऽधरान्तः
संविष्टया त्रिभुवनं क्रियते प्रमत्तम् ।
वंशीविलस्य गगणस्य गुणो हि शब्दः
प्राप्नोति तत्परिणतिं ध्वनिरूपतोऽयम् ॥११८
धावन्नेव समन्ततो ध्वनिरसावण्डानि भिन्दंस्ततो
वैकुण्ठञ्च गतो वलात् प्रविशति त्रैलोक्य-कर्णावलीम् ।
सर्वानेव जनान् प्रसह्य मदयन् धृत्वानयत्येव स
वैशेष्याद् युवतीगणं स सवलात्कारं समाकर्षति ॥११६

पतिव्रतानां व्रतहा मदोद्धतः
कृष्ट्वानयेद् यः पतिवत्तसोऽपि ताः ।
वैकुण्ठलक्ष्मीगण माच्छिनत्ति य-
स्तस्याग्रतः का नु भवन्तु गोपिकाः ॥१२०

पत्युः पुरोऽपि श्लथयन् स नीवीं सन्त्याज्य ताभि र्गृहकर्म वैधम्।
तत्रानयत्येव हठं गृहीत्वा ताः कामिनीर्यत्र स कृष्णचन्द्रः ॥१२१
स लोकधर्मानथ लोकलज्जां विहाप्य ताभिः सकलं भयञ्च।
कृत्वा च ता लुप्तविवेकसंज्ञा इत्थं स्त्रियो नर्तयति प्रमत्ताः ॥१२२

कर्णान्त निंवसत्यसावविरतं तत्र स्वयं प्रस्फुरन्
नान्तः प्रापयति प्रवेशसरणिं शब्दान्तरं किञ्चन।
नैवाकर्णयतः श्रुती तदितरद्वाक्यं तथा यद्वचः
प्रारब्धं वदितुं तदन्यथयति श्रीकृष्णवंशीध्वनिः ॥१२३

इत्यूचिवान् प्रभुरवोचत लब्धसंज्ञ-
एकं ब्रुवन् कथितवानहमन्यदेव।
कृष्णः कृपां त्वयि सनातन कर्त्तुमेव
भ्रान्तिं पुनर्जनितवान्मम चित्तवृत्तेः ॥१२४

असंशयं निजैश्वर्य्यमाधुर्य्याणि प्रकाशयन्।
श्रीकृष्णो मन्मुखेनैवं साम्प्रतं त्वामुपादिशत् ॥१२५

ब्रुवन्नेकं ब्रवीम्यन्यत्तावदेवास्मि वातुलः।
उह्यमानोऽस्मि कृष्णस्य माधुरीस्रोतसाधुना ॥१२६

इत्युक्त्वैव क्षणं तूर्ष्णीं स्थित्वा तत्र महाप्रभुः।
मनसा धैर्यमाश्रित्य भूयोऽवादीत् सनातनम् ॥१२७

एतत् कृष्णस्य माधुर्य्यं प्रभोः श्रीवदनोदितम्।
यः शृणोति स हि प्रेमसुखेन प्लवतेऽनिशम् ॥१२८

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः।
स ब्रूते कृष्णदासः श्रीचैतन्य-चरितामृतम् ॥१२९

इति श्रीचैतन्यचरितामृते मध्यखण्डे सम्बन्धतत्त्वविचारे श्रीकृष्णैश्वर्य्य-माधुर्य्यवर्णनं नामैकविंशः परिच्छेदः।

—o—

मध्यलीलायां द्वाविंशः परिच्छेदः

"वन्दे श्रीकृष्णचैतन्यदेवं तं करुणार्णवम् ।
कलावप्यति गूढ़ेयं भक्तिर्येन प्रकाशिता ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्वसौ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
अयं सम्बन्धतत्त्वस्य विचारो विहितो मया ।
सारः श्रीकृष्ण एवैको वेदैः शास्त्रैश्च दिश्यते ॥२
शृणु वाच्यं मयेदानी मभिधेयस्य लक्षणम् ।
यत एवाप्यते कृष्णः कृष्णप्रेमधनं तथा ॥३
तद्भक्तेरभिधेयत्वं सर्वशास्त्रै र्निगद्यते ।
अतः श्रीकृष्णभक्तिर्हि मुनिभिस्तत्र निश्चिता ॥४

"तथाहि मुनिवाक्यम्—

श्रुति र्माता पृष्टा दिशति भवदाराधनविधिं
यथा मातुर्वाणी स्मृतिरपि तथा वक्ति भगिनी ।
पुराणाद्या ये वा सहजनिवहास्ते तदनुगा
अतः सत्यं ज्ञातं मुरहर भवानेव शरणम् ॥२॥"

अद्वयज्ञानतत्त्वं हि श्रीकृष्णो भगवान् स्वयम् ।
स्वरूपैः शक्तिरूपैश्च स नित्य मवतिष्ठते ॥५
असौ स्वांश-विभिन्नांशरूपै र्विस्तारमाप्नुवन् ।
ब्रह्माण्डेषु च वैकुण्ठेष्वनन्तेषु च दीव्यति ॥६
तस्य स्वांशाश्चतुर्व्यूहा अवतारगणाश्च ते ।
भिन्ना भिन्नांशका जीवा गण्यन्ते तस्य शक्तयः ॥७
एते जीवाः पुनर्भिन्ना भिन्नांशा द्विविधा मताः ।
तत्रैके नित्यमुक्ताश्च नित्यसंसारिणोऽपरे ॥८
नित्यमुक्ता हि कृष्णस्य नित्यं श्रीचरणोन्मुखाः ।
कृष्णपारिषदा नाम तत्सेवासुखभोगिनः ॥९

नित्यबद्धाः पुनर्ये ते नित्यं कृष्णाद्बहिर्मुखाः ।
नारकादीनि दुःखानि संसारे भुञ्जते सदा ॥१०

दण्डयत्येव तां स्तस्माद्दोषान्माया पिशाचिका ।
जारयन्त्येव तान् हन्ति तापैराध्यात्मिकादिभिः ॥११

सेवित्वा कामरोषौ ते लभन्ते तत् पदाहतिम् ।
भ्राम्यन्तस्ते लभन्ते चेज्जातु साधु-चिकित्सकम् ॥१२

तस्योपदेशमन्त्रेण सा पिशाची पलायते ।
कृष्णभक्तिं ततः प्राप्य यान्ति ते कृष्णसन्निधिम् ॥१३

"तथाहि श्रीभक्तिरसामृतसिन्धौ पश्चिमविभागे प्रीतिभक्तिलहर्य्यां

षष्ठः श्लोकः—

कामादीनां कति न कतिधा पालिता दुर्निदेशा-
स्तेषां जाता मयि न करुणा न त्रपा नोपशान्तिः ।
उत्सृज्यैतानथ यदुपते साम्प्रतं लब्धबुद्धि-
स्त्वामायातः शरणमभयं मां नियुङ्क्ष्वात्मदास्ये ॥३॥"

अभिधेयप्रधानं हि कृष्णभक्ति र्भवेद्ध्रुवम् ।
कुर्य्युर्भक्तिमुखापेक्षां ज्ञानं योगश्च कर्म च ॥१४

तदेतत् साधनं सर्वमतितुच्छफलं भवेत् ।
कृष्णभक्तिं विना किञ्चिन्न कृष्णं दातुमर्हति ॥१५

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे पञ्चमाध्याये द्वादशः श्लोकः—

नैष्कर्म्यमप्यच्युतभाववर्जितं
न शोभते ज्ञान मलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे
न चार्पितं कर्म यदप्यकारणम् ॥४॥"

"तथाहि तत्रैव द्वितीयस्कन्धे चतुर्थाध्याये षोड़शः श्लोकः—

तपस्विनो दानपरा यशस्विनो
मनस्विनो मन्त्रविदः सुमङ्गलाः ।

क्षेमं न विन्दन्ति विना यदर्पणं
तस्मै सुभद्रश्रवसे नमोनमः ॥५॥"

मुक्तिं दातुं विना भक्तिं ज्ञानं नार्हति केवलम् ।
जनः कृष्णोन्मुखो ज्ञानमन्तरेणैव मुच्यते ॥१६

"तथाहि तत्रैव दशमस्कन्धे चतुर्दशाध्याये चतुर्थः श्लोकः—

श्रेयः सृतिं भक्ति मुदस्यते विभो
क्लिश्यन्ति ये केवलबोधसिद्धये ।
तेषा मसौ क्लेशल एव शिष्यते
नान्यद् यथास्थूलतुषावघातिनाम् ॥६॥"

"तथाहि श्रीमद्भगवद्गीतायां सप्तमाध्याये चतुर्दशः श्लोकः—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥७॥"

कृष्णस्य नित्यदासोऽहमिति जीवेन विस्मृतम् ।
माया तेनैव दोषेन कण्ठे बद्धवती हि तम् ॥१७
अतएव भजन् कृष्णं यो गुरुञ्च निषेवते ।
मायापाशाद्विमुक्तोऽसौ पदं कृष्णस्य विन्दति ॥१८
स्वं स्वं धर्मं चरन्तोऽपि चतुर्वर्णाश्रमा जनाः ।
पतन्ति रौरवे कृष्णमभजन्तो हि निश्चितम् ॥१६

"तथाहि श्रीमद्भागवते एकादशस्कन्धे पञ्चमाध्याये द्वितीय-तृतीयौ श्लोकौः—

मुख-वाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणै र्विप्रादयः पृथक् ॥८॥
य एषां पुरुषं साक्षादात्म-प्रभवमीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥६॥"

जीवन्मुक्तदशां प्राप्तोऽस्मीति ज्ञानी हि मन्यते ।
वस्तुतस्तु विना कृष्णभक्तिं बुद्धिर्न शुध्यति ॥२०

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वितीयाध्याये षड्विंशः श्लोकः—

येऽन्येऽरविन्दाक्ष विमुक्तमानिन

स्त्वय्यस्तभावादविशुद्ध-बुद्धयः ।

आरुह्य कृच्छ्रेण परं पदं ततः

पतन्त्यधोऽनादृत-युष्मदङ्घ्रयः ॥१०॥"

कृष्णः सूर्य्यसमो माया घोरान्धतमसोपमा ।

कृष्णो यत्रास्ति मायाया स्तत्र नास्त्यधिकारिता ॥२१

"तथाहि श्रीमद्भागवते द्वितीतस्कन्धे पञ्चमाध्याये त्रयोदशः श्लोकः—

विलज्जमानया यस्य स्थातु मीक्षापथेऽमुया ।

विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥११॥"

कृष्ण तवाहमस्मीति सकृद् वदति चेज्जनः ।

तं मायाबन्धनात् कृष्णो विमोचयति निश्चितम् ॥२२

"तथाहि श्रीहरिभक्तिविलासस्यैकादशविलासे सप्तनवत्यधिकत्रिशत-

तमाङ्कधृत-रामायण-वचनम्—

सकृदेव प्रपन्नो यस्तवास्मीति च याचते ।

अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥१२॥"

यदि स्याद्बुद्धिमान् भुक्ति-मुक्ति-सिद्ध्यभिलाषुकः ।

भक्तियोगेन गाढ़ेन तदा कृष्णं भजेदसौ ॥२३

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे तृतीयाध्याये दशमः श्लोकः—

अकामः सर्वकामोवा मोक्षकाम उदारधीः ।

तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥१३॥"

अन्यत् कामयमानोऽपि कृष्णं चेद्भजते जनः ।

कृष्णः स्वचरणौ तस्मै ददात्य प्रार्थिता वपि ॥२४

कृष्णः प्राह भजन् यो मां याचत्यैन्द्रियिकं सुखम् ।

त्यक्त्वामृतं विषप्रार्थी स महामूर्ख ईदृशः ॥२५

तस्मै मूर्खाय दास्यामि विज्ञोऽहं विषयान् कथम् ।

तं तान् विस्मारयिष्यामि दत्त्वा स्वचरणामृतम् ॥२६

"तथाहि श्रीमद्भागवते पञ्चमस्कन्ध ऊनविंशाध्यायेऽष्टा-
विंशः श्लोकः—

सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः ।
स्वयं विधत्ते भजता मनिच्छता-
मिच्छा-पिधानं निजपादपल्लवम् ॥१४॥"

कामस्यार्थे भजन् कृष्णं तद्रसं लभते जनः ।
कामं त्यक्त्वा ततस्तस्य दासो भवितु मिच्छति ॥२७

"तथाहि हरिभक्तिसुधोदये सप्तमाध्यायेऽष्टाविंशः श्लोकः—

स्थानाभिलाषी तपसि स्थितोऽहं
त्वां प्राप्तवान् देव मुनीन्द्रगुह्यम् ।
काचं विचिन्वन्नपि दिव्यरत्नं
स्वामिन् कृतार्थोऽस्मि वरं न याचे ॥१५॥"

कश्चित्तरति केनापि भाग्येन संसृतौ भ्रमन् ।
नद्याः स्रोतोगतं काष्ठं लभते तत्तटं यथा ॥२८

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टात्रिंशाध्याये चतुर्थः श्लोकः—

मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनम् ।
ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥१६॥"

यस्य केनापि भाग्येन संसारः स्यात्त्वयोन्मुखः ।
साधुसङ्गेन तस्यैव रतिः कृष्णे प्रजायते ॥२९

"तथाहि तत्रैवैकपञ्चाशत्तमाध्याये पञ्चत्रिंशः श्लोकः—

भवापवर्गौ भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।
सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते रतिः ॥१७॥"

सौभाग्यशालिनं कञ्चित् कृष्णश्चेद्दयते जनम् ।
गुर्वन्तर्य्यामिरूपाभ्यां स तं शिक्षयति स्वयम् ॥३०

"तथाहि श्रीमद्भागवत एकादशस्कन्धे ऊनत्रिंशाध्याये षष्ठः श्लोकः—

नैवोपयन्त्यपचितिं कवयस्तवेश
ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः ।
योऽन्तर्वहिस्तनुभृता मशुभं विधुन्व-
न्नाचार्य्यचैत्त्यवपुषा स्वगतिं व्यनक्ति ॥१८॥"

साधुसङ्गे तथा कृष्णभक्तौ श्रद्धा भवेद् यदि ।
तथा भक्तिफलं प्रेम प्राप्तस्य स्याद् भवक्षयः ॥३१

"तथाहि तत्रैव विंशाध्यायेऽष्टमः श्लोकः—

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥१६॥"

महत्-कृपां विना कर्मान्तरै र्भक्ति र्न जायते ।
कृष्णभक्तिः सुदूरेऽस्तु संसारोऽपि न नश्यति ॥३२

"तथाहि तत्रैव पञ्चमस्कन्धे विंशाध्याये द्वादशः श्लोकः—

रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद् गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्य्यै र्विना महत् पादरजोऽभिषेकम् ॥२०॥"

"तथाहि तत्रैव सप्तमस्कन्धे पञ्चमाध्याये द्वात्रिंशः श्लोकः—

नैषां मति स्तावदुरुक्रमाङ्घ्रिं
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं
निष्किञ्चनानां न वृणीत यावत् ॥२१॥"

सर्वशास्त्रैः सतां सङ्गः सतां सङ्ग इतीर्य्यते ।
सतां सङ्गलवेनापि सर्वा सिद्धिः प्रजायते ॥३३

"तथाहि तत्रैव प्रथमस्कन्धेऽष्टादशाध्याये त्रयोदशः श्लोकः—

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥२२॥"

उपलक्ष्यार्जुनं कृष्णः कृपापरवशो भवन् ।
एवमेव जगज्जीवान् स्वयमेवोपदिष्टवान् ॥३४

"तथाहि श्रीभगवद्गीतायामष्टादशाध्याये चतुःषष्टितम-
पञ्चषष्टितमौ श्लोकौ—

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढ़ मिति ततो वक्ष्यामि ते हितम् ॥२३॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥२४॥"

पूर्वाज्ञा श्रौतधर्माणां तद्योगज्ञानकर्मणाम् ।
साधनान्ते तु तस्येयं पराज्ञैव वलीयसी ॥३५
एवमाज्ञावलीयस्त्वे श्रद्धा भक्तस्य चेद्भवेत् ।
त्यक्त्वा सर्वाणि कर्माणि तदा कृष्णं भजेत सः ॥३६

"तथाहि श्रीमद्भागवत एकादशस्कन्ध एकादशाध्याये
द्वात्रिंशः श्लोकः—

आज्ञायैव गुणान् दोषान्मयादिष्टानपि स्वकान् ।
धर्मान् सन्त्यज्य यः सर्वान् मां भजेत् स च सत्तमः ॥२५॥"

"तथाहि तत्रैव विंशाध्याये नवमः श्लोकः—

तावत् कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥२६॥"

श्रद्धा शब्देन विश्वासः कथ्यते दृढ़निश्चयः ।
कृतायां कृष्णभक्तौ हि सर्वं कर्म कृतं भवेत् ॥३७

"तथाहि श्रीमद्भागवते चतुर्थस्कन्धे एकविंशाध्याये
द्वादशः श्लोकः—

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हण
मुच्युतेज्या ॥२७॥"

श्रद्धावन्तो जना एव भक्तौ स्युरधिकारिणः ।
ते च श्रद्धानुसारेण कनिष्ठमध्यमोत्तमाः ॥३८

शास्त्र-तद्युक्तिदक्षो यो दृढ़श्रद्धो भवेज्जनः ।
ध्रुवं तरति संसारादुत्तमः सोऽधिकारिणाम् ॥३९

शास्त्रयुक्त्यनभिज्ञो यो दृढ़श्रद्धान्वितो भवेत् ।
महासौभाग्यवान् सोऽपि मध्यमोह्यधिकारिणाम् ॥४०

यस्य स्यात् कोमला श्रद्धा स कनिष्ठोऽधिकारिणाम् ।
भक्तानामुत्तमः सोऽपि भवत्येव यथाक्रमम् ॥४१

"तथाहि भक्तिरसामृतसिन्धौ पूर्वखण्डे द्वितीयलहर्य्याम्—

शास्त्रे युक्तौ च निपुणः सर्वदा दृढ़निश्चयः ।
प्रौढ़श्रद्धोऽधिकारी यः स भक्तावुत्तमो मतः ॥२८॥

यः शास्त्रादिष्वनिपुणः श्रद्धावान् सतु मध्यमः ।
यो भवेत् कोमलश्रद्धः स कनिष्ठो निगद्यते ॥२९॥"

तारतम्याद्रतिप्रेम्नो भक्ता स्तरतमा हि ते ।
स्कन्धे भागवतस्यैकादशे तल्लक्षणं कृतम् ॥४२

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये त्रिचत्वारिंश-चतुश्चत्वारिंश-पञ्चचत्वारिंशाः श्लोकाः—

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥३०॥

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेम-मैत्री-कृपोपेक्षा यः करोति स मध्यमः ॥३१॥

अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥३२॥"

महागुणगणाः सर्वे सन्ति वैष्णवविग्रहे ।
कृष्णभक्तेषु कृष्णस्य सञ्चार्य्यन्तेऽखिला गुणाः ॥४३

"तथाहि तत्रैव पञ्चमस्कन्धेऽष्टादशाध्याये द्वादशः श्लोकः—

यस्यास्ति भक्ति र्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतो महद्‌गुणा मनोरथेनासति धावतो बहिः ॥३३॥"

एषा गुणावली सर्वा भवेद्वैष्णवलक्षणम्।
सर्वं वक्तुं न शक्येत कार्य्यं दिग्दर्शनं ततः ॥४४

कृपावानकृतद्रोहः सत्यात्मा समदर्शनः।
दोषहीनो वदान्यश्च मृदुः शुचि रकिञ्चनः ॥४५

कृष्णैकशरणः शान्तः सर्वेषामुपकारकः।
निरीहः कामनाशून्यः स्थिरो निर्जितषड़्‌गुणः ॥४६

अमानी मानदाता च निष्प्रमादो मिताशनः।
गम्भीरः करुणो मैत्रो दक्षो वाचंयमः कविः ॥४७

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चविंशाध्याये विंशः श्लोकः—

तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥३४॥"

"तथाहि तत्रैव पञ्चमस्कन्धे पञ्चविंशाध्याये द्वितीयः श्लोकः—

महत्सेवां द्वारमाहुर्विमुक्ते स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥३५॥"

साधुसङ्गो भवेत् कृष्णभक्ते र्हि मूलकारणम्।
ततः प्रजायते कृष्णप्रेम मुख्याङ्गमस्य तु ॥४८

"तथाहि श्रीमद्भागवते दशमस्कन्धे एक-पञ्चाशत्तमाध्याये त्रिपञ्चाशः श्लोकः—

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः।
सत्सङ्गमो यर्हि तदैव सद्‌गतौ परावरेशे त्वयि जायते रतिः ॥३६॥"

"तथाहि तत्रैवैकादशस्कन्धे द्वितीयाध्यायेऽष्ठाविंशः श्लोकः—

अत आत्यन्तिकं क्षेमं पृच्छामो भवतोऽनघाः।
संसारेऽस्मिन् क्षणार्द्धोऽपि सत्सङ्गः सेवधि र्नृणाम् ॥३७॥"

"तथाहि तत्रैव तृतीयस्कन्धे पञ्चविंशाध्याये द्वाविंशः श्लोकः—

सतां प्रसङ्गान्मम वीर्य्यसंविदो भवन्ति हृत्कर्ण-रसायनाः कथाः।
तज्जोषनादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरणुक्रमिष्यति ॥३८॥"

सङ्गत्यागो ह्यसाधूनां वैष्णवाचार उच्यते।
स्त्रीसङ्गी प्रथमोऽसाधुः कृष्णाभक्तोऽपरः पुनः ॥४६

"तथाहि श्रीमद्भागवते तृतीयस्कन्ध एकत्रिंशाध्याये पञ्चत्रिंशः श्लोकः—

न तथास्य भवेन्मोहो बन्धश्चान्यप्रसङ्गतः।
योषित्सङ्गाद् यथा पुंसो यथा तत्सङ्गिसङ्गतः ॥३९॥"

"तथाहि तत्रैवैकविंशाध्याये त्रयस्त्रिंश-चतुस्त्रिंशश्लोकौ—

सत्यं शौचं दया मौनं बुद्धिर्ह्रीः श्रीर्यशः क्षमा।
शमोदमो भगश्चेति यत्सङ्गाद् याति संक्षयम् ॥४०॥
तेष्वशान्तेषु मूढ़ेषु खण्डितात्मस्वसाधुषु।
सङ्गं न कुर्य्याच्छोच्येषु योषित्क्रीड़ामृगेषु च ॥४१॥"

"तथाहि हरिभक्तिविलासस्य दशमविलासे चतुर्विंशत्यधिकद्विशत-तमाङ्कधृत-कात्यायनसंहितावचनम्—

वरं हुतवह-ज्वाला-पञ्जरान्तर्व्यवस्थितिः।
न शौरि-चिन्ता-विमुख-जन-संवास-वैशसम् ॥४२॥"

"तथाहि गोस्वामिपादोक्तः श्लोकपादः—

मा द्राक्षीः क्षीणपुण्यान् क्वचिदपि भगवद्भक्तिहीनान् मनुष्यान् ॥४३॥"

एतत् सर्वं तथा वर्णाश्रमधर्मांश्च सन्त्यजन्।
सम्यङ् निष्किञ्चनो भूत्वा श्रीकृष्णं शरणं व्रजेत् ॥५०

"तथाहि श्रीमद्भगवद्गीतायामष्टादशाध्याये षट्षष्टितमः श्लोकः—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥४४॥"

समर्थं सर्वदातारं कृतज्ञं भक्तवत्सलम्।
इत्थं कृष्णं परित्यज्य नान्यं भजति पण्डितः ॥५१

"तथाहि श्रीमद्भागवते दशमस्कन्धेऽष्टाचत्वारिंशाध्याये द्वाविंशः श्लोकः—

कः पण्डितस्त्वदपरं शरणं समीयाद्
भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति सुहृदो भजतोऽभिकामा-
नात्मानमप्युपचयापचयौ न यस्य ॥४५॥"

यदि विज्ञा विजानीयुः श्रीकृष्णस्य गुणावलीम् ।
भजेत्तमेव हित्वान्यं तत्र प्रमाण मुद्धवः ॥५२

"तयाहि तत्रैव तृतीयस्कन्धे द्वितीयाध्याये त्रयोविंशः श्लोकः—

अहो वकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं
व्रजेम ॥४६॥"

शरणागत-दीनस्य भवेदेकं हि लक्षणम् ।
अन्तः प्रविष्टमेवास्य भवेदात्मसमर्पणम् ॥५३

"तथाहि हरिभक्तिविलासस्यैकादशविलासधृतवैष्णवतन्त्रम्—

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा ।
आत्म-निक्षेप-कार्पण्ये षड् विधा शरणा गतिः ॥४७॥
तवास्मीति वदन् वाचा तथैव मनसा विदन् ।
तत्स्थान माश्रितस्तन्वा मोदते शरणागतः ॥४८॥"

यः कृष्णं शरणं गत्वा करोत्यात्मसमर्पणम् ।
तं जनं कुरुते कृष्णस्तत्क्षणादात्मना समम् ॥५४

"तथाहि श्रीमद्भागवत एकादशस्कन्ध ऊनत्रिंशाध्याये
द्वात्रिंशः श्लोकः—

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ।
तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥४६॥"

अधुना साधनं भक्तिं शृणु वक्ष्ये सनातन ।
लभ्यते यत एवेदं कृष्णप्रेम-महाधनम् ॥५५

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे द्वितीयलहर्य्यां
द्वितीयः श्लोकः—

कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥५०॥"
श्रवणादिक्रिया तस्या भवेत् स्वरूपलक्षणम् ।
तटस्थलक्षणन्त्वस्या जातं प्रेमधनं भवेत् ॥५६
कृष्णप्रेमा भवेन्नित्यसिद्धः साध्यो न कर्हिचित् ।
उपायैः शुद्धचित्तेऽय मुदेति श्रवणादिभिः ॥५७
एषा साधनभक्तिस्तु द्विविधैव प्रकीर्त्त्यते ।
एका वैधी तथान्या च नाम रागानुगा मता ॥५८
भजते शास्त्रनिर्देशात् कृष्णं रागहीनो जनः ।
वैधी भक्तिरिति प्राहुः सर्वशास्त्राणि तद्विधाम् ॥५९

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे प्रथमाध्याये पञ्चमः
श्लोकः—

तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयम् ॥५१॥"

"तथाहि तत्रैवैकादशस्कन्धे पञ्चमाध्याये द्वितीय-तृतीयौ
श्लोकौ—

मुखवाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणै र्विप्रादयः पृथक् ॥५२॥
य एषां पुरुषं साक्षादात्मप्रभव मीश्वरम् ।
न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥५३॥"

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्ति-
लहर्य्यां पद्मपुराणवचनम्—

स्मर्त्तव्यः सततं विष्णु र्विस्मर्त्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥५४॥"

सैषा साधनभक्तिस्तु विविधाङ्गा सुविस्तृता ।
तत् सारं साधनाङ्गानां स्वल्पं वक्ष्ये समासतः ॥६०
गुरुपादाश्रयो दीक्षा गुरुशुश्रूषणं तथा ।
शिक्षा पृच्छा च सद्धर्मे साधुमार्गानुशीलनम् ॥६१
कृष्णस्य प्रीतये भोगत्यागस्तत्तीर्थ आश्रयः ।
यावन्निर्वाहमादान मेकादश्यामुपोषणम् ॥६२
धात्र्यश्वत्थगवां विप्रवैष्णवानाञ्च पूजनम् ।
सेवा-नामापराधादे वर्जनञ्च सुदूरतः ॥६३
त्यजेदवैष्णवैः सङ्गं शिष्यान् कुर्य्याद्बहून्न च ।
बहुग्रन्थ-कलाभ्यास-व्याख्यानानि च वर्जयेत् ॥६४
शोकादेश्चानधीनत्वं समत्वं हानिलाभयोः ।
न निन्देदन्यशास्त्राणि देवानन्यांश्च कांश्चन ॥६५
शृणुयाद् ग्राम्यवार्त्तां न विष्णुवैष्णवनिन्दनम् ।
नोद्वेगं प्राणिमात्रस्य कुर्य्याद्वाचाथ चेतसा ॥६६
श्रवणं कीर्त्तनं ध्यानं पूजनं वन्दनं तथा ।
परिचर्य्या च दास्यञ्च सख्यञ्चात्मनिवेदनम् ॥६७
पुरतो नृत्यगीतानि विज्ञप्ति र्दण्डवन्नतिः ।
अभ्युत्थान मनुव्रज्या गति स्तीर्थगृहेषु च ॥६८
जपः सङ्कीर्त्तनञ्चैव स्तवपाठः परिक्रमा ।
धूप-स्रग्-गन्धदानञ्च महाप्रसादभोजनम् ॥६९
श्रीमूर्त्तेर्दर्शनं तावदारात्रिकमहोत्सवः ।
निजाभीष्टप्रदानञ्च ध्यानं तस्य च सेवनम् ॥७०
तदीया तुलसी भागवतञ्च वैष्णवास्तथा ।
मथुरेति चतुष्कस्य सेवा कृष्णस्य सम्मता ॥७१
कृष्णस्यार्थेऽखिला चेष्टा तत् कृपाया विलोकनम् ।
तस्य भक्तैः समं जन्मदिवसादिमहोत्सवः ॥७२

कार्त्तिकादिव्रताचारः सर्वदा शरणागतिः ।
इत्यङ्गानां चतुःषष्टेः साधनं परमं महत् ॥७३
श्रीमूर्त्तेः श्रद्धया सेवा सत्-सङ्गो नामकीर्त्तनम् ।
मथुरायां निवासश्च श्रीमद्भागवतश्रुतिः ॥७४
इत्येतत् साधनश्रेष्ठं मनागप्यङ्गपञ्चकम् ।
साध्यते चेत्तदा तस्मात् कृष्णप्रेमो पजायते ॥७५

"तथाहि तत्रैव द्विचत्वारिंश-त्रयश्चत्वारिंशौ श्लोकौ—

सजातीयाशये स्निग्धे साधौ सङ्गः स्वतो वरे ।
श्रीमद्भागवतार्थानामास्वादो रसिकैः सह ॥५५॥
श्रद्धाविशेषतः प्रीतिः श्रीमूर्त्तेरङ्घ्रिसेवने ।
नामसङ्कीर्त्तनं श्रीमन्मथुरामण्डले स्थितिः ॥५६॥"

"तथाहि तत्रैव नवाधिकशततमः श्लोकः—

दुरूहाद्भुतवीर्य्येऽस्मिन् श्रद्धा दूरेऽस्तु पञ्चके ।
यत्र स्वल्पोऽपि सम्बन्धः सद्धियां भावजन्मने ॥५७॥"
कोऽप्येकं साधयत्यङ्गं बहून्यङ्गानि कोऽपिवा ।
निष्ठायामेव जायन्ते श्रीकृष्णप्रेमवीचयः ॥७६
प्राप्नुवन् बहवो भक्ताः सिद्धि मेकाङ्गसाधनात् ।
अम्बरीषादयो भक्ता बहून्यङ्गान्यसाधयन् ॥७७

"तथाहि पद्यावल्यां भक्तमाहात्म्ये दाक्षिणात्यश्रीवैष्णवकृतः **श्लोकः**—

श्रीविष्णोः श्रवणे परीक्षिदभवद् वैयासकिः कीर्त्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम् ॥५८॥"

"तथाहि श्रीमद्भागवते नवमस्कन्धे चतुर्थाध्यायेऽष्टादशादधः श्लोकाः—

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिञ्चकाराच्युतसत्कथोदये ॥५९॥"

मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।
घ्राणञ्च तत्-पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥६०॥
पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामञ्च दास्ये नतु कामकाम्यया यथोत्तमःश्लोकजनाश्रया रतिः ॥६१॥"

कामं त्यक्त्वा भजेत् कृष्णं शास्त्राज्ञां मानयंश्च यः ।
स कदाचिन्न देवर्षिपित्रादीनामृणी भवेत् ॥७८

"तथाहि तत्रैवैकादशस्कन्धे पञ्चमाध्याये सप्तत्रिंशः श्लोकः—

देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्त्तम् ॥६२॥"

यो भजेत् कृष्णपादाब्जं वैधधर्ममपि त्यजन् ।
याति जातु न तच्चित्तं निषिद्धे पापकर्मणि ॥७९
जात्व ज्ञानवशात् किञ्चित् पापं यद्युपतिष्ठते ।
प्रायश्चित्तं विना कृष्णस्तं विशोधयति स्वयम् ॥८०

"तथाहि तत्रैव अष्टत्रिंशः श्लोकः—

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि सन्निविष्टः ॥६३॥"

न स्यातां ज्ञानवैराग्ये भक्तेरङ्गे कदाचन ।
कृष्णभक्तानुयातारो यमाश्च नियमादयः ॥८१

"तथाहि तत्रैव विंशाध्याये एकत्रिंशः श्लोकः—

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥६४॥"

तथाहि भक्तिरसामृतसिन्धो पूर्वविभागे साधनभक्तिलहर्य्यां धृतं स्कान्दवचनम्—

एते नह्यद्भुता व्याध तवाहिंसादयो गुणाः ।
हरिभक्तौ प्रवृत्ता ये न ते स्युः परतापिनः ॥६५॥"

विवृति र्वैधभक्त्यास्तु साधनानां कृता मया ।
भक्त्या रागानुगायाश्च लक्षणं श्रूयतां त्वया ॥८२
मुख्या रागानुगा भक्ति र्जनानां व्रजवासिनाम् ।
तदनुव्रतभक्तानां भक्ती रागानुगाभिधा ॥८३

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां
चतुरधिकशततमः श्लोकः—

इष्टे स्वारसिकी रागः परमाविष्टता भवेत् ।
तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोदिता ॥६६॥"
इष्टे गाढ़तृषा रागो भवेत् स्वरूपलक्षणम् ।
इष्टे च परमावेश उक्तं तटस्थलक्षणम् ॥८४
एषा रागमयी भक्ति र्नाम्ना रागात्मिका भवेत् ।
एवं श्रुत्वा भवेल्लुब्धो भुवि कश्चन भाग्यवान् ॥८५
आनुगत्यं चरेल्लोभाद्भावेषु व्रजवासिनाम् ।
रागानुगा प्रकृत्यैव शास्त्रयुक्तिं न मन्यते ॥८६

"तथाहि तत्रैव त्र्यधिकशततमः श्लोकः—

विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु ।
रागानुगामनुसृता या सा रागानुगोच्यते ॥६७॥"

"तथाहि तत्रैवाष्टादशाधिकशततमः श्लोकः—

तत्तद्भावादिमाधुर्य्ये श्रुते धीर्यदपेक्षते ।
नात्र शास्त्रं न युक्तिञ्च तल्लोभोपत्तिकारणम् ॥६८॥"
वाह्यश्चान्तरिकश्चास्याः साधनं द्विविधं मतम् ।
वहिः साधकदेहेन कुर्य्याच्छ्रवणकीर्त्तने ॥८७
मनसा च निजं सिद्धदेहं सञ्चिन्तयन्मुदा ।
रात्रिन्दिवं व्रजे कुर्य्याद्भगवत्कृष्णसेवनम् ॥८८

"तथाहि तत्रैव पञ्चाशदधिकशततमः श्लोकः—

सेवा साधकरूपेण सिद्धरूपेण चात्र हि।
तद्भावलिप्सुना कार्य्या व्रजलोकानुसारतः ॥६६॥"

निजाभीष्टतमं कृष्णं तत्प्रेष्ठांश्चाथ सेवकान्।
सर्वदान्तर्मना भूत्वा स्मरन् सेवेत चेतसा ॥८६

"तथाहि तत्रैवोनपञ्चाशदधिकशततमः श्लोकः —

कृष्णं स्मरन् जनञ्चास्य प्रेष्ठं निजसमीहितम्।
तत्तत्कथारतश्चासौ कुर्य्याद्वासं व्रजे सदा ॥७०॥"

दासः सखा च पित्राद्याः प्रेयसीनां गणस्तथा।
गण्यन्ते रागमार्गेण स्वस्वभावानुसारतः ॥६०

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चविंशाध्याये पञ्चत्रिंशः श्लोकः—

न कर्हिचिन्मत्पराः शान्तरूपे नङ्क्ष्यन्ति नो मेऽनिमिषो लेढ़ि हेतिः।
येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥७१॥"

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां धृत-
नारायणव्यूहस्तवः—

पति-पुत्र-सुहृद्-भ्रातृ-पितृवन्मित्रवद्धरिम्।
ये ध्यायन्ति सदोद्युक्ता स्तेभ्योऽपीह नमो नमः ॥७२॥"

एवं रागानुगां भक्तिमनुतिष्ठन्ति ये जनाः।
श्रीकृष्णचरणे प्रीतिस्तेषामेवोपजायते ॥६१

कृष्णप्रेमाङ्कुरौ नाम रतिभावाविति द्विधा।
यतः श्रीभगवान् कृष्णो वश्यतामेति निश्चितम् ॥६२

लभ्यते यत एवेदं कृष्णप्रेमरसं धनम्।
अभिधेयस्य तस्यैषा विवृतिः कथिता मया ॥६३

इमां साधनभक्तिं योऽभिधेयं संशृणोत्यथ।
स प्राप्नोत्यचिरादेव कृष्णप्रेममहाधनम् ॥६४

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥९५

इति श्रीचैतन्यचरितामृते मध्यखण्डेऽभिधेयभक्तितत्त्वविचारो नाम द्वाविंशः परिच्छेदः ।

—०—

मध्यलीलायां त्रयोविंशः परिच्छेदः

"चिराददत्तं निजगुप्तवित्तं स्वप्रेमनामामृतमत्युदारः ।
आपामरं यो विततार गौरः कृष्णो जनेभ्यस्तमहं प्रपद्ये ॥१॥"

गौरचन्द्रो मुहुर्जीयान्नित्यानन्दो जयत्यसौ ।
जयत्यद्वैतचन्द्रश्च गोरभक्ता जयन्तु च ॥१

शृण्विदानीं फलं भक्तेः कृष्णप्रेमप्रयोजनम् ।
यदाकर्णयतो भक्तिरसज्ञानं प्रजायते ॥२

कृष्णे गाढ़ा रतिस्तावत् प्रेमनाम्नाभिधीयते ।
कृष्णभक्तिरसस्यैतत् स्थायिभावाख्ययोच्यते ॥३

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे भावभक्तिलहर्य्यां प्रथमः श्लोकः—

शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥२॥"

ते द्वे स्वारूपताटस्थे भावस्य लक्षणे मते ।
अधुना श्रूयतां प्रेम्णो लक्षणञ्च सनातन ॥४

"तथाहि तत्रैव प्रेमभक्तिलहर्य्यां प्रथमः श्लोकः—

सम्यङ् मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥३॥"

"तथाहि हरिभक्तिविलास्यैकादशविलासे धृतनारद-
पञ्चरात्रवचनम्—

अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म-प्रह्लादोद्धव-नारदैः ॥४॥"

दिष्ट्या कयापि जीवस्य श्रद्धा स्याद् यदि कस्यचित् ।
तदा स एव कुर्वीत ध्रुवं साधुसमागमम् ॥५
साधुसङ्गात्ततः स्यातां तस्य श्रवण-कर्त्तने ।
इत्थं साधनभक्त्या स्यात् सर्वानर्थनिवर्त्तनम् ॥६
अनर्थानां निवृत्तौ च भक्तिनिष्ठोपजायते ।
जायते भक्तिनिष्ठातो रुचिश्च श्रवणादिषु ॥७
आसक्तिः प्रचुरा तस्या रुचेरुत्पद्यते ततः ।
उद्भिद्यते तदासक्ते रथ चित्तोऽङ्कुरो रतेः ॥८
सा रति र्गाढ़तां प्राप्ता धत्ते प्रेमाभिधां पुनः ।
सर्वानन्दैकमञ्जूषा तत् प्रेमैव प्रयोजनम् ॥९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे प्रेमभक्तिलहर्य्या-
मेकादश-द्वादशौ श्लोकौ—

आदौ श्रद्धा ततः साधुसङ्गोऽथ भजनक्रिया ।
ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः ॥५॥
अथासक्तिस्ततो भाव स्ततः प्रेमाभ्युदञ्चति ।
साधकानामयं प्रेम्णः प्रादुर्भावे भवेत् क्रमः ॥६॥"

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चविंशाध्याये द्वाविंशः
श्लोकः—

सतां प्रसङ्गान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रति र्भक्तिरनुक्रमिष्यति ॥७॥"

अयं भावाङ्कुरो यस्य हृदि क्षेत्रे प्ररोहति ।
चिह्नान्येतानि तस्येति सर्वशास्त्रै र्निगद्यते ॥१०

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिभक्तिलहर्य्या मेकादशद्वादशौ श्लोकौ—

क्षान्तिरव्यर्थकालत्वं विरक्ति र्मानशून्यता ।
आशाबन्धः समुत्कण्ठा नामगाने सदारुचिः ॥८॥
आसक्ति स्तद्गुणाख्याने प्रीति स्तद्वसतिस्थता ।
इत्यादयोऽनुभावाः स्यु र्जातभावाङ्कुरे जने ॥६॥"

यस्य चित्ते प्ररोहन्ति नवप्रीत्यङ्कुरा इमे ।
क्षुभ्यति प्राकृतक्षोभहेतौ सत्यपि नैव सः ॥११

"तथाहि श्रीमद्भागवते प्रथमस्कन्ध ऊनविंशाध्याये त्रयोदशः श्लोकः—

तं मोपयान्तं प्रतियन्तु विप्रा
गङ्गा च देवी धृतचित्तमीशे ।
द्विजोपसृष्टः कुहकस्तक्षको वा
दशत्वलं गायत विष्णुगाथाः ॥१०॥"

न विना कृष्णसम्बन्धं कालं व्यर्थं नयत्यसौ ।

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिलहर्य्यां द्वादशाङ्कधृतो हरिभक्ति-सुधोदयस्य द्वादशाध्यायीयाष्ट-त्रिंशः श्लोकः—

वाग्भिः स्तुवन्तो मनसा स्मरन्त
स्तन्वा नमन्तोऽप्यनिशं न तृप्ताः ।
भक्ताः स्रवन्नेत्रजलाः समग्र
मायु र्हरेरेव समर्पयन्ति ॥११॥"

भुक्ति-सिद्धीन्द्रियार्था न भान्ति तस्य मनागपि ॥१२

"तथाहि श्रीमद्भागवते पञ्चमस्कन्धे चतुर्दशाध्याये द्वि-
चत्वारिंशः श्लोकः—

यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलव दुत्तमःश्लोकलालसः ॥१२॥"

स सर्वोत्तम मात्मानमसारं मन्यतेऽधिकम् ।

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिभक्तिलहर्य्यां
पञ्चदशाङ्कधृतपद्मपुराणवचनम्—

हरौ रतिं वहन्नेष नरेन्द्राणां शिरोमणिः ।
भिक्षामटन्नरिपुरे श्वपाकमपि वन्दते ॥१३॥"

कृष्णो दयिष्यते मेति स दृढ़ं निश्चिनोति च ॥१३

"तथाहि श्रीसनातनगोस्वामिनोक्तः श्लोकः—

न प्रेम श्रवणादिभक्तिरपि वा योगोऽथवा वैष्णवो
ज्ञानं वा शुभकर्म वा कियदहो सज्जाति रप्यस्ति वा ।
हीनार्थाधिकसाधके त्वयि तथाप्यच्छेद्यमूला सती
हे गोपीजनवल्लभ व्यथयते हाहा मदाशैव माम् ॥१४॥"

सर्वदा लालसामुख्या समुत्कण्ठास्य जायते ।

"तथाहि श्रीकृष्णकर्णामृते द्वात्रिंशः श्लोकः—

त्वच्छैशवं त्रिभुवनाद्भुत मित्यवेहि
मच्चापलञ्च तव वा मम वाधिगम्यम् ।
तत् किं करोमि विरलं मुरलीविलासिन्
मुग्धं मुखाम्बुज मुदीक्षितु मीक्षणाभ्याम् ॥१५॥"

नामगाने रुचिः कृष्णनामाभ्यासश्च सर्वदा ॥१४

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे रतिभक्तिलहर्य्यां
षोड़शः श्लोकः—

रोदन-विन्दु-मकरन्द-स्यन्दि-दृगिन्दीवराद्य गोविन्द ।
तव मधुर-स्वर-कण्ठी गायति नामावलीं वाला ॥१६॥"

तस्य कृष्णगुणाख्यानेष्वासक्ति र्वर्द्धते सदा ।

"तथाहि श्रीकृष्णकर्णामृते द्विनवतितमः श्लोकः—

मधुरं मधुरं वपुरस्य विभोर्मधुरं मधुरं वदनं मधुरम् ।
मधुगन्धि मृदुस्मित मेतदहो मधुरं मधुरं मधुरं मधुरम् ॥१७॥"

लीलाक्षेत्रेषु कृष्णस्य प्रीतिस्तस्य च सर्वदा ॥१५

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां पञ्चदशः श्लोकः—

कदाहं यमुनातीरे नामानि तव कीर्त्तयन् ।
उद्बाष्पः पुण्डरीकाक्ष रचयिष्यामि ताण्डवम् ॥१८॥"

श्रीकृष्णे रतिचिह्नानां कृतेयं विवृति र्मया ।
श्रीकृष्णप्रेमचिह्नानि शृण्विदानीं सनातन ॥१६
उदेति हृदये यस्य कृष्णप्रेमेदमद्भुतम् ।
तस्य वाक्य-क्रिया-मुद्रा न बुध्यन्ते बुधैरपि ॥१७

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे प्रेमभक्तिलहर्य्यां द्वादशः श्लोकः—

धन्यस्यायं नवप्रेमा यस्योन्मीलति चेतसि ।
अन्तर्वाणीभिरप्यस्य मुद्रा सुष्ठु सुदुर्गमा ॥१९॥"

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये त्रिंशः श्लोकः—

एवंव्रतः स्वप्रियनामकीर्त्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकवाह्यः ॥२०॥"

वर्द्धमानो भवेत् प्रेमा स्नेहमानप्रणीतयः ।
रागानुरागभावाश्च महाभावो यथाक्रमम् ॥१८
वीजादिक्षुरसो यद्वद् गुड़ः खण्डोऽथ शर्करा ।
सिता मत्स्यण्डिका शुद्धमत्स्यण्डी च क्रमोदिताः ॥१९

यथैषा क्रमशः शुद्ध्या स्वादोऽपि वर्द्धते क्रमात् ।
रतिप्रेमादिभावानां स्वादुता वर्द्धते तथा ॥२०
रतिः पञ्चप्रकारा स्यात् प्रभेदेनाधिकारिणाम् ।
शान्तं दास्यञ्च सख्यञ्च वात्सल्यमधुरे इति ॥२१
पञ्चैते स्थायिनो भावा रसाः पञ्च भवन्ति च ।
भक्तस्तैः सुखमाप्नोति कृष्णो भवति तद्वशः ॥२२
प्रेमाद्याः स्थायिभावास्ते सामग्रीसमवायतः ।
परिणामं गता यान्ति कृष्णभक्तिरसात्मताम् ॥२३
विभावै रनुभावैश्च सात्त्विकै र्व्यभिचारिभिः ।
चतुर्भिर्मिलिताः स्थायिभावा हि रसतामियुः ॥२४
खण्ड-मरीच-कर्पूरैः समवेतं यथा दधि ।
लब्धापूर्वरसास्वादं रसालेत्यभिधीयते ॥२५
विभावौ द्विविधावालम्बनोद्दीपननामकौ ।
कृष्णाद्यालम्बनञ्चोद्दीपनं वंशीस्वरादिकम् ॥२६
स्मित-नर्त्तन-गीताद्या अनुभावाः प्रकीर्त्तिताः ।
अनुभावान्तराविष्टाः स्तम्भाद्याः सात्त्विकाः पुनः ॥२७
तथा निर्वेदहर्षाद्यास्त्रिंशत् स्यु र्व्यभिचारिणः ।
इत्येतै र्मिलितैः सर्वै श्चमत्कारी रसो भवेत् ॥२८
शान्तो दास्यश्च सख्यश्च वात्सल्यमधुरौ रसाः ।
इति पञ्चसु शृङ्गारो वलिष्ठो मधुराह्वयः ॥२९
एवं शान्तरसे शान्तिरतिः प्रेमावधि र्भवेत् ।
तथा दास्यरती रागपर्य्यन्तं वर्द्धते क्रमात् ॥३०
अनुरागावधिं यातः सख्य-वात्सल्यगे रती ।
महांस्तु सुवलादीनां प्रेमा भावावधिर्भवेत् ॥३१
शान्तादीनां रसानान्तु द्वैधं योगवियोगतः ।
सख्य-वात्सल्ययो र्योगादयो बहुविधाः पुनः ॥३२

भावौ रूढ़ाधिरूढ़ाख्यौ केवले मधुरे रसे ।
महिषीषु भवेद्रूढ़ोऽधिरूढ़ो गोपिकासु च ॥३३
अधिरूढ़ो महाभावो द्विविधः परिकीर्त्तितः ।
सम्भोगे मादनो नाम विरहे मोहनाह्वयः ॥३४
मादने चुम्बनादीनि सन्त्यनन्तभिदानि च ।
उद्‌घूर्णा चित्रजल्पश्च द्वौ भेदौ मोहने मतौ ॥३५
चित्रजल्पो दशाङ्गः स्यात् प्रजल्पादिकनामतः ।
श्लोका भ्रमरगीतायां तत्प्रमाणानि ते दश ॥३६
उद्‌घूर्णा विवशा चेष्टा दिव्योन्मादाभिधानका ।
कृष्णस्फूर्त्ति र्वियोगे च श्रीकुष्णम्मन्यता तथा ॥३७
सम्भोगो विप्रलम्भश्च शृङ्गारौ द्विविधौ मतौ ।
अनन्ताङ्गो हि सम्भोग स्तस्यान्तो नैव विद्यते ॥३८
विप्रलम्भो भवेत् पूर्वरागाख्यो माननामकः ।
प्रवास-प्रेमवैचित्त्याभिधाविति चतुर्विधः ॥३९
पूर्वरागः प्रवासश्च मानश्च राधिकादिषु ।
दशमे प्रेमवैचित्त्यं वर्णितं महिषीगणे ॥४०

"तथाहि श्रीमद्भागवते दशमस्कन्धे नवतितमाध्याये पञ्चदशः
श्लोकः—

कुररि विलपसि त्वं वीतनिद्रा न शेषे
स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ।
वयमिव सखि कच्चिद् गाढ़निर्विद्धचेता
नलिन-नयन-हासोदार-लीलेक्षितेन ॥२१॥"

व्रजेन्द्रनन्दनः कृष्णो नायकानां शिरोमणिः ।
श्रीमती राधिका देवी नायिकानां शिखामणिः ॥४१

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां
सप्तमः श्लोकः—

नायकानां शिरोरत्नं कृष्णस्तु भगवान् स्वयम् ।
यत्र नित्यतया सर्वे विराजन्ते महागुणाः ॥२२॥"

"तथाहि तत्रैव प्रथमश्लोकव्याख्यायां धृतगौतमीयतन्त्र-
वचनम्—

देवी कृष्णमयी प्रोक्ता राधिका सर्वथाधिका ।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा ॥२३॥"

गुणानन्त्येऽपि कृष्णस्य चतुःषष्टिर्गुणा वराः ।
एकैकं गुणमाकर्ण्य भक्तकर्णौ सुतृप्यतः ॥४२

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां
त्रयोविंशादयः श्लोकाः—

अयं नेता सुरम्याङ्गः सर्वसल्लक्षणान्वितः ।
रुचिरस्तेजसा युक्तो वलीयान् वयसान्वितः ॥२४॥
विविधाद्भुतभाषावित् सत्यवाक्यः प्रियंवदः ।
वावदूकः सुपाण्डित्यो बुद्धिमान् प्रतिभान्वितः ॥२५॥
विदग्धश्चतुरो दक्षः कृतज्ञः सुदृढ़व्रतः ।
देशकालसुपात्रज्ञः शास्त्रचक्षुः शुचि र्वशी ॥२६॥
स्थिरो दान्तः क्षमाशीलो गम्भीरो धृतिमान् समः ।
वदान्यो धार्मिकः शूरः करुणो मान्यमानकृत् ॥२७॥
दक्षिणो विनयी ह्रीमान् शरणागतपालकः ।
सुखी भक्तसुहृत् प्रेमवश्यः सर्वशुभङ्करः ॥२८॥
प्रतापी कीर्त्तिमान् रक्तलोकः साधुसमाश्रयः ।
नारीगण-मनोहारी सर्वाराध्यः समृद्धिमान् ॥२९॥
वरीयानीश्वरश्चेति गुणास्तस्यानुकीर्त्तिताः ।
समुद्रा इव पञ्चाशद् दुर्विगाहा हरेरमी ॥३०॥
जीवेष्वेते वसन्तोऽपि विन्दु-बिन्दुतया क्वचित् ।
परिपूर्णतया भान्ति तत्रैव पुरुषोत्तमे ॥३१॥

तथाहि तत्रैव सप्तत्रिंशादयः श्लोकाः—

अथ पञ्चगुणा ये स्युरंशेन गिरिशादिषु ॥३२॥
सदा स्वरूपसम्प्राप्तः सर्वज्ञो नित्यनूतनः।
सच्चिदानन्दसान्द्राङ्गः सर्वसिद्धिनिषेवितः ॥३३॥
अथोच्यन्ते गुणाः पञ्च ये लक्ष्मीशादिवर्त्तिनः।
अविचिन्त्यमहाशक्तिः कोटिब्रह्माण्डविग्रहः ॥३४॥
अवतारावलीवीजं हतारिगतिदायकः।
आत्मारामगणाकर्षीत्यमी कृष्णे किलाद्भुताः ॥३५॥
सर्वाद्भुतचमत्कारलीलाकल्लोलवारिधिः।
अतुल्य-मधुरप्रेम-मण्डित-प्रियमण्डलः ॥३६॥
त्रिजगन्मानसाकर्षि-मुरलीकलकूजितः।
असमानोर्द्ध्वरूपश्री विस्मापितचराचरः ॥३७॥
लीला प्रेम्णा प्रियाधिक्यं, माधुर्य्यै वेणुरूपयोः।
इत्यसाधारणं प्रोक्तं गोविन्दस्यचतुष्टयम् ॥३८
एवं गुणाश्चतुर्भेदाश्चतुःषष्टिरुदाहृताः ॥३९॥"
गुणानन्त्येऽपि राधायाः पञ्चविंशतिकै र्गुणैः।
प्रधानै र्वशमाप्नोति श्रीकृष्णो भगवान् स्वयम् ॥४३

"तथाह्युज्ज्वलनीलमणौ नवमादयः श्लोकाः—

अथ बृन्दावनेश्वर्य्याः कीर्त्त्यन्ते प्रवरा गुणाः।
मधुरेयं नववयाश्चलापाङ्गोज्ज्वलस्मिता ॥४०॥
चारुसौभाग्यरेखाढ्य-गन्धोन्मादितमाधवा।
सङ्गीतप्रसराभिज्ञा रम्यवाङ्नर्मपण्डिता ॥४१॥
विनीता करुणापूर्णा विदग्धा पाटवान्विता।
लज्जाशीला सुमर्य्यादा धैर्य्यगाम्भीर्य्यशालिनी ॥४२॥
सुविलासा महाभाव-परमोत्कर्षतर्षिणी।
गोकुलप्रेमवसति र्जगच्छ्रेणीलसद्यशाः ॥४३॥

गुर्वर्पितगुरुस्नेहा सखीप्रणयितावशा ।
कृष्णप्रियावलीमुख्या सन्तताश्रवकेशवा ॥४४॥"
नायिका नायकश्च द्वौ रसस्यालम्बनद्वयम् ।
उभौ श्रेष्ठौ च तावेव श्रीराधा-नन्दनन्दनौ ॥४४
इत्थं दास्यरसे दासगणः सख्ये सखिव्रजः ।
माता पिता च वात्सल्य आश्रयालम्बनानि ते ॥४५

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्य्यां षष्ठादयः श्लोकाः—

भक्ति-निर्धूतदोषाणां प्रसन्नोज्ज्वलचेतसाम् ।
श्रीभागवतरक्तानां रसिकासङ्गरङ्गिणाम् ॥४५॥
जीवनीभूतगोविन्दपादभक्तिसुखश्रियाम् ।
प्रेमान्तरङ्गभूतानि कृत्यान्येवानुतिष्ठताम् ॥४६॥
भक्तानां हृदि राजन्ती संस्कारयुगलोज्ज्वला ।
रतिरानन्दरूपैव नीयमाना तु रस्यताम् ॥४७॥
कृष्णादिभिर्विभावाद्यैर्गतै रनुभवाध्वनि ।
प्रौढ़ानन्दचमत्कारकाष्ठामापद्यते पराम् ॥४८॥"
नाभक्तानां गणो जातु रसमास्वादयत्यमुम् ।
कृष्णभक्तजनैरेव रसोऽयं स्वाद्यते खलु ॥४६

"तथाहि तत्रैव रससामान्यनिरूपणे स्थायिभावलहर्य्यां द्वाविंशत्यधिकशततमः श्लोकः—

सर्वथैव दुरूहोऽय मभक्तैर्भगवद्रसः ।
तत्पादाम्बुजसर्वस्वै र्भक्तै रेवानुरस्यते ॥४६॥"
व्याख्या प्रयोजनस्येयं समासेन कृता मया ।
पञ्चमः पुरुषार्थोऽयं कृष्णप्रेममहाधनम् ॥४७
पूर्वमेव प्रयागेऽहं रसस्येमां विचारणाम् ।
तव भ्रातरमादिक्षं शक्तिं सञ्चारयं स्तदा ॥४८

त्वयापि भक्तिशास्त्राणि प्रचार्य्यन्तामितस्ततः ।
क्रियतां लुप्ततीर्थानामुद्धारो मथुरापुरे ॥४६

त्वं भक्तिस्मृतिशास्त्राणि कृत्वा वृन्दावने वसन् ।
कृष्णसेवां तथाचारान् वैष्णवानां प्रचारय ॥५०

संस्थितिं युक्तवैराग्ये सर्वथा त्वा मशिक्षयम् ।
ज्ञानञ्च शुष्कवैराग्यमहं सर्वं निषिद्धवान् ॥५१

"तथाहि भक्तिरसामृतसिन्धौ (१।२।१२५)—

अनासक्तस्य विषयान् यथार्ह मुपयुञ्जतः ।
निर्व्वन्धः कृष्णसम्बन्धे युक्तं वैराग्य मुच्यते ॥५०॥"

"तथाहि श्रीमद्भगवद्गीतायां द्वादशाध्याये त्रयोदशादयः श्लोकाः—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥५१॥

सन्तुष्टः सततं योगी यतात्मा दृढ़निश्चयः ।
मय्यर्पितमनोबुद्धि र्यो मद्भक्तः स मे प्रियः ॥५२॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥५३॥

अनपेक्षः शुचि र्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मे भक्तः स मे प्रियः ॥५४॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः ॥५५॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥५६॥

तुल्यनिन्दास्तुति र्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमति र्भक्तिमान्मे प्रियो नरः ॥५७॥

ये तु धर्मामृत मिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥५८॥"

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे द्वितीयाध्याये पञ्चमः

श्लोकः—

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद्भजन्ति कवयो धन-दुर्मदान्धान् ॥५६॥"

ततः सनातनेनैवं परिपृष्टो महाप्रभुः ।
कथयामास सिद्धान्तान् सर्वान् भागवतानसौ ॥५२
गोलोकस्य स्थिति र्नित्या हरिवंशे यथोदिता ।
यथा चेन्द्रः समागत्य श्रीकृष्णं स्तुतवानिति ॥५३
यथा वा मौषलीलीला कृष्णान्तर्धान मप्यथ ।
केशरूपावतारत्व-विरुद्धाख्यान मेव यत् ॥५४
यथा मायामयं सर्वं महिषीहरणादिकम् ।
सोऽशिक्षयत्तथा व्याख्यां सुसिद्धान्तो यथाभवत् ॥५५
ततः सनातनो धृत्वा श्रीपादौ श्रीमहाप्रभोः ।
तृणगुच्छं गृहीत्वा च दन्तैरेवं न्यवेदयत् ॥५६
जात्या नीचं च मां नीचसेविनं पामराधमम् ।
अज्ञेयान् ब्रह्मणोऽपीमान् सिद्धान्तां स्त्वमुपादिशः ॥५७
असौ सिद्धान्तसाराब्धि रिदं तुच्छं मनो मम ।
विन्दु मेकमपि स्प्रष्टुं तस्य नार्हति मे मनः ॥५८
अभिकाङ्क्षति चेतस्ते पङ्गुं नर्त्तयितुं यदि ।
पादौ निधाय मे मूर्ध्नि वरमित्थं तदार्पय ॥५६
मयोपदिष्टाः सिद्धान्ता स्त्वयि सर्वे स्फुरन्त्विति ।
एवं तव वरेणैव मम शक्ति र्भविष्यति ॥६०

ततो महाप्रभु धृ त्वा पाणिना तस्य मस्तकम् ।
बरं समर्पयामास तत् सर्वं ते स्फुरत्विति ॥६१
प्रेमप्रयोजनस्यायं संवादः कथितो मया ।
विस्तरेण प्रसादोऽस्य स्पष्टं वक्तुं न शक्यते ॥६२
उपदेशान् प्रभोरेतानाकर्णयति यो जनः ।
स प्राप्नोत्यचिरादेव कृष्णप्रेमधनं महत् ॥६३
आशास्ते यः पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥६४

इति श्रीचैतन्यचरितामृते मध्यखण्डे प्रेमप्रयोजनविचारो नाम त्रयोविंशः परिच्छेदः ।

—०—

मध्यलीलायां चतुर्विंशः परिच्छेदः

"आत्मारामेतिपद्यार्कस्यार्थांशून् यः प्रकाशयन् ।
जगत्तमो जहाराव्यात् स चैतन्योदयाचलः ॥१॥
तं वन्दे कृष्णचैतन्यमीश्वरं करुणार्णवम् ।
येनात्मारामश्लोकाष्टादशार्थाः परिकीर्त्तिताः ॥२॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्यसौ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
ततः सनातनो गृह्णंश्चरणौ श्रीमहाप्रभोः ।
कथयामास भूयोऽपि किञ्चित्तं विनयानतः ॥२
श्रुतवानस्मि पूर्वं त्वं सार्वभौमस्य सन्निधौ ।
अर्थानष्टादशातानीः श्लोकस्यैकस्य लीलया ॥३

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे सप्तमाध्याये दशमः श्लोकः—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥३॥"
शृण्वतो मे तथाश्चर्य्यं श्रोतुमुत्कण्ठते मनः ।
वक्ष्यसे कृपया चेन्मे कर्णौ तत्तृप्तिमेष्यतः ॥४
प्रभुः प्रोचेऽहमुन्मत्तः सार्वभौमेण मे वचः ।
प्रलापो वातुलस्यापि भूतार्थमिति मन्यते ॥५
किन्तु प्रलपितं तस्मै न किञ्चित् स्मर्य्यते मया ।
तव सङ्गबलादेव यदि स्मर्य्येत किञ्चन ॥६
स्वभावान्मम कोऽप्यर्थो बुद्धौ न प्रतिभासते ।
सङ्गशक्त्यैव युष्माकं यत् किञ्चिन्नु प्रकाशते ॥७
सप्रसादस्त्वयं श्लोक एकादशपदान्वितः ।
पृथक् पृथक् च बह्वर्थैः पदैः प्रद्योतते भृशम् ॥८
आत्मशब्दात्तनु-ब्रह्म-धैर्य-यत्न-मनो-धियः ।
स्वभावश्चेति सप्तैते लभ्यन्तेऽर्थाः सुधीजनैः ॥९

"तथाहि विश्वप्रकाशे—

आत्मा देह-मनो-ब्रह्म-स्वभाव-धृति-बुद्धिषु ।
प्रयत्ने च ॥४॥"

सप्तस्वेषु रमन्ते य आत्मारामास्त एव हि ।
तेषां विवरणन्त्वात्मारामाणां क्रियतेऽग्रतः ॥१०
अर्था मुन्यादिशब्दाना माकर्ण्यन्तां सनातन ।
कृत्वा पृथक् पृथक् चार्थान् योजयिष्यामि तां स्ततः ॥११
उच्येते मुनिशब्देन मननशील-मौनिनौ ।
मुनि ऋषिस्तपस्वी वा व्रती वा संयतेन्द्रियः ॥१२
अर्था निर्ग्रन्थशब्दस्याख्या-ग्रन्थिविवर्जिताः ।
विधि-निषेध-वेदादिशास्त्र-ज्ञानादिवर्जिताः ॥१३

मूर्खा नीचास्तथा म्लेच्छादयः शास्त्रपराङ्मुखाः ।
धनसञ्चयिनः प्रोक्ता निर्ग्रन्था धनवर्जिता ॥१४

"तथाहि विश्वप्रकाशे—

निर्निश्चये निष्क्रमार्थे निर्निर्माण-निषेधयोः ।
ग्रन्थो धने च सन्दर्भे वर्णसंग्रहणेऽपि च ॥५॥"

स उरुक्रमशव्देन वाच्यो यस्य महान् क्रमः ।
उच्यते क्रमशव्देन पादविक्षेपणं तथा ॥१५
शक्तिः कम्पस्तथा पारिपाट्य शक्त्याक्रमः पुनः ।
सोऽयं कम्पितवान् पादचालनाद्भुवनत्रयम् ॥१६

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे सप्तमाध्याय ऊनचत्वारिंशः श्लोकः—

विष्णोर्हि वीर्य्यगणनां कतमोऽर्हतीह
यः पार्थिवान्यपि कवि र्विममे रजांसि ।
चस्कम्भ यः स्वरहसास्खलता त्रिपृष्ठं
यस्मात्त्रिसाम्यसदनादुरुकम्पयानम् ॥६॥"

विभुशक्त्या च यो व्याप्याखिलं धृत्वा च पुष्यति ।
गोलोकं माधुरीशक्त्यैश्वर्य्येण व्योम यः परम् ॥१७
मायया पारिपाट्येन ब्रह्मण्डादीनि यः सृजेत् ।
इत्युरुक्रमशव्दस्यार्थ एषोऽत्र निरूपितः ॥१८

"तथाहि विश्वप्रकाशे—

क्रमः शक्तौ पारिपाट्यां क्रमश्चालनकम्पयोः ॥७॥"

कुर्वन्तीति पदे चात्र परस्मैपददर्शनात् ।
कृष्णस्यैव सुखस्यार्थे भक्तौ तात्पर्य्यमुच्यते ॥१९

"तथाहि पाणिनिः—

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥८॥"

कथ्यते हेतुशव्देन मुक्त्याद्याकाङ्क्षितान्तरम् ।
मुक्तिः सिद्धिश्च मुक्तिश्चेत्युक्तं मुख्यतया त्रिधा ॥२०

उच्यते भुक्तिशब्देन भोगोऽनन्तविधः किल ।
सिद्धयोऽष्टादश प्रोक्ता मुक्तिः पञ्चविधा मता ॥२१
एता यत्र न विद्यन्ते सैव भक्ति रहैतुकी ।
वशीभावं समायाति श्रीकृष्णः कौतुकी यया ॥२२
अर्थो हि भक्तिशब्दस्य भवेद्दशविधः पुनः ।
नवधा प्रेमभक्तिः स्यात् साधनं भक्तिरेकधा ॥२३
रतिरूपा तथा प्रेमरूपेत्यादिकसंज्ञिताः ।
भावारूपा महाभावरूपा चेति भिदा नव ॥२४
रतिः प्रेमावधिं यावच्छान्तभक्तस्य वर्द्धते ।
रतिस्तु दास्यभक्तस्य याति रागदशावधिम् ॥२५
वर्द्धते चानुरागान्तं सखीनामपि सा रतिः ।
मातापित्रादिकस्नेहोऽनुरागावधिमेति च ॥२६
कान्तानान्तु महाभावसीमामाप्नोति सा रतिः ।
इत्येवं भक्तिशब्दार्थमहिमा विवृतो मया ॥२७
इत्थम्भूतगुणेत्यस्य शब्दस्य विवृतिं शृणु ।
इत्थमित्यस्य भिन्नोऽर्थो गुणशब्दस्य चेतरः ॥२८
इत्थम्भूतेति शब्दार्थः पूर्णानन्दमयो भवेत् ।
तृणायमानतामेति ब्रह्मानन्दोऽपि यत्-पुरः ॥२९

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे भक्तिसामान्यलहर्य्यां धृतः श्रीहरिभक्तिसुधोदयस्य चतुर्दशाध्यायस्थः षट्त्रिंशः श्लोकः—

त्वत्-साक्षात्-करणाह्लाद-विशुद्धाब्धिस्थितस्य मे ।
सुखानि गोष्पदायन्ते ब्राह्माण्यपि जगद्गुरो ॥६॥"

सर्वाकर्ष्यखिलाह्लादकरो महारसायनः ।
आत्मशक्त्यैव सर्वेषां सर्वं विस्मारयत्यसौ ॥३०
यद्गन्धो मोचयेद् भुक्तिसिद्धिमुक्तिसुखं वलात् ।
श्रीकृष्ण-करुणाशक्ति गुणै बध्नात्य लौकिकैः ॥३१

न सिद्धान्तविचारेऽस्मिन् शास्त्रयुक्ति रपेक्ष्यते ।
अत्रास्ते माधुरीसारः सोऽयं स्वाभाविको गुणः ॥३२
अर्थोऽयं गुणशब्दस्य कृष्णस्यानन्तका गुणाः ।
सच्चिद्रूपा गुणाः सर्वे पूर्णानन्दमयाः किल ॥३३
करुणैश्वर्य्यमाधुर्य्यस्वरूपाणाञ्च पूर्णता ।
ततोऽस्य भक्तवात्सल्यादात्मावधिवदान्यता ॥३४
एतस्यालौकिका रूपरसगन्धादयो गुणाः ।
कर्षेद् गुणेन केनापि स मनः कस्यचित्ततः ॥३५
सौरभादिगुणैश्चित्तं सनकादे र्जहार सः ।

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चदशाध्याये त्रयश्चत्वारिंशः श्लोकः—

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥१०॥"

सोऽहरच्छृण्वतो लीलां शुकदेवस्य मानसम् ॥३६

"तथाहि तत्रैव द्वितीयस्कन्धे प्रथमाध्याये नवमः श्लोकः—

परिनिष्ठितोऽपि नैर्गुण्य उत्तमःश्लोकलीलया ।
गृहीतचेता राजर्ष आख्यानं यदधीतवान् ॥११॥"

"तथाहि तत्रैव द्वादशस्कन्धे द्वादशाध्याये द्विपञ्चाशत्तमः श्लोकः—

स्वसुख-निभृत-चेतास्तद्व्युदस्तान्यभावो-
ऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।
व्यतनुत कृपया य स्तत्त्वदीपं पुराणं
तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥१२॥"

रूपेण श्रीमदङ्गानां गोपिकानां मनोऽहरत् ।

"तथाहि तत्रैव दशमस्कन्धे ऊनत्रिंशाध्याये षट्त्रिंशः श्लोकः—

वीक्ष्यालकावृतमुखं तव कुण्डलश्रि-
गण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयञ्च भुजदण्डयुगं विलोक्य
वक्षः श्रियैकरमणञ्च भवाम दास्यः ॥१३॥"

श्रुतै रूपगुणै रुक्मिण्यादिका आचकर्ष सः ॥३७

"तथाहि तत्रैव द्विपञ्चाशत्तमाध्याय ऊनत्रिंशः श्लोकः—

श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरै र्हरतोऽङ्ग तापम् ।
रूपं दृशां दृशिमता मखिलार्थलाभं
त्वय्यच्युताविशति चित्त मपत्रपं मे ॥१४॥"

वंशीगीतेन लक्ष्म्यादिमानसं स जहार च ।

"तथाहि तत्रैव षोड़शाध्याये द्वात्रिंशः श्लोकः—

कस्यानुभावोऽस्य न देव विद्महे
तवाङ्घ्रिरेणुस्पर्शाधिकारः ।
यद्वाञ्छया श्रीर्ललनाचरत्तपो
विहाय कामान् सुचिरं धृतव्रता ॥१५॥"

अहरत् स्वस्वभावेन जगत्यां युवतीगणम् ॥३८

"तथाहि तत्रैवोनत्रिंशाध्याये सप्तत्रिंशः श्लोकः—

का स्त्र्यङ्ग ते कलपदामृत-वेणुगीत-
सम्मोहितार्य्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद् गो-द्विज-द्रुम-मृगाः पुलकान्यबिभ्रन् ॥१६॥"

वात्सल्येन स आकर्षद् गुरुतुल्याश्च योषितः ।
दास्यसख्यादिभावेन समाकर्षच्च पूरुषान् ॥३९
एवं कृष्णगुणाः पक्षि-मृगवल्ली-महीरुहान् ।
चेतनाचेतनान् सर्वान् प्रेम्णोन्मादाद्या चकर्ष सः ॥४०

"तथाहि पूर्वश्लोकस्य परार्द्धम्—

त्रैलोक्यसौभगमिदञ्च निरीक्ष्य रूपं
यद् गो-द्विज-द्रुम-मृगाः पुलकान्यबिभ्रन् ॥१७॥"

हरिशब्दस्य नानार्थास्तेषु मुख्यतमावुभौ ।
हरत्यमङ्गलं सर्वं प्रेम्णा च हरते मनः ॥४१
यथा तथा च यः कश्चिद् यदि स्मरति जातु तम् ।
तदा चतुर्विधं तापं तस्यासौ हरति ध्रुवम् ॥४२

"तथाहि श्रीमद्भागवत एकादशस्कन्धे चतुर्दशाध्याय ऊनत्रिंशः श्लोकः—

यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ।
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥१८॥"

ततोऽसौ बाधकं भक्तेः कर्माविद्याञ्च नाशयन् ।
फलञ्च श्रवणादीनां प्रेमाणं बोधयत्यपि ॥४३
शरीरेन्द्रियचेतांसि हरति स्वगुणै स्ततः ।
इत्थं दयामयः कृष्ण इत्थं तस्य गुणा अपि ॥४४
चतुरः पुरुषार्थान् स त्याजयन् हरते मनः ।
इत्यहं हरिशब्दस्य कृतवान् मुख्यलक्षणम् ॥४५
अपीति चेति शब्दौ द्वौ भवेतामव्यये पदे ।
यस्मिन्नर्थे प्रयुज्येते स एवार्थो भवेदिति ॥४६
तथाप्यस्य चकारस्य मुख्यं स्यादर्थसप्तकम् ।

"तथाहि विश्वप्रकाशे —

चान्वाचये समाहारेऽन्योन्यार्थे च समुच्चये ।
यत्नान्तरे तथा पादपूरणे व्यवधारणे ॥१९॥"

अपिशब्दस्य सप्तार्था मुख्या एव सुविश्रुताः ॥४७

"तथाहि विश्वप्रकाशे—

अपि सम्भावना-प्रश्न-शङ्का-गर्हा-समुच्चये ।
तथा युक्तपदार्थेषु कामाचारक्रियासु च ॥२०॥"

एष एकादशानाञ्च पदाना मर्थनिर्णयः ।
श्लोकार्थ मधुना वक्ष्ये यथा यत्रैव युज्यते ॥४८
अर्थो हि ब्रह्मशव्दस्य तत्त्वं सर्ववृहत्तमम् ।
स्वरूपैश्वर्य्ययो र्यस्य तुलना नैव विद्यते ॥४६

"तथाहि विष्णुपुराणे प्रथमांशे द्वादशाध्याये सप्तपञ्चाशत्तमः श्लोकः—

बृहत्त्वाद् वृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम् ॥२१॥"

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये त्रयश्चत्वारिंशश्लोकव्याख्यायां श्रीधरधृतवाक्यम्—

आततत्वाच्च मातृत्वादात्मा हि परमो हरिः ॥२२॥"

तेनैव ब्रह्मशब्देन कथ्यते भगवान् स्वयम् ।
अद्वितीयं हि तज्ज्ञानं तद्विना नास्ति चापरम् ॥५०

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्याय एकादशः श्लोकः—

वदन्ति तत्तत्त्वविद स्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मे ति परमात्मेति भगवानिति शब्द्यते ॥२३॥"

तदेवाद्वयतत्त्वं हि श्रीकृष्णो भगवान् स्वयम् ।
यद्विना त्रिषुकालेषु नापरं वस्तु विद्यते ॥५१

"तथाहि तत्रैव द्वितीयस्कन्धे नवमाध्याये द्वात्रिंशः श्लोकः—

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥२४॥"

आत्मशब्दस्य कृष्णोऽर्थो बृहत्त्वं तत् स्वरूपकम् ।
सर्वसाद्यखिलव्यापी स परम-स्वरूपकः ॥५२

"तथाहि पूर्वोक्तं श्रीमद्भागवतव्याख्यायां श्रीधरोद्धृतवाक्यम्—

आततत्वाच्च मातृत्वादात्मा हि परमो हरिः ॥२५॥"

प्राप्तये तस्य कृष्णस्य साधनं त्रिविधं भवेत् ।
ज्ञानं योगश्च भक्तिश्चत्रयाणां लक्षणं पृथक् ॥५३
साधनै स्त्रिभिरेतैस्तु भगवान् भासते त्रिधा ।
ब्रह्मत्व-परमात्मत्व-भगवत्त्वस्वरूपतः ॥५४

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्याय एकादशः

श्लोकः—

वदन्ति तत्तत्त्वविद स्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मे ति परमात्मेति भगवानिति शब्द्यते ॥२६॥"

ब्रह्मे त्यात्मेति शब्दाभ्यां कृष्ण एवाभिधीयते ।
लक्ष्येते निर्विशेषान्तर्यामिनौ रूढिवृत्तितः ॥५५
निर्विशेषमतो ब्रह्म ज्ञानमार्गेण भासते ।
अन्तर्य्यामिस्वरूपेण तथात्मा योगवर्त्मना ॥५६
वैधी रागानुगा चेति द्वि विधा भक्ति रुच्यते ।
तत् स्वयं भगवत्वञ्च द्वाभ्यामेव प्रकाशते ॥५७
स्वयं श्रीभगवान् रागानुगया लभ्यते व्रजे ।

"तथाहि श्रीमद्भागवते दशमस्कन्धे नवमाध्याये सप्तदशः

श्लोकः—

नायं सुखापो भगबान् देहिनां गोपिकासुतः ।
ज्ञानिनाञ्चात्मभूतानां यथा भक्तिमतामिह ॥२७॥"

याति पार्षददेहेन वैकुण्ठं वैधभक्तिमान् ॥५८

"तथाहि तत्रैव तृतीयस्कन्धे पञ्चदशाध्याये पञ्चविंशः

श्लोकः—

यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या
दूरे यमा ह्युपरि नः स्पृहणीयशीलाः ।
भर्त्तुर्मिथः सुयशसः कथनानुराग-
वैक्लव्य-वाष्पकलया पुलकीकृताङ्गाः ॥२८॥"

भवन्ति त्रिविधा वैधभक्तिमन्त उपासकाः ।
अकामाः सर्वकामाश्च मोक्षकामास्तथापरे ॥५६

"तथाहि तत्रैव द्वितीयस्कन्धे तृतीयाध्याये दशमः श्लोकः—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥२६॥"

बुद्धिमानिति शब्दार्थौ विचारज्ञो भवेत् यदि ।
तदासौ निजकामानां कृते कृष्णं भजेत हि ॥६०
भक्तिं विना फलं दातुं क्षमतेऽन्यन्न साधनम् ।
स्वतन्त्रा प्रवला भक्ति र्ददाति निखिलं फलम् ॥६१
अन्यानि साधनानि स्यु रजागलस्तना इव ।
हरिमेव भजन्त्यत्र बुद्धिमन्तो जनास्ततः ॥६२

"तथाहि श्रीमद्भगवद्गीतायां सप्तमाध्याये षोड़शः श्लोकः—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्त्तो जिज्ञासु रर्थार्थी ज्ञानी च भरतर्षभ ॥३०॥"

द्वावार्त्तार्थार्थिनौ गण्यौ सकामेष्वव निश्चितम् ।
मन्येते मोक्षकामौ च जिज्ञासुज्ञानिनावुभौ ॥६३
चत्वारस्तु महाभागा एते सुकृतिनो जनाः ।
तत्तत्कामादिकं त्यक्त्वा शुद्धां भक्तिं श्रयन्ति च ॥६४
कृपया साधुसङ्गस्य कृष्णस्य कृपयाथवा ।
हित्वा कामादिदुःसङ्गान् शुद्धां भक्तिं त आप्नुयुः ॥६५

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे दशमाध्याय एकादशः
श्लोकः—

सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ।
कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥३१॥"

दुःसङ्गः कथ्यते तावत् कैतवञ्चात्मवञ्चनम् ।
कृष्णञ्च कृष्णभक्तिञ्च विना त्वन्यस्य कामना ॥६६

"तथाहि तत्रैव प्रथमाध्याये द्वितीयः श्लोकः—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तव मत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ।।३२।।"

मोक्षेच्छा कैतवश्रेष्ठा प्रशब्देनैव सूच्यते ।
इत्यूचे श्रीधरस्वामी श्लोक मेतं समादधत् ।।६७
सकामो भक्त एवाज्ञ इति जानन् कृपामयः ।
स्वपादौ भगवान् दत्त्वा पिधत्ते तस्य कामनाम् ।।६८

"तथाहि तत्रैव पञ्चमस्कन्ध एकविंशाध्यायेऽष्टाविंशः श्लोकः—

सत्यं दिशत्यर्थित मर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः ।
स्वयं विधत्ते भजता मनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ।।३३।।"

भक्तिः कृष्णकृपा साधुसङ्गश्चेति स्वभावतः ।
त्रय्येषा जनयेत् कृष्णे भावं सर्वञ्च मोचयेत् ।।६९
व्याख्यास्यते मया तावद् यावतोऽर्थानितोऽग्रतः ।
विद्धि कृष्णगुणास्वादे सा त्रयी ह्येव कारणम् ।।७०
श्लोकं व्याख्यातुमाभासो विहितोऽयं मयाधुना ।
तस्य श्लोकस्य मुख्यार्थः सम्प्रत्येव प्रकाश्यते ।।७१
द्विविधा ज्ञानमार्गेण सम्भवेयु रुपासकाः ।
मुमुक्षुः केवलब्रह्मोपासकश्चेति संज्ञिताः ।।७२
तेषाञ्च केवलब्रह्मोपासकानां भिदात्रयम् ।
साधका ब्रह्मभावाप्ताः प्राप्तब्रह्मलया इति ।।७३

मुक्ति र्न स्याद् विना भक्तिं ज्ञानेन केवलेन तु ।
अतो ब्रह्मलयप्राप्ताः कुर्वते भक्तिसाधनम् ॥७४
स्वभावेनैव भक्तिस्तु ब्रह्माप्याकर्षति ध्रुवम् ।
कृष्णस्य भजनं दिव्यदेहेन कारयत्यमून् ॥७५
भक्तदेहे ततः प्राप्ते तद्गुणस्मरणं भवेत् ।
ते तु कृष्णगुणाकृष्टा भजन्ते निर्मलं तदा ॥७६

"तथाहि श्रीभगवत्सन्दर्भे श्रीविष्णुपादाविर्भावव्याख्यायां
धृतभाष्यकृद्व्याख्या—

मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं
भजन्ते । इति ॥३४॥"

आजन्म ब्रह्मभावाप्ताः शुकश्च सनकादयः ।
तेऽपि कृष्णगुणाकृष्टाः कृष्णमेव भजन्ति च ॥७७
करुणासौरभाकृष्टाः कृष्णस्य सनकादयः ।
सुनिर्मलं भजन्ते तं तद्गुणैर्हृतचेतसः ॥७८

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे पञ्चदशाध्याये
त्रयश्चत्वारिंशः श्लोकः—

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥३५॥"

व्यासस्य कृपया श्रुत्वा लीलादिक मनुस्मरन् ।
श्रीकृष्णस्य गुणाकृष्टः शुकदेवोऽभजद्धरिम् ॥७९

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे सप्तमाध्याये एकादशः
श्लोकः—

हरेर्गुणाक्षिप्तमति र्भगवान् बादरायणिः ।
अध्यगान्महदाख्यानं नित्यं विष्णुजन-प्रियः ॥३६"

आजन्मज्ञानिनो योगेश्वरा स्ते नवसाधकाः ।
ब्रह्मे श-नारदास्येभ्यः श्रुत्वा कृष्णगुणावलीम् ॥८०
तयैवाकृष्टचित्तास्ते श्रीकृष्णमभजन्निति ।
श्रीमदेकादशस्कन्धे तेषां भक्तिर्व्यतन्यत ॥८१

"तथाहि भक्तिरसामृतसिन्धौ पश्चिमविभागे शान्तभक्ति-
लहर्य्यां सप्तमः श्लोकः—

अक्लेशां कमलभुवः प्रविश्य गोष्ठीं
कुर्वन्तः श्रुतिशिरसां श्रुतिं श्रुतिज्ञाः ।
उत्तुङ्गं यदुपुरसङ्गमाय रङ्गं
योगीन्द्राः पुलकभृतो नवाप्यवापुः ॥३७॥"

त्रैविध्यं वर्त्तते मोक्षाकाङ्क्षिणां ज्ञानिनामिह ।
मुमुक्षवस्तथा जीवन्मुक्ताः प्राप्तस्वरूपकाः ॥८२
भुवि संसारिणः सन्ति बहवो हि मुमुक्षवः ।
भजन्ते मुक्तिलाभाय भक्त्यैव कृष्णमेव ते ॥८३

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्याये षड्विंशः
श्लोकः—

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ।
नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ॥३८॥"

साधुसङ्गेन सर्वेषां तेषां कृष्णगुणः स्फुरन् ।
मुमुक्षां तैः परित्याज्य कारयेत् कृष्णसेवनम् ॥८४

"तथाहि भक्तिरसामृतसिन्धौ पश्चिमविभागे प्रीतिभक्ति-
लहर्य्यां षष्टाङ्कधृतः श्रीहरिभक्तिसुधोदयस्य
प्रथमाध्यायस्थः पञ्चाशत्तमः श्लोकः—

अहो महात्मन् बहुदोषदुष्टोऽ-
प्येकेन भात्येष भवो गुणेन ।

सत्सङ्गमाख्येन सुखावहेन
कृताद्य नो येन कृशा मुमुक्षा ॥३९॥"

नारदस्यैव सङ्गेन मुनयः शौनकादयः ।
अभजन् कृष्णमेवैते परित्यज्य मुमुक्षुताम् ॥८५
कृष्णस्य दर्शनात् केऽपि केचित्तस्यानुकम्पया ।
भजन्ते चरणौ तस्य गुणै स्त्यक्त्वा मुमुक्षुताम् ॥८६

"तथाहि भक्तिरसामृतसिन्धौ शान्तभक्तिलहर्य्यां त्रयोदशः श्लोकः—

अस्मिन् सुखघनमूर्त्तौ परमात्मनि वृष्णिपत्तने स्फुरति ।
आत्मारामतया मे वृथा गतो वत चिरं कालः ॥४०॥"

जीवन्मुक्तास्तु भूयांसो ज्ञायन्तां द्विविधा इमे ।
जीवन्मुक्ता हि भक्त्यैके ज्ञानेन चापरे मताः ॥८७
जीवन्मुक्तास्तु भक्त्या ये गुणैः कृष्णं भजन्ति ते ।
मज्जन्त्यधोऽपराधेन विशुष्कज्ञानिनोऽपरे ॥८८

"तथाहि श्रीमद्भागवते दशमस्कन्धे द्वितीयाध्याये षड्विंशः श्लोकः—

येऽन्येऽरविन्दाक्ष बिमुक्तमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥४१॥"

"तथाहि श्रीभगवद्गीताया मष्टादशाध्याये चतुष्पञ्चाशत्तमः श्लोकः—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥४२॥"

"तथाहि भक्तिरसामृतसिन्धौ धृतो विल्वमङ्गलकृतः श्लोकः—

अद्वैतवीथीपथिकैरुपास्याः-

स्वानन्दसिंहासनलब्धदीक्षाः ।

शठेन केनापि वयं हठेन

दासीकृता गोपवधु-विटेन ॥४३॥"

दिव्यदेहं लमन्ते ये भक्त्या प्राप्तस्वरूपकाः ।

ते कृष्णस्य गुणाकृष्टा भजन्ते तत्पदाम्बुजम् ॥८६

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे दशमाध्याये

षष्ठश्लोकार्द्धम्—

मुक्ति र्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥४४॥"

कृष्णवैमुख्यदोषेण मायातो जायते भयम् ।

भक्त्या कृष्णाभिमुख्या तु मायाया मुच्यते जनः ॥९०

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्याये

पञ्चत्रिंशः श्लोकः—

भयं द्वितीयाभिनिवेशतः स्या-

दीशादपेतस्य विपर्य्ययोऽस्मृतिः ।

तन्माययातो बुध आभजेत्तं

भक्त्यैकयेशं गुरुदेवतात्मा ॥४५॥"

"तथाहि श्रीभागवद्गीतायां सप्तमाध्याये चतुर्दशः श्लोकः—

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥४६॥"

मुक्ति र्न स्याद्विना भक्तिं मुक्तिर्भक्त्यैव लभ्यते ।

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये चतुर्थः

श्लोकः—

श्रेयःसृतिं भक्ति मुदस्य ते विभो

क्लिश्यन्ति ये केवलबोधलब्धये ।

तेषामसौ क्लेशल एव शिष्यते
नान्यद् यथा स्थूलतुषावघातिनाम् ॥४७॥"

"तथाहि तत्रैव द्वितीयाध्याये षड़्विंशः श्लोकः—

येऽन्येऽरविन्दाक्ष विमुक्तमानिन
स्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥४८॥"

"तथाहि तत्रैवैकादशस्कन्धे पञ्चमाध्याये द्वितीयः श्लोकः—

मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ।
चत्वारो जज्ञिरे वर्णा गुणै र्विप्रादयः पृथक् ॥४९॥"

भक्त्या मुक्तिं गतः कृष्णं भजतेऽवश्यमेव सः ॥६१

"तथाहि श्रीभगवत्सन्दर्भे श्रीविष्णुपादाविर्भावव्याख्यायां
धृता भाष्यकृद्व्याख्या—

मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ते ॥५०॥"

आत्मारामाः षड़ेवैते भजन्ते कृष्णमेव ते ।
ते पृथक् पृथगित्यर्थे चकारोऽप्यर्थकोऽत्र सः ॥६२
आत्मारामाश्चापि कृष्णे भक्तिं कुर्वन्त्य हैतुकीम् ।
मुनयः सन्त इत्यार्थात् कृष्णस्य मनने रताः ॥६३
निर्ग्रन्था विधिहीना वा केऽप्यविद्याविवर्जिताः ।
ये यथा यत्र युज्यन्ते सूच्यन्तेऽर्थास्तथैव ते ॥६४
इतरेतरतार्थश्चेच्चकारेणाभिधीयते ।
उच्यते यस्तदैकोऽर्थः स वलिष्ठो हि सर्वथा ॥६५
षट्कृत्वश्चेद्वदेदात्मारामाश्चेति पदद्वयम् ।
षट् चकारा विलुप्येरन्नात्मारामैश्च पञ्चभिः ॥६६
तदान्ते त्वेक एवात्मारामशव्दोऽवशिष्यते ।
आत्मारामा इतिह्येकपदेनोक्ता स्तु षड़् जनाः ॥६७

"तथाहि विश्वप्रकाशे—

सरूपाणामेकशेष एकविभक्तौ उक्तार्थानामप्रयोगः ।
रामश्च रामश्च रामश्च रामा इतिवत् ॥५१॥"

अथ तेन चकारेण सूच्यते यत्समुच्चयः ।
कृष्णं तावद्भजन्त्यात्मारामाश्च मुनयश्च तत् ॥६८
स्यान्निर्ग्रन्था अपीत्यत्रापीति सम्भावनार्थकम् ।
इति व्याख्यातवानर्थान् सप्तधाहमुपक्रमे ॥६६
आत्मारामा भवन्त्यन्तर्यामिणं य उपासते ।
एतेषां योगिनामात्मारामाणां स्याद्भिदाद्वयम् ॥१००
नाम्ना सगर्भ-निर्गर्भाविति भेदद्वये पुनः ।
एकैकेषां त्रिधा भेदाद् भेदः षोढ़ोपजायते ॥१०१

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे द्वितीयाध्यायेऽष्टमः श्लोकः—

केचित् स्वदेहान्तर्हृदयावकाशे
प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्ज-रथाङ्ग-शङ्ख-
गदाधरं धारणया स्मरन्ति ॥५२॥"

"तथाहि तत्रैव तृतीयस्कन्धेऽष्टाविंशाध्याये चतुस्त्रिंशः श्लोकः—

एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।
औत्कण्ठ्यबाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तवड़िशं शनकैर्वियुङ्क्ते ॥५३॥"

योगारुरुक्षवो योगारूढाश्च प्राप्तसिद्धयः ।
इति त्रैविध्यमासाद्य षोढ़ा भवति तद्द्वयम् ॥१०२

"तथाहि श्रीभगवद्गीतायां षष्ठाध्याये तृतीयचतुर्थौ श्लोकौ—

आरुरुक्षो र्मुने र्योगं कर्म कारण मुच्यते ।
योगारूढ़स्य तस्यैव शमः कारण मुच्यते ॥५४॥
यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसङ्कल्पसन्न्यासी योगारूढ़स्तदोच्यते ॥५५॥"
इमे षड़् योगिनः प्राप्य साधुसङ्गादिकारणम् ।
श्रीकृष्णस्य गुणाकृष्टा स्तं भजन्त्येव सर्वदा ॥१०३
चेत्यव्ययपदेनापेरर्थश्चाप्युपलभ्यते ।
अर्थाश्च पूर्ववत् कार्य्या मुनि-निर्ग्रन्थशब्दयोः ॥१०४
एते त्रयोदशार्थाः स्युः प्रवला इत्युरुक्रमे ।
इत्यत्राहैतुकीत्यत्र योजनीया यथार्थतः ॥१०५
एते सर्वे यदा शान्ता भगवन्तं भजन्ति हि ।
लभन्ते शान्तभक्ताख्यां तदा योगिन एव ते ॥१०६
मनः स्यादात्मशब्दार्थो मनस्येव रमेत यः ।
स भजेत् साधुसङ्गेन श्रीकृष्णचरणाम्बुजम् ॥१०७

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याये चतुर्दशः श्लोकः—

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः
परिसरपद्धतिं हृदय मारुणयो दहरम् ।
तत उदगादनन्त तव धाम शिरः परमं
पुनरिह यत् समेत्य न पतन्ति कृतान्तमुखे ॥५६॥"
ते महामुनयोऽप्येवं कृष्टाः कृष्णगुणैरथ ।
लब्धा निर्ग्रन्थतां कृष्णे भक्ति कुर्वन्त्यहैतुकीम् ॥१०८
आत्मशब्देन यत्नोऽपि कथ्यते, तेन यत्नतः ।
मुनय स्तेऽपि निर्ग्रन्था भूत्वा कृष्णं भजन्ति हि ॥१०९

"तथाहि तत्रैव प्रथमस्कन्धे पञ्चमाध्यायेऽष्टादशः श्लोकः—

तस्यैव हेतोः प्रयतेत कोविदो
न लभ्यते यद् भ्रमतामुपर्यधः ।

तल्लभ्यते दुःखवदन्यतः सुखं
कालेन सर्वत्र गभीररंहसा ॥५७॥

तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां षष्ठाङ्क-
धृतनारदीयवचनम्—

सद्धर्मस्यावबोधाय येषां निर्बन्धिनी मतिः ।
अचिरादेव सर्वार्थः सिध्यत्येषामभीप्सितः ॥५८॥"

अपेरर्थे च शब्दोऽयमपिशब्दोऽवधारणे ।
यत्नाग्रहौ विना तेन प्रेमभक्ति र्न जायते ॥११०

"तथाहि तत्रैव सामान्यभक्तिनिरूपणे त्रयोविंशः श्लोकः—

साधनौघै रनासङ्गै रलभ्या सुचिरादपि ।
हरिणा चाश्वदेयेति द्विधा सा स्यात् सुदुर्लभा ॥५६॥"

"तथाहि श्रीमद्भगवद्गीतायां दशमाध्याये दशमः श्लोकः—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥६०॥"

आत्मशब्दोऽस्ति धृत्यर्थस्तस्माद् यो रमते धृतौ ।
स भूत्वा धैर्य्यवानेव भजेत् कृष्णमनारतम् ॥१११
मुनिः स्यात् खग-भृङ्गार्थौ निर्ग्रन्थो मूर्ख उच्यते ।
भजेतां तावुभौ कृष्णं कृष्णसाध्वनुकम्पया ॥११२

"तथाहि श्रीमद्भागवते दशमस्कन्धे एकविंशाध्याये चतुर्दशः श्लोकः—

प्रायो वताम्ब मुनयो विहगा वनेऽस्मिन्
कृष्णेक्षितं तदुदितं कलवेणुगीतम् ।
आरुह्य ये द्रुमभुजान् रुचिरप्रवालान्
शृण्वन्ति मीलितदृशो विगतान्यवाचः ॥६१॥

तथाहि तत्रैव पञ्चदशाध्याये सप्तमाष्टमौ श्लोकौ—

एतेऽलिनस्तव यशोऽखिललोकतीर्थं
गायन्त आदिपुरुषानुपथं भजन्ते ।

प्रायो अमी मुनिगणा भवदीयमुख्या
गूढ़ं वनेऽपि न जहत्यनघात्मदैवम् ॥६२॥
नृत्यन्त्यमी शिखिन ईड्य मुदा हरिण्यः
सूक्तैश्च कोकिलगणा गृहमागताय ।
कुर्वन्ति गोप्य इव ते प्रियमीक्षणेन
धन्या वनौकस इयान् हि सतां निसर्गः ॥६३॥

तथा तत्रैव पञ्चत्रिंशध्याय एकादशः श्लोकः—

सरसि सारस-हंस-विहङ्गाश्चारुगीतहृतचेतस एत्य ।
हरिमुपासत ते यत-चित्ता हन्त मीलितदृशो धृतमौनाः ॥६४॥

तथा तत्रैव द्वितीयस्कन्धे चतुर्थाध्याये सप्तदशः श्लोकः—

कीरात-हूनान्ध्र-पुलिन्द-पुक्कशा
आभीरशुह्मा यवनाः खसादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥६५॥"

अथवा धृतिशब्दार्थः स्वपूर्णत्वादिधी र्भवेत् ।
दुःखाभावोत्तमाप्तिभ्यां महती पूर्णता भवेत् ॥११३

"**तथाहि** भक्तिरसामृतसिन्धौ दक्षिणविभागे व्यभिचारिलहर्य्यां षष्टितमः श्लोकः—

धृतिः स्यात् पूर्णता ज्ञान-दुःखाभावोत्तमाप्तिभिः ।
अप्राप्तातीतनष्टार्थानभिसंशोचनादिकृत् ॥६६॥"

कृष्णभक्तो भवेद् दुःख-वाञ्छान्तर-विवर्जितः ।
पूर्णानन्दप्रवीणोऽसौ प्रेम्णा कृष्णस्य सेवया ॥११४

"**तथाहि** श्रीमद्भागवते नवमस्कन्धे चतुर्थाध्याये पञ्चाशत्तमः श्लोकः—

मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम् ॥६७॥"

तथा श्रीगोस्वामिपादोक्तः श्लोकः—

हृषीकेशे हृषीकाणि यस्य स्थैर्य्यगतानि हि ।
स एव धैर्य्यमाप्नोति संसारे जीवचञ्चले ॥६८॥"

चेत्यवधारणार्थं स्यादप्यर्थश्च समुच्चयः ।
भजते धैर्य्यवान् भूत्वा पक्षि-मूर्खचयोऽपि, तम् ॥११५

बुद्ध्यर्थोऽप्यात्मशब्दोऽस्ति सा च बुद्धि विलक्षणा ।
साधारणास्तु ये जीवा स्ते स्युः सामान्यबुद्धयः ॥११६

ये बुद्धावारमन्त्यात्मारामास्ते द्विविधाश्च ते ।
मुनयः पण्डिताश्चैके निर्ग्रन्थाश्चापरेऽबुधाः ॥११७

ते प्राप्ता रतिवुद्धिं सत्-सङ्गात् कृष्णानुकम्पया ।
सर्वं सन्त्यज्य कृष्णाङ्घ्रौ भक्तिं कुर्वन्ति निर्मलाम् ॥११८

"तथाहि श्रीमद्भगवद्‌गीतायां दशमाध्यायेऽष्टमः श्लोकः—

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥६९॥

तथाहि श्रीमद्भागवते द्वितीयस्कन्धे सप्तमाध्याये पञ्चचत्वारिंशः श्लोकः—

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्री-शूद्र-हून-शबरा अपि पापजीवाः ।
यद्यद्भुत-क्रम-परायण-शील-शिक्षा-
स्तिर्य्यग्जना अपि किमु श्रुतधारणा ये ॥७०॥"

सुविचार्य्य यदा कृष्णचरणौ भजते जनः ।
तस्मै दत्ते तदा कृष्णो बुद्धिं स प्राप्यते यया ॥११९

"तथाहि श्रीमद्भगवद्‌गीतायां दशमाध्याये दशमः श्लोकः—

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥७१॥"

सत्सङ्गः कृष्णसेवा च भागवतञ्च नाम च ।
व्रजे च वास इत्येत् श्रेष्ठं साधनपञ्चकम् ॥१२०

पञ्चस्वेतेषु यद्येकतमोऽप्यल्पतमो भवेत् ।
तेनैव धीमतां नृणां कृष्णप्रेमोदयो भवेत् ॥१२१

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां सप्ताशीतितमः श्लोकः—

दुरूहाद्भुतवीर्येऽस्मिन् श्रद्धा दूरेऽस्तु पञ्चके ।
यत्र स्वल्पोऽपि सम्बन्धः सद्धियां भावजन्मने ॥७२॥"
महोदारा च यस्यास्ति बुद्धिः सर्वोत्तमा तथा ।
भक्तिं सिद्धिञ्च विन्देत् स नानाकामै र्भजन्नपि ॥१२२

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे तृतीयाध्याये दशमः श्लोकः—

अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥७३॥"
भक्तेः स्वभाव एवैष स कामांस्त्याजयन्नथ ।
कृष्णाङ्घ्रौ जनयेद्भक्तिं कृष्णस्याकर्षयन् गुणैः ॥१२३

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे सप्तमाध्याये दशमः श्लोकः—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्ति मित्थम्भूतगुणो हरिः ॥७४॥

तथा तत्रैव पञ्चमस्कन्ध ऊनविंशाध्यायेऽष्टाविंशः श्लोकः—

सत्यं दिशत्यर्थित मर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः ।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम् ॥७५॥"
आत्मशब्दः स्वभावार्थो रमन्ते तत्र ये पुनः ।
आत्मारामा हि कथ्यन्ते जीवाः स्थावरजङ्गमाः ॥१२४
स्वभावेनैव जीवाः स्युः कृष्णदासाभिमानिनः ।
तच्च स्वाभाविकं ज्ञानं देहेष्वात्मधियावृतम् ॥१२५

एवार्थकश्चशब्दः स्यादपिशब्दः समुच्चये ।
श्रीमत्कृष्णं भजन्त्यात्मारामा एव हि केवलम् ॥१२६
मुनयः सनकाद्याश्च सर्वे जीवा इमे पुनः ।
निर्ग्रन्था मूर्खनीचाश्च स्थावराः पशवस्तथा ॥१२७
शुकव्याससनादीनां प्रसिद्धं भजनं स्मृतम् ।
निर्ग्रन्थस्थावरादीनां विवृतिः श्रूयतामथ ॥३२८
हेतोः कृष्णकृपादेस्तु स्वभावस्योदयो भवेत् ।
श्रीकृष्णस्य गुणाकृष्टा भजन्ते तं ततो जनाः ॥१२८

"तथाहि श्रीमद्भागवते दशमस्कन्धे पञ्चदशाध्यायेऽष्टमः श्लोकः—

धन्येयमद्य धरणी तृणवीरुधस्त्वत्-पादस्पृशो द्रुमलताः करजाभिमृष्टाः ।
नद्योऽद्रयः खगमृगाः सदयावलोकै र्गोप्योऽन्तरेण भुजयोरपि
यत्स्पृहा श्रीः ॥७६॥"

तथा तत्रैवैकविंशाध्याय ऊनविंशः श्लोकः—

गा गोपकैरनुवनं नयतो रुदार-
वेणुस्वनैः कलपदै स्तनुभृत् सु सख्यः ।
अस्पन्दनं गतिमतां पुलकस्तरूणां
निर्योगपाशकृतलक्षणयो र्विचित्रम् ॥७७॥

तथा तत्रैव पञ्चत्रिंशाध्याये पञ्चमः श्लोकः—

बनलतास्तरव आत्मनि विष्णुं व्यञ्जयन्त्य इव पुष्पफलाढ्याः ।
प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवो ववृषुः स्म ॥७८॥

तथा तत्रैव द्वितीयस्कन्धे चतुर्थाध्याये सप्तदशः श्लोकः—

किरात-हूनान्ध्र-पुलिन्द-पुक्कसा-
आभीर-शुह्मा यवनाः खशादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाः
शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥७९॥"

कृता स्त्रयोदशाग्रेऽर्थो अधुना षड़िमे पुनः ।
ऊनविंशतिरर्थाः स्युरुभयो र्मिलनादतः ॥१३०

तथोनविंशति स्तेऽर्थो विहिताः शृण्वथान्यथा ।
आत्मशब्दस्य देहार्थं कृत्वार्थाः स्युश्चतुर्विधाः ॥१३१

देहोपाधि भवेद् ब्रह्म देहारामा भजन्ति यम् ।
स देहोऽपि सतां सङ्गात् कृष्णे भक्तिं करोत्यथ ॥१३२

"तथाहि श्रीमद्भागवते दशमस्कन्धे सप्ताशीतितमाध्याये चतुर्दशः श्लोकः—

उदर मुपासते य ऋषिवर्त्मसु कूर्पदृशः
परिसरपद्धतिं हृदय मारुणयो दहरम् ।
तत उदगादनन्त तव धाम शिरः परमं
पुनरिह यत् समेत्य न पतन्ति कृतान्तमुखे ॥८०॥"

देहारामास्तु ये कर्मनिष्ठा यज्ञकृतो जनाः ।
त्यक्त्वा कर्माणि सत्सङ्गात्तेऽपि कृष्णं भजन्ति हि ॥१३३

"तथाहि तत्रैव प्रथमस्कन्धेऽष्टादशाध्याये द्वादशः श्लोकः—

कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ।
आपाययति गोविन्दपादपद्मासवं मधु ॥८१॥"

ये देहारामिणः सन्ति तपस्वि-प्रमुखा जनाः ।
त्यक्त्वा तपांसि सत्सङ्गात् कृष्णमेव भजन्ति ते ॥१३४

"तथाहि तत्रैव चतुर्थस्कन्ध एकविंशाध्याय ऊनत्रिंशः श्लोकः—

यत् पादसेवाभिरुचिस्तपस्विना-
मशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती
यथा पदाङ्गुष्ठविनिःसृता सरित् ॥८२॥"

आत्मारामा हि ये देहारामिणः सर्वकामिनः ।
ते कृष्णकृपया सर्वान् कामांस्त्यक्त्वा भजन्ति तम् ॥१३५

"तथाहि श्रीहरिभक्तिसुधोदये सप्तमाध्यायेऽष्टाविंशः श्लोकः—

स्थानाभिलाषी तपसि स्थितोऽहं
त्वां प्राप्तवान् देवमुनीन्द्रगुह्यम् ।
काचं विचिन्वन्निव दिव्यरत्नं
स्वामिन् कृतार्थोऽस्मि वरं न याचे ॥८३॥"

इत्थमर्थैश्चतुभिश्च त्रयोविंशतिधाभवन् ।
अर्थाः श्लोकस्य भूयोऽर्थान् शृणु त्रींश्च वरीयसः ॥१३६
अन्योऽप्यर्थो भवेच्चेतिशब्दार्थश्चेत् समुच्चयः ।
उभये हि भजन्त्यात्मारामाश्च मुनयश्च तम् ॥१३७
निर्ग्रन्हाः सन्त इत्यस्मिन्नपि निर्द्धारणार्थकः ।
यथा रामश्च कृष्णश्च वने विहरत स्तथा ॥१३८
चेत्यस्यान्वाचयार्थत्वे भवेदर्थान्तरं पुनः ।
मुख्यं गौणं वटो भिक्षामट गाञ्चानयेति-वत् ॥१३९
भजन्ते मुनयः कृष्णं मन्तारः सर्वदैव तम् ।
आत्मारामा अपि भजन्तीति गौणार्थ उच्यते ॥१४०
चेत्येवार्थे भजेयुस्तं मुनय एव सर्वदा ।
आत्मारामा अपीत्यत्र गर्हार्थ मपि कथ्यते ॥१४१
निर्ग्रन्थाः सन्त इत्येतदुभयत्र विशेषणम् ।
अन्योऽर्थः श्रूयतां साधुसङ्गमो वर्णित स्तथा ॥१४२
निर्ग्रन्था इति शब्देन कथ्यन्ते व्याध-निर्धनाः ।
ते भजन्त्युभये कृष्णं साधुसङ्गेन सर्वदा ॥१४३
कृष्णारामाश्च ते ह्येव कृष्णमननकारिणः ।
व्याधाः सन्तोऽपि संवृत्ताः पूज्या भागवतोत्तमाः ॥१४४
सावधानं त्वया भक्तव्याधस्य श्रूयतां कथा ।
महिम्नः साधुसङ्गस्य यतो ज्ञानं भविष्यति ॥१४५
देवर्षिर्नारदो नारायणमालोक्य कर्हिचित् ।
त्रिवेणीसङ्गमे स्नातुं प्रयागाभिमुखं ययौ ॥१४६

वनमार्गे ददर्शैकं मृगं स पतितं क्षितौ ।
भग्नपादं शरैर्विद्धं स्फुरत्सर्वकलेवरम् ॥१४७

कियद्दूरं गतोऽद्राक्षीत् स एकं तत्र शूकरम् ।
भग्नपादं तथावाणविद्धाङ्गं प्रचलत्तनुम् ॥१४८

पुनर्गत्वा कियद्दूरं पश्यन्नेकं शशं तथा ।
दुःखमालोच्य जीवानां सोऽभवद्दयाकुलान्तरः ॥१४९

कियद्दूरे तरुच्छन्नदेहं मृगवधोद्यतम् ।
नारदो दृष्टवान् व्याधं धनुष्यारोपिताशुगम् ॥१५०

महाभीतिकराकारं कृष्णाङ्गं रक्तलोचनम् ।
धनुर्वाणकरं दण्डधरं साक्षादिवान्तकम् ॥१५१

पन्थानं नारदस्त्यक्त्वा तं व्याधं निकषा गतः ।
तमालोक्य मृगाः सर्वे पलायन्ते स्म सत्वरम् ॥१५२

तस्मै क्रुद्धस्ततो व्याधः कटूक्तिं कर्त्तुमैहत ।
नारदस्य प्रभावेन तन्मुखान्नोदिता तु सा ॥१५३

व्याधः प्रोचे कथं त्यक्त्वा सन्मार्गं त्वमिहागतः ।
गोस्वामिं स्त्वां हि दृष्ट्वा मे मृगा लक्ष्याः
पलायिताः ॥१५४

प्रत्यूचे नारदो मार्गं भ्रान्त्वा त्वां प्रष्टुमागतः ।
दूरीकर्त्तुञ्च सन्देहमेकं मे मनसि स्थितम् ॥१५५

मन्ये यौ पथि दृष्टौ तौ त्वदीयौ मृगशूकरौ ।
व्याधेनोक्तं यथात्थ त्वं तत्तथैवेति निश्चितम् ॥१५६

प्रत्यूचे नारदस्तञ्च जीवान् हंसि शरै र्यदि ।
अर्द्धघातं कथं हंसि न तेषां हंसि जीवनम् ॥१५७

तेनोक्तं शृणु गोस्वामिन् मृगारिरिति नाम मे ।
विदधामि तथा कर्म यथा शिक्षा पितु र्मम ॥१५८

भवन्त्यर्द्धमृता जीवाः प्रस्फुरद्विग्रहा यदा ।
तथा दृष्ट्वा ममानन्दो हृदये वर्द्धते तदा ॥१५९
नारदः प्रोक्तवानेकं वस्तु त्वं याच्यसे मया ।
व्याधेनोक्तं यथाभीष्टं गृहाण त्वं मृगादिकम् ॥१६०
याचसे मृगकृत्तिं चेत्तदागच्छ गृहं मम ।
दास्याम्यहं यथाकामं मृगव्याघ्राजिनानि ते ॥१६१
नारदेनोक्त मेतानि नाहं कानिचिदर्थये ।
प्रार्थयेऽहं समीपे ते वस्त्वेकमपरं पुनः ॥१६२
श्वः प्रभृत्येव यांस्तावन्मृगादीं स्त्वं हनिष्यसि ।
ऐकान्त्येनैव तान् हन्या न कुर्य्या अर्द्धवैशसम् ॥१६३
व्याधेनोक्तं किमेतन्मां दानं याचितवानसि ।
कृताया मर्द्धहत्यायां मम किन्नु भवेदिति ॥१६४
ऋषिः प्रोवाच जीवोऽर्द्धहतो विन्दति यातनाम् ।
इत्थं पीड़यतो जीवान् दुर्गतिस्ते भविष्यति ॥१६५
त्वं व्याधः प्राणिनो हंसि तेनागः स्वल्पमेव ते ।
असीमं लभसे पापं तान् हत्वा तु कदर्थयन् ॥१६६
एवमुत्पीड़यन् जीवान् यानेव हतवानसि ।
ते त्वां जन्मान्तरे भूयो हनिष्यन्त्येव निश्चितम् ॥१६७
व्याधो नारदसंसर्गात् सुप्रसन्नमना अभूत् ।
ऋषेस्तद्वाक्य माकर्ण्य भयमाप्नोच्च चेतसि ॥१६८
व्याधेन प्रोक्तमाबाल्यादित्थमेव मया कृतम् ।
कथङ्कारं तरिष्यामि तं महापापसञ्चयम् ॥१६९
केनोपायेन यास्यन्ति पापभारा इमे मम ।
पादयोस्ते पतन्नस्मि त्वं निस्तारय मामिति ॥१७०
ततस्तं नारदः प्रोचे त्वं चेद् गृह्णासि मे वचः ।
तदाहमस्मि पापेभ्य स्त्वां विमोचयितुं क्षमः ॥१७१

व्याधेनोक्तं यथा ब्रूषे करिष्येऽहं तथा ध्रुवम् ।
ऋषिः प्रोवाच कुर्वादौ धनुर्भङ्गं ततो ब्रुवे ॥१७२
व्याधोऽपृच्छद्धनुर्भङ्गे कृते जीवाम्यहं कथम् ।
नारदोऽवददन्नं ते दास्यामि प्रतिवासरम् ॥१७३
ततो व्याधो धनुर्भङ्क्त्वा न्यपतत्तस्य पादयोः ।
नारदो व्याध मुत्थाप्य तं प्रत्येवमुपादिशत् ॥१७४
विप्रेभ्यो देहि सर्वस्वं गृहं गत्वा यदस्ति ते ।
वसानौ वस्त्रमेकैकं वहिर्यातं युवामुभौ ॥१७५
दम्पती रचयित्वैकां पर्णशालां नदीतटे ।
तदग्रे रोपयित्वा च मृत्स्तूपे तुलसीतरुम् ॥१७६
नित्यं प्रदक्षिणीकृत्य सेवेथां तुलसीञ्च ताम् ।
युवां कीर्त्तयतं भक्त्या कृष्णनाम निरन्तरम् ॥१७७
प्रत्यहं प्रेरयिष्यामि बह्वन्नं युवयोः कृते ।
ततस्तदन्न मादाय भुञ्जाथाञ्च यथेप्सितम् ॥१७८
इत्युक्त्वा नारदे सुस्थान् कुर्वति त्रीन् मृगादिकान् ।
सन्तः सुस्थशरीरास्ते धावन्तश्च पलायिताः ॥१७९
तथा दृष्ट्वा च स व्याधो विस्मयाकृष्टमानसः ।
गुरुं भक्त्या नमस्कृत्य प्रतस्थे स्वगृहं प्रति ॥१८०
यथेच्छं नारदे याते व्याधः प्राप्तो निजालयम् ।
नारदस्योपदेशेन कृतवान् कर्म चाखिलम् ॥१८१
व्याधोऽसौ वैष्णवो जात इति ग्रामे कथोत्थिता ।
सर्वे ग्रामजनास्ताभ्यां भोजनं ददुरन्वहम् ॥१८२
एकैकाहे ददुस्तेऽन्नं दश वा विंशतिर्जनाः ।
यावदन्नं द्वयोर्भोज्यं दत्तं तावद् गृहीतवान् ॥१८३
एकदा नारदः प्रोचे पर्वतं शृणु पर्वत ।
अस्ति मे शिष्य एकस्तं द्रष्टुं गच्छ मया सह ॥१८४

अथ प्रस्थितवन्तौ तावृषी व्याधोटजं प्रति ।
दूरादेव ततो व्याधः सम्प्राप्तो दर्शनं गुरोः ॥१८५
धावन् ससम्भ्रमं यातुं नावकाशमविन्दत ।
मार्गे पिपीलिकाः पादौ स्पृशन्ति स्म समन्ततः ॥१८६
स्वशिरोनमनस्थाने सोऽवलोक्य पिपीलिकाः ।
स्थानं वस्त्रेण सम्मार्ज्य दण्डवत् पतितोऽभवत् ॥१८७
नारदः प्रोक्तवान् व्याध नैतद् विस्मयकारणम् ।
हरिभक्त्या भवेद्धिंसाशून्यः साधूत्तमो जनः ॥१८८

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे साधनभक्तिलहर्य्यां
द्व्यधिकशततमाङ्कधृतस्कन्दपुराणवचनम्—

एते न ह्यद्भुता व्याध तवाहिंसादयोगुणाः ।
हरिभक्तौ प्रवृत्ता ये न ते स्युः परतापिनः ॥८४॥"

तत आनीय स व्याधस्तावृषी स्वगृहाङ्गनम् ।
कुशासने समास्तीर्य भक्त्या तत्र न्यषादयत् ॥१८९
आनीतेनाम्बुना भक्त्या पादान् प्रक्षालयंस्तयोः ।
सदारस्तज्जलं पीत्वा शिरसा च गृहीतवान् ॥१९०
कृष्णनाम जगौ व्याधः कम्पाश्रुपुलकान्वितः ।
वस्त्रमुत्पातयन्नुच्चै रूर्द्ध्वबाहु र्ननर्त्त च ॥१९१
महर्षिः पर्वतः प्रेम व्याधस्यैवं विलोकयन् ।
त्वं स्पर्शमणिरेवेति हृष्टः प्रोवाच नारदम् ॥१९२

"तथाहि तत्रैव दशमाङ्कधृतस्कन्दपुराणवचनम्—

अहो धन्योऽसि देवर्षे कृपया यस्य तत्क्षणात् ।
नीचोऽप्युत् पुलको लेभे लुब्धको रतिमच्युते ॥८५॥"

नारदः पृष्टवानन्नं कियदायाति वैष्णव ।
तेनोक्तं प्रहिणोषि त्वं यां स्त एवार्पयन्ति मे ॥१९३

नेयन्ति प्रेषयान्नानि नेयद्भि र्मे प्रयोजनम् ।
आवयोस्तु द्वयोरेव भोज्यं केवल मर्थये ॥१६४
नारदः प्रोक्तवां स्तिष्ठ त्वमेवं भाग्यवानसि ।
इत्युक्त्वान्तर्दधे तत्र पर्वतेन समं मुनिः ॥१६५
इति ते तदुपाख्यानं ब्याधस्य कथितं मया ।
साधुसङ्गप्रभावस्य ज्ञानं स्याच्छ्रृण्वतो हि यत् ॥१६६
इत्थमेवोपलभ्यन्ते श्लोकस्यार्थास्त्रयः पुनः ।
अर्थैरेतै र्मिलित्वा स्युरर्थाः षड़् विंशतिः क्रमात् ॥१६७
अन्योऽर्थः श्रूयतां यः स्यादर्थरत्नाकरो महान् ।
अर्थौ सामान्यतो द्वौ च द्वात्रिंशच्च विशेषतः ॥१६८
अर्थः स्यादात्मशब्दस्य सर्वथा भगवानिति ।
स स्वयं भगवानेको भगवन्नाम चापरः ॥१६६
रमन्ते तत्र ये सर्वे त आत्मारामसंज्ञकाः ।
वैधभक्तास्तथा रागभक्तास्ते नामतो द्विधा ॥२००
पुनस्ते द्विविधा भक्ता भवन्त्येव चतुर्विधाः ।
पारिषद-स्वयंसिद्ध-साधनासिद्ध-साधकाः ॥२०१
ते सर्वे रतिभेदेन भवेयुः साधका द्विधा ।
मार्गाभ्यां वैधरागाभ्यां चतुःशोऽष्टविधास्ततः ॥२०२
वैधभक्त्या स्वयंसिद्धाः पार्षदास्ते प्रकाशिताः ।
दासः सखा गुरुः कान्ताजनश्चेति चतुर्विधाः ॥२०३
साधकाः साधनासिद्धास्तथा दासः सखा गुरुः ।
कान्ता चेति चतुर्द्धा स्युरुत्पन्नरतयश्च ते ॥२०४
अजातरतयो भक्ताः साधकाश्च चतुर्विधाः ।
इति षोड़शभेदाः स्यु भक्तानां वैधमार्गिणाम् ॥२०५
तथा षोड़शधा भक्ता भवेयू रागमार्गिणाम् ।
तद् द्वात्रिंशद्भिदा आत्मारामा मार्गद्वयेन ते ॥२०६

मुनि-निर्ग्रन्थ-चा-पीति पदानाञ्च चतुष्टयम् ।
यथार्थं लभते यत्र तथा तत्र स युज्यते ॥२०७
द्वात्रिंशत् सह षड् विंशत्याष्टापञ्चाशदेव ते ।
श्रूयतामपरो भेदस्तस्यार्थोऽयं प्रकाशते ॥२०८
चेतीतरेतरद्वन्द्वसमासः क्रियते यदि ।
अष्टापञ्चाशतो बारानात्मारामेति नामभिः ॥२०९
अष्टपञ्चाशदावृत्त्यात्मारामाश्चेत्युदीरणात् ।
परं सर्वविलोपेऽवशिष्यते तत् सकृत्तदा ॥२१०

"तथाहि पाणिनिः—

सरूपाणामेकशेष एकविभक्तौ ॥८६॥"

विलुप्तेष्वष्टपञ्चाशत्पदेष्वेकं पदं पुनः ।
अष्टापञ्चाशतं चार्थान् शिष्टं तद्वदति स्फुटम् ॥२११

"तथाहि अश्वत्थवृक्षाश्च वटवृक्षाश्च कपित्थवृक्षाश्च आम्रवृक्षाश्च वृक्षाः ॥८७॥"

वने वृक्षाः फलन्त्यस्मिन्नित्युदाह्रियते यथा ।
आत्मारामाश्च कुर्वन्ति कृष्णभक्तिं पुनस्तथा ॥२१२
समुच्चयो भवेदात्मारामाश्चेत्यत्र चेति चेत् ।
मुनयश्च भजन्तीति तदार्थोऽप्युपलभ्यते ॥२१३
निर्ग्रन्था एव भूत्वेति भवेन्निर्द्धारणेऽपि चेत् ।
इत्यूनषष्टिधार्थानां व्याख्यानं विवृतं मया ॥२१४
भवत्येकोऽपरोऽप्यर्थश्चेति सर्वसमुच्चये ।
निर्ग्रन्थाश्च भजन्त्यात्मारामाश्च मुनयश्च तम् ॥२१५
अपिशब्दं प्रयुञ्जीथा यदि त्वमवधारणे ।
तं चतुर्भिः पदैः सार्द्धं चतुरुच्चारयाधुना ॥२१६

"यथा उरुक्रम एव, भक्तिमेव, अहैतुकीमेव, कुर्वन्त्येव ॥८८"

श्लोकस्यैतावता षष्टिसंख्या अर्थाः कृता मया ।
एकमर्थं प्रमाणार्हमपरं शृणु सम्प्रति ॥२१७

उच्यते ह्यात्मशब्देन क्षेत्रज्ञो जीवलक्षणः ।
आब्रह्म-कीट-पर्य्यन्तस्तच्छक्तिरेव गण्यते ॥२१८

"तथाहि विष्णुपुराणे षष्ठांशे सप्तमाध्याये षष्टितमः श्लोकः—

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञा च तथापरा ।
अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥८६॥"

"तथा चामरः—क्षेत्रज्ञ आत्मा पुरुष इति ॥६०॥"

मानवः परितो भ्राम्यन् साधुसङ्गं लभेत चेत् ।
तदा सर्वं परित्यज्य श्रीमत्कृष्णं भजेत सः ॥२१६

उक्ताः षष्टिविधा अर्थाः सर्वथा कृष्णभक्तिषु ।
एवमर्थाः प्रयुज्यन्ते सर्वोदाहरणानि च ॥२२०

एकषष्टिः स्फुरन्त्यर्थास्तवसङ्गेन साम्प्रतम् ।
तव भक्तिवशादर्था उत्तिष्ठन्ति तरङ्गवत् ॥२२१

"तथाहि प्राचीनः श्लोकः—

भक्त्या भागवतं ग्राह्यं न बुद्ध्या न च टीकया ॥६१॥"

सनातनोऽथ तानर्थान् श्रुत्वा विस्मयविह्वलः ।
तुष्टाव प्रणतो भक्त्या पादौ गृह्णन् महाप्रभोः ॥२२२

ईश्वरो हि भवान् साक्षाद् व्रजराजस्य नन्दनः ।
प्रवर्त्तन्तेऽखिला वेदा निश्वासेनैव ते प्रभो ॥२२३

भागवतस्य वक्तासि त्वमेवार्थमवैषि च ।
त्वां विना नापरः कोऽपि तं विज्ञातुमलं भवेत् २२४

"तथाहि विश्वेश्वरवाक्यम्—

अहं वेत्ति शुको वेत्ति व्यासो वेत्ति न वेत्ति वा ॥६२॥"

बभाषे प्रभु रेवं त्वं कथं मे कुरुषे स्तुतिम् ।
तत्त्वं भागवतस्य त्वं न विचारयसे कथम् ॥२२५

श्रीमद्भागवतं कृष्णतुल्यं सर्वाश्रयं विभु ।
प्रत्यक्षरं प्रतिश्लोकं नानार्थानां प्रकाशकम् ॥२२६
तत्र भागवते प्रश्नोत्तरै निर्द्धारणं कृतम् ।
विस्मयेनाभिभूयन्ते जना यच्छ्रवणाद्ध्रुवम् ॥२२७

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे प्रथमाध्याये त्रयोविंशः

श्लोकः—

ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ।
स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥६३

तथा तत्रैव तृतीयाध्याये द्विचत्वारिंशः श्लोकः—

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥६४॥"
श्लोकमेकतमं तावदिमं व्याख्यातवानहम् ।
वातुलस्य प्रलापोऽयमिति प्रत्येतु को भुवि ॥२२८
वातुलो हि मया तुल्यो यो वा को वा भवत्विह ।
इत्थं भागवतस्यार्थं मद्दृष्टान्तेन वेत्ति सः ॥२२९
ततः सनातनेनोक्तं मिलिताञ्जलिना पुनः ।
वैष्णवस्मृतिबन्धाय मामाज्ञापितवान् प्रभुः ॥२३०
नीचजातिरहं शुद्धाचारं वेद्मि न कञ्चन ।
मया स्मृतिप्रचारोऽयं कथङ्कारं भविष्यति ॥२३१
भवांश्चेत् सूत्ररूपेण दिशं मां दर्शयिष्यति ।
हृदये मे प्रविष्टश्च स्वयमेवोपदेक्ष्यति ॥२३२
तदैव मम नीचस्य हृदये दिक् स्फुरिष्यति ।
यत् कारयसि तत् सिद्धिं याति त्वं स्वयमीश्वरः ॥२३३
प्रभुः प्रोचे यथा कर्त्तुं भविष्यत्येव ते मनः ।
प्रकाशयिष्यते कृष्ण स्त्वयि सर्वं तथा तदा ॥२३४

तथापि सूत्ररूपं तच्छ्रूयतां दिक्प्रदर्शनम् ।
सर्वेष्वावरणेष्वादौ लिख्यतामाश्रयो गुरोः ॥२३५
लक्षणं गुरुशिष्याणां द्वयस्य च परीक्षणम् ।
ईश्वरस्य च सेव्यस्य सर्वमन्त्रविचारणम् ॥१३६
मन्त्राधिकारिणां चर्चा मन्त्रशुद्ध्यादिशोधनम् ।
दीक्षा प्रातःस्मृतिः कृत्यं शौच माचमनं तथा ॥२३७
दन्तानां धावनं स्नानं सन्ध्योपासादिवन्दनम् ।
सेवनञ्च गुरोरूर्द्ध्वपुण्ड्रचक्रादिधारणम् ॥२३८
तुलस्याहरणं माल्यगोपीचन्दनधारणम् ।
वस्त्र-पीठ-गृहाणाञ्च संस्कारः कृष्णबोधनम् ॥२३९
पञ्च-षोड़श-पञ्चाशैरुपचारै स्तथार्च्चनम् ।
पञ्चकालार्चना-नीराजने भोजनशायने ॥२४०
श्रीमूर्त्तेर्लक्षणं शालग्रामविष्णोश्च लक्षणम् ।
श्रीकृष्णक्षेत्रयात्रा च कृष्णविग्रहदर्शनम् ॥२४१
नाम्नाञ्च महिमा दूरे नामपराधवर्जनम् ।
लक्षणं वैष्णवानाञ्च सेवापराधखण्डनम् ॥२४२
शङ्खाम्बु-गन्धपुष्पाणां धूपादीनाञ्च लक्षणम् ।
जपः स्तुतिः परिक्रान्ति र्दण्डवन्नतिवन्दने ॥२४३
पुरश्चर्य्याविधिः कृष्णप्रसादान्नस्य भोजनम् ।
कृष्णानिवेदितत्यागो भक्तनिन्दादिवर्जनम् ॥२४४
साधूनां लक्षणं तेषां सङ्गश्च सेवनं तथा ।
असत्सङ्गपरित्यागः श्रीमद्भागवतश्रुतिः ॥२४५
कृत्यानि दिन-पक्षाणामेकादश्यादिवर्णनन् ।
मासकृत्यं तथा जन्माष्टम्यादिविधिनिर्णयः ॥२४६
वामनद्वादशी जन्माष्टमी चैकादशी तथा ।
श्रीरामनवमी चैव श्रीनृसिंहचतुर्दशी ॥२४७

इत्यासां विद्धतात्यागोऽथाविद्धानाञ्च संग्रहः ।
दोषश्चाकरणे भक्तिः करणे चावलम्बनम् ॥२४८
सर्वत्रैव पुराणानां प्रमाणत्वप्रदर्शनम् ।
श्रीमूर्त्तेर्लक्षणं विष्णुमन्दिरस्यापि लक्षणम् ॥२४६
सामान्येन सदाचारा वैष्णवाचरणानि च ।
कृत्याकृत्यविवेकेन कार्य्या स्मार्त्तव्यवस्थितिः ॥२५०
इति दिग्दर्शनं तुभ्यं संक्षेपेण कृतं मया ।
लिखति त्वयि सर्वाणि कृष्ण उद्भासयिष्यति ॥२५१
मया प्रोक्तः प्रसादोऽयं श्रीप्रभोः श्रीसनातने ।
श्रवणाद् यस्य भक्तानामवसादो विलुम्पति ॥२५२
सनातने प्रसादोऽयं श्रीमहाप्रभुणा कृतः ।
स्वग्रन्थे कर्णपूरेण लिखितोऽस्ति सविस्तरम् ॥२५३

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके नवमाङ्के शततमः श्लोकः—

गौड़ेन्द्रस्य सभाविभूषणमणि स्त्यक्त्वा य ऋद्धां श्रियं
रूपस्याग्रज एष एव तरुणीं वैराग्यलक्ष्मीं दधे ।
अन्तर्भक्तिरसेन पूर्णहृदयो वाह्येऽवधूताकृतिः
शैवालैः पिहितं महासर इव प्रीतिप्रदस्तद्विदाम् ॥६५॥"

तथा तत्रैवैकाधिकशततमः श्लोकः—

तं सनातनमुपागतमक्ष्णो-
र्दृष्टिमात्रमतिमात्रदयार्द्रः ।
आलिलिङ्ग परिघायतदोर्भ्यां
सानुकम्प मथ चम्पकगौरः ॥६६॥

तथा तत्रैव चतुरधिकशततमः श्लोकः—

कालेन वृन्दावनकेलिवार्त्ता लुप्तेति तां ख्यापयितुं विशिष्य ।
कृपामृतेनाभिषिषेच देवस्तत्रैव रूपञ्च सनातनञ्च ॥६७॥"

महाप्रभोः प्रसादोऽयं मया प्रोक्तः सनातने ।
खण्ड्यते श्रवणाद् यस्य भक्तानामवसन्नता ॥२५४
ज्ञानं कृष्णस्वरूपाणां सर्वेषामेव जायते ।
विधेः साधनभक्तेश्च मार्गयोर्वैधरागयोः ॥२५५
कृष्णे प्रेम्णोऽत्र सिद्धान्तो भक्ते र्भक्तिरसस्य च ।
इत्येतच्छ्रवणाद् भक्ता विन्दन्ते परमावधिम् ॥२५६
चैतन्यस्य पदे नित्यानन्दाद्वैतपदानि च ।
येषां प्राणधनानि स्यु र्विन्देरं स्तानि ते ध्रुवम् ॥२५७
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२५८

इति श्रीचैतन्यचरितामृते मध्यखण्डे आत्मारामाश्चेति श्लोकव्याख्यायां सनातनानुग्रहो नाम चतुर्विंशः परिच्छेदः ।

—०—

मध्यलीलायां पञ्चविंशः परिच्छेदः

"वैष्णवीकृत्य सन्न्यासिमुख्यान् काशीनिवासिनः ।
सनातनं सुसंस्कृत्य प्रभु र्नीलाद्रिमागतः ॥१॥"
श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
एवं मासद्वयं यावत्तत्र श्रीमन्महाप्रभुः ।
अशेषान् भक्तिसिद्धान्तान् सनातनमशिक्षयत् ॥२
प्रभुं सङ्कीर्त्तनाभिज्ञो रङ्गिष्ठः शेखरानुगः ।
कीर्त्तनं श्रावयामास परमानन्दनामकः ॥३
उपेक्षितोऽभवत् सर्वैः प्रभुः सन्न्यासिभिर्यदा ।
भक्तानां माधिनाशाय कृपां तेष्वकरोत्तदा ॥४

विस्तृतं लिखिता पूर्वं कृपा सन्न्यासिषु प्रभोः ।
सम्प्रत्युद्देशमात्रेण संक्षेपात् कथ्यते मया ॥५
यत्र तत्र प्रभोर्निन्दां श्रुत्वा सन्न्यासिभिः कृताम् ।
महाराष्ट्रीयविप्रोऽसौ दुःखादेव मचिन्तयत् ॥६
प्रत्यक्षं वीक्षते यस्तु प्रभावं श्रीमहाप्रभोः ।
स्वरूपं तस्य विज्ञाय स तं मन्यत ईश्वरम् ॥७
तां श्चेत् कथञ्चिदेकत्र तेन योजयितुं क्षमे ।
तदा भक्ता भविष्यन्ति दृष्ट्वा सन्न्यासिनः प्रभुम् ॥८
वाराणस्यां निवत्स्यामि सर्वदाहमतस्तथा ।
प्रतिकार मकुर्वाणो लप्स्ये दुःख मनारतम् ॥९
इति सञ्चिन्त्य सन्न्यासिगण मामन्त्र्य च द्विजः ।
तत एव समायातः सन्निधानं महाप्रभोः ॥१०
कालेऽत्रैव प्रभो र्निन्दां श्रुत्वा तपनशेखरौ ।
तौ न्यवेदयतां दुःखपीड़ितौ प्रभुपादयोः ॥११
भक्तानां दुःखमालोच्य मनसा चिन्तयन् प्रभुः ।
ऐच्छत् सन्न्यासिनां चित्तं प्रत्यावर्त्तयितुं ततः ॥१२
तदैव द्विज आगत्य वचोभि र्दैन्यसूचकैः ।
प्रभुं निमन्त्रयामास गृहीत्वा तत्पदद्वयम् ॥१३
तदा महाप्रभुस्तस्य स्वीचकार निमन्त्रणम् ।
आजगामाथ मध्याह्ने तस्य गेहं परेद्यवि ॥१४
सन्न्यासिगण-निस्तारं प्रभुस्तत्र यथाकरोत् ।
आख्याने पञ्चतत्त्वस्य तथोक्तं विस्तृतं मया ॥१५
ग्रन्थबृद्धिस्तथा पौनरुक्त्यदोषो भविष्यतः ।
तत्तन्मात्रं लिखाम्यत्र तत्र यन्नालिखं पुरा ॥१६
कृतवान् दिवसे यस्मिन् कृपां सन्न्यासिषु प्रभुः ।
काश्यां तदा प्रभृत्येव महान् कोलाहलोऽभवत् ॥१७

जनाः सर्वे ससङ्घट्टं प्रभुं द्रष्टुं समाययुः ।
नानाशास्त्रविचारार्थमागताः शास्त्रकोविदाः ॥१८
खण्डयन् सर्वशास्त्राणि भक्तिं सारं समर्थयन् ।
वाचो युक्त्या च सर्वेषां मनः प्रत्यानयत् प्रभुः ॥१६
कृष्णसङ्कीर्त्तनं चक्रुरुपदेशेन ते प्रभोः ।
सर्वेऽहसन्नगायंश्च जना श्चक्रुश्च नर्त्तनम् ॥२०
प्रभौ प्रह्वत्वमापन्ना स्तदा सन्न्यासिनोऽखिलाः ।
आत्मीयै विंदधु र्गोष्ठीं विहायाध्ययनादिकम् ॥२१
प्रकाशानन्दपादस्य शिष्यः कश्चन तत्समः ।
बहुमानं प्रभोश्चक्रे सदस्येव मुदीरयन् ॥२२
असौ श्रीकृष्णचैतन्यः साक्षान्नारायणो ध्रुवम् ।
करोति व्याससूत्राणामर्थानतिमनोरमान् ॥२३
व्याख्यातो मुख्य एवार्थस्तेनोपनिषदामपि ।
यं श्रुत्वा पण्डितास्तृप्त-श्रोत्रचित्ता भवन्ति च ॥२४
मुख्यार्थं जहता व्याख्या सूत्रोपनिषदां कृता ।
महाग्रहभरेणैव माचार्य्येणैव कल्पिता ॥२५
श्रुत्वा तत्कल्पितानर्थानेवं स्यादिति पण्डितः ।
ब्रुवन्नपि मुखेनैव हृदयेन न मन्यते ॥२६
सत्यं श्रीकृष्णचैतन्यवाक्यमेव दृढं मतम् ।
कलिकाले न सन्न्यासात् संसारोऽयं विजीयते ॥२७
हरे र्नामेति पद्यार्थं यथा व्याख्यातवानसौ ।
सोऽर्थ एव भवेत् सत्यः सुखदः सत्-प्रमाणकः ॥२८
मुक्ति र्न स्याद्विना भक्तिमिति भागवते वचः ।
नामाभासादपि स्याच्च कलौ मुक्तिः सुखेन हि ॥२६

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्याये चतुर्थः श्लोकः—

श्रेयः सृतिं भक्तिमुदस्य ते विभो
क्लिश्यन्यि ये केवलबोधलब्धये ।
तेषामसौ क्लेशल एव शिष्यते
नान्यद् यथास्थूलतुषावघातिनाम् ॥२॥

तथा तत्रैव द्वितीयाध्याये षड् विंशः श्लोकः—

येऽन्येऽरविन्दाक्ष विमुक्तमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ॥३॥"

ब्रह्मेत्यस्य षड़ैश्वर्य्यपूर्णोऽर्थो भगवानिति ।
स्थापिते निर्विशेषत्वे पूर्णत्वं तस्य हीयते ॥३०
विलासान् कृष्णचिच्छक्तेः पुराणश्रुतिबोधितान् ।
पण्डिता नैव मन्यन्ते प्रत्युतोपहसन्ति च ॥३१

"तथाहि भगवत्सन्दर्भव्याख्यायां धृतसर्वज्ञसूक्तम्—

ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः ।
स्वाविद्या-संवृतो जीवः संक्लेशनिकराकरः ॥४॥"

चिदानन्दमये कृष्णदेहे च मायितामतिः ।
महापापेति चैतन्यवचनं सत्यमेव हि ॥३२

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे नवमाध्याये तृतीयः श्लोकः—

नातःपरं परम यद्भवतः स्वरूप-
मानन्दमात्र मविकल्प मविद्धवर्चः ।
पश्यामि विश्वसृजमेकमविश्वमात्मन्
भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥५॥

तथाहि तत्रैव दशमस्कन्धे षट्चत्वारिंशाध्याये त्रयश्चत्तारिंशः श्लोकः—

दृष्टं श्रुतं भूतभवद्भविष्यत् स्थानुश्चरिष्णु र्महदल्पकं वा ।
विनाच्युताद्वस्तु तरां न वाच्यं स एव सर्वं परमात्मभूतः ॥६॥

यथा तत्रैव तृतीयस्कन्धे नवमाध्याये चतुर्थः श्लोकः—

तद्वा इदं भुवनमङ्गल मङ्गलाय
ध्याने स्म नो दर्शितं त उपासकानाम् ।
तस्मै नमो भगवतेऽनुविधेम तुभ्यम्
योऽनादृतो नरकभाग्भि रसत्प्रसङ्गैः ॥७॥

तथाहि श्रीमद्भगवद्गीतायां नवमाध्याय एकादशः श्लोकः—

अवजानन्ति मां मूढ़ा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तः मम भूतमहेश्वरम् ॥८॥

तथा तत्रैव षोड़शाध्याय ऊनविंशः श्लोकः—

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्र मशुभानासुरीष्वेव योनिषु ॥९॥"
सूत्रस्थां परिणामोक्तिं व्युदस्यास्थापयच्च सः ।
विवर्त्तवादमाचार्य्यो व्यासं भ्रान्त इति ब्रूवन् ॥३३
अर्थोऽयं कल्पितः सुष्ठु प्रतिभाति न चेतसि ।
पाषण्डान् बोधयत्येषा शास्त्रं त्यक्त्वा कुकल्पना ॥३४
बिचारः परमार्थस्य क्क गतो वादमात्रतः ।
केन मुक्तिं लभे कृष्णप्रसादश्च कथं भवेत् ॥३५
आचार्य्यो व्याससूत्राणां सत्यमर्थं समावृणोत् ।
ब्रूते श्रीकृष्णचैतन्यो यमर्थं सत्य एव सः ॥३६
यद्धि चैतन्यगोस्वामी ब्रूते श्रेष्ठं हि तन्मतम् ।
मतान्यन्यानि यावन्ति तान्यसाराणि भस्मवत् ॥३७
इत्युक्त्वा स चकार श्रीकृष्णसङ्कीर्त्तनं तदा ।
प्रकाशानन्द आकर्ण्य किञ्चिदेवं वचोऽब्रवीत् ॥३८
अद्वैतवादमाधातुमाचार्य्यः साग्रहोऽभवत् ।
सूत्रार्थानन्यया रीत्या तेन व्याख्यातवानसौ ॥३९

न स्थाप्योऽद्वैतवादोऽयं भगवत्तत्त्वसम्मतौ ।
अतोऽसौ खण्डयामास शास्त्राणि सकलान्यपि ॥४०
ग्रन्थकर्त्ता मतं स्वीयं यः स्थापयितु मीहते ।
सरलोऽर्थो हि शास्त्राणां तेन कर्त्तुं न शक्यते ॥४१
ईश्वरः कर्मणोऽङ्गं स्यादिति मीमांसका विदुः ।
सांख्याश्च प्रकृतिं प्राहुर्जगदुत्पत्तिकारणम् ॥४२
जातञ्च परमाणुभ्यो विश्वं नैयायिका विदुः ।
निर्विशेषं विदुर्मायावादिनो ब्रह्म कारणम् ॥४३
ईशतत्त्वमपि ज्ञेयमिति पातञ्जला विदुः ।
स स्वयं भगवानेव श्रुतिभि र्मन्यते पुनः ॥४४
ईश्वरः परमो हेतु रिति कोऽपि न मन्यते ।
दूषयन् मत मन्येषां स्वमतं स्थापयत्यलम् ॥४५
दर्शनेभ्यस्ततः षड़्भ्यस्तत्त्वं नैवावगम्यते ।
सत्यं तदेव मन्येत कथितं यन्महाजनैः ॥४६

"तथाह्येकादशीतत्त्वधृतव्यासवचनम्—

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नासावृषि र्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥१०॥"

वाणी श्रीकृष्णचैतन्यदेवस्यामृतनिर्झरः ।
उच्यते तेन यद्वस्तु तत्त्वसारो हि तद्ध्रुवम् ॥४७
इति श्रुत्वैव वृत्तान्तं स महाराष्ट्रजो द्विजः ।
सुखेन प्रस्थितो वक्तुं प्रभुपादाय तत्क्षणात् ॥४८
अस्मिन्नवसरे स्नानं कृत्वा पञ्चनदे प्रभुः ।
गच्छन्नासीत् पथा द्रष्टुं श्रीहरिं विन्दुमाधवम् ॥४९

तेन विप्रेण बृत्तान्तं पथि सर्वं निवेदितम् ।
श्रुत्वैवेषत् स्मितं चक्रे मुखेनैव महाप्रभुः ॥५०

दृष्ट्वा माधवसौन्दर्य्यं तेनाविष्टमनाः प्रभुः ।
तत्र प्राङ्गण मागत्य प्रेम्णारभत नर्त्तितुम् ॥५१

शेखरः परमानन्द स्तपनश्च सनातनः ।
चत्वारो मिलिता श्चक्रु र्नामसङ्कीर्त्तनं तदा ॥५२

"तथाहि—

हरि हरये नमः कृष्ण यादवाय नमः ।
गोपाल गोविन्द राम श्रीमधुसूदन ॥११॥"

लोका हरिहरीत्यूचु र्लक्षं तेषां समन्ततः ।
द्यावाभूमी परिव्याप्त उत्थितो मङ्गलध्वनिः ॥५३

प्रकाशानन्द आकर्ण्य तं ध्वनिं स्वसमीपतः ।
तत्र शिष्यैः सह द्रष्टुं कौतुकेन समागतः ॥५४

अवलोक्य प्रभोर्नृत्यं तथा तद्रूपमाधुरीम् ।
स चकार समं शिष्यै र्भूयो भूयो हरिध्वनिम् ॥५५

कम्प-गद्गद-वैवर्ण्य-स्तम्भ-स्वेदान्वितस्य च ।
प्रभो र्नेत्राम्बुधाराभिः सिक्ताः पुलकिता जनाः ॥५६

हर्ष-चापल्यदैन्यादिसञ्चारिभावविह्वलम् ।
प्रभुं दृष्ट्वा जना काशीवास्तव्या विस्मयं ययुः ॥५७

जनसंघट्ट मालोक्य वाह्यसंज्ञोऽभवत् प्रभुः ।
गणं सन्न्यासिनां दृष्ट्वा विररामापि नर्त्तनात् ॥५८

प्रकाशानन्दपादौ च महाप्रभुरवन्दत ।
ततः सोऽपि समागत्य ववन्दे चरणौ प्रभोः ॥५९

प्रभुस्तं कथयामास त्वं पूज्योऽसि जगद्गुरुः ।
न समानोऽस्मि ते शिष्य-शिष्यानामपि जातुचित् ॥६०

त्वं श्रेष्ठोऽपि कथं हीनतमं मामभिवन्दसे ।
त्वमसि ब्रह्मवत्तेन मम सर्वं विनश्यति ॥६१
निखिलं यदिदं ब्रह्म यद्यपि प्रतिभाति ते ।
तथापि लोकशिक्षार्थमेवं कर्त्तुं न युज्यते ॥६२
प्रकाशानन्द आह स्म पुरा त्वं निन्दितो मया ।
अधुना ते पदस्पर्शात्तत् पापं मे क्षयं गतम् ॥६३

"तथाहि वासनाभाष्यधृतं परिशिष्टवचनम्—

जीवन्मुक्ता अपि पुनर्बन्धनं यान्ति कर्मभिः ।
यद्यचिन्त्यमहाशक्तौ भगवत्यपराधिनः ॥१२॥

तथा श्रीमद्भागवते दशमस्कन्धे चतुस्त्रिंशाध्याये सप्तमः श्लोकः—

स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ।
भेजे सर्पवपु र्हित्वा रूपं विद्याधरार्चितम् ॥१३॥"
प्रत्युक्तं प्रभुणा विष्णुर्विष्णु र्जीवोऽस्मि तुच्छकः ।
जीवे विष्णुत्वबोधोऽयमपराधस्य लक्षणम् ॥६४
यो जीवं बुध्यते विष्णुं तुल्यौ नारायणेन वा ।
मन्यते ब्रह्मरुद्रौ च पाषण्डेषु स गण्यते ॥६५

"तथाहि पाद्मोत्तरखण्डे त्रयोविंशाध्याये द्वादशः श्लोकः—

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।
समत्वेनैव मन्येत स पाषण्डी भवेद् ध्रुवम् ॥१४॥"
प्रकाशानन्द ऊचे तं त्वं साक्षाद् भगवानसि ।
अपि चेत् स त्वमात्मानं तद्दासमभिमन्यसे ॥६६
अस्माकमपि सर्वेषां त्वं पूजार्हतमोह्यसि ।
सर्वनाशो भवत्येव कुर्वतां तव निन्दनम् ॥६७

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे चतुर्दशाध्याये चतुर्थः श्लोकः—

मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥१५॥

तथा तत्रैव दशमस्कन्धे चतुर्थाध्याय एकत्रिंशः श्लोकः—

आयुः श्रियं यशो धर्मं लोकानाशिष एव च ।
हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥१६॥

तथा च तत्रैव सप्तमस्कन्धे पञ्चमाध्याये पञ्चत्रिंशः श्लोकः—

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं
स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं
निष्किञ्चनानां न वृणीत यावत् ॥१७॥"

इदानीं तव पादाब्जे भक्तिर्मे जायतामिति ।
तत्कृते चरणाम्भोजयुगले प्रणतोऽस्मि ते ॥६८
इत्युक्त्वा प्रभुमादाय तत्रैवोपविवेश सः ।
आरेभे च परिप्रष्टुमेव मेव महाप्रभुम् ॥६९
मायावादे भवान् दोषान् यावतः समदर्शयत् ।
आचार्य्यकल्पितव्याख्यागतांस्तान् वेद्मि चाखिलान् ॥७०
भवता सर्वसूत्राणां मुख्यार्थविवृतिः कृता ।
तामाकर्णयतां चेतः सर्वेषां विस्मयं गतम् ॥७१
त्वं तावदीश्वरः सर्वा वर्त्तन्ते त्वयि शक्तयः ।
संक्षेपाद् ब्रूहि तत् सर्वं मम शुश्रूषते मनः ॥७२
प्रभुणोक्त महंजीवो ज्ञानं तुच्छमतीव मे ।
गम्भीरा व्याससूत्रार्था व्यासो हि भगवान् खलु ॥७३
अर्थां स्तत्कृतसूत्राणां जीवो वेत्ति न कश्चन ।
अतोऽसौ निजसूत्रानामर्थान् व्याख्यातवान् स्वयम् ॥७४
रच्यन्ते येन सूत्राणि स तद्व्याख्यां करोति चेत् ।
सूत्राणां तर्हि मूलार्थान् जनो विज्ञातु मर्हति ॥७५

प्रणवस्यार्थरूपा या गायत्री प्रतिपद्यते ।
तस्या अर्थश्चतुःश्लोक्या विवृतो वर्त्तते किल ॥७६

ईश्वरो ब्रह्मणे पूर्वं चतुःश्लोकी मवोचत ।
ततो ब्रह्मापि तामेव नारदायोपदिष्टवान् ॥७७

सा पुनर्नारदेनापि व्यासाय प्रतिपादिता ।
वेदव्यासस्तथाकर्ण्य मनसैवं व्यतर्कयत् ॥७८

अर्थोऽस्या मम सूत्राणां व्याख्यानं प्रतिभाति मे ।
श्रीमद्भागवतं सूत्रभाष्यरूपं करोम्यहम् ॥७९

इत्यसौ चतुरो वेदान् सर्वोपनिषदस्तथा ।
गृहीत्वा तत्तदर्थांश्च स्वसूत्रेषु न्यवेशयत् ॥८०

येषु सूत्रेष्वृचां यासां विषयो वर्त्तते खलु ।
श्रीमद्भागवते श्लोकै र्निबद्धाः सन्ति ता ऋचः ॥८१

अतस्तत्कृतसूत्राणां भाष्यं भागवतं भवेत् ।
श्लोका भागवतस्योपनिषदश्च समार्थकाः ॥८२

"तथाहि श्रीमद्भागवतेऽष्टमस्कन्धे प्रथमाध्यायेऽष्टमः श्लोकः—

आत्मावास्य मिदं विश्वं यत् किञ्चिज्जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥१८॥"

श्लोकमेकं प्रदर्श्यैवं कृतं दिग्दर्शनं मया ।
श्रीमद्भागवतश्लोकाः सर्व एव मृचां समाः ॥८३

भागवतस्य सम्बन्धोऽभिधेयञ्च प्रयोजनम् ।
विवृतानि चतुःश्लोक्यां कृतं तेषाञ्च लक्षणम् ॥८४

सम्बन्धः स्यादहंतत्त्वं ज्ञान-विज्ञान-संयुतम् ।
मां लब्धुं साधनाभक्ति रभिधेयतयोच्यते ॥८५

साधनायाः फलं प्रेम तद्धि मूलं प्रयोजनम् ।
प्रेम्णा तेनैव जीवा हि लभन्ते मम सेवनम् ॥८६

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे नवमाध्याये त्रिंशः
श्लोकः—

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गञ्च गृहाण गदितं मया ॥१९॥"

एतत्तत्त्वत्रयं तुभ्यं मया स्पष्टमुदीर्य्यते ।
जीवस्त्वं नैव शक्नोषि ज्ञातु मेतत्त्रयं पुनः ॥८७
यथैव स्यात् स्वरूपं मे यथा मे स्यादवस्थितिः ।
यथा कर्म-षड़ैश्वर्य्य-शक्तयश्च भवन्ति मे ॥८८
ममैवानुग्रहात्तानि स्फुरन्तु हृदये तव ।
इत्युक्त्वा त्रीणि तत्त्वानि तस्मै व्यज्ञापयत् प्रभुः ॥८९

"तथाहि तत्रैव एकत्रिंशः श्लोकः—

यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञान मस्तु ते मदनुग्रहात् ॥२०॥"

सृष्टेः पूर्वं षड़ैश्वर्यपूर्णास्तिष्ठाम्यहं किल ।
प्रपञ्चांश्चान्तरादाय प्रकृतिं पुरुषञ्च मे ॥९०
तदन्तरे निषण्णोऽहं सृष्टिकार्य्यं करोम्यहम् ।
प्रपञ्चा ये च दृश्यन्ते सर्वे तेऽप्यहमेव हि ॥९१
प्रलये योऽवशिष्टः स्यात् सोऽपि पूर्णतमोह्यहम् ।
प्रपञ्चाः प्राकृताः सर्वे यान्ति मय्येव ते लयम् ॥९२

"तथाहि तत्रैव द्वात्रिंशः श्लोकः—

अहमेवास मेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥२१॥"

अहमेवाहमेवेति श्लोकेऽत्र त्रिरुदीरणात् ।
दृढं निर्द्धारिता शश्वत् पूर्णैश्वर्य्यतनुस्थितिः ॥९३
ये पुन नैंव मन्यन्ते मानवास्तादृशीं तनुम् ।
तानेवात्र तिरस्कर्त्तुं तथा निर्द्धारणं कृतम् ॥९४

शब्दैरेतैर्भवेज् ज्ञानं विज्ञानन्तु विविच्यते ।
माया-तत्कार्य्यतो भिन्नमहंतत्त्वं प्रतीयते ॥६५

सूर्य्याभासो यथा भासा तम उद्भासयत्यपि ।
सूर्य्यं विना तदाभासः स्वतो नैव प्रकाशते ॥६६

तथा मायामतीत्यैव भवत्यनुभवो मम ।
सम्बन्धतत्त्व मेतावदुक्तं शृणु ततः परम् ॥६७

"तथाहि श्रीमद्भागवते द्वितीयस्कन्धे नवमाध्याये त्रयस्त्रिंशः श्लोकः—

ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥२२॥"

शृणु साधनभक्त्याख्यमभिधेयं विचार्य्यते ।
यद् व्याप्नोति जनान् सर्वान् देशान् कालांस्तथा दशाः ॥६८

चतुर्द्धैवं विचार्य्यन्ते धर्मादिविषया यथा ।
विचारांश्चतुरोऽतीता भक्तिस्तु साधनाभिधा ॥६६

सर्वत्र देशकालेषु दशासु चाखिलै र्जनैः ।
प्रष्टव्या सैव भक्तिर्हि श्रोतव्या च गुरोर्मुखात् ॥१००

"तथाहि तत्रैव पञ्चत्रिंशः श्लोकः—

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यं यत् स्यात् सर्वत्र सर्वदा ॥२३॥"

मयि यद् वर्त्तते प्रेम तदेवैकं प्रयोजनम् ।
स्वरूपलक्षणं तस्य कार्य्यद्वारेण कथ्यते ॥१०१

भौतिकानां वहिश्चान्तर्यथास्ते भूतपञ्चकम् ।
भक्तानां वहिरन्तश्च तथैव प्रस्फुराम्यहम् ॥१०२

"तथाहि तत्रैव चतुस्त्रिंशः श्लोकः—

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥२४॥"
निजहृत्कमले भक्तो मां बध्नाति निरन्तरम् ।
तन्नेत्रे पततो यत्र मां तत्रैव स पश्यति ॥१०३

"तथाहि तत्रैवैकादशस्कन्धे द्वितीयाध्याये पञ्चाशत्तमः श्लोकः—

विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥२५॥

तथाहि तत्रैव त्रयश्चत्वारिंशः श्लोकः—

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥२६॥

तथा तत्रैव दशमस्कन्धे त्रिंशाध्याये चतुर्थः श्लोकः—

गायन्त्य उच्चैरमुमेव संहता
विचिक्युरुन्मत्तकवद्वनाद्वनम् ।
पप्रच्छुराकाशवदन्तरं बहि-
र्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥२७॥"

श्रीमद्भागवते तस्मान्नित्यमेव प्रकाशितम् ।
सम्बन्धश्चाभिधेयञ्च प्रयोजनमिति त्रयम् ॥१०४

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्याय एकादशः श्लोकः—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञान मद्वयम् ।
ब्रह्मे ति परमात्मेति भगवानिति शब्द्यते ॥२८॥

तथा तत्रैव तृतीयस्कन्धे पञ्चमाध्याये त्रयोविंशः श्लोकः—

भगवानेक आसेदमग्र आत्मात्मनां विभुः ।
आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥२६॥

तथा तत्रैव प्रथमस्कन्धे तृतीयाध्यायेऽष्टाविंशः श्लोकः—

एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे ॥३०॥"

सम्बन्धस्त्वेष भक्त्याख्यं श्रूयतामभिधेयकम् ।
भागवते प्रतिश्लोकं व्याप्य यस्य व्यवस्थितिः ॥१०५

"तथाहि तत्रैवैकादशस्कन्धे चतुर्दशाध्याये विंशः श्लोकः—

भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात् ॥३१॥

तथा तत्रैवोनविंशः श्लोकः—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्याय स्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥३२॥

तथा तत्रैव द्वितीयाध्याये पञ्चत्रिंशः श्लोकः—

भयं द्वितीयाभिनिवेशतः स्या-
दीशादपेतस्य विपर्य्ययोऽस्मृतिः ।
तन्मायपातो बुध आभजेत्तं
भक्त्यैकयेशं गुरुदेवतात्मा ॥३३॥"

इदानीं श्रूयतां प्रेम यद्धि मूलं प्रयोजनम् ।
लक्षणान्यस्य रोमाञ्चा अश्रु गीतञ्च नर्त्तनम् ॥१०६

"तथाहि तत्रैव तृतीयाध्याये द्वात्रिंशः श्लोकः—

स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥३४॥

तथा तत्रैव द्वितीयाध्यायेऽष्टात्रिंशः श्लोकः—

एवं व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकवाह्यः ॥३५॥"

अतो भागवतं धत्ते सूत्राणामर्थरूपताम् ।
व्यासेन कृतसूत्राणां तद्भाष्यं रचितं स्वयम् ॥१०७

"तथाहि हरिभक्तिविलासस्य दशमविलासे धृतगरुड़-
पुराणवचनम्—

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थ-विनिर्णयः ।
गायत्रीभाष्यरूपोऽसौ वेदार्थपरिबृंहितः ॥
पुराणानां सामरूपः साक्षाद्भगवतोदितः ।
द्वादशस्कन्धयुक्तोऽयं शतविच्छेदसंयुतः ॥
ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः ॥३६॥

तथा श्रीमद्भागवते प्रथमस्कन्धे तृतीयाध्याये द्विचत्वारिंश
श्लोकार्द्धम्—

सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ॥३७॥

तथा तत्रैव द्वादशस्कन्धे त्रयोदशाध्याये द्वादशः श्लोकः—

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥३८॥"

अर्थमादाय गायत्र्या प्रारब्धो ग्रन्थ एष हि ।
सत्यं परं हि सम्बन्धो धीमहीति च साधनम् ॥१०८

"तथाहि तत्रैव प्रथमस्कन्धे प्रथमाध्याये प्रथमः श्लोकः—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत् सूरयः ।
तेजो वारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥३९॥

तथा तत्रैव द्वितीयः श्लोकः—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तव मत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।

श्रीमद्भागवते महामुनिकृते किंवा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥४०॥"

श्रीमद्भागवतं नाम कृष्णभक्तिरसाकृति ।
ततोऽस्य वेदशास्त्रेभ्यो महिमा परमः स्मृतः ॥१०६

"तथाहि तत्रैव तृतीयः श्लोकः—

निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिवत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥४१॥

तथा तत्रैवोनविंशः श्लोकः—

वयन्तु न वितृप्याम उत्तमः-श्लोक-विक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥४२॥"

अतो भागवतस्यैव विचारं कुरु सर्वदा ।
ततः सूत्रश्रुते रर्थसार एवोपलभ्यते ॥११०
कुरु सङ्कीर्त्तनं श्रीमत्कृष्णनाम्नो निरन्तरम् ।
हेलया लप्स्यसे मुक्तिं कृष्णप्रेमधनानि च ॥१११

"तथाहि श्रीमद्भगवद्गीतायामष्टादशाध्याये चतुष्पञ्चाशत्तमः श्लोकः—

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥४३॥

तथा भगवत्सन्दर्भे भाष्यकृद्व्याख्या—

मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ते ॥४४॥

तथा श्रीमद्भागवते द्वितीयस्कन्धे प्रथमाध्याये नवमः श्लोकः—

परिनिष्ठितोऽपि नैर्गुण्ये उत्तमःश्लोकलीलया ।
गृहीत-चेता राजर्षे आख्यानं यदधीतवान् ॥४५॥

तथा तत्रैव तृतीयस्कन्धे पञ्चदशाध्याये त्रयश्चत्वारिंशः श्लोकः—

तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्क-मिश्र-तुलसी-मकरन्द-वायुः ।
अन्तर्गतः स्वविवरेण चकार तेषां
संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥४६॥

तथा तत्रैव प्रथमस्कन्धे सप्तमाध्याये दशमः श्लोकः—

आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।
कुर्वन्त्यहैतुकीं भक्ति मित्थम्भूतगुणो हरिः ॥४७॥"

महाराष्ट्रीय विप्रोऽसौ तस्मिन्नवसरे पुनः ।
अस्य श्लोकस्य वृत्तान्तमवादीत्तत्र संसदि ॥११२
एकषष्टिविधानर्थान् श्लोकस्य कृतवान् प्रभुः ।
यानाकर्णयतां चित्ते जायते विस्मयो महान् ॥११३
इति श्रुत्वा जनैः सर्वैरनुरुद्धो दृढ़ाग्रहस् ।
प्रभुर्व्याख्याय तानर्थान् कृतवानेकषष्टिधा ॥११४
श्रुत्वा सन्न्यासिभिः सर्वैं विंस्मयं परमं गतैः ।
श्रीमच्चैतन्यगोस्वामी श्रीकृष्ण इति निश्चितम् ॥११५
अथ गौरहरौ गन्तु मुत्थिते निखिला जनाः ।
भूयो भूयो नमस्कृत्य कृतवन्तो हरिध्वनिम् ॥११६
ब्रूत कृष्ण हरोत्यूर्द्ध्व बाहौ ब्रुवति तान् प्रभौ ।
जनास्तं दण्डवन्नत्वा चक्रुरुच्चै र्हरिध्वनिम् ॥११७
नामसङ्कीर्त्तनं चक्रुः सर्वे काशीनिवासिनः ।
चक्रन्दु र्जहसुः प्रेम्णा ननृतुश्च जगुश्च ते ॥११८
चक्रुर्भागवतव्याख्यां तत्र सन्न्यासि-पण्डिताः ।
इत्थं निस्तारयामास प्रभुर्वाराणसीं पुरीम् ॥११९
अथ स्वगण मादाय प्रभुर्वासगृहं ययौ ।
द्वितीयश्च नवद्वीपोऽभवद्वाराणसी तदा ॥१२०

अथैकदा प्रभुर्हास्यं कुर्वन्नूचे निजान् गणान् ।
काश्यां भावुकतावस्तु विक्रेतु महमागतः ॥१२१
ग्राहका नैव सन्त्यत्र विक्रीतं नापि वस्तु तत् ।
मया तद्वहता भूयो देशं नेतुं न युज्यते ॥१२२
अहं वक्ष्यामि तद्भारमिति युष्मान् सुदुःखितान् ।
दृष्ट्वा मूल्यं विनाहं तद्व्ययतरं युष्मदिच्छया ॥१२३
अथोचु स्तेऽवतारोऽयं लोकांस्तारयतस्तव ।
त्वया निस्तारिता देशाः पूर्वपश्चिमदक्षिणाः ॥१२४
ततः कोलाहले जाते तत्र वाराणसीपुरे ।
श्रुत्वा ग्रामान्तराद्देशान्तराल्लोकाः समाययुः ॥१२५
असंख्येया जना लक्षं कोटिर्वा ते समागताः ।
तस्मिन् क्षेत्रे तु सङ्कीर्णे नापुस्ते दर्शनं प्रभोः ॥१२६
प्रभुर्विश्वेश्वरं द्रष्टुं स्नातुं वा प्रस्थितो यदा ।
ते तदैवाभितो मार्गं तिष्ठन्तो ददृशुः प्रभुम् ॥१२७
ब्रूत कृष्ण हरीत्यूर्द्ध्व बाहौ तान् ब्रुवति प्रभौ ।
जनास्तं दण्डवन्नत्वा चक्रुरुच्चै र्हरिध्वनिम् ॥१२८
एवं निस्तारयँल्लोकान् पञ्चाहं तत्र संस्थितः ।
प्रतस्थे प्रभुरन्येद्युः समुद्विग्नेन चेतसा ॥१२९
समुत्थायैव यामिन्यां प्रस्थानायोद्यतं प्रभुम् ।
ते च पञ्चजना भक्ता अनुजग्मु र्यथाक्रमम् ॥१३०
तपनो रघुनाथश्च महाराष्ट्रीयको द्विजः ।
कीर्त्तकः परमानन्दः पञ्चमश्चन्द्रशेखरः ॥१३१
ऐच्छंस्ते प्रभुणा सार्द्धं गन्तुं नीलाचलं प्रति ।
तान् प्रतिप्रेषयामास यत्नेनैव महाप्रभुः ॥१३२
प्रभुणोक्तं दिदृक्षुर्मां पश्चादागच्छ नाधुना ।
झारिखण्डपथेनाहमेकाकी यामि साम्प्रतम् ॥१३३

सनातनं प्रभुः प्रोचे याहि बृन्दावनं प्रति ।
तत्रैव प्रस्थितावास्तां भ्रातरावनुजौ तव ॥१३४
कन्था-करङ्कवन्तो ये भक्ता दीनतमा मम ।
श्रीबृन्दावन मेष्यन्ति पाल्यन्तां ते सदा त्वया ॥१३५
इत्युक्त्वा तान् समालिङ्ग्य सर्वांश्च प्रस्थिते प्रभौ ।
सर्व एवापतंस्तत्र भूमौ मूर्च्छावशं गताः ॥१३६
ते कियच्चिर मुत्थाय दुःखेन स्वगृहं गताः ।
श्रीसनातनगोस्वामी ततो बृन्दावनं ययौ ॥१३७
अथेतो रूपगोस्वामी मथुरा मागतो यदा ।
तदा सुबुद्धिरायेण ध्रुवतीर्थे स सङ्गतः ॥१३८
पुरा सुबुद्धिरायोऽभूद् यदा गौड़ाधिकारिकः ।
हुषेन् खाँ सैयदस्तस्य तदा कर्मकरोऽभवत् ॥१३९
दीर्घिकाखननार्थं तं स न्ययोजयदेकदा ।
छिद्रं प्राप्य स वेत्रेण ताड़यामास सैयदम् ॥१४०
हुसेन् खाँ सैयदः पश्चाद्भूत्वा गौड़जनाधिपः ।
प्रभोः सुबुद्धिरायस्य सम्मानं बह्ववर्द्धयत् ॥१४१
तस्य भार्य्या तु तस्याङ्गं पश्यन्ती ताड़नाङ्कितम् ।
रायस्य प्राणनाशाय राजानं तं व्यजिज्ञपत् ॥१४२
राजा तामवदद् रायः पोषणेन पिता मम ।
निहनिष्यामि तत्प्राणानिति भद्रं न भाषणम् ॥१४३
स्त्रियोक्तं जहि तज्जातिं प्राणांस्तस्य न हंसि चेत् ।
राज्ञोक्तं जातिनाशेन नासौ जीवितु मर्हति ॥१४४
स्त्रियां रायं जिघांसन्त्यां विषमे सङ्कटे पतन् ।
राजा न्यक्षेपयद्वारि भृङ्गारस्थं तदानने ॥१४५
ततः सुबुद्धिरायोऽसौ प्राप्य पापविड़म्बनाम् ।
वाराणसीं ययौ त्यक्त्वा सर्वा विषयसम्पदः ॥१४६

प्रायश्चित्तविधिं पृष्टा स्तत्रत्यास्तेन पण्डिताः ।
पीत्वा तप्तघृतं प्राणान् विजहीहीत्युपादिशन् ॥१४७
केचिदाहु रयं दोषः स्वल्पो नैव भवेदिति ।
तत्तदाकर्णयन् रायस्तस्थावारुह्य संशयम् ॥१४८
ततो वाराणसीं प्राप्तं श्रुत्वा श्रीमन्महाप्रभुम् ।
सङ्गत्य च स्वयं रायः सर्ववृत्तान्त मब्रवीत् ॥१४६
प्रभुणोक्तमितः स्थानाद् गच्छ बृन्दावनं लघु ।
कुरु सङ्कीर्त्तनं कृष्णनाम्न स्तत्र निरन्तरम् ॥१५०
पापदोषा विनङ्क्ष्यन्ति नामाभासेन ते सकृत् ।
ततो नामापरं गृह्णन् पादौ कृष्णस्य लप्स्यसे ॥१५१
इत्याज्ञप्त स्ततो रायो गच्छन् बृन्दावनं प्रति ।
प्रयागाच्च गतोऽयोध्यां नैमिषारण्यमागतः ॥१५२
न्यवसन्नैमिषारण्ये कतिचिद् वासरानसौ ।
तदा बृन्दावनं त्यक्त्वा प्रयागं प्रभुरागतः ॥१५३
मथुरामागतो रायो लेभे वार्त्तां महाप्रभोः ।
साक्षात् तत्सङ्गमप्राप्य परमं दुःख मन्वभूत् ॥१५४
राय एधांसि संगृह्य विक्रीय मथुरामधि ।
प्रापदेकैकभारस्य मूल्यानि पञ्चषान् पणान् ॥१५५
पणेनैकेन स क्रीत्वा चणकांश्चर्वयन् स्वयम् ।
वणिक्षु चावशिष्टांस्तान्न्यासान स्थापयत् पुनः ॥१५६
दुःखिनो वैष्णवान् दृष्ट्वा स च तां स्तैरभोजयत् ।
तैलाभ्यङ्गञ्च दध्यन्नं गौड़ीयेभ्यो ददावसौ ॥१५७
रूपगोस्वामिनि प्राप्ते महता प्रणयेन तम् ।
गृहीत्वा दर्शयामास वनानि द्वादश स्वयम् ॥१५८
मासमात्र मवस्थाय रूपो वृन्दावने ततः ।
सत्वरं प्रस्थितोऽन्वेष्टुं भ्रातरं श्रीसनातनम् ॥१५६

गङ्गातीर-पथेनैव प्रयागं प्रभुरागतः।
इत्याकर्ण्य गतौ तेन पथा तौ द्वौ सहोदरौ ॥१६०
श्रीसनातनगोस्वामी प्रयागे समुपस्थितः।
व्रजन् राजसरण्या च प्राप्तवान्मथुरां ततः ॥१६१
मथुरायां सुबुद्धिस्त मुपस्थाय सनातनम्।
रूपानुपमयोर्वार्त्तां सर्वामेव व्यजिज्ञपत् ॥१६२
सनातनोऽगमद्राजमार्गेण तौ तु सोदरौ।
अनुगङ्गं पथा यातौ तत्तोऽन्योन्यं न सङ्गताः ॥१६३
कृतः सुबुद्धिरायेण महान् स्नेहः सनातने।
तत्स्निग्धव्यवहारं तु नाभ्यनन्दत् सनातनः ॥१६४
सोऽयं कठोरवैराग्यः प्रत्यरण्यं परिभ्रमन्।
प्रतिवृत्ततलं तस्थौ प्रतिकुञ्जं दिवानिशम् ॥१६५
कृत्वा माथुरमाहात्म्यशास्त्राणां संग्रहं ततः।
भ्रमन् प्रतिवनं लुप्ततीर्थान्युद्धृतवानसौ ॥१६६
इत्थं बृन्दावने तस्मिन्नवतस्थे सनातनः।
सानुजो रूपगोस्वामी वाराणस्यामुपस्थितः ॥१६७
महाराष्ट्रीयविप्रेण मिश्रेण तपनेन च।
शेखरेण च सङ्गत्य त्रिभी रूपोऽवसत्तदा ॥१६८
कुर्वन् मिश्रगृहे भिक्षां शेखरस्य गृहे वसन्।
शिक्षां शुश्राव मिश्रास्यात् प्रभोः सनातनं प्रति ॥१६९
तेषां मुखत्रयात् काश्यां चरितं स महाप्रभोः।
कृपाञ्चाकर्ण्य सन्न्यासिगणे प्राप्नोत् सुखं महत् ॥१७०
प्रभोरुपरि लोकानां प्रह्वता मवलोकयन्।
तथा तेषां मुखाच्छ्रुत्वा कीर्त्तनानि ननन्द सः ॥१७१
तत्र स्थित्वा दशाहानि स गौड़ं गतवानिति।
चरितानि मयोक्तानि श्रीसनातनरूपयोः ॥१७२

इतो महाप्रभु र्नीलाचलं काननवर्त्मना ।
व्रजन्नतिविविक्तेन प्राप्तवान् परमं सुखम् ॥१७३
आगच्छन् वलभद्रेण सुखेनैव महाप्रभुः ।
पूर्ववत् कृतवान् रङ्गान् वहुधा हरिणादिभिः ॥१७४
प्राप्तोऽष्टादशनालीञ्च भट्टाचार्य्यद्विजन्मना ।
प्रेरितेन निजान् भक्तजनानाह्वाययत् प्रभुः ॥१७५
तच्छ्रुत्वा निखिला भक्ताः सोद्यमाः पुनरुत्थिताः ।
जीवे प्रत्यागते देहमिन्द्रियाणां गणा इव ॥१७६
आनन्दविह्वला भक्ता धावन्तो द्रुत मागताः ।
नरेन्द्रसर आसाद्य प्रभुमेवोपतस्थिरे ॥१७७
ववन्दे भारतीपुर्य्योः स्वामिनोश्चरणान् प्रभुः ।
ताबुभौ स्वामिनौ प्रेम्णाश्लिष्टवन्तौ च तं तदा ॥१७८
दामोदरस्वरूपश्च पण्डितश्च गदाधरः ।
गोविन्दोजगदानन्दः काशीवक्रेश्वरौ तथा ॥१७९
काशी-प्रद्युम्नमिश्रौ च श्रीदामोदरपण्डितः ।
ठक्कुरो हरिदासश्च तथा शंङ्करपण्डितः ॥१८०
अन्ये च निखिला भक्ताः पतिताः पादयोः प्रभोः ।
तानालिङ्गय प्रभुः प्रेमाविष्टान्तःकरणोऽभवत् ॥१८१
आनन्दाब्धौ प्लवन्ते स्म तदा भक्तजनाः प्रभोः ।
तानादाय जगन्नाथं द्रष्टुकामोऽगमत् प्रभुः ॥१८२
पथि चान्ये प्रभोर्भक्ताः पतिताश्चरणाम्बुजे ।
अथ द्रष्ट्वा जगन्नाथं प्रेमाविष्टोऽभवत् प्रभुः ॥१८३
प्रभुः सानन्द मालिङ्गय सर्वांस्तत्रगतान् जनान् ।
सुचिरं कृतवान् भक्तैः सार्द्धं गीतञ्च कीर्त्तनम् ॥१८४
ददौ मालाप्रसादञ्च श्रीजगन्नाथसेवकः ।
आगत्य तुलसी-प्रेष्यो ववन्दे चरणौ प्रभोः ॥१८५

महाप्रभुः समायात इति वार्त्ता चरत् पुरे ।
रामानन्दः सार्वभौमो वाणीनाथश्च सङ्गताः ॥१८६
तान् सर्वान् सममादाय मिश्रावासं गतः प्रभुः ।
निमन्त्रितोऽभवत् सार्वभौमेण पण्डितेन च ॥१८७
महाप्रसादमानेतुं ताबादिश्यावदत् प्रभुः ।
अद्याहं सहितः सर्वैः करिष्याम्यत्र भोजनम् ॥८८
ततो द्वाभ्यां जगन्नाथप्रसादानाहृतान् प्रभुः ।
अभक्षयत् समं सर्वैर्जनैः सानन्दमानसः ॥१८६
मयैतत् कथितं वृन्दावनं दृष्ट्वा महाप्रभुः ।
यथा नीलाचलं भूयः स प्रत्यागतवानिति ॥१६०
य एवाकर्णयत्येतच्छ्रद्धायुक्तेन चेतसा ।
स एवाचिरमाप्नोति चैतन्यस्य पदाम्बुजम् ॥१६१
रचितं मध्यलीलाया मिदं दिग्दर्शनं मया ।
षड् वर्षाणि प्रभोरास्तां गमनागमने यथा ॥१६२
शेषानष्टादशाब्दांश्च वसन्नीलाचले प्रभुः ।
सङ्कीर्त्तनविलासांश्च चक्रे भक्तजनैः सह ॥१६३
इदानीं मध्यलीलायाः क्रमोऽत्रानूद्यते मया ।
अनुवादे कृते यस्मात् कथास्वादो विवर्द्धते ॥१६४
प्रथमेऽत्र परिच्छेदे शेषलीलाश्च सूत्रिताः ।
तत्र कस्यचिदंशस्य वर्णनासीत् सविस्तरा ॥१६५
द्वितीये च प्रलापोऽस्य वर्णितोऽभून्महाप्रभोः ।
तत्रैवानेकभागानां कृतं दिग्दर्शनं मया ॥१६६
तृतीये च परिच्छेदे सन्न्यासग्रहणं प्रभोः ।
आचार्य्यस्य गृहे तस्य विलासा बहुधा तथा ॥१६७
चतुर्थे चरितास्वादः श्रीमाधवपुरीप्रभोः ।
गोपालस्थापन-क्षीरचोर्य्ययोर्वर्णनद्वयम् ॥१६८

पञ्चमे साक्षिगोपालचरितानाञ्च वर्णनम् ।
नित्यानन्दोऽब्रवीद् यानि प्रभुरास्वादयत् पुनः ॥१६६
षष्ठेऽत्र कृतवान् सार्वभौमोद्धारं महाप्रभुः ।
सप्तमे तीर्थयात्रायां वासुदेवस्य निस्तृतिः ॥२००
रामानन्दस्य संवादो विस्तृतं वर्णितोऽष्टमे ।
श्रुतवान् सर्वसिद्धान्त-सारान् यत्र स्वयं प्रभुः ॥२०१
नवमे दाक्षिणात्येषु तीर्थेषु भ्रमणं प्रभोः ।
दशमे मिलनं सर्ववैष्णवैः कृतवानसौ ॥२०२
चकारैकादशे वेड़ाकीर्त्तनं मन्दिरे प्रभुः ।
द्वादशे गुण्डिचागेहमार्जनक्षालने पुनः ॥२०३
त्रयोदशे रथस्याग्रे ननर्त्त श्रीमहाप्रभुः ।
स होरापञ्चमीयात्रां दृष्टवांश्च चतुर्दशे ॥२०४
तत्रैव व्रजदेवीनां भावान् शुश्राव च प्रभुः ।
कथितास्ते स्वरूपेण प्रभुणास्वादिताः पुनः ॥२०५
गुणान् व्याचष्ट भक्तानां प्रभुः पञ्चदशे स्वयम् ।
सार्वभौमगृहे भिक्षन्नमोघं निरतारयत् ॥२०६
गौड़देशाध्वना वृन्दावनयात्रा च षोड़शे ।
पुनश्च नाटशालातो गति र्नीलाचलं प्रति ॥२०७
मथुरागमनं सप्तदशे काननवर्त्मना ।
बृन्दावनविहारोऽस्य वर्णितोऽष्टादशेऽभवत् ॥२०८
ऊनविंशे प्रयागे च गमनं मथुरापुरात् ।
शक्तिसञ्चारणं रूपे तत्रैव वर्णितं खलु ॥२०६
तथा विंशे परिच्छेदे श्रीसनातनसङ्गमः ।
स्वरूपं वर्णितं तेन श्रीमद्भगवतः स्वयम् ॥२१०
एकविंशे च कृष्णस्यैश्वर्य्यमाधुर्य्यवर्णनम् ।
द्वाविंशे साधनाख्याया भक्तेर्द्वैविध्यवर्णनम् ॥२११

प्रेमभक्तिरसानाञ्च त्रयोविंशेऽथ विस्तृतिः ।
आत्मारामेति पद्यस्य चतुर्विंशेऽर्थसञ्चयः ॥२१२
वैष्णवीकरणं पञ्चविंशे काशीनिवासिनाम् ।
काश्या नीलाचलप्रत्यावर्त्तनञ्च महाप्रभोः ॥२१३

अनुवादः कृतः पञ्चविंशस्यान्ते मयाधुना ।
ग्रन्थार्थानां सुखास्वादो यस्य श्रवणतो भवेत् ॥२१४
सारोऽयं मध्यलीलायाः संक्षेपात् कथितोमया ।
विस्तृता वर्णना यस्या ग्रन्थकोट्या न सम्भवेत् ॥२१५

जीवान्निस्तारयन् देशान् देशान् पर्य्यभ्रमत् प्रभुः ।
आत्मना भक्तिमास्वाद्य तां प्रकाशितवांश्च सः ॥२१६
कृष्णतत्त्वं तथा सारं प्रेम्णो भक्तेश्च तत्त्वयोः ।
तत्त्वानि रसलीलानां तत्त्वं भागवतस्य च ॥२१७
श्रीभागवततत्त्वस्य रससारं प्रचारयन् ।
श्रीमद्भागवतं कृष्णतुल्यं व्यज्ञापयद् भुवि ॥२१८

भक्तिप्रयोजनायैव स्वमुखेन सविस्तरम् ।
प्रभुणा कथितं जातु जातु भक्तमुखाच्छ्रुतम् ॥२१९
चैतन्येन समः कोऽपि वदान्यः करुणामयः ।
न भक्तवत्सलश्चान्यो वर्त्तते भुवनत्रये ॥२२०
श्रद्धया श्रुयतां भक्तैरियं लीला महाप्रभोः ।
प्राप्स्यते श्रवणेनास्याश्चैतन्यचरणद्वयम् ॥२२१

श्रीकृष्णतत्त्वसारश्च लप्स्यतेऽस्याः प्रसादतः ।
सिद्धान्ताः सर्वशास्त्रानामत्येष्यन्ते च सर्वथा ॥२२२

"यथा रागः"

श्रीमत्कृष्णस्य लीलारसमयममृतं स्यन्दमानं समन्ताद्
धारासारैः शतेन प्रवहति नितरामत्र यस्याः प्रभावात् ।

सेयं चैतन्यलीला सरससरसिका नित्यपूर्णा विभाति
भक्तास्तत्रैव शश्वत् प्रविचरतु मनोराजहंसावलिर्वः ॥२२३
हे भक्ताः श्रूयतां मे सविनयवचनं दैन्यपूर्णं भवद्भिः
पादानां रेणुभिर्वो मम निखिलतनुं मण्डयन् वेदयामि ।
सिद्धान्तः कृष्णभक्ते विकशति कमलं तन्मधु स्वादयन्त-
स्तत्प्रीत्यां कैरविण्यां हृदयमधुलिहश्चारयन्तां भवन्तः ॥२२४
नानाभावैर्विहारानिह विदधति ते भक्तचक्राङ्ग-चक्रा
नित्यं सम्भुञ्जते ते मधुररसमयं कृष्णकेली-मृणालम् ।
यूयं चक्राङ्ग-चक्रा भवत विलसत प्राप्य पद्माकरं तं
प्रेमोल्लासो भवेद्वः परमसुखमयः सर्वदुःखप्रणाशात् ॥२२५
विश्वोद्यानेऽमृतं तत् सुचरित-जलदाः सर्वदैवोत्सृजन्ति
भक्तानां नित्यभोज्यं फलति फलमिह प्रेमजीवं जनानाम् ।
सत्कर्पूरामृते द्वे सुघटितमिलने कृष्ण-चैतन्यलीले
ते आस्वाद्यैव भक्तः सुमधुरिमभरं वेत्ति साधुप्रसादात् ॥२२६

यल्लीलामृतमन्तरेण कलयन्निष्टान्नपाने अपि
भक्तो दुर्वलजीवन स्तदमृतस्यैकन्तु विन्दुं पिवन् ।
आनन्दोच्छ्वसदुल्लसत्तनुमना गायंश्च गीतान्यहो
कुर्वन् हास्यमहैतुकञ्च विगलल्लज्जो नरीनृत्यते ॥२२७

भक्ता, अनन्यसदृशं पिवतामृतं त-
च्छ्रद्धादृढ़ेन मनसा न कुतर्क-गर्त्ते ।
घोरभ्रमौ पतत कल्मष-सङ्कुले च
जायेत तत्र पततां खलु सर्वनाशः ॥२२८

भक्ताश्चैतन्यदेवस्य नित्यानन्द-प्रभोश्च ये ।
अद्वैतस्य तथा भक्ताः श्रोतारो ये च सज्जनाः ॥२२९
शिरोमे भूषयाम्यद्य युष्माकं श्रीपदाम्बुजैः ।
अभीष्टपूरणं यस्माद्भविष्यत्येव निश्चित्तम् ॥२३०

सनातनस्य रूपस्य श्रीजीव-रघुनाथयोः ।
श्रीपादान्निदधाम्येष शिरस्याशंसितान् मम ॥२३१
कृष्णलीलासुधामिश्रं चैतन्यचरितामृतम् ।
दीनेन कृष्णदासेन किञ्चिदत्र निगद्यते ॥२३२
"श्रीमन्मदनगोपाल-गोविन्ददेव-तुष्टये ।
चैतन्यार्पितमस्त्वेतच्चैतन्यचरितामृतम् ॥४८॥
तदिदमतिरहस्यं गौरलीलामृतं यत्
खलसमुदयलोकै र्नाहृतं तैरलभ्यम् ।
क्षतिरियमिह का मे स्वादितं यत् समन्तात्
सहृदयसुमनोभि र्मोदमेषां तनोति ॥४६॥"

"इति श्रीचैतन्यचरितामृते मध्यखण्डे काशीवासिवैष्णव-करणं महाप्रभोः पुनर्नीलाद्रिगमनं मध्यलीलानुवादकरणञ्च नाम पञ्चविंशः परिच्छेदः ।"

इति मध्यलीला समाप्ता ।

मध्या चैतन्यलीला स्वजन-धन-गृह-त्याग-नैष्ठुर्य्य-निष्ठा
नीलाद्रौ सार्वभौम-प्रमुख-बुधजनालाप-माधुर्य्य-सारा ।
रामानन्दोक्त-तत्त्व-श्रवण-रसमयी दाक्षिणात्यप्रदेशे
तीर्थीकृत्यैव तीर्थान्यखिलजनपदं वैष्णबीकुर्वती च ॥
नृत्येन श्रीरथाग्रे सहृदयहृदयं निर्दयं मोहयन्ती
काशी-सन्न्यासि-वृन्दे प्रवहदकपट-प्रेमकारुण्य-धारा ।
श्रीमद्वृन्दावनस्थान् सुचिर-परिचितानात्मबन्धून् स्मरन्ती
रूपादीन् शिक्षयन्ती विलसतु सततं चेतसि श्रीमतां वः ॥
गौरेन्दोश्चरितामृतं सुमधुरं श्रीकृष्णदासेन यत्
पद्यैर्वङ्गज-वाङ्मयै र्विरचितं तन्मध्यलीलामिमाम् ।
ज्ञानानन्द-सरस्वती-परमहंसाचार्य्य-चूड़ामणेः
शिष्यः संस्कृतभाषयानुकृतवान् श्लोकात्मना भास्करः ॥

—०—

प्रथमसंस्करणे मुद्रणादोषविशेषाणां संशोधनपत्रम् ।

(मध्यलीला)

पत्राङ्कः	श्लोकसंख्या	अशुद्धिः	शुद्धिः
४	३२	वर्णिता	वर्णिता
११	११०	माग्रहेण	याग्रहेण
१२	१३२	सद	सह
१३	१३४	षेचनम	षेचनम्
„	१४३	विप्रं	कृत-
१५	१६७	वागेव	वागेष
२२	२४६	प्रभुण	प्रभुणा
२३	२६७	श्रोनिवास	श्रीनिवास
२७	"३"	स्विलेन्द्रि	खिलेन्द्रि
२८	३०	ज्ञहार	जहार
३२	"१०"	नरना	नयना
„	६०	स्त्रीसमूहे	स्त्रीसमूहे
३७	१०७	कल्लोलय	कल्लोलस्य
३६	२२	चामुं	चाहं
४१	४६	भोज्य	भोग
४६	११२	हुङ्कतैः	हुङ्कृतै
„	११४	वघ्नं	वध्नं
४६	११२	क्रन्दन्नर्यें	क्रन्दन्नार्यें
५०	१५७	मुदान्वित्तः	मुदान्वितः
५१	१७४	सन्न्मासं	सन्न्यासं
५५	"१"	प्रेम्रा	प्रेम्णा
„	६	ग्रम्थे	ग्रन्थे
६४	१२७	पुष्माभि	युष्माभि

संशोधनपत्रम्

पत्राङ्कः	श्लोकसंख्या	अशुद्धिः	शुद्धिः
७०	"२"	ताथ	नाथ
७२	३	नयत्	नयन्
७३	२०	व्रषे	व्रूषे
७५	४४	जेष्मामि	जेष्यामि
"	४६	ववीषि	व्रवीषि
७८	८४	पुष्येण	पुण्येन
८७	४४	सहाप्रसादं	महाप्रसादं
९६	१३६	वोद्धं	वोद्धुं
"	१४१	त्यक्ता	त्यक्त्वा
९७	१५१	अस्पृश्यो	अस्पृश्योऽ
१०१	१६१	प्रत् पुवाच	प्रत्युवाच
१०२	१६८	वद्धा	वद्ध्वा
१०४	२१३	सुस्य	स्तस्य
"	२२८	स्थापयद	स्थापयद्
११०	२६	द्रुःखं	दुःखं
१११	४५	प्रभौः	प्रभोः
११६	१३४	वाके	वाङ्के
१२१	८	कुर्व्वं तत्र	कुर्व्वंस्तत्र
"	९	दृष्टा	दृष्ट्वा
१२२	१२	त्रीरामानन्द	श्रीरामानन्द
१२४	४३	जानेऽह	जानेऽहं
१२५	५५	ऊर्द्ध्वान्तु	ऊर्द्ध्वन्तु
१२८	"१६"	त	न
"	"१८"	मन्मयः	मन्मथः
१४०	"४३"	निर्धूत	निर्धूत

पत्राङ्कः	श्लोकसंख्या	अशुद्धिः	शुद्धिः
१५२	१३	पश्मन्	पश्यन्
२५८	८४	वमाषे	वभाषे
१६६	१६१	प्रमवे	प्रभवे
१७५	२५७	शुम	शुभ
१७६	२७८	पेठुठश्च	पेठुश्च
१७७	२८६	गृहोत	गृहीत
१८४	३४	ङ्गीक्रियता	ङ्गीक्रियता
१८६	५८	कथपित्वा	कथयित्वा
१८७	७६	द्वेता	द्वैता
१६७	"१"	निमग्रम्	निमग्नम्
२१०	१४८	दपडवत्	दण्डवत्
२३७	४६	कीत्तन	कीर्त्तन
२४१	८६	हरिचन्दस्य	हरिचन्दनस्य
२६१	१०८	नृत्यैश्र	नृत्यैश्च
२६६	"६"	माधेवेन	माधवेन
२६६	१६१	वृन्दवन	वृन्दावन
२७१	२११	गमणं	गमनं
२७८	५७	सम्भृत	सम्भृत
२८२	१०८	श्राचण्डालं	आचण्डालं
२८४	१३८	ममग्र	समग्र
२६१	२११	रस्याश्छ	रस्याश्च
"	२२१	भट्टचार्य्यं	भट्टाचार्य्यं
३१०	१४६	प्रभणा	प्रभुणा
३५०	११३	समुद्धारयति	समुद्धारयति
३६४	६२	दण्ठवत्	दण्डवत्

संशोधनपत्रम्

पत्राङ्कः	श्लोकसंख्या	अशुद्धिः	शुद्धिः
३६१	१०४	तित्य	नित्य
४१०	२७१	चत्वारिशत्	चत्वारिंशत्
४१२	"५६"	सत्र	यत्र
४३०	१०५	मस्त्र	मन्त्र
४४८	"६०"	तद्धत्य	तद्ध्‌त्य
४६५	"६"	रर्जासि	रजांसि
४६६	२४	भावारूपा	भावरूपा
४८८	१५२	णलायन्ते	पलायन्ते
४६६	२४२	नामपराध	नामापराध
५०२	"७"	भङ्गलाय	मङ्गलाय
५०६	७०	खित्यान्	खिलान्
५१४	११७	हरो	हरी

—०—